4. *grihapraveśanavidhānam*, beg. fol. 268: अथ वक्ष्ये नराणां च गृहवेशस्य लक्षणं । ०

5. *dvāravidhānam*, beg. fol. 274: द्वारस्थापनविन्यासलक्षणं वक्ष्यते ऽधुना । ०

6. *dvāravidhānam*, beg. fol. 276: द्वारमान विधिं वक्ष्ये लक्षणं वक्ष्यते ऽधुना । ०

7. *rājalakshaṇavidhānam*, beg. fol. 293: भूपतीनां च हर्म्याणां लक्षणं वक्ष्यते ऽधुना । ०

8. *rathalakshaṇavidhānam*, beg. fol. 301: देवभूसुरभूपानामारोहणार्थयोग्यकं । ०

9. *toraṇalakshaṇavidhānam*, beg. fol. 311: देवानां च द्विजातीनां वर्णानां शयनादिकं । ० cf. above, XLV.

10. *madhyaraṅgavidhānam*, beg. fol. 326: देवानां च नृपाणां च चरास्तासनयोग्यकं । ० this corresponds to XLVI. above, though clearly derived from a different MS.

11. *abhishekalakshaṇavidhānam*, beg. fol. 328: देवानां भूपतीनां च मौलिलक्षणमुच्यते ।० this corresponds to the beginning of XLV. above, but differs soon after. The latter part, on the other hand, corresponds to that of XLVII.

12. *liṅgavidhānam*, beg. fol. 341: देवानां भूपतीनां च भूषणानां तु लक्षणं । ० corresponding to LIV. for the first few verses.

13. *pīṭhalakshaṇavidhānam*, beg. fol. 354: सर्वेषामपि लिंगानां वक्ष्यते पीठलक्षणं । ०

14. *śaktividhānam*, beg. fol. 359: शक्तीनां च हृतवर्णलक्षणं वक्ष्यते ऽधुना । सरस्वती चैव सावित्री लक्ष्मी च मही तथा ॥ ०

15. *jinalakshaṇavidhānam*, beg. fol. 370: सुगतिस्वातिकं धूनलक्षणं वक्ष्यते ऽधुना । ० different from the *jainalakshaṇam* in LIV.

16. *bauddhalakshaṇavidhānam*, beg. fol. 376: बौद्धस्य लक्षणं वक्ष्ये सम्यक् च विधिनाधुना । ०

17. *rishilakshaṇavidhānam*, beg. fol. 377: ऋषीणां लक्षणं वक्ष्ये शास्त्रे संक्षिप्यते ऽधुना । ० this corresponds to LVI. above, but it has some more matter following it (? a different chapter, *munilakshaṇam*).

18. *yakshavidyādharalakshaṇavidhānam*, beg. fol. 378: यक्षविद्याधराणां च लक्षणं वक्ष्यते ऽधुना । ० this corresponds to LVII. above.

19. *bhaktalakshaṇavidhānam*, beg. fol. 380: अधुना वक्ष्यते सम्यग् भक्तानां लक्षणं क्रमात् । ०

20. *vāhanavidhānam*, beg. fol. 394: अथ वक्ष्ये त्रिमूर्तीनां वाहनानां तु लक्षणं । ०

21. *garuḍalakshaṇavidhānam*, beg. fol. 397: विहंगराजस्य मानं च लक्षणं वक्ष्यते ऽधुना । ० the first half corresponds to that of LX., the latter part different.

22. *pratimālakshaṇam uttamaṃ daśatālavidhānam*, beg. fol. 401: वृषस्य लक्षणं सम्यग् वक्ष्यते विधिनाधुना । ०

23. *strīmānamadhyamaṃ daśatālavidhānam*, beg. fol. 418: — — वुष्णीपात् — सविंशतिशतांगुलं । ०

24. *madhūcchishṭalakshaṇavidhānam*, beg. fol. 423: सर्वेषां देवदेवीनां लक्षणं वक्ष्यते ऽधुना । ०

DR.RUPNATHJI( DR.RUPAK NATH )

25. *aṅgadūshaṇavidhānam,* beg. fol. 426: सालपाद्यंगसर्वेषां हीनाधिक्यं भवेद्यदि । °

26. *aṅgabhūshaṇavidhānam,* beg. fol. 431 and again fol. 457: देवानामपि देवीनां भक्तानां नेत्रमोक्षणं । लिंगानां लक्षणोद्धारं वस्त्रादीनां यथाक्रमं ॥ °

This would seem to be the last chapter of the work, as it concludes as follows, fol. 464:

[स्व]हृदयकमलमध्ये दीपवत्तत्परं स्यात्
कमलजहरहरादिदेवतानां च सर्वं ।
विधिमिह सकलरूपचक्षुरुन्मीलनं च
कृतिमितिरखिलमुक्तमानसारं पुराणैः ॥
पितामहेंद्रप्रमुखैस्समस्त-
देवैरिदं शास्त्रपरं पुरोदितं ।
तस्मात्समुद्धृत्य ति(*r.* हि) मानसारं
शास्त्रं कृतं लोकहिताय वै यथा(क्रमात्) ॥

After a blank leaf (465) there are the following additional sections:

27. *liṅgalakshaṇavidhāna,* beg. fol. 466: उत्तरायणमासे तु शुक्लपक्षे शुभोदये । °

28. (?) beg. fol. 470: अथ वक्ष्ये ऽहं स्फटिकं(लिंगं) नीचमध्योत्तमं क्रमात् । ° breaks off abruptly on fol. 472.

The title *Mānavasāra* (Burnell, Tanjore MSS., p. 62) is not met with in this copy.

Goldstücker, in his dictionary, s.v. *abhisheka*, p. 284, refers to the work as reputedly the most complete Hindu work on architecture, but of more than doubtful antiquity.

The fly-leaf contains the following note:—"This portion of the *Śilpaśāstram* was copied from a very ancient manuscript, in the old Tamil character, discovered at Trichinopoly. It was imperfect both at the beginning and at tho end. It was written out under the directions of Charles Philip Brown. 1830." From various indications it would, however, rather seem that the volume was copied from two different MSS., one a Grantha, the other a Telugu MS. (?Grantha MS. no. 1987, and Telugu MS. no. 525 in Taylor's Cat. Rais., I. 71; II. 355). This would account for certain repetitions, as well as for certain orthographic peculiarities (such as *yeka* for *eka*, *vuttara* for *uttara*) pointing to a Telugu source.

[C. P. Brown.]

## 3142.

**1291.** Foll. 24; size 12¾ in. by 5 in.; good, clear Devanāgarī writing of 1800 A.D.; twelve lines in a page.

*Rājavallabhamaṇḍana* (or *Bhūpativallabha*) *Vāstuśāstra*, a work on the architectural disposition of houses, palaces, temples, etc., and the rites to bc performed at their inauguration, in 14 chapters, by *Maṇḍana*, an architect in the employ of King *Kumbhakarṇa* of *Medapāṭa*.

According to Tod, a King *Kumbho*, who had a taste for arts and built many temples and strongholds, ruled over tho country of Mevāḍ from 1419 to 1469 A.D. (cf. Bhandarkar, Report 1882-83, p. 37).

I. *miśrakalakshaṇam,* begins:

आनंदं वो गणेशार्कविष्णुगौरीमहेश्वराः ।
देवाः कुर्युः श्रियं सौख्यमारोग्यत्वं गृहे सदा ॥ १ ॥
देवं नमामि गिरिजात्मजमेकदंतं
सिंदूरचर्चितवपुःसुविशालसुंडं(*r.* शुंडं) ।
नागेंद्रमंडिततनुं युतसिद्धिबुद्धिं
सेव्यं सुरोरगनरैः सकलार्थसिद्धै ॥ २ ॥
या ब्रह्माद्यैरलक्ष्या त्रिभुवननमिता ब्रह्मपुत्री शिवाद्या
ब्रह्मा विष्णुश्च रुद्रः प्रणमति बहुशो यां सदानंदरूपां ।
वाणी चैतन्यरूपे वसति च सकले प्राणनिद्राक्षुधातृट्
सा नित्यं सुप्रसन्ना वितरतु विभवं विश्वरूपा च लोके ॥ ३ ॥
कं वा सूत्रांबुपात्रं वहति करतले पुस्तकं ज्ञानसूत्रं
हंसारूढस्त्रिनेत्रः सुरमुकुटशिरःसर्वतोवृद्धकायः ।
त्रैलोक्यं येन सृष्टं सकलसुरगृहं राजहर्म्यादिहर्म्यं
देवो ऽसौ सूत्रधारो जगदखिलहितः पातु वो विश्वकर्मा ॥ ४ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं
जंतूनां लयनं सुखास्पदमिदं शीतांबुघर्मापहं ।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशंति तेन विबुधाः श्रीविश्वकर्मादयः ॥ ५ ॥

सिद्धै गृहारंभमुशंति वृद्धा
यथोदिते मासि वलक्षपक्षे ।
शशांकवीर्ये सुदिने निमित्ते
शुभे रवौ सौम्यगते प्रवेशः ॥ ६ ॥

चैत्रे शोककरं गृहादिरचितं स्यान्माधवे ऽर्थप्रदं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे ।
शून्यं भाद्रपदे ऽश्विने कलिकरं भृत्यक्षयं कार्त्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः फाल्गुने ॥ ७ ॥
[० ४० ॥

सुशीलश्चतुरो दक्षः शास्त्रज्ञो लोभवर्जितः ।
क्षमायुक्तो द्विजश्चैव सूत्रधारः स उच्यते ॥ ४१ ॥

II. *vāstulakshaṇam,* begins fol. 3*b*:

संग्रामे ऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात्क्षितौ
तस्माद्भूतमभूच्च भीतिजननं द्यावापृथिव्योर्महत् ।
तद्देवै रभसा विगृह्य निहितं भूमावधोवक्त्रकं
देवानां वसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः ॥ १ ॥

प्रासादे भवने तडागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारंभनिवर्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवेऽङ्घ्रिकरयोः संधौ च कोणद्वये
[॥ २ ॥ ० ३८ ॥

III. *āyādilakshaṇam,* fol. 5*a*:

आयर्क्षव्ययतारकांशकविधून् राशिर्ग्रहाद्यं तथा
धान्यं सौख्ययशो ऽपि वृद्धिरधिका यस्मादतः कथ्यते ।
आयास्तु ध्वजधूमसिंहशुनका गोरासभेयाः(?०भाः) क्रमात्
ध्वांक्षस्त्वष्टम आयकेषु विषमाः श्रेष्ठाः सुराणां गृहे ॥
[१ ॥ ० २३ ॥

IV. *prākārayantravāpīkūpataḍāgalakshaṇam,* fol. 6*a*:

वापीकूपतडागदेवभवनान्यारामयागादिकं
तीर्थानामवगाहनं च विधिवत्कन्याप्रदानादिकं ।
सर्वं पुण्यमिदं नृपः स लभते यः कारयेत्पर्वतं
दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परं ॥ १ ॥ ० ३६ ॥

V. *rājagṛihaniveśādilakshaṇam,* fol. 8*a*:

अथो नृपाणां भवनानि वक्ष्ये
चैकातपत्रावनिपालकस्य ।
शतं च हस्ताष्टसमन्वितं च
व्यासे गृहे चोत्तममेव तस्य ॥ १ ॥ ० ४७ ॥

VI. *ekaśāladviśālagṛihalakshaṇam,* fol. 10*a*:

अथैकशाला द्विगुणा द्विशालं
प्रस्तारतो लक्षणमेव तेषां ।
यथोदितं वास्तुमते तथैव
ब्रवीमि राज्ञामथ मानवानां ॥ १ ॥ ० ३५ ॥

VII. *dviśālatriśālacatuḥśālagṛihalakshaṇam,* fol. 11*b*:

द्विशालगेहानि च षोडशैव
वास्तूदधेः सारतरं पुनश्च ।
वक्ष्याम्यलिंदोख(ष)णका लघुश्च(!)
द्वौ तिंदुकाख्यौ कथितावलिंदौ ॥ १ ॥ ०३० ॥

VIII. *śayanasiṃhāsanacchattragavākshasabhāshṭakavedikācatushṭayadīpalakshaṇam,* 13*a*:

शयनमथ नृपाणां त्वंगुलानां शतैकं
नवतिरपि सुतानां मंत्रिणः षड्विहीनं ।
बलपति गुणहस्तं त्र्यंगुलोनं गुरोश्च
तदनु युगलहीनं ब्राह्मणादेः प्रशस्तं ॥ १ ॥ ० १८ ॥

IX. *rājagṛihādilakshaṇam,* fol. 14*a*:

गृहा वास्तुशास्त्रोदधौ राजयोग्या
अनंता हि संत्यत्र तेभ्यः कियंतः ।
मयोक्ताश्च योग्या नृपाणां समृद्धै
सुशोभान्वितास्ते च कल्याणदाश्च ॥ १ ॥ ० ३९ ॥

X. *māpitakshetrādbhutalakshaṇam,* fol. 15*b*:

छाया चाणू रेणुकेशाग्रलिक्षा
यूकाः प्रोक्ता स्याद्यवस्त्वंगुलं हि ।
छायादिभ्यो ऽष्टाद्यमानस्य वृद्धिः
प्रोक्तो हस्तो जैनसंख्यांगुलैश्च ॥ १ ॥ ० २४ ॥

XI. *dinaśuddhigṛihaniveśagṛihapraveśavivāhamuhūrtalakshaṇam,* fol. 17*a*:

नंदा तिथिः षट् प्रतिपच्च रुद्रा
द्वितीयादशी सप्तमिका च भद्रा ।
जया तृतीयाष्टमिका च विश्वा
रिक्ता चतुर्थी नवमी च भूता ॥ १ ॥ ० ३६ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

XII. *gocaradinarātrimānasvarodayakoṭacakra-mātṛikālakshaṇam,* fol. 18*b*:

प्राक्पक्षे धवले शशी यदि शुभः पुंसां स पक्षः शुभः
कृष्णे चेदशुभस्तदाशुभकरो व्यत्यासतो निष्फलः ।
तारावीर्यवशात् शशी विधुबलादिष्टो रवेः संक्रमः
शस्ता भानुबलाद्भवंति खचरा दुष्टाः स्थिता गोचरे ॥
[१ ॥ ० ३२ ॥

XIII. *jyotishalakshaṇam,* fol. 20*a*:

पूर्वात्रयं सार्पयमाग्निधिष्णाम् (*r.* धिष्ण्यम्)
अधोमुखं मूलमघा विशाखा ।
खाते च भूम्यां निधिरोपणे च
तथोग्रकार्ये मुनयो वदंति ॥ १ ॥ ० ३१ ॥

XIV. *śakunalakshaṇam,* fol. 21*b*:

तिथिवारर्क्षयुते ऽपि गुणौघे
किमपि न कार्यं शकुने विरुद्धे ।
तेषामनुकूले ऽपि च दोषे
शकुने सिद्धिमुपैति सदैव ॥ १ ॥ ० ४२ ॥

दुर्गा गतिः पिंगलिकारुतं च
चेष्टा शुनः स्थानकमेव काके ।
दिशः शिवा या शकुने मुनींद्रैर्
एतद्विशेषात्कथितं बलिष्ठं ॥ ४२ ॥

श्रीमेदपाटे नृपकुंभकर्णस्
तदंह्रिराजीवपरागसेवी ।
स मंडनाख्यो भुवि सूत्रधारस्
तेन कृतो भूपतिवल्लभो ऽयं ॥ ४३ ॥

गणपतिगुरुभक्त्या भारतीपादतुष्ट्या
मुनिमतमिदमुक्तं वास्तुशास्त्रं सुवृत्तं ।
गणितमपि च सारं शाकुनं सारभूतं
भवतु चतुरयोग्यं विश्वकर्मप्रसादात् ॥ ४४ ॥

इति श्रीवास्तुशास्त्रे राजवल्लभमंडने (thus always) शकुनलक्षणं नाम चतुर्दशमो ऽध्यायः ॥

[H. T. COLEBROOKE.]

## 3143.

**826.** Foll. 28; size 12¾ in. by 4¾ in.; fairly good Devanāgarī writing of 1800 A.D.; twelve lines in a page.

*Rājavallabhamaṇḍana.*

This MS., though far less correct than the preceding one, was apparently copied from the same original.

[H. T. COLEBROOKE.]

## 3144.

**2046a.** Foll. 48; size 11¼ in. by 5¼ in.; clear, modern Devanāgarī writing; ten lines in a page.

The same work.

Colophon: इति श्रीमंडनसूत्रधारविरचितो राजवल्लभः समाप्तो ऽयं ॥

[GAIKAWAR.]

## 3145.

**2046b.** Foll. 38; size 11 in. by 5 in.; good, modern Devanāgarī writing; ten lines in a page.

Another copy of the same work, apparently derived from the same original as the preceding one.

[GAIKAWAR.]

## 3146.

**2204.** Foll. 39; size 11¾ in. by 5¾ in.; Devanāgarī writing of 1809 A.D.; eleven lines in a page.

*Rājavallabhamaṇḍana.* A rather careless copy.

Colophon: इति श्रीवास्तुशास्त्रे राजवल्लभमंडने शकुनलक्षणं चतुर्दशमो ऽध्यायः ॥ संवत् १८६६ ना भाद्रपदमासे शुक्लपक्षे तिथौ ५ पंचम्यां श्रीगुरुवासरे लिखितं नविनपूरवास्तव्य औदिच्यज्ञातीयः दवेप्रेमजिलिखितो राजवल्लभः समाप्तो ऽयं संपूर्णः ॥

[GAIKAWAR.]

## 3147.

**2253.** Foll. 41; oblong, size 6¼ in. by 5 in.; fairly good Devanāgarī writing of 1811 A.D.; nine lines in a page.

DR.RUPNATHJI( DR.RUPAK NATH )

*Prāsādamaṇḍana Vāstuśāstra,* in eight chapters, by *sūtradhāra Maṇḍana.* Very incorrect Sanskrit, largely mixed with *bhāshā* forms.

It begins: विश्वकर्मे उवाच(!) ॥

तस्मै निर्विघ्नसिद्धिहेतवे ।
आदिगवरी समा भूता ।
तेजसर्संभवाय वौ महामाऐति या गीता ॥ १ ॥

चिन्मये मुनीसत्तमौ करोति वागविलास मे ।
जीह्वाया सा सरस्वती प्री(?शा)स्तेष्टसूत्रधारस्य ॥ २ ॥

प्रासादा विश्वकर्मानेः प्रसादार्मंडणं भ्रते ।
सुत्रधारेषु मंडणं ग्रहेषु जो विधि प्रोक्तं ॥ ३ ॥ °

I. *miśrakalaśa* (42 vv.), fol. 4*b*; II. *jagati dṛishṭidoshā āyatanādhikāra* (45 vv.), fol. 9*a*; III. *bhiṭṭapīṭhamaṇḍovara*(!)*garbhagṛihaudumbarapramāṇa* (66 vv.), fol. 15*a*; IV. *pramāṇadṛishṭipadasthāna-śikharakalaśalakshaṇapuṇyādhikāra* (49 vv.), fol. 19*a*; V. *rājyādi(prā)sādapañcaviṃśatyadhikāra* (36 vv.), fol. 22*a*; VI. *keśaryādiprāsādajātilakshaṇa-pañcakshetrapañcacatvāriṃśanmerulakshaṇādhyāya* (46 vv.), fol. 26*b*; VII. *maṇḍapavalāṇaka*(!) *saṃvaraṇādhikāra* (49 vv.), fol. 30*b*; VIII. (*jīrṇoddhārabhinnadosha-sthāvarapratishṭhā-sūtradhārapūjā-jinapratishṭhā-vāstupurushavinyāsa*), 116 vv.

It ends: इति वास्तुपुरुषविन्यासः ॥

एकेन शास्त्रेन(°ण) गुणाधिकेन
विना द्वितीयेन पदार्थसिद्धि[:] ।
तस्मात्प्रकारांतरतो विलोक्य
मणिगुणाढ्यो पिरुहायकांक्षी(!) ॥ ११५ ॥

सविश्वकर्मगणनाथमहेशचंडी-
श्रीविश्वरूपजगदीश्वरसुप्रादवः(?सूर्यदेवः) ।
प्रासादमंडनमिदं रुचिरं चकार
श्रीमंडनो गुणवतां भुवि सूत्रधारः ॥ ११६ ॥

इति श्रीसूत्रधारमंडनविरचिते प्रासादमंडने वास्तुशास्त्रे ऽष्टमो ऽध्यायः ॥ °

[F. BUCHANAN.]

## 3148.

**3012.** Foll. 276; folio, size 11½ in. by 7 in.; fairly good Devanāgarī writing; sixteen lines in a page.

*Śilpaśāstra,* consisting of *paurāṇic* extracts on idols, shrines, etc., ascribed to *Kāśyapa* and *Āgastya.*

It is written out in half-*ślokas,* on one side of the leaves. Very incorrect.

It begins:

अथ वक्ष्ये विशेषेण विनायकं सुलक्षणं ।
पादाद्युष्णीपपर्यंतं चतुर्भ्यष्टांशकं भवेत् ॥ १ ॥
मूर्धान्मस्तकनिम्नं(!) तु अंगुलद्वयमुच्यते ।
तस्माद्वेकेत्र सृतं च तु मान्त्रमुदाहृतं(!) ॥ २ ॥
हृदयानाभिमूलं तु शोडशांगुमुच्यते(*r.* षोडशांगुल°) ।
नाभ्यादिमेद्रमूलांतं षडंगुलमुदाहृतं ॥ २ ॥ °

इत्यंशुमान्भेदे काश्यपे परिवारलक्षणपटलः fol. 22; °उमास्कंदसहितलक्षणपटलः fol. 26; °चंद्रशेखरमूर्तिपटलः fol. 34; दक्षिणामूर्तिलक्षण° fol. 40; कालमूर्ति° fol. 42; लिंगोद्भवलक्षण° fol. 43; नृत्तमूर्ति° fol. 55; गंगाधरमूर्ति° fol. 56; त्रिपुरांतकमूर्ति° fol. 62; कल्याणमूर्ति° fol. 65; अर्धनारीश्वरमूर्ति° fol. 66; गजभारमूर्ति° fol. 68; पाशुपतमूर्ति° fol. 69; भक्तलक्षण° fol. 73; भूमानपटलः fol. 77; ग्रामादिलक्षण° fol. 80; (ध्यानपटलः) fol. 93:—

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥

विश्वकर्मायाति(?दि)लक्षणं ॥

अथ वक्ष्ये विशेषेण आयादीनां च लक्षणं ।
नृपकर्तुश्च वास्तूनां सर्वसंपत्करार्थकं ॥
आयातिरूपभेदं स्यात् मानं तत् श्रीपदं भवेत् ।
अभेदं सर्वदोषं स्यात् तस्मादायातिसंयुतं ॥ °

इत्यागस्त्ये सकालाधिकारे(?सकला°) मानसग्राह्यविशेषाणां प्रथमोध्यायः fol. 151; इति पंचविंशतिरूपभेदः fol. 181; इत्यंशुमान्भेदे काश्यपे तालभेदपटलः fol. 251; °काश्यपे उत्तमदशतालपटलः fol. 266; °गौरीलक्षणपटलः ॥ अधमदशतालप्रमाणं ॥ fol. 274; the MS. terminates abruptly at the end of *śloka* 14 of this chapter.



DR RUPNATHJI( DR RUPAK NATH )

Foll. 1–72 are marked at the top शिल्पशास्त्रं (somotimes शिल्प°); foll. 73–150, 251–276 शिल्पशास्त्रं काश्यपेयं; foll. 151–250 शिल्पशास्त्रमागस्त्यं.

This copy was transcribed, for Mr. Charles Philip Brown, from a Telugu MS., at Masulipatam, in June 1832.

Cf. *Aṃśumānakalpa*, Burnell, Tanj. MSS., p. 62*b*. [C. P. Brown.]

## 3149.

**2578 b.** Foll. 36 (paged 1–71); folio, size 12 in. by 8 in.; modern Telugu handwriting; 21–36 lines in a page.

*Śilpiśāstra*, a metrical treatise on house-building, with a Telugu commentary.

Extremely incorrect, and written in a very cursive hand, difficult to read.

It begins: गर्तं खनित्वा प्रतिपूरयित्वा मृद्भवेतेकर्ट(!) भवेत्समध्ये। ° ॥ १ ॥ टीका। °

तत्कूपपश्चिमस्थाने खनय पुत्रमात्रकं।
निशोदा(? या) तारयेत्पादः प्रभाते मविभ्रान्यत्(?) ॥ °

No colophon is to be found, either in the body of the work, or at the end; but there are several lacunæ in the latter part of the MS.

The above title is written on the fly-leaf in Telugu and Marāṭhī, with 'Vaustoo' (*Vāstuśāstra*) added underneath.

This MS. is preceded, in the same volume, by two sections of the *Nāgarakhaṇḍa* of the *Skandapurāṇa*, viz.: *Viśvakarmopākhyāna* and *Viśvakarmavaṃśānuvarṇana*. [Mack. Coll.]

## 3150.

**2579.** Foll. 64; 4to, size 12 in. by $8\frac{1}{2}$ in.; modern Telugu writing on rough paper; 19–29 lines in a page.

I. *Śilpiśāstravidhāna*, or *Mayamata*, a work on images, in five chapters; with a short Telugu commentary by *Gannama*(?).

It begins:

ब्रह्मविष्णुमयो(यमो B) वायुपृथ्वीनक्षत्रतारकः।
सर्वमू(भू)र्त्यं निराळंबं विश्वकर्मसुदेवतैः ॥

ब्रह्म। विष्णु। [यम B]। वायु। भूमिनक्षत्रतारकादुलु। °
मानसारं तु गार्ग्यं दीर्घं मरीचि[म्] चत्रिमं।
वैखानस्सर्वशास्त्रेषु सारं मयमतागमं ॥

मानसारं। गार्ग्यं। दीर्घं। मरीचि चत्रमं(!) सनत्कुमारं।°
मृत्तिका वृक्षपाषाणं लोहद्रव्यं सनातनं। °

The MS. being written in a cursive hand, and very incorrect besides, it is not very easy to make out the text.

Ch. 1 ends: इति गंन्नमाचार्यविरचितायां आंध्रभाषाटीकायां मयमते शिल्पिशास्त्रविधानो नाम प्रथमोध्यायः ॥ fol. 30*b*; 2. इति गन्नमा° मयमते शिल्पिशास्त्रविभागो नाम द्वितीयाध्यायः (thus corrected) ॥ fol. 33*b*; between foll. 36 and 37 some leaves seem to be wanting, there being only a blank leaf with the title of the work in Telugu and English (the latter written by F. Mountford), and the leaves from 37 onwards not being numbered); 3. ends: इति गंन्नमा° मयमते शिल्पिशास्त्रविधानो नाम दशता[ल]-लक्षणत्रितीयोध्यायः ॥ fol. 40*b*; 4. इति गंन्नमा° मयमते शिल्पिशास्त्रविधानो नाम नवताललक्षणं ॥ fol. 42*b*; 5. ends: एतत्सामान्यमुद्दिष्टं युक्तायुक्तं प्रयोजयेत् ॥° इति° मयमते शिल्पिशास्त्रानामा(!) अष्टतालविधानं पंचमोध्यायः ॥ 45*b*.

II. *Pañcarātrapradīpikā*, or *Mantradīpikā*, consisting of five(?) chapters of verses on images—professing to form part of the *Pādmatantra* of the (*Nārada-*)*Pañcarātra*—with a Telugu commentary, by *Peddanācārya*.

It begins fol. 45*b*, l. 5 (immediately after the last colophon of the preceding work): ब्रह्मोवाच ॥

भगवन्देव देवेश प्रतिमालक्षणं मम(!)।
सुविस्तरं यथाभूमि श्रोतुमिच्छामि तत्परः ॥

Ch. 1. इति पेड्डनाचार्यविरचितायां मंत्रदीपिकायां शिलासंग्रहलक्षणं नाम प्रथमोध्यायः fol. 47*a* (? again 49*b*); 2. इति पंचरात्रप्रदीपिकायां महोपनिषत्पासेतं(!) प्रक्रियापादे

DR.RUPNATHJI( DR.RUPAK NATH )

दारुसंग्रहणं नाम द्वितीयोध्याय: ॥ fol. 51*a*; 3. इति पंचरात्र° त्रिपादे(क्रिया°) प्रतिमालक्षणं नाम त्रितीयोध्याय: ॥ fol. 53*b*; 4. इति पेड्डुनाचार्यविरचितायां पंचरात्रप्रदीपिकायां मंत्रदीपिकायां नाम तृतीयो(*r.* चतुर्थो)ध्याय: ॥ fol. 56*a*; 5. ends again with the latter part of tho second chapter: इति पंचरात्र° त्याख्ने तंत्रे क्रियापादे दारुसंग्रहणं नाम द्वितीयोध्याय: fol. 58*a*; 3. fol. 58*b*; 4. fol. 62*a*; 5.(?) इति श्रीपेड्डुनाचार्यविरचितायां पञ्चरात्रप्रदीपिकायां प्रतिमासंग्रहे जलाधिवासनं अष्टमोध्याय:(!) ।

[MACK. COLL.]

## 3151.

**2680.** Foll. 197; 4to, size 10 in. by 7 in.; cursive, modern Telugu writing; 25–27 lines in a page.

I. *Śilpiśāstravidhāna*, or *Mayamata*, with *Gannama's* Telugu commentary; chapters 1 and 2. Ch. 1 ends p. 5; 2. *āyurlakshaṇam*, p. 7.

II. pp. 7*a*, l. 5 to 30*b*, l. 8. *Vedāntasāra*, consisting of *ślokas* bearing on the size of images, the proper time for commencing to build, and similar subjects (apparently extracted from a work of that title); with a Telugu commentary.

It begins: यक्षराक्षसपन्नगै:(!) ।

सिद्धचारणचंद्रार्कविद्याधरगणे हि मे ।
वाराही गतनींद्राणी(!) कौमारी गरुडस्तथा ॥

टीका । °

तथैव मध्यमेनैव दुर्गा लक्ष्मी: सरस्वती ।

मध्यमं नवतालं° उत्तमं दशतालं°

Colophon: इति श्रीगार्लेपाटलक्ष्माचार्यविरचिते(!)-भिन(?न्न)जीवभदै(?द्रै)क्यप्रतिपादके वेदांतसारे वचनव्याख्यानं ॥

निगमागमवेदांतसिद्धांतं प्रदि(ति)पादितं ।
विवृणोति शिवात्तै(?त्मै)क्यं लक्ष्मार्यश्ये(°श्रै)वतोषकृत् ॥

This new chapter (or treatise), being without a colophon, is perhaps incomplete. Moreover, pp. 57–79 are written on paper of different size from the preceding portion, and between pp. 56 and 57 a blank leaf is inserted, with '*Vishvacurma Vastoo*' and notes in Telugu and Marāṭhī written on it.

III. pp. 1–42. *Sanatkumāra-Vāstuśāstra*, with a brief Tolugu commentary.

It begins:

यं ब्रह्मवेदांतविदो वदंति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गते: कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥

या कुंदेंदुतुषारहारधवला या शुभ्रवस्त्रावृता
यद्वीणावरदंडमंडलकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवै: सदा पूजिता
सा मां पातु सरस्वती भगवती निश्येष(?नि:शेष)-
[जाड्यापहा ॥
वागीशाद्या: सुमनस: सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्या: स्युस्तं नमामि गजाननं ॥

महेश्वराय नम: ॥

ब्रह्मा इंद्रो यमश्चैव भार्गवांगीरसा उभौ(*r.* °वांगिरसा-
गौतमश्चैव गार्ग्यश्च मनुर्व्यासो भृगुस्तथा ॥ [वुभौ) ।
विश्वकर्मादिभिश्चैव वास्तुविद्याविशारदै: ।
सर्वेषां यत्कृतं शास्त्रं सारमुद्धृत्य यत्नत: ॥
सनत्कुमारो मतिमान् नमस्कृत्य स्वयंभुवे ।
वक्ष्यते यत्नत: शास्त्रं वास्तु शोभनमुत्तरं ॥

ब्रह्म । इंद्र ° – – वास्तुशास्त्रं ॥

सर्वपापहरं चैव पुण्याहवाचकर्मणं(!) ।
यथाशक्ति तथा विप्रा भूतिपात्रं(?) महीयते ॥ °

Colophon: इति सनत्कुमारवास्तुशास्त्रसर्वाधिका[र]-स्समाप्त: ॥

IV. pp. 1–26 (*Viśvakarmasampradāya*), an account of the race descended from *Viśvakarman*. Cursive writing, rather incorrect.

It begins:

तत्तद्गोत्राणि चेष्यंते विश्वकर्मकुलाज्जित:(?) ।
पंचविंशतिसंख्यानि शितामानं(?) तदुत्तरं ॥ °
विश्वकर्मकुलानां च शाखामात्रं च कथ्यते ।
तद्वंश ऋषयो युक्ता गोत्रप्रवरमुच्यते ॥

इति सनातनसांप्रदाय: p. 16; no final colophon.

DR.RUPNATHJI( DR.RUPAK NATH)

V. pp. 1–59*a*. *Viśvavidyābharaṇa,* a treatise on the duties of artisans, especially members of the carpenter (*rathakara*) caste, compiled by *Basavācārya.*

It begins:

वंदे ऽस्मत्कुलदैवतं यदुकुलानंदैकसंदोहदं
– – भूतसुराधिनाथविभवं मंदेंदुहासासनं(?) ।
नंदानंदसुखप्रदं व्रजभुवां बृंदैकलीलारतं
वंदारुश्रितपारिजातमधुनाभावे(?) मुकुंदं हरिं ॥

विश्वकर्मकुलजातनराणां शश्वदागमसुकर्मविस्तरः । विश्वसेव्यदिमनीषिणां(?) गुणश्चेश्वरो भवति । तस्य सुखाप्त्यै

विश्वकर्मकुलीनानां विश्वलोकोपकारिणां ।
श्रुतिस्मृ[तो]तिहासैश्च वैदिकत्वं निरूप्यते ॥

ननु रथकाराणां वैदिककर्माधिकारोऽस्ति वा न वा । आद्ये अस्ति चेत्तत्र वक्तव्यं । किं त्रैवर्णिकांतःपरिगणनेन वा तदन्येन वा । आद्ये आधानानुकूलपृथक्कालविधानं न स्यात् प्रत्युत वसंते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यमिति । °

इति श्रीपरमेश्वरप्रसादलब्धामितशिल्पिविद्याप्रभृत्यशेषवैदिकविद्याप्रवीणविश्वकर्माचार्यसारसतारुणारुणवीरणाप्रमानभूमीधराचार्यकुलजलधिसोमायुतकनुपतिं(?कानुवर्ति)बसवाचार्यनिरूपितं विश्वविद्याभरणं संपूर्णं ॥ p. 59.

According to a note on the fly-leaf, this is only tho first book of the work. Its scope is limited to the religious duties of the *rathakāra,* who claims *Viśvakarman, Viśvarūpa* and *Tvashṭṛi* as his divine guardians.

It consists largely of quotations from *Purāṇas,* the epics, *Sūtras* and other works. Of other authorities may be mentioned *Rudradatta's* commentary on the *Āpastambasūtra* (p. 3); the '*Shaḍgurubhāshya*' on the (*Āśvalāyana !*)-*Sarvānukramaṇikā,* p. 4; *Vidyāraṇya,* pp. 4, 11 (on the formula तक्षभ्यो रथकारेभ्यश्च नमो नमः ॥); *Vijñāneśvaravyākhyānakṛita-Sarasvatīvilāsanāmagranthe,* p. 11.

VI. pp. 59*a*–96. The second chapter of the preceding work, or another treatise on the same subject.

It begins:

कनति कनकमंचे कामनीयं कवीनां
करधृतशुकवीणालीलया लालयंतं ।
अरुणमखिलभूपालंकृतं चंद्रचूडं
दलितविनमितार्तिं(?) दक्षिणामूर्तिमीशे ॥

श्रीकन्वर्तिकुलांबुधौ विधुरिन(° व) श्रीगौरवास्यांबुजात्
ज्ञात्वा शेषमतं मितेन वचनं श्रीतंत्ररत्नोपरि ।
व्याकर्तुं निजवंशजातसुहृदां श्रीभस्वनामार्यकः(?)
श्रीटंकाश्यमकारयत्सुकृतिना श्रीदक्षिणामूर्तिना ॥

वचनाद्रथकारस्याधानस्य सर्वशेषत्वात् वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति विधाय श्रुतं । °

It breaks off abruptly at the end of a leaf.

[MACK. COLL.]

## 3152.

**1603 b.** Foll. 5; size 6 in. by 9¼ in.; fair, modern Devanāgarī writing; twenty lines in a page.

*Śilpagrantha-,* or *Aparājita-Vāstuśāstra* (*Aparājitapṛicchā*). Apparently the first two chapters of a larger work on architecture, ascribed to *Bhuvanadevācārya,* in which *Parameśvara,* at the request of *Aparājita,* reveals the theory of the constructive art, from the creation of the mundane egg down to the erection of a town gate, and the measurements of banners, water-pots and bells in sanctuaries.

It begins: वास्तुपुरुषाय नमः ॥ श्रीविश्वकर्मणे नमः ॥ अथ शिल्पग्रंथं प्रारभ्यते ॥

चतुर्मुखमुखांभोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥

आद्या श्रीमेहती भोगपर्वते गंधमादने ।
विचित्रशिखराकीर्णे चित्रस्फटिकशोभिते ॥ २ ॥

चंद्रकांतशिलारम्ये ऋतानृतनिवासिनि ।
सिद्धामकरकथा(*r.* °गणा)कीर्णे क्रीडामणिगुहागृहे ॥ ३ ॥

हंसकारंडवाकीर्णे चक्रवाकोपशोभिते ।
नीलजीमूतसंकाशे तरुणादित्यसंप्रभे ॥ ४ ॥

DR.RUPNATH(DR.RUPAK NATH)

उच्छ्रयाकाशशिखरे रत्नधातुप्रशोभिते ।
संतगृहाश्रमे रम्ये सरितां तटवासिनि ॥ ५ ॥

इदं चात्र वनं रम्यं पर्वते गंधमादने ।
भूर्भुवःस्वःस्वरं देवं तच्छिलापृष्ठशायिनं ॥ ६ ॥

नद्युत्तममहानंदि – – – – पलामलं ।
साश्रयाद्यगोपतिभिर्महाशिखरमूर्धनि ॥ ७ ॥

गंगा सरस्वती पुण्या देवी मधुमती तथा ।
पारा सिंधुश्च कावेरी गोमती चंद्रतारिका ॥ ८ ॥

मज्जन्मातंगकुंभच्युतमदमदिरामोदमत्तालिमालं
  स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगं ।
सायंप्रातर्मुनीनां कुशकुसुमचयैश्छन्नतीरस्थनीरं
  पायान्नो गांगमंभः करिकरभकराक्रांतरंहस्तरंगं ॥ ९ ॥
[० ११ ॥

कश्यपो ऽगस्त्यकश्चैव याज्ञवल्क्यो ऽथ कौशिकः ।
भारद्वाजो वैश्रवणो वशिष्ठो नारदस्तथा ॥ [१२] ॥ ०

शिखिध्वजो महाकांति[र्महा]त्मा चंद्रशेखरः ।
जयो विजय आख्यातः सिद्धार्थश्चापराजितः ॥ [२२] ॥

अत्रातः ग्रंथस्य त्रुटिर्ज्ञेया ॥

अणाश्च(!) किलकिलायंते प्रपलाति(!) मुहुर्मुहुः ।
इदं दिव्यं च भुवनं शुद्धस्फटिकसंनिभं ॥
वज्रवैडूर्यखचितं रत्नप्राकारशोभितं ।
तोरणैर्दिव्यमाख्यातं पूर्वयाम्यपरोत्तरं ॥
तन्मध्ये दिव्यपर्यंकं सिंहव्यालैरलंकृतं ।
हंसतुल्यसमाख्यातं(शितं*) सर्वशास्त्रविशारद ॥
सर्वविज्ञानसंभूतं सर्वज्ञं च महार्णवं ।
चतुर्भुजं महाशुभ्रं तप्तकांचनसंनिभं ॥
दीर्घकुंडलशोभाढ्यं त्रिनेत्रं चंद्रशेखरं ।
अक्षसूत्रं करे वामे दक्षिणे ऽस्य कमंडलं(*r.*°लुः) ॥
पुस्तकं वामहस्तार्धे सुक्सरोजं तु दक्षिणे ।
ज्ञानदं मोक्षदं चैव विश्वसंसृष्टिकारकं ॥
तिष्ठंतं च विनोदेन कौतूहलसमन्वितं ।
विश्वकृद्विश्वकर्मा च त्वष्टा स्याद्देववर्धनः ॥
भूर्भुवर्भुवनेशश्च सर्वदेवेषु विश्रुतः ।
पुनराचार्यनामाख्य(!) प्रभासे वसुधा[तले] ॥
– – – प्रणतो भूत्वा जानुभ्यां धरणीतले ।
भक्तिमांश्च महातातं पृच्छते त्वपराजितः ॥ [३१] ॥ ०

* Perhaps there is an omission here.

यद्यत्पृच्छामि त्वामहं सूत्रशास्त्रप्रयोजनं ।
तव ज्ञानप्रसादेन यथा तारा तमोहरं ॥ [३४] ॥

इति सूत्रसंतानगुणकीर्तिश्रीभुवनदेवाचार्योक्ते अपराजितपृच्छायां ग्रंथाधिकारे प्रथमं सूत्रं ॥ १ ॥

अपराजित उवाच ॥

सृष्टिकौतूहलं देव ब्रूहि मे महदादिभिः(!) ।
ब्रह्मांडं च कथं तत्र का च संख्या प्रमाणतः ॥ [१] ॥

कया युक्त्या समुत्पन्नं वर्धितं केन हेतुना ।
विकाशं केन संजातं केनाधारेण धार्यते ॥ [२] ॥ ०

छत्रं सिंहासनं यानं भवेच्च विविधायुधं ।
वैदिका(?) रत्नधातुश्च तथा मरक[त]ोद्भवं ॥ [२४] ॥

एतत्सर्वं प्रसादेन कथय(स्व) परमेश्वर ।
भक्तः स्याद्वत्सलं(!) देव प्रसादं कुरु मे प्रभो ॥ [२५] ॥

इति सूत्रसंतानगुणग्रंथाधिकारे द्वितीयः ॥

Dr. Bühler, in his Cat. of Gujarāt etc. MSS., iv., p. 276, mentions an *Aparājitavāstuśāstram* (foll. 24, 15 *ślokas* in a page) ascribed to *Viśvakarman*, which, as well as an *Aparājita-pṛcchā*, by *Bhavadeva* (*? Bhuvanadeva*), mentioned in Prof. Bhandarkar's Report 1883-84, p. 276 (incomplete, foll. 29, 15 lines), may be identical with the present work.

[H. T. Colebrooke.]

## 3153.

**2614.** Foll. 74 (paged 1–148); 4to, size 9½ in. by 7 in.; modern Telugu handwriting; 23–25 lines in a page.

*Viśvakarma-purāṇa* (?), or life of *Viśvakarman* (?); with a Telugu commentary.

The title here adopted is that given to the volume on the fly-leaf, no colophon of any kind being met with in the MS. Nor is it easy to form an opinion of the contents—except that they aro similar in nature to those of the preceding work—as the MS. is so incorrect that one seldom feels quite sure as to whether one has to deal with Sanskrit or not.

DR.RUPNATHJI(DR.RUPAK NATH)

It begins: नमस्कारमात्रं। नमो विश्वकर्मणे स उ पात्यस्माननन्यास्थो मर्पामन्यमां प्राणस्य विद्यास्थनमरेनधिर एनश्चकृवास्म(?न्म)हीवद्ध एषां तं विश्वकर्ममानसं वै प्राजापत्यं पवित्रं मानसे मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत माने सर्वं प्रतिष्ठितं तस्मान्मानसं परम वदंति। संकल्पादि(?) अद्य पंचमुखब्रह्मपुरुषस्य जोतिषा जोतिरुत्तमादिब्रह्मस्य अचिंत्य परिमिते अनेक अनंत बहुरुपावतादे(?°रूपावतारे) विश्वरूपाय विरु(रू)पास्संतो बहुधैकरूपस्यादि यं ब्रह्मपरापरा वस्तुस्वरूपे सत्यात्रेयमानस्यर्द्द संधूते(!)। °

वरपासु रथकारो[ऽ]ग्नीनादधीत वर्षासु वरपुरुतुमयं° p. 2.

> अयस्कर्म मनूनां च मयनां(?) दारुकर्म च।
> त्वष्टा कास्या लोहनं(?कांस्यानां लोहानां) कर्ता शूरस्स [पंडितः॥
>
> शिल्पी सर्वशिलाभेदी ब्रह्मादिसुरकल्पकः।
> दैवज्ञा हेमकृद्योगी(?) नानाभूषणनैपुणः॥
>
> एतानि पंच कर्माणि विश्वकर्मेत्यहं(?°र्मेत्यहं) प्रभु।
> विधाय चैकमेकं च सुरेभ्यः प्रददामि च॥
>
> मुखेभ्यस्तस्य पंचभ्यः कुमाराः पंच जज्ञिरे।
> वदनेभ्यो धनेभ्यो भवं तेषां पंच पंच(!) कुमारकाः॥
> शतं विंशतिः पंचा(*r.* पंच च) वंशजा विश्वकर्मणः।
> जायते [ऽ]नुयुगं लोके सृष्टिसंत्राण[त]त्पराः॥° p. 4.

It ends with the following, partly corrupt, verses:

> कन्यां कनकसंपन्नां यथासंभवदक्षिणैः।
> अंगुल्यमुद्रवराभ्यां दास्यामि तत्तथैव च॥

गोत्रप्रवरऋषीणां च त्रिपुरुषोद्देशनं तथा कन्या वु(कन्यासु) दकपूर्वं च कन्याप्रतिग्रहे वरात् देवस्य त्वेति मंत्रेण राज्ञा त्वा वरुणे न तु मुहूर्तेति। कन्यादृष्टं वरस्स च। अघोरचक्षु[रि]ति मंत्रेण मधुर्यं(?) पावनस्य च भूपुत्रस्तु धृवंते(!) च अंगारक नमो नमः॥ [MACK. COLL.]

## 3154.

**1365 b.** Foll. 26; size $10\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; legibly written in Devanāgarī about 1550 A.D.; nine lines in a page.

*Kuṇḍanirmāṇa* (also called *Kuṇḍākṛiti*), a treatise of some 70 verses, on the shape and dimensions of sacred fire-places, sacrificial sheds, etc.; composed in Saṃvat 1506 (A.D. 1449) by *Rāmacandra Vājapeyin*, or *Rāma Naimishastha*, a Mālava Brāhman of Ratnapura, son of *Sūryadāsa* (and *Viśālākshī*), grandson of *Śivadāsa*, and great-grandson of *Śrīdhara-mālava*. With a prolix commentary, *Kuṇḍa-lakshyavivṛiti*, by the same author, supplying additional details on the subject.

It begins:

> सूनोः श्रीधरमालवस्य शिवदासाख्यादुरुख्याततः
> सम्राडग्निचिदाप यस्य जनकः श्रीसूर्यदासो जनिं।
> यन्मातुर्यशसा दिशो दश विशालाक्ष्या वलक्षाः सृज-
> त्येष स्वाहितकुंडलक्ष्यविवृतिं रामो वसन्नैमिषे॥

शिष्यबुद्ध्यनुकूलनाय प्रयोजनं वर्णयंश्चिकीर्षितं प्रतिजानीते।

> इष्टापूर्तेष्वंगमाद्यं यदाहुर्
> यस्योनत्वाधिक्यतो भूरिदोषाः।
> कुंडं सांगं भूरिभेदं तदत्र
> ब्रूते रामो नैमिषस्थो विचार्य॥ १॥

इष्टानि श्रुतिस्मृतीरिता यज्ञाः। पूर्तानि वापीकूपतडागारामादिविधयः°

For the text of this treatise (with a different commentary in *bhāshā*) see Weber, Cat. Berl., nos. 1086 (*Kuṇḍavarṇana*), 1087 (*Kuṇḍa-maṇḍapalakshaṇa*). For text and commentary see Rāj. Mitra, Notices, vii., p. 14; Weber, Berl. Cat., nos. 1086, 1087. The text has also been printed, along with other works on the same subject, described in subsequent MSS., in the *Kuṇḍagranthaviṃśati* (Cat. Cat.).

The introductory stanza of the commentary corresponds to the second stanza of the same author's *Ādhānapaddhati*, Aufrecht, Cat. Bodl., p. 358*b* (cf. ib., p. 341*b*, note).

This and other treatises by the same author (*Vājapeya-paddhati*, above, no. 427, *Prāyaścitta-paddhati*, no. 446) seem to form part of a general manual of the sacrificial ceremonial (*Karmapradīpikā*).

DR. RUPNATHJI( DR. RUPAK NATH )

The author quotes constantly from the *Śāradātilaka*, the *Kāmika*, *Kātyāyana* (*kalpakṛit*) and the *Śulva*(-*sūtra*, -*kāra*).

Besides several *Purāṇas*, the following authorities are also referred to: *Kātyāyanavyākhyā*, fol. 21; *Kālottara*, foll. 22, 26; *Kuṇḍapamaṇḍapa*, foll. 4, 6; *Nāradīya*, fol. 24; *Pañcarātra*, fol. 6*b*; *Piṅgalā*, fol. 26; *Piṅgalāmata*, foll. 22*b*, 23; *Bhūpālapaddhati*, foll. 20*b* (twice), 21*b*; *Vāstuśāstra*, fol. 8*b* (twice); *Vijñānalalita*, foll. 17*b*, 18*b*; *Vaidyakam*, fol. 25*b*; *Śāradātilakatṛitīyapaṭalaṭīkā*, fol. 11*b*; *Śāradātilake* (*'smatkṛitaṭīkānusareṇa*, om. B), fol. 13*b*; *Śulvavārttika*, fol. 11*b*; *Śrīdhara*, foll. 10*b* (twice), 11*a*, *b*; *Hemādri*, foll. 6*b*, 7*a*, *b*, 23.

The treatise ends: ग्रंथकरणप्रसंगमाह ।

श्रीमद्रत्नपुराधिपेन महितः श्रीरामचंद्रेण यो
भारद्वाजकुलांबुधेर्विधुरिव श्रीमज्जटामद्विजः ।
बंधूनां परिणीतये ऽभ्युपगतो ऽसौ मालवो नैमिषं
तेनर्ग्वेदविदेरितेन रचिता रामेण कुंडाहितिः (! A B.) ॥

षोडशमहादानादिदात्रा रत्नपुराधीश्वरेण रामचंद्रभूभुजा पूजितचरणो भारद्वाजमुनिकुलसमुद्रचंद्रमा ऋग्वेदपारदृश्वा मालवीयद्विजकुलकमलबंधुरक्षदेवचतुर्वेदिपुत्रः श्रीमज्जडनो दासचतुर्वेदी रत्नपुरान्नैमिषारण्यं निजबान्धवानामुद्वाहेन सहायासीत्तेन प्रेरितो रामचंद्रो नैमिषस्थः कुंडानामिषामाहितिं (! A B.) निर्माणं व्यरचयत् । ग्रंथोत्पत्तिकालमाह ।

रसगगणतिथिप्रमाणवर्षे
गतवति विक्रमभूमिपस्य कालात् ।
क्रतुविधिफलदायके मखेज्ये
कृतिरियमस्तु ममार्पिता सुरेशे ॥

विक्रमार्ककालात्पंचदशशतेषु षड्वर्षाधिकेषु गतेषु स्वयं ग्रंथो ऽभूत् । स च यज्ञफलदे यज्ञभोक्तरि परमपुरुषे सुराधीशे नारायणे ऽर्पितो ऽस्तु । प्राकृतमप्यर्पणं पुनः क्रियत आदरातिशयात् ॥ इति नैमिषस्थरामवाजपेयिकृता स्वकृतकुंडनिर्माणश्लोकविवृतिः समाप्ता ॥ [H. T. Colebrooke.]

## 3155.

1459 b. Foll. 64; size 8½ in. by 4½ in.; legibly written in Devanāgarī, in 1728 A.D.; 8–10 lines in a page.

*Kuṇḍanirmāṇa*, with the author's commentary. A less correct copy. The *ślokas* are numbered as far as 66.

Colophon: इति नैमिषवास्तव्यरामचंद्रकृता स्वकृतकुंडनिर्माणश्लोकटीका समाप्ता ॥ शके १६५० किलकसंवत्सरे दक्षिणायने हेमंतर्त्तौ मार्गशीर्षमासे कृष्णपक्षे चतुर्दश्यां तिथौ सौम्यवासरे तद्दिने इदं पुस्तकं मोरेश्वरेण लिखितं समाप्तं ॥

[H. T. Colebrooke.]

## 3156.

1705 c. Foll. 16; size 8¼ in. by 3¾ in.; legibly written in Devanāgarī, about A.D. 1700; 10–13 lines in a page.

A fragment of the same work, comprising about one half of the whole (vv. 1–37).

[H. T. Colebrooke.]

## 3157.

1722 a. Foll. 108; size 8¼ in. by 4¼ in.; good Devanāgarī writing of 1588 A.D.; nine lines in a page.

*Kuṇḍaratnākara*, another treatise on the preparation of sacrificial fire-places, by *Viśvanātha dvivedin*, son of *Śrīpati* (a resident of Kāśī) and *Tejasvinī*, grandson of *Jagannātha*, and younger brother of *Vishṇujī Kavīndra*.

It consists of 84 verses of text, accompanied by the author's own commentary.

It begins:

अंभोजे स्वर्णरंभा तदुपरि पुलिनं तत्र कूपो ऽत्र रिंगत्-
कालिंदी तत्र मेरुस्तदुपरि च शशी तत्र गाढांधकारः ।
तत्रोद्यत्सूर्यकोटिस्त्रिनयनविधृतार्धांगमध्याजमव्याद्
अन्यद्वस्मोरगां च सुकृतनरशिरोरत्नमालाभिरामं ॥ १ ॥

वेधा द्वेधा विभाव्य श्रुतिनिचयमुखान्निद्यविद्यावदान्यः
स्वर्गे क्षोण्यां निधातुं त्रिदशपतिगुरुश्रीपती पात्रयुग्मं ।
कृत्वा धृत्वा तुलायां सपदि निरचिनोत् श्रीपतिस्तत्र पात्रं
भूमिं यातं गुणाढ्यं त्रिदशपतिगुरुर्लाघवादुज्जगाम ॥ २ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तस्मात्तेजस्विनी सा द्विजकुलकुमुदानंदसंदोहचंद्रं
प्रासावीद्विश्वनाथं गुरुचरणरजःपुंजसौंदर्यभाजं ।
यस्या दानांबुराशेः प्रबलतरतरत्तुंगरिंगत्तरंगे
दारिद्र्यं मग्नमद्यापि च किल न पुनर्दृश्यते याचकानां॥३॥

उपचंक्रम्यते तेन कुंडरत्नाकरः स्वयं ।
व्याख्यातुं मुनिवाक्यानां दर्शनाय स्वनिर्मितः ॥ ४ ॥

अथ स्वकृतकुंडरत्नाकरं व्याचिख्यासुर्निर्विघ्नपरिसमाप्त्यर्थं विशिष्टेष्टदेवतानुस्मरणलक्षणं मंगलं शिष्यशिक्षार्थमुपनिबध्नाति ।

चंचच्चारुनिबद्धचंद्रशकलश्च्योतत्सुधामिश्रिताः
स्फूर्जद्धूर्जटिना जटासु निभृता गंगातरंगालयः ।
साक्षाद्ब्रह्मपदप्रदायिपदवीचूडामणिश्रेणयस्
त्रैलोक्यं विधिवत्पुनंतु नयनानंदैककंदोदयाः ॥ १ ॥ ०

Of authorities referred to may be mentioned: *Āmnāyarahasya* (fol. 45*a*), *Kātyāyana* (foll. 4*a*, 6*a*, 95*b*), *Kāmika* (foll. 47*a*, 66*b*), *Kriyāsāra* (foll. 33*a*, 34*a*, 35*a*) *Chandogapariśishṭa* (fol. 6*b*), *Jayapṛicchādhikāra* by *Viśvakarman* (fol. 91*b*), *Jñānaratnāvalī* (fol. 45*b*), *Trailokyasāra* (fol. 89*b*), *Pañcarātra* (foll. 7*b*, 33*a*, 34*b*), *Padārthādarśa* by *Rāghavabhaṭṭa* (fol. 56*b*), *Piṅgalāmata* (fol. 39*a*), *Pratishṭhāsārasaṃgraha* (fol. 42*b*), *Prayogasāra* (fol. 13*b*), *Baudhāyana* (fol. 4*a*), *Mantramuktāvalī* (fol. 34*b*), *Mahākapilapañcarātra* (fol. 21*a*, *b*), *Rājavallabhākhyaṃ Vāstuśāstram* (fol. 102*b*), *Rāmavājapeyin* (foll. 62*a*, 78*a*, 87*a*, 102*b*), *Lakshaṇasaṃgraha* (fol. 87*a*), *Līlāvatī* (foll. 38*b*, 96*b*), *Vaśishṭhasaṃhitā* (fol. 104*b*), *Vāyavīyasaṃhitā* (fol. 104*b*), *Vāstuśāstra* by *Viśvambhara* (foll. 22*a*, 33*a*, 34*a*, 38*b*), *Vijñānalalita* (fol. 77*b*), *Śāradātilaka* (fol. 6*b*, etc.), *Śulva* (foll. 28*a*, 31*b*, 97*a*), *Śulvapariśishṭa* (fol. 10*b*), *Sārasaṃgraha* (fol. 44*a*), *Siddhāntaśekhara* (foll. 21*b*, 34*b*), *Hayaśīrshapañcarātra* (foll. 4*a*, 13*a*).

It ends: स्वकृतिं परमेश्वरायार्पयति ।

अस्ति त्रैलोक्यवंद्या परमकरुणयापांगसंदत्तमुक्तिः
काश्यत्र श्रीपतिर्यो व्यजनयदतुलं विश्वनाथं स्वसूनुं ।
तेजस्विन्यां च तेन स्वमतिमनुकृतः कुंडरत्नाकराख्यः
शंभुः प्रीणातु तेनाप्यखिलजनयिता बालवाचेव तातः ॥ ६४ ॥

त्रैलोक्यस्यप्राणिजातैर्ब्रह्मेंद्रादिभिर्वंद्या परमकरुणासंयुक्तापांगवीक्षणमात्रेण सम्यक्प्रकारेण दत्ता मुक्तिर्यया तादृशी वाराणसी अस्ति । तत्रास्यां काश्यां श्रीश्रीपतिद्विवेदी अस्ति । ० यथा कथंचिदस्पष्टोक्तयापि बालकस्य वाचा पिता तुष्यति तद्वत् ।

नानाशाखीयसुत्रागमनिपुणमतिर्वेदवेदार्थवेत्ता
ज्योतिःसिद्धांतपाटीगणितसुगणकः कश्चिदेव श्रमं मे ।
विज्ञायांगीकरोतु त्यजतु कृतिमिमां वांजलिर्बद्ध एषो
ऽन्येषां नात्राधिकारः पिकस्वरविरुतं बद्धकर्णस्य तुल्यं ॥ १ ॥

ज्योतिःसिद्धांतवेत्ता यदपि निजमनस्तुष्टिपुष्टिं न धत्ते
नो धत्ते यागमज्ञः क्रतुरसनिचयक्लिन्नतवागविष्ट(? ०सर्वांगयष्टिः) ।
नो धत्ते ऽस्मच्छ्रमे चेत्सुकृतचयवशात्सर्वविद्याविनोदी
धत्तां धत्ते च नेर्ष्याचयनिचितश्चंद्रचूडो दधातु ॥ २ ॥

वेदत्रय्यामधीती गुणिगणगणनारंभगण्याग्रगण्यो
वेदव्याख्यानविख्यापितचतुरचमत्कारकारिस्वकीर्तिः ।
मीमांसान्यायवैशेषिकफणिभणितांभोधिसंतारपोतो
जीयाच्छ्रीश्रीपतिर्यो जगति गुरुगुरुः श्रीजगन्नाथसूनुः ॥ २ ॥

तत्सूनुर्विष्णुजो यः श्रुतिनिकरशिरःसिद्धसिद्धांतवेत्ता
मीमांसान्यायदीक्षागुरुरखिलकलाधारभूतः कवींद्रः ।
तस्याज्ञापालको यो ऽनुज इह कथितो विश्वनाथः कवींद्रस्
तेनेयं कुंडरत्नाकरवरविवृतिः संव्यधायि स्वबुद्ध्या ॥ ३ ॥

इति श्रीमत्सकलविद्याविशारदश्रीश्रीपतिद्विवेदिसूनुविश्वनाथद्विवेदिकृता स्वकृतकुंडरत्नाकरटीका समाप्ता॥ संवत् १६४५ ॥ वर्षे श्रावणशुद्ध११गुरौ अद्येह श्रीबेजग्रामे लिखितं॥ नीम्रस्थाने अग्निहोत्री धनेश्वरसुत अ० रघुनाथेनार्थं(!) पुस्तकं लिखितं॥ ०॥

Another hand has added the following note: संवत् १६५६ वर्षे भाद्रपदसुदि ६ भट्टगोविंदने हस्ते पोथि आपिछोति(?) ॥

This work, though later than the preceding one (1449 A.D.) whose author it quotes, must have been composed prior to 1619 A.D., as it is quoted in *Viṭṭhaladīkshita's Kuṇḍamaṇḍapasiddhi* (Oxf. Cat., no. 798).

[H. T. COLEBROOKE.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 3158.

**2419.** Foll. 63; size $8\frac{3}{4}$ in. by $6\frac{3}{4}$ in.; dated 1793 A.D.; twelve lines in a page.

*Kuṇḍamaṇḍapakaumudī,* another work on the same subject, in 103 verses, composed, with a commentary (*vivaraṇa*), by *Viśvanātha-deva,* son of *Śambhudeva,* grandson of *Mukunda,* great-grandson of *Purushottama,* and younger brother of *Rāmadeva.*

The text begins:

जगति जयति रामो जानकीजानिरेको
दशरथकुलदीपः सच्चिदानंदरूपः ।
दशमुखमुखशत्रुच्छेदविच्छेददक्षो
भृगुकुलतिलकोद्यन्मानहानिप्रवीणः ॥ १ ॥
सूनोः श्रीपुरुषोत्तमस्य तनयः श्रीमन्मुकुन्दस्य यः
शंभुः शंभुरिवापरो दृढमतिः श्रीरामसंचिंतने ।
तत्सूनुर्विविधागमेषु निपुणः श्रीरामदेवानुजो
ब्रूते कुंडमिहांगभेदसहितं श्रीविश्वनाथः सुधीः ॥ २ ॥
यद्यपीदमुदितं बहुधाद्यैर्दूषितं तदतिमंदबुद्धिभिः ।
आशयानवगतैरिति तेषां हार्दमात्रमिह वर्ण्यते मया ॥ ३ ॥
भूमिं परीक्ष्य परिगृह्य निजोचितां तां
शल्यं निरस्य महाकपिलोक्तमार्गात् ।
हस्तोच्छ्रितां प्रकृतितो ऽर्धकरोच्छ्रितां वा
संपाद्य यंत्रमुखतो ऽप समां विदध्यात् ॥ ४ ॥°

It ends:

स्वपंचमांशेन च गंधपुष्पैः
सुभूषिता आयुधचिह्नयुक्ताः ।
कार्याः पताकाः परितश्च मंडपे
निवेशनीया बहिरेव मंत्रैः ॥ १०३ ॥

The commentary begins: श्रीपुरुषोत्तमस्य सूनोर्मुकुंदस्य यस्तनय इत्यन्वयः । विविधागमा हयशीर्षमहाकपिलपंचरात्रादयः । इह ग्रंथे । अंगानि कंठमेखलायोनिनाभिखननानि । भेदाः योन्यर्धचंद्रत्र्यस्रवृत्तषडस्रपद्माष्टास्ररूपाः । तत्सहितं । उपलक्षणमेतत्तदुपयोगिमंडपवेदिकाकलशध्वजपताकादिसहितं च । स्पष्टमन्यत् ॥ नूतननिर्माणस्य वैयर्थ्यमाशंक्य निराकरोति यद्यपीदमिति । आद्यैः शारदातिलकरामवाजपेयिप्रमुखैः ।°

It concludes with quotations from *Sārasaṃgraha* and *Somaśambhu,* ending: पताका आयुधांकाश्च गंधपुष्पसमन्विता इति ॥ १०२ ॥ १०३ ॥ इति श्रीमच्छंभुदेवतनयरामदेवानुजविश्वनाथदेवविरचितं कुंडमंडपकौमुदीविवरणं समाप्तं ॥ संवत् १८५० नाम्बे आश्विनवदी ३ वारभौमे व्यास सभेरामेण लिखितं ॥

To the authorities quoted by the author, as mentioned in Oxf. Cat., no. 798, may be added the *Nārāyaṇīya(? tantra),* fol. 59*b*; *Vāyavīyasaṃhitā,* foll. 51*b*, 57*a*; *Vishṇudharmottara,* fol. 61*b*; *Hayaśīrshapancarātra,* fol. 5*b*, etc.

Burnell, Tanjore MSS., p. 63*a*, mentions a *Kuṇḍapamaṇḍapakaumudī,* by *Śivasūri,* with the author's own commentary (*vyākhyā,* or *āloka*). [GAIKAWAR.]

## 3159.

**1254 b.** Foll. 8; size $9\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; indifferent, modern Devanāgarī writing; eleven lines in a page.

*Kuṇḍamaṇḍapakaumudī,* without the commentary.

The date Saṃvat 1686 of the copyist *Vaidyanātha* must have belonged to a former MS. [H. T. COLEBROOKE.]

## 3160.

**610 b.** Foll. 36; size $9\frac{3}{4}$ in. by $3\frac{3}{4}$ in.; clear Devanāgarī writing of 1791 A.D.; 9 or 10 lines in a page.

*Kuṇḍasiddhi,* also called *Kuṇḍamaṇḍapasiddhi* or *Maṇḍapakuṇḍasiddhi,* another treatise of the same kind, composed, in 1619 A.D., by *Viṭṭhaladīkshita,* son of *Vūvaśarman;* and accompanied with the author's own commentary (*vyākhyā*).

It (comm.) begins: मत्तमतंगजवदनं ° १ ॥ ° ४ ॥ इह हि° मंगलमाचरति शार्दूलविक्रीडितेन । गाढं ध्वांतमनेकभानुजठरे° ॥ १ ॥

Cf. Aufrecht, Oxf. Cat., no. 798; Weber, Berl. Cat., no. 1088. [H. T. COLEBROOKE.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 3161.

**1254** c. Foll. 42; size 9¼ in. by 4¼ in.; fairly good, modern Devanāgarī writing; twelve lines in a page.

*Maṇḍapakuṇḍamaṇḍana*, a treatise, in 60 verses, on the same subject, composed, for *Viśvambhara Paṇḍita*, by *Nṛihari* or *Narahari Bhaṭṭa daivajña*, surnamed *Saptarshi*; with the author's own commentary, *Prakāśikā*.

It begins:

श्रीहरिं चिन्मयं चिंतयित्वा चिरं ।
मंडने प्रस्फुटा व्याकृतीरुच्यते(व्याकृति०) ॥

चिकीर्षितस्याविघ्नपरिसमाप्तिप्रचयगमनफलकं स्वकृतं मंगलं संप्रदायाविच्छेदाय निबधन्शार्दूलविक्रीडितेन तदारंभं प्रतिजानीते ॥

कूर्मानंतधरामृतार्णवमणिद्वीपे ऽथ कल्पद्रुमा-
धश्चिंतामणिमंडपे सुविलसद्भद्रत्नवेद्यां विभुं ।
इष्ट्वातः सुमनोरथोपरचितैः स्वर्गोगपद्मादिभिः
सप्तर्षिर्नृहरिर्बहिर्वितनुते सन्मंडपाद्यर्चितुं ॥ १ ॥

सप्तर्षिः सप्तर्ष्युपनामकः नृहरिनामकः विभुं व्यापकं नृहरिर्बहिः (?नृहरिं बहिः) अर्चितुं मंडपादि मंडपा आदिर्यस्य तत् मंडपं वेदिकुंडमिति समासार्थः । ० मणिद्वीपमध्ये कल्पद्रुमस्तदधः चिंतामणिमंडपे० ॥ १ ॥

अजद्वये करत्रये वसुद्वयोत्तरात्रये ।
स पुष्पपौष्णामित्रभे शुभे ऽह्नि चंद्र आरभेत् ॥ २ ॥

अजो ब्रह्मा ० उत्तरात्रये उत्तरा फल्गुन्युत्तराषाढोत्तरा भाद्रपदा ०

The relative age of the work is fixed by its quoting *Viśvanāthadeva* (fol. 16*a*) and the *Kuṇḍasiddhi* (foll. 21*b*, 30*b*, 33*a*). Of other authorities may be mentioned: *Jaimini-muni* (fol. 31*b*), *Tantrarāja* (fol. 24*b*), *Nāradasaṃhitā* (foll. 10*b*, 13*a*, 36*b*), *Nigamapariśishṭa* (fol. 40*b*), *Prayogasāra Sārasvata* (fol. 31*a*), *Vishṇudharmottara* (fol. 18*a*), *Śāradātilaka* with *Rāghavabhaṭṭa's* commentary (fol. 2*a*, etc.), *Siddhānta-rahasya* by *Gaṇeśadaivajña* (fol. 8*a*), *Svāyambhuva* (foll. 21*a*, 33*b*, 36*a*).

It ends:

प्रकाशिताशेषविशेषमुज्ज्वलं
सदाकरं मंडपकुंडमंडनं ।
अकारि विश्वंभरपंडिताज्ञया
तदस्तु कंठाभरणं विपश्चितां ॥ ६० ॥

विश्वंभरपंडिताज्ञया मंडपकुंडमंडनं अकारि सप्तर्ष्युपाख्यनरहरिभट्टदैवज्ञेनेति शेषः ॥ अत्र पंडितशब्दप्रयोगात्सर्वशास्त्रेषु नैपुण्यं ध्वनितं । तथा च महतामाज्ञया अनुल्लंघनीयता दर्शिता । मंडपकुंडे मंडयति भूषयति वा मंडपकुंडयोर्विषये मंडयति तदभिज्ञान्हर्षयतीति मंडपकुंडमंडनं । ० (no mention of *Kuṇḍa-maṇḍapamaṇḍana*) ॥ एवं चाद्यश्लोके विभुमिष्ट्वेति स्वेष्टात् प्रस्वरूप(?)श्रीनरहरेरनुसंधानात्मकं मध्ये ऽपि विलसति(रि० MS.) सन्नृपश्रीमंडपे श्रीनृसिंह इति तदनुसंधानात्मकमेव तदंते चाशीर्वादात्मकं मंगलं कृतं ग्रंथप्रार्थनार्थं शिष्टाचा[र]प्रदर्शनार्थं च तन्निबंधनम् ॥ ६० ॥

इति श्रीसप्तर्ष्युपाख्यनरहरिदैवज्ञविरचिता मंडपकुंडमंडनप्रकाशिका समाप्ता ॥

[H. T. Colebrooke.]

## 3162.

**1521** g. Foll. 9; size 10½ in. by 5½ in.; clear Devanāgarī writing of about 1750 A.D.; six lines in a page.

*Kuṇḍoddyota*, another treatise on the measurements of sacrificial fire-places and sheds, by *mīmāṃsaka-Bhaṭṭa Nīlakaṇṭha*, son of *mīmāṃsaka-Bhaṭṭa Śaṅkara Śarman*, and younger brother of *Nṛisiṃha*.

It begins:

देवर्षिरक्षःसंघानामवाङ्मनसगोचरं ।
प्रत्यक्षमपि तद्धाम सर्वदा समुपास्महे ॥ १ ॥

द्विजराजैकमूर्धन्यं वृषाध्यक्षं शिवान्वितं ।
काश्यां सर्वोपदेष्टारं भावये शंकरं गुरुं ॥ २ ॥

विरोधिमार्गाद्वयदर्शनार्थं द्वेधा बभूवात्र परः पुमान्यः ।
श्रीशंकरो भट्ट इहैकरूपो मीमांसकाद्वैतमुरीचकार ॥ ३ ॥

कुंडमंडपनिर्माणकारिका उपकारिकाः ।
नीलकंठकृताः संतु कंठे ताः कर्मठैः कृताः ॥ ४ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

The MS. concludes with the following three verses, the last two of which, according to the commentary, do not belong to the original treatise, but have been added from another source as a useful supplement:

कुंडाभावे स्थंडिलं स्याद्वेदास्रं हस्तमानतः ।
द्विचिवेदांगुलोत्सेधं सैकतं दर्पणोन्नतं ॥ ७१ ॥

एकांशस्य कलांशकेन रहितान्पादोनवेदांशकान्
संवर्ध्योभयतस्तदर्धगुणतः पंचास्रवृत्तं भवेत्(r. चरेत्) ।
वृत्ते तत्र विभागपंचकमिते सूत्राणि पंच क्रमाद्
दद्यात्तेन भवेत्समानभुजकं कुंडं तु पंचास्रकं ॥ ७२ ॥

इष्टं यच्चतुरस्रकं भवति तन्मध्यस्य सूत्रं लव-
द्वंद्वेनाथ लवस्य चार्धलवतः संवर्ध्य वृत्तं चरेत् ।
कृत्वांशान्मुनिसंमितात्तदधि सत्सूत्राणि सप्त क्रमाद्
दद्यात्तेन मनोहरं समभुजं सप्तास्रकुंडं भवेत् ॥ ७३ ॥

after which the copyist has inadvertently put the colophon of *Śaṅkara Bhaṭṭa's* commentary: इति श्रीमन्मीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ पितृ[कृत]-कुंडोद्योतविवृतिः कुंडभास्कराख्या समाप्तिमफाणीत् ॥

For another verse (श्रीमीमांसकभट्टशंकरतनूजन्मा°) inserted by one of the commentaries before these two additional verses, see no. 3164.

[H. T. Colebrooke.]

## 3163.

**2667 a.** Foll. 40 (two of which, 15 and 30, are wanting); size 11 in. by 5 in.; fair Devanāgarī writing of about 1750 A.D.; 8–16 lines in a page.

*Kuṇḍabhāskara,* a commentary (*vivṛiti*) on *Nīlakaṇṭha's Kuṇḍoddyota,* by his son *Śaṅkara Bhaṭṭa;* with the text of the original treatise in the middle of the page.

It begins:

यतः सर्वं विश्वं भजति जनिसत्तालयमिदं
य आत्मा सर्वेषां स्थिरचरजडानामपि विभुः ।
तमेतं भास्वंतं विधिहरिमहेशानवपुषं
नमस्यामः कामं परमकमनीयं सुकृतिनां ॥ १ ॥

तमो[ऽ]ज्ञानप्रहर्तारं कर्तारं द्युतिसंविदः ।
आनंदामृतदातारं सवितारं भजामहे ॥ २ ॥
श्रीभट्टनीलकंठं पितरं परिचिंत्य शंकरः काश्यां ।
पितृकृतकुंडोद्योतं व्याचष्टे मूलमालोच्य ॥ ३ ॥

श्रीभास्करतेजउपासनारूपं मंगलमाचरन् शिष्यशिक्षार्थमनुषंगतो व्याख्यातृश्रोतृप्रतिपत्तये च ग्रंथे निबध्नाति । देवर्षिरक्षमासमूहानामवाङ्मनसगोचरं वाङ्मनसयोरविषयं । यतो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेः । प्रत्यक्षमपि तद्धाम श्रीभास्कराख्यं तेजः सर्वदा त्रिकालं समुपास्महे चिंतयामहे । वाङ्मनसविषयत्वप्रत्यक्षत्वयोर्विरोधे ऽपिशब्दः । तत्परिहारस्तु निर्गुणत्वसगुणत्वाभ्यां विधेयः ॥ १ ॥

In this copy the original text is made to end with the following verse (only the first half of which is, however, commented upon):

द्विचिवेदांगुलोत्सेधं सैकतं दर्पणोन्नतं ।
कुंडोद्योतममुं भट्टनीलकंठो व्यचीकरत् ॥ ७० ॥

The commentary then proceeds: अथ प्रसंगात्पंचासप्तास्रे उच्येते । एकांशस्येति ॥ °

It ends: इदमुदाहृतं विज्ञानललिते ।

दशमांशं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात् ।
भक्ता क्षेत्रं चतुःषष्ट्या तद्भागैस्त्रिंशता त्रिभिः ॥
संमाय सूत्रं तादृक्षात्सप्तास्रं सूत्रसप्तकात् ।
अभिचारोपशांत्यर्थं होमे कुंडमिदं स्मृतमिति ॥

इति श्रीमन्मीमांसकभट्टनीलकंठात्मजभट्टशंकरकृता पितृकृतकुंडोद्योतविवृतिः कुंडभास्कराख्या समाप्तिमगमत् ॥

A few diagrams are given in illustration of the text.

[H. T. Colebrooke.]

## 3164.

**610 a.** Foll. 19; size 16 in. by 3¾ in.; fairly good, modern Devanāgarī writing; 13 lines in a page.

*Kuṇḍoddyotadarśana,* a second (and later) commentary, by *Śaṅkara Bhaṭṭa,* on his father's *Kuṇḍoddyota;* composed, at Benares, in 1671 A.D.

The original treatise is given in full along with the commentary.

DR.RUPNATHJI(DR.RUPAK NATH)

It begins:

यतः सर्वं विश्वं भजति जनिसत्तालयमिदं० ॥ १ ॥
तमो[ऽ]ज्ञानप्रहर्तारं कर्तारं द्युतिसंविदः । ० ॥ २ ॥
ध्यायंति यत्पदांभोजमपहत्यै भवांबुधेः ।
योगिनः संयतात्मानस्तं नमामि रघूद्वहम् ॥ ३ ॥
श्रीनीलकंठपितरं परिचिंत्य काश्यां
वर्षे गजद्वि(also B; ? द्वय)हयैकयुते महार्घ्ये ।
व्याख्या कृता सगणितं सफलं च कुंडो-
द्योते मया पितृकृते किल भास्कराख्या ॥ ४ ॥
गणितं ये न जानंति न जानंति च तां तु ये ।
तेषां ज्ञानाय कुर्वे ऽहं कुंडोद्योतस्य दर्शनं ॥ ५ ॥

श्रीभास्करतेजउपासनारूपं मंगलमाचरन् शिष्यशिक्षार्थमनुषंगतो व्याख्यातृश्रोतृप्रतिपत्तये च ग्रंथे निबध्नात्यनुष्टुभमविपुलया देवर्षीति ॥ तत्सूर्याख्यं धाम तेजः सर्वदा रात्रिंदिवं उपास्महे चिंतयामहे ॥ कीदृशं । प्रत्यक्षमपि देवर्षिरक्षसां संघाः समूहास्तेषामवाङ्मनसगोचरं । वाङ्मनसयोरविषयमित्यर्थः । यतो वाचो निवर्तंते अप्राप्य मनसा सहेति श्रुतेः । वाङ्मनसाविषयत्वप्रत्यक्षत्वविरोधे ऽपिशब्दः । यद्वा । अपिशब्दस्य देवर्षिरक्षःसंघानामपीत्यत्रान्वयः । विरोधपरिहारस्तु निर्गुणत्वसगुणत्वाभ्यां विधेयः ॥ १ ॥

As here commented upon, the text ends thus:

कुंडाभावे स्थंडिलं० ।
द्वित्रिवेदांगुलोत्सेधं० ॥ ६५ ॥
प्रकाशकं हि सर्वेषां विलोचनमनोहरं ।
कुंडोद्योतममुं भट्टनीलकंठो व्यचीकरत् ॥ ६६ ॥

अथालंकारशार्दूलविक्रीडितेनाह ।

श्रीमीमांसकभट्टशंकरतनूजन्मा नृसिंहानुजः
कुंडोद्योतमचीकरत्सुविततं श्रीनीलकंठः कृती ।
तं दृष्ट्वा विबुधाः प्रहृष्टमनसः कुर्वंतु सन्मंडपे
कुंडे संगणकास्तथा च सुहृदः शार्दूलविक्रीडितम् ॥ ६७ ॥

Without commenting on this last verse, the commentator then proceeds to explain the two additional verses: अत्र प्रसंगान्मूलानुक्ते ऽपि क्वचिदुपयुक्ते पंचास्रसप्तास्रे शार्दूलविक्रीडिताभ्यामुच्येते । तत्रादौ पंचास्रं ।

एकांशस्य ० ॥

The commentary ends:

इह पंडितदुर्विगाहशास्त्रे यदलेखि स्वधिया मया तु किंचित् ।
अवलंबनमेकमेव तस्मिन् मम गंगायुतनीलकंठपादौ ॥

इति श्रीमन्मीमांसकभट्टनीलकंठात्मजभट्टशंकरविरचितं कुंडोद्योतदर्शनं समाप्तिमफाणीत् ॥

The following is a list of authorities quoted by the commentator: *Āmnāyarahasya, Kātyāyana, Kāmika, Kuṇḍaratnākara, Kuṇḍalakshmavivṛiti, Kriyāsāra, Trailokyasāra, Pañcarātra, Piṅgalāmata, Baudhāyana, Bhavishyapurāṇa, Bhāskarācārya, Madanaratna* by *Nārada, Matsyokti* (i.e. *Matsyapurāṇa*), *Rāghava, Rāmavājapeyin, Liṅgapurāṇa, Vaśishṭhasaṃhitā, Vāyavīyasaṃhitā, Vijñānalalita, Śāradātilaka* (most frequently quoted), *Śulba, Śrīdharācārya, Siddhāntaśekhara, Sūtasaṃhitā, Skandapurāṇa, Hayagrīvapañcarātra, Hemādri.*

*Śaṅkara Bhaṭṭa* was himself the author of an independent work on the same subject, entitled *Kuṇḍārka*, which was commented upon by *Raghuvīra*, son of *Viṭṭhala*, of the *Krishṇātri* family (cf. Rāj. Mitra, Notices, ii., p. 121).

[H. T. COLEBROOKE.]

## 3165.

**1810.** Foll. 31 (two of which, 16 and 17, are lost); size 9 in. by 3¾ in.; indifferent, modern Devanāgarī writing; nine lines in a page.

*Śaṅkara Bhaṭṭa's Kuṇḍoddyotadarśana*, with the original text of *Nīlakaṇṭha's Kuṇḍoddyota* between the commentary.

[H. T. COLEBROOKE.]

## 3166.

**617 b.** Foll. 47; size 9¼ in. by 4 in.; indifferent Devanāgarī writing of 1802 A.D.; eight lines in a page.

*Kuṇḍoddyotadarśana*, with the original text in the middle of the page.

[H. T. COLEBROOKE.]

DR.RUPNATHJI(DR.RUPAK NATH)

### 3167.

**2720.** Foll. 123 (with a supplementary leaf to fol. 33, while fol. 96 is wanting); size 7½ in. by 4¼ in.; indifferent Devanāgarī writing of 1761 A.D.; 10 or 11 lines in a page.

**1267.** Foll. 50; size 7 in. by 4 in.; indifferent, modern Devanāgarī writing; eleven lines in a page.

A fragment of the *Nṛisiṃhapurāṇa*, viz. the *Rāmaprādurbhāva*, or story of *Rāma*; divided into six sections, named after the *kāṇḍas* of the *Rāmāyaṇa*, of 163, 155, 141, 139, 58 and 117 *ślokas* respectively; and corresponding to *adhyāyas* 44–49 (foll. 69*b*–99*b*) of MS. A.

It begins:

शृणु राजन् प्रवक्ष्यामि प्रादुर्भावं हरेः शुभं ।
निहतो रावणो येन सगणो लोककंटकः ॥

It ends:

ज्ञानन्मया ते (राजन्° A.; स्त्रा जन्मजातेः D.) कथितं
रामस्य भूम्यां चरितं महात्मनः । [समासतो
इदं च भक्त्या पठतां च शृण्वतां
ददाति रामः स्वपदं (सुपदं D.) जगत्पतिः ॥

इति श्रीनृसिंहपुराणे रामप्रादुर्भावे लंकाकाण्डः समाप्तः ॥ ६ ॥ [H. T. COLEBROOKE.]

## 3380.

**215.** Foll. 242; size 14 in. by 5 in.; clear Devanāgarī writing (of the Nepal type, and on rough Nepalese paper) of 1783 A.D.; nine lines in a page.

*Padmapurāṇa*, section I., *Sṛishṭikhaṇḍa*. [A.] Rather incorrect.

It begins: ओं नमः श्रीविघ्नविघातकाय ॥

स्वच्छं चंद्रावदातं करिकरमकरक्षोभसंजातफेनं
ब्रह्मोद्भूतं प्रसक्तैर्व्रतनियमपरैः सेवितं विप्रमुख्यैः ।
ओंकारालंकृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टिपूतं
संभोगाभोगरम्यं जलमशुभहरं पौष्करं वः पुनातु ॥
सूतमेकांतमासीनं व्यासशिष्यं महामतिं ।
लोमहर्षणनामा वै उग्रश्रवमभाषत (!) ॥

Cf. Aufrecht, Cat. Bodl., no. 50; Rāj. Mitra, Notices, ii., p. 1; iii., p. 247 (which latter MS. seems to stand in some relation to the present one); and H. H. Wilson's analysis, Journ. Roy. As. Soc., v., p. 280 (repr. in Works, vol. iii., p. 21 seqq.). This *Purāṇa* has been edited, in the *Ānandāśrama* Series (1893, 1894), by V. N. Mandlik.

The last seven chapters (cf. Aufrecht's description) are:—*padmodbhavaprādurbhāva*, fol. 191*a*; *suratārakayoḥ saṃgrāmaḥ*, fol. 194*a*; *kumārasambhave gaurīvivāhaḥ*, fol. 214*b*; *pitṛimāhātmyakathanam*, fol. 218*b*; *śrāddhaprakaraṇam*, fol. 222*a*; *yaduvaṃśakīrtanam*, fol. 227*b*; and the last on *kroshṭuvaṃśa*, etc.

It ends:

तथा कृत्वोशना चाह समता सुपुरोहितः (?) ।
प्रमानो वाल्पदेवेषु (!) कर्तव्यो न कदाचन ॥
एकस्य चैकसाभक्तं भोक्तव्यं करसे (!) पुटे ॥

इत्यादिमहापुराणे पाद्मे सृष्टिखण्डः समाप्तः ॥ अब्दे १८४० कार्त्तिकमासि वलक्षपक्षे पौर्णमास्यां भरणीतारायां व्यतिपातयोगे गौरिवारे तुलाराशिगते सूर्ये मेषराशिगते चन्द्रे तस्मिन्नेव दिवसे इमं पाद्मं सृष्टिखण्डमाप्तिपर्यन्तमलिखत् ॥ इदं पुस्तकं श्रीमत्भगीरथशर्मणः ॥ [H. T. COLEBROOKE.]

## 3381.

**239a.** Foll. 174 (counted 177; nos. 145 and 163 being passed over; and fol. 52 missing); size 12½ in. by 6 in.; clear, but not very accurate, Devanāgarī writing of about 1790 A.D.; fourteen lines in a page.

*Padmapurāṇa*, the same section (called the fifth *khaṇḍa* on fol. 1*a*). [B.]

In the beginning, this MS. differs entirely from the text of the preceding MS:

नारायणं नमस्कृत्य नरं चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्* ॥

* This verse is found at the beginning of the *Mahābhārata* and many *Purāṇas*.

DR.RUPNATHJI(DR.RUPAK NATH)

एकदा नैमिषक्षेत्रे ऋषयः सत्त्रमास्थिताः ।
पप्रच्छुः सूतमासीनं रौमहर्षणिमुत्सुकाः ॥

सूतसुत महाभाग वद नो वदतां वर ।
पुराणं पाद्ममित्याहुर्ऋषयो यं(*r.* यत्) तपोधनाः ॥

श्रुतानि च पुराणानि बहूनि त्वन्मुखांबुजात् ।
अधुना जायते तृष्णा पाद्मं श्रोतुं त्वदात्मनां ॥

सूत उवाच ॥

एष साधु कृतः प्रश्नो विष्णुभक्तिपरायणैः ।
वेदव्यासं नमस्कृत्य यत्कारुण्यादवाप्नवान् ॥

विशुद्धं परमं ज्ञानं पौराणं सर्वपूजितं ।
एकदा सुखमासीनं पुलस्त्यं स्वगृहागतं ॥

भीष्मः परमधर्मात्मा पप्रच्छ ज्ञानमुत्तमं ।
कथयस्व तदां(? कथां) विप्र विष्णुभक्तिप्रवर्धनीं ॥

त्वं त्वपूर्वेण भाग्येन प्राप्तो निधिरिवोज्ज्वलः ।
त्वत्पादसंश्रयाच्चेतो याति निर्मलतां मुने ॥

पुलस्त्य उवाच ॥

साधु साधु कृतः प्रश्नस्त्वया भीष्म सुनिर्भरं ।
ममाप्युल्लासते चेतो न चेतो(? तच्चेतो) यत्सुखावहं ॥

पाद्मं पुराणं यत्प्रोक्तं तत्र सृष्टिं वदामि ते ।
कालस्य संख्या यत्रास्ति पुराणेषु परिश्रुता ॥ [१०] ॥

परमाणुप्रमाणेन कालस्तु परिकीर्तितः ।
स कालः परमाणुर्वै यो भुंक्ते परमाणुतां ॥

अष्टादशनिमेषाणां काष्ठास्तु परिकीर्तिताः ।
त्रिंशत्तास्तु क्षणसोतु(? °स्तास्तु) मुहूर्तो द्वादश स्मृताः ॥

अहोरात्रस्तु ते त्रिंशत् पक्षः पंचदश स्मृताः] ।
द्वौ पक्षावह्न(? वेक)मासस्तु षण्मासौ(? द्वौ मासौ)
ऋतवः स्मृताः ॥ [१३] ॥ ° [२३] ॥

भीष्म उवाच ॥

ब्रह्मा नारायणो वासौ कल्पादौ भगवान्यथा ।
ससर्ज सर्वभूतानि तदाचक्ष्व महामुने ॥ [२४] ॥

पुलस्त्य उवाच ॥

अतीतकल्पावसाने निशासुप्तोत्थिता प्रजा(°तः प्रभुः ed.)।
सत्त्वोद्रिक्तस्तया ब्रह्मन्(*r.* °द्रिक्तस्तथा ब्रह्मा) शून्यं
[लोकमपश्यत ॥ [२५] ॥

तोयांते स महीं दृष्ट्वा निमग्नां वारिसंप्लवे ।
अहेतं(? अनंतं A, विचिन्त्य तदु° ed.) जगदुद्धारं
[कर्तुकामः प्रजापतिः ॥

विष्णुरूपं तदा कृत्वा पृथ्वीमुद्धारकारणात्(A B, पृथ्वीं
[धोढुं स्वतेजसा ed.) ।
मत्स्यकूर्मादिकां चान्यां वाराहीं च तथा तनुं ॥ [२७] ॥ °

Tho earth, having been raised and steadicd, bursts forth into a panegyric of *Vishṇu* as the divino spirit (*paramātman, paramaṃ brahma*), ending:

त्वन्मयाहं(? त्वन्मय्यहं) त्वदाधारा त्वत्सृष्टा त्वामुपाश्रिता ।
माधवीमिति लोको ऽयमभिधत्ते ततो हि मां ॥ [३७] ॥
जयाखिलज्ञानमय जयास्थूल जयाजय ॥

The passage from v. 25 onwards (with the exception of the last odd half-verse) occurs also in the other MS. (fol. 7*a*, l. 8 seq.) as well as in the edition, and is there (at the beginning of the 3rd *adhyāya*) likewise preceded by some verses regarding the divisions of time, which, however, differ entirely from those of our MS.; whilst the first ten verses of the latter have nothing corresponding to them in MS. A and the edition. In these, the earth's eulogy of *Vishṇu* is followed by an account of the nine creations ending with the creation of the *Rākshasas* and *Yakshas*, after which they continue with the present MS.:

ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मनो विनिर्ममे[1] ।
वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः ॥ °

after this the present MS. to the end corresponds to MS. 215 (with, however, constant variations of detail) as far as fol. 218*b*, l. 2 (ed. p. 1233), where it ends:

इदं पवित्रं यशसो निधानम्
इदं पितॄणामपि वल्लभं(°मतिव° ed.) स्यात् ।
इदं च देवदृष्टताय कल्पते(*r.* देवेष्वमृताय कल्पते)
पुण्यावहं(°हरं A) पातकिनां च पुंसाम्(वपुः स्यात् A)॥
इति पठति य इत्थं यः(प्रशस्यं od.) शृणोतीह सम्यग्
मधुमुरनरकारेरर्चनं वाथ पश्येत् ।
मतिमपि च जनानां यो ददातींद्रलोके(°तीहलोके A)
भव इव (हरिशिवं ed.)विबुधाद्यैः पूज्यते कल्पमेकं ॥

[1] क्रोधात्मतो A; ततः क्रुद्धेन वै सृष्टा क्रोधात्मानो विनिर्मिताः । ed.



DR.RUPNATH(DR. RUPAK NATH)

after which the MS. concludes with the colophon: इति श्रीपद्ममहापुराणे गौरीविवाहो नामाध्यायः संपूर्णः ॥ the first seven *aksharas* of which are written over previous writing daubed over; whilst MS. 215 proceeds (with ed.):

> य इदं शृणुयान्नित्यमृषीणां चरितं महत् ।
> विमुक्तः सर्वपापेभ्यो स्वर्गलोके महीयते ॥ ० 6 *ślokas*,

and after which (different from ed.): इत्यादिमहापुराणे पाद्मे सृष्टिखण्डे पितृमाहात्म्यकथनं नामाध्यायः ॥

The last three chapters of MS. A would thus be wanting in the present one.

For an index to this MS. see MS. 366 (no. 3742). [H. T. COLEBROOKE.]

## 3382.

**920 b.** Foll. 81; size $12\frac{1}{4}$ in. by 6 in.; fair Devanāgarī writing of the latter part of last century; thirteen lines in a page.

Part of the *Bhūmikhaṇḍa* of the *Padmapurāṇa;* corresponding to *adhy.* 59–118 of the Cod. Wilson, 113 (Aufrecht, Cat. Bodl., p. 13*a*), and *adhy.* 61–125 of the *Ānandāśrama* edition.

It begins: वेण उवाच ।

> भार्यातीर्थं समाख्यातं सर्वतीर्थोत्तमोत्तमं ।
> पितृतीर्थं समाख्याहि पुत्राणां तारणं परं ।

विष्णुरुवाच ॥

> कुरुक्षेत्रे महापुण्ये कुंडलो नाम ब्राह्मणः ।
> सुकर्मा नाम सत्पुत्रः कुंडलस्य महात्मनः ॥
> गुरू तस्य महावृद्धौ धर्मज्ञौ शास्त्रकोविदौ ।
> द्वावेतौ तौ महाप्राज्ञौ जरया परिपीडितौ ॥ ०

The colophons of the chapters (which are not numbered) run thus: 1. इति श्रीपद्मपुराणे वेण्योपाख्याने fol. 3*a*; 2. do., fol. 5*a*; 3. do., fol. 5*b*; 4. इति पाद्मे वैण्योपाख्याने पितृमातृतीर्थवर्णनं fol. 8*a*; 5. इति प० वै० पितृतीर्थे ib.; 6. इति श्रीप० वै० पितृमातृतीर्थे ॥ fol. 13*b*; 7. इति श्रीपाद्मे वै० पितृमातृतीर्थे ययातिचरिते ॥ fol. 16*a*; similarly 8–20; 21. इति श्रीप० वै० ययातिस्वर्गारोहणं fol. 31*b*; 22. इति पा० पितृमातृतीर्थे fol. 32*a*; 23. इति श्रीप० गुरुतीर्थे च्यवनोपाख्याने ॥ fol. 34*a*; 24. इति पा० वै० गु० च्यवनसंवादे fol. 36*a*; similarly 25–35; 36. इति श्री० च्यवनोपाख्याने ॥ fol. 54*a*; similarly 37–43; 44. इति पा० नहुषचरितं fol. 65*a*; 45. इति पा० च्यवनोपाख्याने ॥ fol. 68*a*; 46, 47. इति पाद्मे भूमिखण्डे ॥ foll. 69*a*, 70*a*; 48. इति पा० वैण्योपाख्याने ॥ fol. 71*a*; 49. as 46; 50. इति पा० नहुषोत्पत्तिः fol. 72*b*; 51, 52. as 46; 53. इति श्रीप० भू० वैण्योपाख्याने fol. 77*a*; 54. इति श्रीप० भू० च्यवनसंवादः fol. 78*a*; 55. इति पा० भू० वै० गुरुतीर्थं fol. 79*b*; 56. इति श्रीप० वैण्योपाख्याने ॥ fol. 80*b*; 57. ends:

> भूमिखण्डे नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
> सर्वदुःखेभ्यः (? r. सर्वदुःखैः शत्रुभिश्च) सर्वरोगैः प्रमुच्यते ॥
> तस्मादेवं ० । श्रोतव्यं हि ० ॥
> प्रथमं सृष्टिखण्डं हि द्वितीयं भूमिखंडयं(० कं) ।
> गोप्रदानसहस्रस्य फलं प्राप्नोति मानवः ॥

इति श्रीमहापुराणे पाद्मे भूमिखंडं समाप्तं ॥

Fol. 1*a* has the inscription पद्मपुराणद्वितीयखंडप्रारंभः ॥ [H. T. COLEBROOKE.]

## 3383.

**2487.** Foll. 233; size 11 in. by $5\frac{1}{4}$ in.; fair Devanāgarī writing of the latter part of last century; ten lines in a page.

*Rāmāśvamedha*, a section of the *Pātālakhaṇḍa* of the *Padmapurāṇa*, describing, in 68 *adhyāyas*, the circumstances connected with the great horse-sacrifice held by *Rāma* after the conquest of *Laṅkā*.

It begins:

> नारायणं नमस्कृत्य नरं चैव नरोत्तमं ।
> देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥

व्यास उवाच ॥

> ततः परं धराधारं पृष्टवान्भुजगेश्वरं ।
> वात्स्यायनो मुनिवरः कथामेतां सुनिर्मलां ॥ २ ॥
> शेषाशेषकथा त्वत्तो जगत्सर्गलयादिका ।
> भूगोलश्च खगोलश्च ज्योतिश्चक्रविनिर्णयः ॥ ३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

महत्तत्त्वादिसृष्टीनां पृथक् तत्त्वविनिर्णयं(*r.* °यः) ।
नानाराजचरित्राणि कथितानि त्वयानघ ॥ ४ ॥
सूर्यवंशभवानां च राज्ञां चरित्रमद्भुतं ।
तत्रानेकमहापापहरा रामकथा कृता ॥ ५ ॥
तस्य वीरस्य रामस्य हयमेधकथा श्रुता ।
संक्षेपतो मया त्वत्तस्तामिच्छामि सविस्तरां ॥ ६ ॥
या श्रुता संस्मृता चोक्ता महापातकहारिणी ।
चिंतितार्थप्रदात्री च भक्तचित्तप्रतोषदा ॥ ७ ॥
शेषनाग उवाच ॥ °

It ends:

शृण्वंति ये कथामेतां ब्रह्महत्यौघनाशिनीं ।
ते यांति परमं स्थानं सर्वदेवैः सुदुर्लभं ॥
गोघ्नश्च युवतीघ्नश्च(तु सुतघ्नश्च ed.) सुरापो गुरुतल्पगः ।
श्रवणात्पूतो भवत्येवमचिरेण द्विजर्षभ ॥

इति श्रीपद्मपुराणे पातालखंडे शेषवात्स्यायनसंवादे अश्वमेधः समाप्तः ॥

The colophons of the chapters correspond to *adhy.* 29–95 in Wilson's Cod. 112 (Cat. Bodl., p. 13*b*),—where, however, *Lavamūrcchanam* ought to be read instead of *Naramūrcchana* in *adhy.* 89; — whilst in the *Ānandāśrama* edition, this section forms *adhy.* 1–68 of the *Khaṇḍa.*

The work was also published separately at Bombay in 1857. [GAIKAWAR.]

## 3384.

**2492.** Foll. 251; size 11¼ in. by 5 in.; good Devanāgarī writing of the latter part of last century; nine lines in a page.

*Rāmāśvamedha*; apparently copied from the same MS. as the preceding one. [GAIKAWAR.]

## 3385.

**2564.** Foll. 52; size 12¾ in. by 6½ in.; Devanāgarī character, for the most part carelessly written, by different hands, in 1799 A.D.; 15–19 lines in a page.

*Śivarāghavasaṃvāda*, a dialogue between *Śiva* and *Rāma* (on the mysteries of *Śiva* worship, etc.), forming part of the *Pātāla-khaṇḍa* of the *Padmapurāṇa*, viz. *adhyāyas* 100–113 in the *Ānandāśrama* edition.

It begins: श्रीगणेशाय नमः ॥ निरंतरायोस्तु ॥
सूत उवाच ॥

अयोध्यां गंतुकामेन शंकरेण महात्मना ।
पार्वत्या सह देवेन उषितं शरयूतटे(*r.* स°) ॥
मुनयस्तं समभ्येत्य शंकरं विश्वरूपिणं ।
कश्यपाद्या महात्मानः पप्रच्छुरमितौजसं ॥
स्वागतं ते मुनिश्रेष्ठ सभार्यः कुत आगतः ।
किमागमनकृत्यं ते कं देशं गंतुमुद्यतः ॥

श्रीशंकर उवाच ॥

अहं धूर्जटिरिति ख्यातो विप्रो हिमगिरिस्थितः ।
द्रष्टुं च राघवं गच्छे मम कार्यं महत्तरः ॥
नामाह्वयति राजासौ पुराणश्रवणेरितः(°णे रतः ed.) ।
आगच्छंतु भवंतोऽपि राघवः परितुष्यति ॥
ततः शिवस्ते मुनयो ययू राममिदृक्षवः ।
तानागतान्वसिष्ठस्तु ज्ञात्वा रामाय चोक्तवान् ॥
ततः सत्वरमुत्थाय निर्ययौ सपुरोहितः ।
अर्घ्यपाद्यादिना सर्वान्पूजयामास तान्नृपान् ॥
गृहराजं ततः सर्वान्प्रावेशयदरिंदमः ।
प्रत्येकमासनं दत्त्वा स्वागतोक्त्यासनस्थितान् ॥
प्रीणयन्(क्रमेण ed.) रघुशार्दूलः पूजयामास तान्नृपान् ।
वाचा मधुरया प्रीणन्निदमाहासनस्थितान् ॥
अद्य मे सफलं जन्म प्राप्तमद्य तपःफलं ।
अद्याभ्यासस्य विद्यानां फलकालोऽयमागतः ॥
अद्य मे पितरस्तुष्टा राज्यं च सफलं मम ।
अद्य मे सफलं वृत्तमद्य मे सफलं श्रुतं ॥
एवं वदं ते(*r.* वदंतं) राजानं ब्राह्मणाः कश्यपादयः ।
ऊचुः प्रियतरं वाक्यं रामं राजीवलोचनं ॥

ऋषय ऊचुः ॥

अयं शंभुर्द्विजः प्राज्ञः सर्वशास्त्रविशारदः ।
वेदवेदांगतत्त्वज्ञः सर्वभूतहिते रतः ।
कैलासवासी सततं तपसे कृतनिश्चयः ॥



DR.RUPNATHJI( DR.RUPAK NATH )

ब्रह्मणा ब्रह्मवर्चस्के तुल्यो ब्रह्मविदां वरः ।
हरिणा ब्रह्मवात्सल्ये प्रसादे शंकरोपमः ॥
एवंविधो महातेजाः शंभुर्ब्राह्मणपुंगवः ।
अष्टादशपुराणज्ञो मीमांसान्यायकोविदः ॥
त्वद्वाक्यगौरवादेव प्राप्तो ऽयं मुनिपुंगवः ।
त्वयाहूतो मुनिवरः कैलासादागतः प्रभो ॥
अतः पृच्छ महाभाग पुराणाख्यानमुत्तमं ।
श्रोतुकामा वयं प्राप्तास्त्वामद्य रघुनंदन ॥ ०

The colophons are as follows: 1. इति श्रीपद्मपुराणे पातालखंडे शिवराघवसंवादे प्रथमो ऽध्यायः fol. 4*b*; 2. इत्यादिमहापुराणे श्रीपाद्मे पा० शि० द्वितीयो ऽध्यायः fol. 10*a*; 3. इत्या० श्री० पा० शि० विभूतिमाहात्म्ये तृतीयो ऽध्यायः fol. 12*b*; 4. इति श्रीप० पा० शि० चतुर्थो ऽध्यायः fol. 14*a*; 5. इत्यादि० श्री० पा० भस्मोत्पत्तिविधानं नाम पंचमो ऽध्यायः fol. 15*b*; 6. इत्या० श्री० पा० शि० विभूतिमाहात्म्ये षष्ठो ऽध्यायः fol. 18*a*; 7. इति श्रीप० पा० शि० पूजामाहात्म्ये सप्तमो ऽध्यायः fol. 20*b*; 8. इत्यादि० श्री० पा० शि० ऽष्टमो ऽध्यायः fol. 22*a*; 9. इत्या० श्री० पा० शि० हरनाममाहात्म्ये नवमो ऽध्यायः fol. 25*a*; 10. इत्या० श्रीपा० दशमो ऽध्यायः fol. 26*b*; 11(?). इत्या० श्री० पा० शि० पौराणिकवाक्यं नाम दशमो(!) ऽध्यायः fol. 37*b*; 12(?). इत्या० श्री० पा० शि० पुराणमाहात्म्यकथनं नामाध्यायः fol. 40*a*, l. 1.

The MS. then proceeds, fol. 40*a*, l. 2: श्रीराम उवाच ॥

संध्यावंदनकर्म क्रिय[ता]मिति मुनिं समाचष्ट (मुनिमाच- [ष्टायं ed.) ।
इस्त(उष्ण)द्युतिरप्यस्तमुपैति द्विजकुलमेतं नीडमुपैति [॥]
स्वयमपि संध्यावंदनगामी इतरमुत्तरराणुगामी (०वन्दन- [कामो ऽव्रजदुत्तरदिशमुज्झितयानः ed.) ।
हाहाहूहूकृतसंगीतिर्वैंदी प्रमुखप्रस्तुतवृत्तिः (०कीर्तिः ed.)॥

Cf. ed., p. 731.

Fol. 48*b* (ed. p. 747): इत्या० श्री० पा० शि० पुराकल्पार्षरामायणं समाप्तमिति ॥ सूत उवाच ।

भारद्वाजगृहे भुक्त्वा रामचंद्रः प्रसन्नधीः ।
मुनींद्रविष्णुसहितो वानरर्क्षसमन्वितः ॥

Fol. 52*a* (cf. ed. p. 754, where no new chapter: इत्यादि० श्री० पा० शिवराघवसंवादे सप्तचत्वारिंशतितमो ऽध्यायः ॥ श्रीरामाय नमः । सूत उवाच ।

शंभुमेव (*r.* शंभुं) विलोक्याथ ततो बभाषे
रामः कथां कीर्तय शंकरस्य ।
तृप्तिर्न जाता मुनिवर्य शृण्वतो
महेशमाहात्म्यमघौघनाशनं ॥
श्रीशंभुरुवाच । ०

It ends: इत्यादिमहापुराणे श्रीपाद्मे पातालखंडे शिवराघवसंवादे उपरिभागे राममोक्षो नामाध्यायः ॥

पुराणवक्त्रे दातव्यं वस्त्रगोहेमभूषणं ।
भूमिः सस्यफलोपेता देया शक्त्यनुसारतः ॥
शिवराघवसंवादं सर्वाघौघनिकृंतनं ।
. . . . . . . . . . . (? line lost).
प्रदक्षिणेनमायैस्य(?) सूनुना श्रीपतेन(!) च ।
सिद्धार्थवत्सरे पुण्ये एकादश्यां बुधे दिने ॥

[MACKENZIE COLLECTION.]

## 3386.

**846 e.** Foll. 22; size 9¾ in. by 4 in.; fair Devanāgarī writing of 1765 A.D.; 8–10 lines in a page.

*Holikāmāhātmya*, a supplement to the *Pātālakhaṇḍa* of the *Padmapurāṇa*.

In six *adhyāyas*, it describes the *Holikāvrata*, a ceremony performed, in honour of *Kṛishṇa*, during the fortnight preceding the full moon of the month *Phālguṇa*; and deriving its name from a certain *Holā* or *Holikā*, a sister of the *mahāsura Kola* in the Nairṛita region, from whose life on this occasion stories are told in which she usually turns out to be *Umā*, *Lakshmī*, *Bhāratī*, etc., herself.

For a full account of this festival, by H. H. Wilson, see Works, ii., p. 227 sqq. It is likewise mentioned in Mr. Sherring's 'Sacred City of the Hindus,' p. 227 sqq.; in S. C. Bose's 'The Hindoos as they are,' 2nd ed. (Calc. 1883), p. 156 sqq.; in Yule and Burnell, Glossary of Indian Words, *s.v.* Hooly, etc.

DR.RUPNATHJI( DR.RUPAK NATH )

It begins: सूत उवाच ।

शृण्वंतु ऋषयः सर्वे गुह्याद्गुह्यतरं महत् ।
होलिकाव्रतमाहात्म्यं विस्तरेण तपोधनाः ॥ १ ॥
फाल्गुणस्य सिते पक्षे कुर्याद्व्रतमनुत्तमं ।
सर्वकामप्रदं नृणां नारीणां च विशेषतः ॥ २ ॥
सायं पूजयते यस्तु होलिकां भक्तवत्सलां ।
भस्मीकृत्यास्य पापानि नात्र कार्या विचारणा ॥ ३ ॥

It ends:

राजर्षिप्रभृतीन्सर्वानुपदिश्य व्रतं त्विदं ।
गुणनामसहस्रं च सत्यलोकं ययौ मुनिः ॥ ८८ ॥
इत्येतत्कथितं सर्वं होलिकाख्यानमुत्तमं ।
सर्वकामप्रदं नृणां किमन्यच्छ्रोतुमिच्छथ ॥ ८९ ॥

इति श्रीपद्मपुराणे पातालखंडे होलिकामाहात्म्ये [होलिका]-
वरप्रदानं नाम षष्ठो ऽध्यायः ॥ ०

[H. T. Colebrooke.]

### 3387.

**1828.** Foll. 34; size 12¾ in. by 4 in.; good Devanāgarī writing (watermark of paper 1818); seven lines in a page.

The same work. [Dr. John Taylor.]

### 3388.

**254.** Foll. 252 (in two parts, paged 1–131, and 1–120; two leaves of the latter being numbered 73); size 11 in. by 4¼ in.; clear, modern Devanāgarī writing; nine lines in a page.

*Prayāgamāhātmya*, professing to form part of the *Pātālakhaṇḍa* of the *Padmapurāṇa*, and celebrating, in 100 *adhyāyas*, the high renown of the *Prayāgatīrtha* and its vicinity, as well as describing the ceremonies and devotions to be performed there at different times.

It begins:

कदाचिन्नैमिषारण्ये सूतं परमकोविदं ।
कोविदाः सर्वधर्मेषु सर्वयज्ञेषु कोविदाः ॥ १ ॥ ०

See Aufrecht, Cat. Bodl., no. 60 (from beginning to *adhy.* 36, v. 17). An edition of the work was published at Benares in 1867.

Part II. begins with *adhy.* 53: शौनकादय ऊचुः॥

मोद्यापनं समाहात्म्यं माघस्नानं त्वयोदितं ।
श्रुत्वा प्रमुदिताः सर्वे पृच्छामो ऽन्यद्वयं प्रभो ॥ १ ॥
शक्तौ दानानि कार्याणीत्यवोचि करुणात्मना ।
भवता विदुषा तत्र वयं संदेहमागताः ॥ २ ॥
कानि दानानि देयानि कुत्र केभ्यः कदा कथं ।
एतदाचक्ष्व नः सूत सर्वज्ञो ऽसि महामते ॥ ३ ॥ ०

It ends:

आदावादिपराशरात्मजवरेणोक्तस्ततो नैमिषे
सूतेनोक्त ऋषिभ्य आदरभरात् शेषेण विस्तारितः ।
पश्चाद्ब्रह्मसुतेभ्य आदिमहिमा यस्तीर्थराजस्य तं
श्रुत्वाप्नोति निजेहितं नरवरो नानाविधं निश्चितं॥६४॥
गंगायै यमुनायै च सरस्वत्यै वटाय च ।
सोमेश्वराय शेषाय माधवाय नमो नमः ॥ ६५ ॥

इति श्रीपद्मपुराणे पातालखंडे सूतशौनकसंवादांतर्गतशेष-
सनकादिसंवादे श्रीप्रयागमाहात्म्ये श्रवणपठनफलादिनिरूपणं
नाम शततमो ऽध्यायः ॥ [H. T. Colebrooke.]

### 3389.

**2688 a.** Foll. 9; size 9½ in. by 5¾ in.; clear, modern Devanāgarī writing; eleven lines in a page.

*Kālañjaramāhātmyam*, an account, in five *adhyāyas*, of the *Kālañjara-kshetra*, on the eastern confines of the Bundelkhand district, and the tantric worship of *Śiva-Nīlakaṇṭha* practised there; professing to form part of the *Pātālakhaṇḍa* of the *Padmapurāṇa*.

In the form of a dialogue between *Śiva* and *Pārvatī*, this *kshetra* is described as a hill extending over half a *yojana*, and comprising several *tīrthas* of great repute, such as *Koṭitīrtha*, *Vāṇagaṅgā*, *Gopyakuṇḍa*, *Sūryakshetra* or *Ravikshetra*, *Ṛishikshetra* and *Saumitrakshetra*.

DR RUPNATHJI( DR RUPAK NATH )

The MS., which is not very correct, begins:
अथ कालंजरमाहात्म्यं ॥ तत्र पार्वतीं प्रति शिव उवाच ॥

श्रवणात्कीर्तनाद्ध्यानाद्दर्शनादधिकं फलं ।
चतुर्धा वांछितं दद्यान्नृणामारोहणाद्गिरिः(°रेः) ॥ १ ॥
संदेहो ऽत्र न कर्तव्यो गिरिरूपी सदाशिवः ।
दर्शनान्मुच्यते जंतुः कलौ कालंजरस्य तु ॥ २ ॥
समुद्रमथनारंभे विष्णुना निःसृते विषे ।
प्रार्थितो मद्(ऽमर्दै)यत्तस्मान्नीलकंठो भवेच्छिवः ॥ ३ ॥
नीलकंठस्तदारभ्य गिरौ कालंजरे स्थितः ।
स्वक्षेत्रे वसतां नृणां चतुर्वर्गफलप्रदः ॥ ४ ॥
जन्मदीक्षाविधौ चैव विवाहे मरणे तथा ।
अर्धयोजनविस्तीर्णं तत्क्षेत्रं सर्वमुक्तिदं ॥ ५ ॥ °

It ends:

मूढो भ्रमति संसारे मोहितो मम मायया ।
कालंजरे ऊखरे(ऊपरे) तु प्रसादं पुरवासिनां ॥ ३७ ॥
कारयित्वा तु मनुजो जायते स चतुर्भुजः ।
स्वयं पावनस्तत्र वसति गिरिमुत्तमं ॥ ३८ ॥
श्रुत्वा वाचकपूजाभि[:] कृतघ्नं श्रुतिगं न हि ।
ईदृशं तु धरण्यां हि नान्यत्क्षेत्रमनुत्तमं ॥ ३९ ॥
श्रुत्वा पठित्वा माहात्म्यं यः शृणोति नरोत्तमः ।
तस्य पुत्रः प्रपौत्रश्च मद्भक्तो मत्परायणः ॥ ४० ॥

इति श्रीपद्मपुराणे कालंजरमाहात्म्ये उमामहेश्वरसंवादे तीर्थवर्णनं नाम पंचमो ऽध्यायः ॥

[Mackenzie Collection.]

3390.

**1306.** Foll. 116; size 12¾ in. by 6 in.; good Devanāgarī writing of 1766 A.D.; twelve lines in a page.

A portion of the *Uttarakhaṇḍa* of the *Padmapurāṇa*, beginning with a chapter (the 25th) called '*Vidyopadeśa*'; after which its contents generally correspond to *adhyāyas* 26–96 of the Oxford MS. (Cat., p. 13*b*); *Ānand.* ed., *adhy.* 251–276; 171–188 (*gītā*).

It begins: दिलीप उवाच ॥

भगवन्भगवता(*r.* भवता) प्रोक्ताः सर्वे धर्मा विशेषतः ।
वर्णाश्रमयुता धर्मा नित्यनैमित्तिकाः क्रियाः ॥
राजधर्माश्च यज्ञाश्च तीर्थदानव्रतादिकम् ।
श्रुतं मया मुनिश्रेष्ठ क्रिया याः सर्वमोक्षदाः ॥
अधुना श्रोतुमिच्छामि तत्सर्वं वक्तुमर्हसि ।
को मंत्रः सर्वमंत्राणां भवरोगैकभेषजः(°जं) ॥ °

The first four *adhyāyas* are numbered 1–4; after which only the *adhyāyas* constituting the *Gītāmāhātmyaṁ* (79–96) are numbered 1–18.

Colophon: इति पद्मपुराणे गीतामाहात्म्ये अष्टादशाध्यायः ॥ गीतामाहात्म्यं समाप्तं ॥ ° संवत् १८२३ ° ॥

[H. T. Colebrooke.]

3391.

**2393c.** Foll. 77; size 12½ in. by 6 in.; fair Devanāgarī writing of 1777 A.D.; fourteen lines in a page.

The *Uttarakhaṇḍa* of the *Padmapurāṇa*, beginning as the preceding MS. and reaching to the end of *adhyāya* 76.

Colophon: इति श्रीपद्मपुराणे उत्तरखंडे [उमामहे]श्वरसंवादे वशिष्ठदिलीपसंवादो नामाध्यायः ॥ ° संवत् १८३४ ॥

[H. T. Colebrooke.]

3392.

**2556.** Foll. 95; size 13¾ in. by 6 in.; careless, modern Devanāgarī writing; ten lines in a page.

The same portion of the *Uttarakhaṇḍa* of the *Padmapurāṇa*, as contained in the preceding MS. [Mackenzie Collection.]

3393.

**2856b.** Foll. 95; size 13½ in. by 7 in.; careless Devanāgarī writing of 1794 A.D.; thirteen lines in a page.

*Māghamāhātmya*, a section of the *Uttarakhaṇḍa* of the *Padmapurāṇa*, in 36 *adhyāyas*.

The text of this MS. seems to differ as

DR.RUPNATHJI( DR.RUPAKNATH )

much from all the other versions known as they differ among themselves. Compared with the Oxford MS. (Cat. no. 57), the names of the chapters, as far as they are given here, are all different, and the beginning as given by Prof. Aufrecht corresponds to the second chapter of our MS. The beginnings of *adhy.* 7–10 in the Berlin MS. (Cat. no. 457) correspond to those of *adhy.* XXIV., XXVII., XXIX., XXXII. of our MS., but the number of verses is different.

Besides these MSS., there are two printed editions. A comparison of the Madras edition of 1858, in 37 *adhyāyas,* shows the following result. The first 17 *adhyāyas* agree in both. From XVIII. 9 to XXI. 75 there is considerable difference. The end of XXI. and beginning of XXII. is the same as the corresponding pieces of *adhy.* 25 and 26 in the Madras edition. XXVI.–XXVIII. harmonize with *adhy.* 31–33 in the Madras edition; XXX. with *adhy.* 35 and 36. XXXI.–XXXVI. are contracted into one (*adhy.* 37) in the Madras edition. The Bombay edition of 1861, in 25 chapters, on the other hand, again differs greatly in particulars from the Madras edition and from our MS. In the *Ānandāśrama* edition of the *Padmapurāṇa,* this section forms *adhys.* 219–250 of the *Uttarakhaṇḍa.*

The MS. begins: श्रीवेंकटेशाय नमः ॥

आरब्धं नैमिषारण्ये सत्रं द्वादशवार्षिकम् ।
आजग्मुरखिलास्तत्र मुनयो ब्रह्मवादिनः ॥ १ ॥

असितो देवलश्चैव सुमंतुः पैल एव च ।
सुमतिर्वामदेवश्च जावालिः कश्यपो भृगुः ॥ २ ॥ ° २१ ॥

सुखासीनं ततस्तं तु विश्रांतमुपलक्ष्य च ।
श्रोतुकामाः कथां पुण्यामिदं वचनमब्रुवन् ॥ २२ ॥

ऋषय ऊचुः ।

अष्टादश पुराणानि सेतिहासानि कृत्स्नशः ।
त्वत्तः श्रुतान्यशेषेण श्रोतव्यांशो न विद्यते ॥ २३ ॥

सूतः । शृण्वंतु मुनयः सर्वे श्रोतव्यांशमितः परम् ।
यावज्ज्ञानं प्रवक्ष्यामि युष्माकं विदुषां पुरः ॥ २४ ॥

ब्राह्मं पुराणं प्रथमं पाद्मं वैष्णवमेव च ।
लैंगं तथैव वाराहं स्कांदं वामनमेव च ॥ २५ ॥

भगवत्याभिधं शैवं भविष्यं नारदीयकं ।
मार्कंडेयं तथाग्नेयं ब्रह्मवैवर्तमेव च ॥ २६ ॥

कौर्मं मात्स्यं गारुडं च ब्रह्मांडं च ततः परम् ।
आद्येष्वष्टादशस्वेषु पुराणेषु महत्सु च ॥ २७ ॥

द्वितीयं पाद्ममित्युक्तं पुराणं रौमहर्षणे ।
पंचपंचाशदित्युक्तसहस्रग्रंथसंख्यया ॥ २८ ॥

तस्मिन्पुराणे हि मया माघमासस्य वैभवः ।
संक्षेपाद्वा श्रुतो विप्रा वर्णितो न तु विस्तरात् ॥ २९ ॥

ऋषयः ।

तस्मिन्पुराणे भवता माघमासस्य वैभवः ।
अग्रतो वर्णितो ऽस्माकं तं भूयो वक्तुमर्हसि ॥ ३० ॥ °

Colophon: इति श्रीपद्मपुराणे माघमाहात्म्ये वसिष्ठदिलीपसंवादे स्नानदाननियमोद्यापनादिकथनं नाम षट्त्रिंशो ऽध्यायः ॥

[H. T. Colebrooke.]

## 3394.

**2418.** Foll. 61; size 8½ in. by 4¼ in.; large, clear Devanāgarī writing of 1731 A.D.; seven lines in a page.

*Bhāgavatamāhātmyam,* a treatise on the nature and practice of faith (*bhakti*), as the essence of the *Bhāgavata-purāṇa,* in six *adhyāyas,* forming part of the *Uttarakhaṇḍa* of the *Padmapurāṇa.* [A.]

In the *Ānandāśrama* edition this section constitutes *adhys.* 189–194 of the *Uttarakhaṇḍa.*

It begins: श्रीराधावल्लभो जयति ॥

यं प्रव्रजंतमनुपेतमपेतकृत्यं
द्वैपायनो विरहकातरमाजुहाव (°र आजुहव B, ed.) ।
पुत्रेति तन्मयतया तरवो ऽभिनेदुस्
तं सर्वभूतहृदयं मुनिमानतो ऽस्मि ॥ १ ॥

नैमिषे सूतमासीनमभिवाद्य महामतिं ।
कथामृतरसास्वादकुशलः शौनको ऽब्रवीत् ॥ २ ॥

DR RUPNATHJI( DR RUPAK NATH )

शौनक उवाच ॥

अज्ञानध्वांतविध्वंसकोटिसूर्यसमप्रभं ।
सूताख्याहि कथासारं मम कर्णरसायनं ॥ ३ ॥
भक्तिज्ञानविरागाप्तो(° प्न B)विवेको वर्धते परं(कथं B)।
मायामोहनिरासश्च वैष्णवैः क्रियते कथं ॥ ४ ॥
इह घोरे कलौ प्रायो जीवश्चासुरतां गतः ।
क्लेशाक्रांतस्य तस्यैव शोधने किं परायणं ॥ ५ ॥ ° १८ ॥
मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ ।
पठनाच्छ्रवणात्सद्यो वैकुंठफलदायकं ॥ १९ ॥
सप्ताहेन श्रुतं चैतत्सर्वथा मुक्तिदायकं ।
सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥ २० ॥ °

1. *bhaktināradasaṃvāda* (79 vv.); 2. *kumārasamāgama* (75 vv.); 3. *bhaktikashṭanivartanam* (68 vv.); 4. *vipramoksha* (81 vv.); 5. *gokarṇaguṇavarṇanam* (98 vv.); 6. *śravaṇavidhikathanam* (99 vv.).

*Adhy.* III. 26 (cf. H. H. Wilson, *Vishṇupurāṇa*, 2nd ed., i., p. xlix., note):

ग्रंथो ऽष्टादशसहस्रो द्वादशस्कंधसंमितः ।
परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ॥

It ends:

इति च परमगुह्यं सर्वसिद्धांतसिद्धं
सपदि निगदितं ते शास्त्रपुंजं विलोक्य ।
जगति शुककथातो निर्मलं नास्ति किंचित्
पिब परसुखहेतोर्द्वादशस्कंधसारं ॥ ९८ ॥
एतां यो नियतमनाः(°तया ed.) शृणोति भक्त्या
यश्चैनां कथयति शुद्धवैष्णवाग्रे ।
तौ सम्यग्विधिकरणात्फलं लभेते
याथार्थ्यान्न हि भुवने किमप्यसाध्यं ॥ ९९ ॥

इति श्रीपद्मपुराणे उत्तरखंडे श्रीभागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठो ऽध्यायः ॥ सं° १७८८ श्रावणशुदि एकादश्यां परतः द्वादश्यां मंगलवासरे लिखितं मया पंडितराघवमुटेन ॥

यो ऽस्योत्प्रेक्षक आदिमध्यनिधने यो व्यक्तजीवेश्वरो
यः सृष्ट्वेदमिदं प्रविश्य ऋषिणा चक्रे पुरः शास्तितः ।
यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ॥

The leaves of the MS. are wrongly bound in the order: 1–16, 25–32, 17–24, 50–57, 33–49, 58–61.

This popular treatise has been repeatedly printed in India, both separately and in connection with the *Bhāgavatapurāṇa*.

[H. T. COLEBROOKE.]

## 3395.

**1116.** Foll. 78; size 12½ in. by 6¼ in.; indifferent Devanāgarī writing of 1804 A.D.; eleven lines in a page.

*Bhāgavatamāhātmya(-nirūpaṇam)*, an amplified version of the foregoing treatise, in 25 *adhyāyas*, likewise professing to form part of the *Uttarakhaṇḍa* of the *Padmapurāṇa*. [B.]

The six *adhyāyas* of the former treatise (prefaced by nine additional verses) are embodied in this version as *adhyāyas* 15–20 (foll. 42–65); and the first 19 *ślokas* (except v. 2) of the shorter text are repeated at the beginning of this work, after which it proceeds:

शौनक उवाच ॥

कीदृशं भागवतं(*i.e.* भाग्वतं) शास्त्रं भगवद्रूपं तदुच्यते ।
तदहं श्रोतुमिच्छामि कृपया वद मे प्रभो ॥ १९ ॥
अवतारा ह्यसंख्याताः श्रुता मे सर्वशास्त्रतः ।
विस्मयो मे महानासीद्वचने तव सुव्रत ॥ २० ॥
अधुना वद शीघ्रं त्वं संसारार्णवतारकं ।
श्रीकृष्णाख्यं परं धाम यद्भागवतमुच्यते ॥ २१ ॥
द्विजातयस्तथा शूद्रा वर्णसंकरिणश्च ये ।
तेषां त्वं हितमन्विच्छन्वद मे शास्त्रमुत्तमं ॥ २२ ॥

सूत उवाच ॥

शृणु शौनक यत्नेन सुछिरो(? सुस्थिरो) भव चानघ ।
ब्रह्मादीनां च यद्गोप्यं रहस्यं प्रवदामि ते ॥ २३ ॥
सर्वतीर्थमयं ह्येतद् वेदैश्च परिकीर्तितं ।
यत् श्रुत्वा मनुजाः सर्वे प्रयांति परमं पदं ॥ २४ ॥ °

1. *vaikuṇṭhadarśanam*; 2. *vishṇustavanam*; 3.–14. *prathama* (etc.) *-skandhamahimavarṇanam*; 15.–20. (as in preceding MS.); 21. *māsanirṇaya*; 22. *śrotṛiśravaṇavidhikathanam*; 23, 24. *(bhāgavata-)mahimavarṇanam*; 25. *puraścaraṇavidhikathanam*.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends: सूत उवाच ॥

एवमुक्त्वा हृषीकेशो गुडाकेशं प्रति स्फुटं ।
ययौ द्वारवतीं शुभां ब्रह्मरुद्रादिसेवितां ॥ ४७ ॥

एतद्यः कथयति सत्वतां पुरस्तात्
शुद्धांतःकरणनिविष्टसत्कथानां ।
सारूप्यं व्रजति स सात्वतार्षभस्य
शृएवंतो भवजलधेः प्रयांति पारं ॥ ४८ ॥

इति श्रीपद्मपुराणे उत्तरखंडे भागवतमाहात्म्ये [भागवतमाहात्म्यनिरूपणे in all chapters except 15 and 25; not counting ch. 10 and 11, where only इति श्रीपद्मपुराणे १० (११) ॥] पुरश्चरणविधिकथनो नाम पंचविंशो ऽध्यायः २५ ॥ संवत् १७६१ आषाढे मासे कृष्णपक्षे पष्टम्यां(!) गुरुवासरे लि° शिववालब्राह्मणचतुर्वेदिमिदं(!) पुस्तकं समाप्तं॥

[H. T. COLEBROOKE.]

## 3396.

**2406b.** Foll. 19; size 8½ in. by 4¼ in.; stiff, but clear, Devanāgarī writing of 1677 A.D.; 7 or 8 lines in a page.

*Krishnanāmasahasraka*, a series of a thousand names and epithets of *Krishna*, assigned to the *Uttarakhanda* of the *Padmapurāna*.

It begins:

शुक्लांवरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्याये सर्वविघ्नोपशांतये ॥ १ ॥

ब्रह्मलोकादिह प्राप्तं नादं(नारदं) भगवत्प्रियं ।
दृष्ट्वा नत्वा सभायां ते पप्रच्छुर्मुनयो मुदा ॥ २ ॥

नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ।
देवर्षिमुपसंगम्य पप्रच्छुरिदमादृताः ॥ ३ ॥

ऋषय ऊचुः ॥

ब्रह्मन् केन प्रकारेण सर्वपापक्षयो भवेत् ।
विना दानेन तपसा विना तीर्थैर्विना मखैः ॥ ४ ॥ °

It ends: श्रीमहादेव उवाच ॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ५२ ॥

इति श्रीपद्मपुराणे उत्तरखंडे उमामहेश्वरसंवादे श्रीकृष्णनामसहस्रकं समाप्तं ॥ संवत् १७३४ ॥ समये नाम ज्येष्टवदि एकादसी गुरुवार लिपनार्थो सिरोमनिगिरिपठनार्थे चंद्रगिरिग्रामपरिश्रावा ॥

[GAIKAWAR.]

## 3397.

**239b.** Foll. 88; size 12½ in. by 6 in.; fair, but rather inaccurate, Devanāgarī writing of 1777 A.D.; fourteen lines in a page.

*Vedasāra-(paramadhya-)sahasranāma*, being a series of a thousand names and epithets of *Śiva*, in 212 verses (including introduction and epilogue), and professing to form part of the *Bilvakeśvaramāhātmya* of the *Uttarabhāga* of the *Padmapurāna*; followed by a commentary thereon by *Parama-Śivendra Sarasvatī*, pupil of *Abhinava-Nārāyanendra Sarasvatī*.

The text of this treatise has been published (under the title of *Vedasāra-Śivasahasranāma*) in Telugu characters, at Bangalore (1882).

The MS. begins (cp. the foot-note to vv. 3 and 4 of the commentary):

एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कंठाः कृष्णदर्शनलालसाः ॥ १ ॥
ततः स भगवान्प्रीतः पूजां चक्रे यथाविधि ।
तेषामाशीस्ततो गृह्य बहुमानपुरःसरं ॥ २ ॥
तैः पृष्टः कथयामास कौमारप्रभृतं च यत् ।
चरितं भूमिभारघ्नं लोकानंदकरं परं ॥ ३ ॥
मार्कंडेयमुखाः सर्वे माध्याह्निकक्रियोत्थिताः ।
कृष्णः स्नानमथो चक्रे मृद्घृतकुशादिभिः ॥ ४ ॥
सूर्योपस्थानसंध्यां च स्मृतिधर्ममनुस्मरन् ।
शिवपूजां ततः कृष्णो गंधपुष्पाक्षतादिभिः ॥ ५ ॥
चकार विधिवद्भक्त्या नमस्कारयुतां शुभां ।
जय शंकर सोमेश रक्ष रक्षेति चाब्रवीत् ॥ ६ ॥ ° १० ॥

श्रीकृष्ण उवाच ॥

साधु साधु मुने पृष्टं हिताय सकलस्य च ।
अज्ञातं तव नास्त्येव तथापि च वदाम्यहं ॥ ११ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

दैवतं सर्वदेवानां सर्वकारणकारणं ।
ज्योतिर्यत्परमानंदं सावधानमतिः शृणु ॥ १२ ॥

विश्वसाधनमीशानं गुणातीतमजं परं ।
जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ॥ १३ ॥

It ends: श्रीसदाशिव उवाच ॥

जपंतु मम तां(? मामिकां) देवा नाम्नां दशशतीमिमां ।
मम चातिप्रियकरीं महामोक्षप्रदायिनीं ॥ १८७ ॥ °

व्यास उवाच ॥

ततस्ते ऋषयः सर्वे जगृहुर्मुनिपुंगवाः ।
सहस्रनामसद्विद्यां भक्तियुक्तेन चेतसा ॥ २०८ ॥

एतद्वः कथितं सर्वं हितार्थं मुनिपुंगवाः ।
गृहीत्वा मम वाक्येन मुक्तिं प्राप्स्यथ निश्चितं ॥ २०९ ॥

भवद्भिरात्मशिष्येभ्यो दीयतामिदमादरात् ।
नाम्नां सहस्रमेतद्धि लिखितं यन्निकेतने ॥ २१० ॥

अविमुक्तं तु तन्नेहं नित्यं तिष्ठति शंकरः ।
अनेन मंत्रितं भस्म खलु दृष्टिविघातकं (खलदृष्ट° ed.) [॥ २११ ॥

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमं ।
नाम्नां सहस्रेणानेन समं किंचिन्न विद्यते ॥ २१२ ॥

इति श्रीपद्मपुराणे उत्तरभागे विल्वकेश्वरमाहात्म्ये कृष्णमार्कंडेयसंवादे वेदसारपरमदिव्यसहस्रनामैकनविंशो (? °मैकोननवति° comm.; नाम नवतितमो ed.) ऽध्यायः ॥

The Commentary begins:

ऐश्वर्यं परमं तत्त्वमादिमध्यांतवर्जितं ।
आधारं सर्वभूतानामनाधारमविक्रियं ॥ १ ॥

अनंतानंदबोधांबुनिधिमद्भुतविक्रमं ।
अंबिकापतिमीशानमनिशं प्रणमाम्यहं ॥ २ ॥

ऐशमाद्यंतनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं सांबं संसारामयभेषजं ॥ ३* ॥

महदादिविशेषांतं जगद्यस्याः समुत्थितं ।
यस्यामेव लयं याति वंदे तामंबिकामहं ॥ ४* ॥

गुरुमूर्तिधरां गुह्यां गुह्यविज्ञानदायिनीं ।
गुह्यभक्तजनप्रीतां गुहायां निहितां नुमः ॥ ५ ॥

नत्वा गणेश्वरं स्कंदं सांबं सद्गुरुमेव च ।
वेदसारसहस्राख्याव्याख्या सम्यग्विरच्यते ॥ ६ ॥

काशीखंडे विष्णुवचनं । कृत्वापि सुमहत्पापं°

It ends: श्रीसदाशिव उवाच ॥ जपंतु मामिकां(!) देवा नाम्नां दशशतीमिमां । °प्रदायिनीं ॥ १ ॥ इमां वेदसारसहस्राख्यां मामिकां मम सगुणनिर्गुणस्वरूपकथनपरां ° ॥ १ ॥ ° २६ (of the last 13 verses only the text is given) ॥

इति श्रीपाद्मे पुराणे पंचपंचाशत्सहस्रिकायां संहितायां उत्तरभागे विल्वेश्वरमाहात्म्ये श्रीकृष्णमार्कंडेयव्यासादिसंवादे वेदसारसहस्रनामैकोननवतितमो ऽध्यायः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदभिनवनारायणेंद्रसरस्वतीपूज्यपादशिष्य-श्रीमत्परमशिवेंद्रसरस्वतीविरचिता वेदसारसहस्रनामव्याख्या समाप्ता ॥ संवत् १८३४ ॥

[H. T. Colebrooke.]

3398.

**1785.** Foll. 128; size 19 in. by 6 in.; large, clear Bengālī handwriting; eight lines in a page; European paper (watermark 1805).

*Kriyāyogasāra* of the *Padmapurāṇa*, in 25 *adhyāyas*.

It begins:

लक्ष्मीनाथपदारविन्दयुगलं ब्रह्मेश्वराद्यामर-
श्रेणीनम्रशिरो[ऽ]तिमालममलं वन्दामहे संततं ।
भक्त्या योगिमनस्तडागसुषमासंदोहवृद्ध्युत्तमं
गङ्गाम्भोमकरन्दबिन्दुनिकरं संसारदुःखापहं ॥ १ ॥
यो मूर्तिं बहुधा विधाय ° ॥ २ ॥
वेदेभ्य उद्धृत्य समस्तधर्मान्
यो ऽयं पुराणेषु जगाद देवः ।
व्याससरूपेण जगद्धिताय
वन्दे तमेतं कमलासमेतं ॥ ३ ॥
एकदा मुनयः सर्वे सर्वलोकहितैषिणः ।
सुरम्ये नैमिषारण्ये गोष्ठीं चक्रुर्मनोरमां ॥

See Aufrecht, Cat. Bodl., p. 14.

It ends: सूत उवाच ।

एवं प्रबोधितस्तेन जैमिनिः परमार्थिना ।
क्रियायोगरतो भूत्वा जगाम परमं पदं ॥

* These two verses (3 and 4) of the commentary are made in the Bangalore edition the first two verses of the text, being followed by those with which this MS. begins.

DR.RUPNATHJI( DR.RUPAK NATH )

इमं क्रियायोगसारं व्यासेनोक्तं महात्मना ।
ये पठन्ति जना भक्त्या शृखन्ति च मुमुक्षवः ॥

ते सर्वपातकैर्घोरैर्बहुजन्मार्जितैरपि ।
विमुक्ताः परमां मुक्तिं लभन्ते नात्र संशयः ॥

यद्यदिष्ट्वा पठन्त्येतत् शृखन्ति च नरोत्तमाः ।
लभन्ते तत्तदेवाशु प्रसादात्कमलापतेः॥

श्लोकार्धं श्लोकमेकं वा श्लोकपादमथापि वा ।
नरः पठित्वा श्रुत्वास्य लभते वाञ्छितं निजं ॥

लिखित्वा लेखयित्वा वा यः शास्त्रमिदमर्चयेत् ।
स विष्णुपूजनस्यैव फलं प्राप्नोति मानवः ॥

इदमतिशयगुह्यं निःसृतं व्यासवक्त्रात्
रुचिरमुपपुराणं प्रीतिदं वैष्णवानां ।
चिरममरवरौघैर्वन्दिताङ्घ्रेर्मुरारेः
सकलभुवनभर्तुश्चक्रिणः प्रीतये ऽस्तु ॥

इति क्रियायोगसारे व्यासजैमिनिसंवादे पंचविंशो ऽध्यायः ॥ समाप्तं चेदमुपपुराणमिति ॥

[H. T. Colebrooke.]

## 3399.

**1422.** Foll. 75; size 12¼ in. by 5 in.; modern Devanāgarī writing; 10–14 lines in a page.

*Śivagītā*, in 16 *adhyāyas*, professing to be a section of the *Padmapurāṇa*; with a commentary, by *Keladī Veṅkaṭādri Nāyaka.*

The text begins: सूत उवाच ॥

अथातः संप्रवक्ष्यामि शुद्धकैवल्यमुक्तिदं ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥ °

See Aufrecht, Cat. Bodl., no. 61.

The commentary begins:

सो ऽयं पद्मपुराणस्थां षोडशाध्यायनिर्मितां ।
शिवगीतां शिवप्रीत्यै विवेचयति सादरं ॥ १ ॥

सूत उवाचेति ऋषीन्प्रतीति शेषः ॥ अथेति । अत ऋषय उत्तमाधिकारिणो बुभुत्सया पृच्छंतीति निर्णयानंतरं । अतः तेषामनुपेक्षणीयत्वात्°

It ends: इति श्रीमद्विशुद्धाद्वैतसिद्धांतप्रतिष्ठापनैकधुरंधर-श्रीकेलदीवेंकटाद्रिनायकविरचितायां श्रीशिवगीताव्याख्यायां षोडशो ऽध्यायः ॥

[H. T. Colebrooke.]

## 3400.

**2838a.** Foll. 15; size folio, 12½ in. by 7½ in.; European paper; small, modern Telugu handwriting; 40–42 lines in a page.

*Śvetagiri-māhātmya*; containing an account of a shrine of *Vishṇu* (the Kūrma Pagoda), in the southern part of the Coromandel coast; in thirty *adhyāyas*, professing to form part of the *Padmapurāṇa.*

It begins:

सूपे कथं तु हरिणा सर्वपापापहारिणा ।
स्वप्ने व्यादेशितं क्षेत्रं कूर्मनाम वदस्व तत् ॥
कथं क्षेत्रस्य माहात्म्यं कथं वा हरिरव्ययः ।
कूर्मरूपी निवसति तस्मिन् क्षेत्रे निरंजनः ॥
कथं प्रसादमाहात्म्यं तत्सर्वं मां वदस्व भोः ।
ऋषिरुवाच ॥
साधु पृष्टं हि सुमुने कूर्ममाहात्म्यमुत्तमं ॥
अस्ति कश्चिच्छ्वेतगिरिर्दक्षिणस्योदधेस्तटे ।
तत्र श्वेतमहापालः कुर्वाणो राज्यमुत्तमं ॥ °

It ends:

पुमांस्तु यस्तत्र समाधियुक्तः
करोति वीक्षां खलु चक्रतीर्थे ।
गृह्णाति तस्मादपि यस्तपस्तो(?)
वैकुंठकंधे(!) कलयांबभूव ॥

इति श्रीपद्मपुराणे श्वेतगिरिमाहात्म्ये त्रिंशो ऽध्यायः ॥

[Mackenzie Collection.]

## 3401.

**2565.** Foll. 130 (of which foll. 30–34, 44 and 49 are wanting); size 13¾ in. by 6¼ in.; fair Devanāgarī writing of about 1780 A.D.; twelve lines in a page.



DR.RUPNATHJI( DR.RUPAK NATH )

[*Padmapurāṇakhilam*], a supplement to the *Padmapurāṇa;* also including some extracts from that (and other) *Purāṇas.*

The above title, in English characters, is pasted on the fly-leaf.

It begins: भीष्म उवाच ।

श्रुतमेतस्त्वत्प्रसादाद्विप्र वर्गपुरातनम् ।
यज्ज्ञात्वा मुच्यते पापैः श्रवणेन च पुण्यभाक् ॥
इदानीं श्रोतुमिच्छामि तीर्थमाहात्म्यमद्भुतम् ।
ब्रूहि विस्तरतो ब्रह्मन्यच्छ्रुत्वा मुच्यते नरः ॥

पुलस्त्य उवाच ।

सन्ति तीर्थान्यनेकानि पावनानि च सुव्रत ।
येषां कीर्तनतो ऽपि स्यान्महापातकनाशनम् ॥
तीर्थानां दर्शनं स्नानं पुनस्तत्रावगाहनम् ।
स्मरणं सर्वतीर्थानां वाञ्छितार्थफलप्रदम् ॥
पर्वताश्च तथा नद्यस्तीर्थानि कथितानि वै ।
क्षेत्राणि चाश्रमा भीष्म मानसादिसरांसि च ॥
गच्छतस्तीर्थयात्रार्थं यान्युद्दिश्य पदे पदे ।
अश्वमेधादियज्ञानां फलं स्यान्नात्र संशयः ॥
तेषां किंचिद्वदाम्यत्र तत्त्वं मां वक्तुमर्हसि ॥

भीष्म उवाच ।

विष्णोश्चरितमिच्छामि श्रोतुं त्वत्तो द्विजोत्तम ।
यज्ञपर्वतमासाद्य विष्णुना प्रभविष्णुना ॥
पदानि चेह दत्तानि किमर्थं पदपद्धतिः ।
कृता वै देवदेवेन तन्मे वद महामते ॥

Here begins a section of the *Srishṭikhaṇḍa* extending over three *adhyāyas* and part of a fourth, viz. *vishṇupadotpatti, tīrthāvatāra, mārkaṇḍeyāśramavarṇanam* and *kshemaṃkaryutpatti,* as far as the end of fol. 27 (in MS. 215 from fol. 141*b*, 2 to fol. 166*b*, 3). Then there is a gap in the text, although the following leaf is numbered 28. The rest of the work is not ascribed to any particular *khaṇḍa*, but simply to the *Padmapurāṇa;* viz. *iti pādme pañcākhyāne pitṛibhaktir nāma* (fol. 43*b*); *pativratopākhyānam* (fol. 47*b*); *pañcākhyāne strīṇām ākhyānam* (fol. 51*b*); *pañcākhyāne tulādhārasaṃvāde śūdrasyālobhākhyānam* (fol. 54*b*); *ahalyāharaṇam* (fol. 56*b*); *pañcākhyāne kāmalauhityotpattiḥ* (fol. 59*a*); *iti pādme pañcākhyānam* (fol. 61*a*); *ityādipādme khātādidānam* (fol. 62*b*); *pushkariṇyādidharmakīrtanam* (fol. 65*a*); *rudrākshamāhātmyam* (fol. 73*b*); *tulasīmāhātmyam* (fol. 79*a*); *tulasīstavaḥ* (fol. 80*b*); *gaṅgāmāhātmyam* (fol. 85*a*); *gaṇapatistotram* (fol. 86); *kālikeyavadhaḥ* (fol. 91*b*); *kāleyavadhaḥ* (fol. 92*a*); *devāsuravimarde balavadhaḥ* (fol. 94*a*); *devāsuravimarde devāntakadurmukhavadhaḥ* (fol. 94*b*); *devāsuravimarde namucivadhaḥ* (fol. 95*b*); . . . *tārakavadhaḥ* (fol. 96*b*); . . . *madhuvadhaḥ* (fol. 98*b*) ... *vṛitravadhaḥ* (fol. 100*b*); ... *traipuravadhaḥ* (fol. 102*a*); ... *hiraṇyākshavadhaḥ* (fol. 105*b*); *vijayastotram* (fol. 106*b*); *arkāṅgasaptamīvidhi* (fol. 116*b*); *sūryaśāntiḥ* (fol. 119*a*); *bhadreśvarākhyānam* (fol. 120*b*); *somapūjāyāṃ rūpasaubhāgyakāmato dravyādidānam* (fol. 121*b*); *devīpurāṇe* (! fol. 124*b*); *iti bhavishyapurāṇe* (! fol. 125*b*); *iti padmapurāṇe* (fol. 127*b*); *devīpurāṇe* (fol. 128*a*); *iti pādme* (fol. 128*b*). Between the last two leaves there is, however, a gap; the original number of the last leaf having been obliterated, and the new number substituted by a different hand.

It ends:

सृष्टिप्रकारो लक्ष्म्याश्च दक्षयज्ञविनाशनम् ।
दैत्यवंशो मन्वन्तरं सूर्यवंशस्य कीर्तनम् ॥
तथैव पितृमाहात्म्यं श्राद्धप्रकरणं तथा ।
यदुवंशः सृष्टिकथा रुद्रस्य वरदानकम् ॥
वर्णाश्रमाणां धर्मश्च गायत्रीसंग्रहस्तथा ।
व्रतानां कथनं चैव सर्वमेतत्प्रकीर्तितम् ॥

इति श्रीपद्मपुराणे व्रताध्याय एकविंशतितमः ॥

[MACKENZIE COLLECTION.]

## 3402.

**1313 a.** Foll. 185 (counted 186; no. 99

DR.RUPNATHJI( DR.RUPAK NATH )

being passed over); size 12¼ in. by 6 in.; modern Devanāgarī writing; twelve lines in a page.

*Bṛihad-Dharmapurāṇa*, in 79 *adhyāyas*, divided into three *khaṇḍas*:—*prathamakhaṇḍa*, *adhy.* 1–30; *madhyamakhaṇḍa*, *adhy.* 31–60; *uttarakhaṇḍa*, *adhy.* 61–79.

The work has been published, in the Bibliotheca Indica, by *Paṇḍit Haraprasād Śāstrī*. The present MS. (which, unfortunately, is not very correct) has, however, several chapters more at the end. The subjoined analysis was made before the appearance of that edition, and may still prove useful.

The MS. begins:

ओं भूर्भुवःस्वरिति तत्सवितुर्वरेण्यं
भर्गो निसर्गविमलं परमस्य विष्णोः ।
देवस्य धीमहि धियो ऽधिगतं वयं यो
यत्नान्न ईहितमतींस्तु प्रचोदयादों ॥

पवित्रे नैमिषे क्षेत्रे विमले साधुसेविते ।
सुगंधिमंदशीतेन वायुना सुमनोहरे ॥

नानाद्रुमलताकीर्णे नानापुष्पसमाकुले ।
मयूरैः कोकिलैर्हंसैर्भ्रमरैरुपकूजिते ॥

तथान्यैः पक्षिभिश्चैव गोमृगादिभिरेव च ।
शांतस्वभावे व्या[घ्रा]द्यैरावृते नैमिषे वने ॥

दीर्घसत्त्रमुपासीनानृषीन् सावसरान्तते ।
यदृच्छया सभां यातः सूतो बदरिकाश्रमात् ॥

तं दृष्ट्वा सूतमायांतं मुनयः शौनकादयः ।
स्वागतासनपाद्याद्यैर्मुदिताः समपूजयन् ।
तमूचुश्च महात्मानं सूतं पौराणिकोत्तमं ॥

ऋषय ऊचुः ॥

कस्मादागमनं सूत तवेह रोमहर्षणे ।
प्रफुल्लवदनांभोजो दृश्यसे ऽस्माभिरेव च ॥

मन्ये व्यास[स]मीपात्त्वं समागच्छसि संप्रति ।
वद तर्हि कथाः पुण्या व्यासेनोक्ता महामते ॥

कः श्रोता तत्र किं वासौ प्रोक्तवान् शक्तिपुत्रजः ।
तत्सर्वमाचक्ष्वानुपूर्व्या श्रुतवानसि चेत्तथा ॥

सूत उवाच ॥

नमो वः सत्यमेवाहं प्राप्तो बदरिकाश्रमात् ।
भवतां निकटं तत्र कथाः पुण्याः श्रुता अपि ॥

व्यासो जाबालिना पृष्टः कथा धर्मार्थसंहिताः ।
प्रत्यवोचच्छृण्वतां च मुनीनां मम च द्विजाः ॥

प्रावर्तयत्तथा पुण्यं पुराणं धर्मसंहितं (*r.* °संज्ञितं) ।
सर्वे धर्माः श्रुतास्तत्र सेतिहासा उदाहृताः ॥

चतुराश्रमधर्माश्च सामान्येन विशेषतः ।
धर्मप्रशंसा सत्यादेर्भेदा धर्मांगरूपिणः ॥

गुरूणां कथनं चैव पितुर्मातुस्तथा स्तवः ।
तीर्थानि देशाः क्षेत्राणि देवपूजाः पृथग्विधाः ॥

तीर्थानामपि माहात्म्यं यच्च कालो* विशेषतः ।
पुराणोपपुराणादिकीर्तनं पुण्यकीर्तनं ॥

ज्योतिषां प्रश्नेन चैव कथितं तन्मया श्रुतं ।
गंगायाः सत्प्रसंगश्च श्रुतः प्रथमतः परं ॥

एतेषां खलु धर्माणां कारणं पावनं परं ।
रामायणं च संक्षेपात्कथितं तन्मया श्रुतं ॥

मयि श्रोतरि हे विप्रास्तत्र तेन कृपालुना ।
व्यस्तं पुराणममलं वक्तायमिति(? वक्तव्य°) सर्वतः ॥

I. 1. *Vyāsajāvālisaṃvāda*; 2. *pitṛimātṛibhakti*; 3. *tulādhāropākhyānam*; 4. *gurūṇām nirṇayaḥ*; 5, 6. *tīrthaprādurbhāva*; 7. *tulasīprādurbhāva*; 8. *tīrthasambhave tulasīmāhātmyam*; 9. *śrīphalaprādurbhāve krishṇaśaṅkarasamāgamaḥ*; 10. *śrīphalaprādurbhāva*; 11. *vilvavṛikshamāhātmyam*; 12. *āmalakīprādurbhāva*; 13. *naimishāraṇyasambhava*; 14. *tīrthaprādurbhāva*; 15. *Kālatīrthakathane vaiśākhādikathanam*; 16. *tīrthakathane agastyārgham*; 17. (on *śrāddha*); 18. *rāvaṇavadhopāya*; 19. *tīrthaprādurbhāve sītāvṛittāntalābhaḥ*; 20. *hanūmadāgamanam*; 21. *vyāsajāvālisaṃvāde devībodhanopāyaḥ*; 22. *kālatīrthakathane rāvaṇavadhaḥ*; 23. *vyāsaj. rudrāṇījayāvijayāsaṃvāde kālatīrthakathanam*; 24. *kālatīrthāni*; 25. *rāmāyaṇotpattiḥ*; 26. *rāmāyaṇotkīrtanam*; 27.

* i.e. the *Kālatīrtha*, *adhy.* 15 and 23.

DR.RUPNATHJI( DR.RUPAK NATH )

*Brahman* tells the *Ṛishis* that the *Rāmāyaṇa* was composed by *Vālmīki* by his own direction (*pañcaviṃśatisāhasrī saṃhitā saptakāṇḍikā*); 28. the *munis* visit *Janaka*; 29. their visit to *Vālmīki's* hermitage; 30. *vyāsajāvālisaṃvāde jayāvijayāsaṃvādaḥ*.

II. fol. 58*b*, begins: जावालिरुवाच ॥

रुद्राणीसखिसंवादस्त्वया प्रोक्तो विशेषतः ।
तत्र गंगा पुण्यतमा प्रोक्ता सर्वसुरोत्तमा ॥
का गंगा किंप्रभावा च संभवो ऽस्याः कुतो ऽथवा ।
कथं हिमगिरेः कन्या जलरूपा कथं पुनः ॥ °

31. *śukajaiminisaṃvāde purushotpattiḥ*; 32. origin of *Satī*, daughter of *Daksha*; 33. *satīsvayaṃvara*; 34. *bhikshukāgamanam*; 35. *rudradveshanivedanam*; 36. (*śivasatīsaṃvāda*); 37. *satīdehotsarga*; 38. *dakshayajñadhvaṃsa*; 39. *dakshayajñasambhava*; 40. the gods pay homage to *Vishṇu*; 41. *satībrahmādisaṃvāda*; 42. *śukajaiminisaṃvāde gaṅgājanma*; 43. *Śiva-gaṅgāsamāgama*; 44. *śivagānam*; 45. *aditi-varaprāptiḥ*; 46, 47. *vāmanacaritam*; 48, 49. *gaṅgārādhanam*; 50. *gaṅgāstava* (the same as Rāj. Mitra, Notices, i., p. 174); 51. *gaṅgāva-taraṇam*; 52. *sagaraputroddhāra*; 53. *umā-lābha*; 54–58. *gaṅgādharmāḥ*; 59, 60. *man-vantaravaṃśakathanam*.

III, fol. 142*b*, begins: शौनक उवाच ॥

मध्यखंडकथा दिव्याः श्रुत्वा स गुरवे मुनिः ।
जावालिः किं नु पप्रच्छ तन्नः सूत वद प्रभो ॥

61. *praṇāmavidhiḥ*; 62. *brāhmaṇadharmāḥ*; 63. *rājadharmāḥ*; 64, *vaiśyadharmāḥ*; 65. *brahma-cāridharmāḥ*; 66. *gṛihasthadharmāḥ*; 67. *vāna-prasthayatidharmāḥ*; 68. *strīdharmāḥ*; 69. on *devapūjā* (*Gaṇeśa, Sūrya, Śiva*); 70. do. (*Vishṇu, Durgā, Grahapūjā*); 71. *Grahastotrāṇi* (names of *grahas*); 72. on *yuga* and *yugadharmāḥ*, *ahiṃsā*, *janmakarma*; 73, 74. *jātisāṃkaryam*.

These 14 chapters are all that the Bibl. Indica ed. assigns to the *Uttarakhaṇḍa*; this section ending in our MS.:

संकराणामुपाख्यानं पृथुकीर्तिः सुपुष्कला ।
एतत्पाठस्य श्रवणं फलं पुण्यकरं मतं ॥

The MS. then, however, contains 6 more chapters, beginning thus: व्यास उवाच ॥

द्वापरे वेदभागे हि जावालेर्विहिते मया ।
एकद्विवेदित्रिवयादिभेदाद्विप्रास्तथाभवन् (!) ॥

एवं शास्त्रेषु भि[न्ने]षु वहुधा नीयते मया ।
तपोदानप्रवृत्ता च राजसी भवति प्रजा ॥

अल्पायुषो नराः सर्वे मंदभाग्या उपद्रुताः ।
वेदाचारविहीनाश्च हिंसाशीला अधर्मिणः ॥

तैराक्रांता च धरणी पीडिता भावरूपिणी ।
तस्य भावस्य शांत्यर्थं भगवान्विष्णुरव्ययः ॥

वासुदेव इति ख्यातो ह्यवतीर्णो बभूव ह ।
देवक्या अष्टमे गर्भे संकर्षणसहायवान् ॥

75. *dānakathanam*; 76. *Brahman, Vishṇu, Śiva, Durgāstuti, Vishṇvavatārāḥ*; 77, 78. *Kṛishṇa*; 79. *kaliyugadharmāḥ*; 80. epilogue:

सूत उवाच ॥

इदं वः कथितं विप्राः पुराणं धर्मनामकं ।
बृहद्धर्मपुराणं यत्कथ्यते मुनिपुंगवैः ॥

इदं पापहरं पुण्यं यशस्यं धनवर्धनं ।
पठेद्वा शृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

इदमष्टोत्तरशतं श्रुतं वा पठितं किल ।
अश्वमेधफलं दत्ते कलिकाले ऽपि भूसुराः ॥

अबंध्यं दिवसं कुर्यात् श्लोकमेकं पठन्नपि ।
इदं हि वैष्णवं शास्त्रं शैवं शाक्तं तथैव च ॥

संख्यायोगपरं चैतत् साध्यात्मसंद्विजा (? °संहिता) ।
वाचयेद्ब्राह्मणद्वारा व्याख्यातं शृणुयादपि ॥

अयं ह्युपपुराणार्कः श्रीमद्भागवतं यथा ।
कालाकालविचारस्तु नास्यास्ति श्रवणादिषु ॥

अशुश्रूषुमभक्तं च देवभेदकरं तथा ।
न श्रावयेदिदं शास्त्रं परमज्ञानदायकं ॥

देव्या दत्तमिदं पूर्वं ब्रह्मादिभ्यस्ततः परं ।
नारदः कथयामास व्यासायामिततेजसे ॥

DR.RUPNATHJI( DR.RUPAK NATH )

व्यासश्चक्रे श्लोकबंधं ततो ऽहं श्रुतवानिदं ।
मया तु कथितं चेदं युष्मभ्यं हि यथामति ॥
इदं लेख्यं च पूज्यं च रक्षणीयं गृहे तदा ।
दुर्गोत्सवे तथा पुण्यदिवसेष्वितरेषु च ॥
बृहद्धर्मपुराणाख्यं शृणुयाद्दक्षिणाप्रदः ।
गंगातीरे पुण्यतीर्थे शिवविष्णवालये तथा ।
साधूनां संगमे चैव पठेदेतच्छुचिर्द्विजः ॥
एतान्यावस्यसमये(?) यस्तु कुर्यात्कथांतरं ।
स कुर्याद्ब्रह्महत्यायाः प्रायश्चित्तं विशुद्धये ॥
इति वः कथितं सर्वं यथापृष्टो ऽहमिहास्मि व(?ऽह-
येन संसारदुष्पारसमुद्रो गोष्पदीभवेत् ॥ [मस्मि च) ।
सुखं तिष्ठत वै विप्राः काले वर्षंतु वारिदाः ।
ब्राह्मणेभ्यो नमस्कृत्य प्रतियामि यथागतं ॥

इति बृहद्धर्मपुराणे उत्तरखंडः । समाप्तं चेदं बृहद्धर्मपुराणमिति ॥

For another MS. agreeing with the present one in its opening and its final *śloka*, see Rāj. Mitra, Notices, i., p. 236.

The passage enumerating the *Purāṇas* and *Upapurāṇas* runs as follows, fol. 49*a* (cf. ed., *adhy*. 25, vv. 18–27, where, however, a line has been omitted):

सत्यवाक्यानि सर्वाणि पुराणानि द्विधानि च ।
उपपूर्वं महत्पूर्वं पुराणं द्विविधं मतं ॥
अष्टादशैव संख्यातान्युभयानि सखीद्वय ।
सावधानेन चित्तेन शृणु तानि च क्रमं ॥
आदौ ब्रह्मपुराणं च पाद्मं ब्रह्मांडमेव च ।
वैष्णवं ब्रह्मवैवर्तं महाभागवतं तथा ॥
भविष्यं गारुडं लैंगं शैवं वाराहमेव च ।
मार्कंडेयं तथा स्कांदं कौर्मं मात्स्यं पुराणकं ॥
तथाग्नेयं च वायव्यं श्रीभागवतमेव च ।
एवमष्टादशैवाहुः पुराणानि महांतुत ॥
तथाप्युपपुराणानि कथयामि मुदा शृणु ।
आदावादिपुराणं स्यादादित्याख्यं द्वितीयकं ॥
ततो बृहन्नारदीयं नारदीयं ततः परं ।
नंदिकेशपुराणं च बृहन्नंदीश्वरं तथा ॥
शांबं क्रियायोगसारं कालिकाह्वयमेव च ।
ततो धर्मपुराणं च विष्णुधर्मोत्तरं तथा ॥
शिवधर्मं विष्णुधर्मं वामनं वारुणं तथा ।
नारसिंहं भार्गवं च बृहद्धर्मं तथोत्तमं ॥
एतान्युपपुराणानि सख्या[षट्]दशैव तु ।
अन्याश्च संहिताः सर्वा मारीचकापिलादयः ।
सर्वत्र धर्मकथने तुल्यसामर्थ्यमुच्यते ॥

[H. T. COLEBROOKE.]

## 3403.

**1313 b.** Foll. 25; size 12¼ in. by 6 in.; fair Devanāgarī writing of 1801 A.D.; 16 or 17 lines in a page.

*Pārāśara Upapurāṇa*, in 18 *adhyāyas*, related by *Parāśara* to *Śuka*.

It begins:

सौरमंडलमध्यस्थं सांबं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥ १ ॥
मेरुशृंगे समासीनं संसारोदधितारकम् ।
शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥ २ ॥
पप्रच्छ परमं गुह्यं भक्त्या परमया मुदा ।
भवपाशेन बद्धानां भवपाशविमोचनम् ॥ ३ ॥
पराशरो ऽपि भगवान् भवानीपतिवल्लभम् ।
प्राह कारुणिकः श्रीमान् ध्यात्वा सांबं त्रिलोचनम् ॥ ४ ॥

श्रीपराशर उवाच ॥

पुरा पुराणमखिलं व्यासः सत्यवतीसुतः ।
कृत्वा शिवप्रसादेन मुनीनां भावितात्मनाम् ॥ ५ ॥
दर्शयित्वा मुनींद्रेभ्यस्तैः प्रसन्नैर्महात्मभिः ।
पूजितो ऽभवदत्यर्थं पुरजित्पादवल्लभः ॥ ६ ॥
अस्मिन्नवसरे श्रीमान् महाकारुणिकोत्तमः ।
महादेवो महादेव्या सह संनिहितो ऽभवत् ॥ ७ ॥
तं दृष्ट्वा देवदेवेशं त्रिनेत्रं चंद्रशेखरम् ।
प्रणम्य मुनयः सर्वे दंडवत्पृथिवीतले ॥ ८ ॥
प्रदक्षिणमा(प्रदक्षिणा)त्रयं कृत्वा प्रपूज्य परमेश्वरम् ।
तुष्टबुद्धेर्मनसो विस्मृता(*r.* विस्मिता) विवशाः शुक॥९॥

मुनय ऊचुः ॥

शिवाय सत्यविज्ञानमहानंदस्वरूपिणे ।
स्वविलक्षणहीनाय स्वयंवेद्याय ते नमः ॥ १० ॥
स्वात्मभूतमहामायाशक्तिवैभवसाक्षिणे ।
स्रष्ट्रे भर्त्रे च संहर्त्रे सर्वस्य जगतः सदा ॥ ११ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

शल्याकारे(? सा०) तु मायायाः स्वयंविच्छक्तिरूपतः ।
संस्थिताय स्वतंत्राय नमः सांबाय शंभवे ॥ १२ ॥
महदाद्यणुपर्यंतमायाचित्रस्य सर्वदा ।
भिन्निभूताय(!) रुद्राय नमः संसारहारिणे ॥१३॥ ०१९॥

श्रीपराशर उवाच ॥
इत्येवं मुनिभिः साक्षाच्छंकरो ऽभिष्टुतः प्रभुः ।
प्रसन्नः पार्वतीनाथः प्राह गंभीरया गिरा ॥ २० ॥

ईश्वर उवाच ॥
मुनींद्रा ब्रह्मविच्छ्रेष्ठाः प्रसन्नो ऽहमतीव वः ।
अयं सत्यवतीसूनुरत्यंतं मम वल्लभः ॥ २१ ॥
मत्प्रसादेन विप्रेंद्रास्तपसा च ममाज्ञया ।
निर्ममे च पुराणानि लोकानां हितकाम्यया ॥ २२ ॥
मत्प्रियार्थं मुनिश्रेष्ठाः पुराणं सकलं तु तत् ।
श्रुत्वा सत्यवतीसूनोर्लोकानां हितकाम्यया ॥ २३ ॥
अन्यान्युपपुराणानि यथेष्टं यूयमास्तिकाः ।
कुरुध्वं सग्रहेणैव(*r.* संग्र०) ममाज्ञा परमा कृता ॥ २४ ॥

श्रीपराशर उवाच ॥
एवमाज्ञां महादेवः कृत्वा वेदविदां वणी(? गणी) ।
प्रसन्नः परया शक्त्या तत्रैवांतरधीयत ॥ २५ ॥
एवमाज्ञापितास्तेन शिवेन मुनयः पुरा ।
श्रुत्वा सत्यवतीसूनोः पुराणं सकलं मुदा ॥ २६ ॥
अन्यान्युपपुराणानि चक्रुः सारतराणि वै ।
आद्यं सनत्कुमारोक्तं नारसिंहं ततः परं ॥ २७ ॥
नांदाख्यं शिवधर्माख्यं दौर्वासं नारदीयकम् ।
कापिलं मानवं चैव तथा चौशनसेरितम् ॥ २८ ॥
ब्रह्मांडं वारुणं कालीपुराणाख्यं तथैव च ।
वासिष्ठं लैंगसंज्ञं च सांबं सौरं तथैव च ॥ २९ ॥
पराशरसमाख्यं च मारीचं भार्गवाह्वयम् ।
*Bhāgavata-Vyākhyāleśa*, annotations on the *Bhāgavatapurāṇa*, by *Gopāla Śarman* (as he calls himself at the end of the 3rd and 4th *skandhas*) or *Gopāla Cakravartin* (as he is called by another hand on the back of the last leaf).

It begins: ओं नमः शिवाय ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
यं ब्रह्मवेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥

एतत्पद्यं टीकाकृता-व्याख्यातत्वात् गायत्र्या च समारम्भ इति पुराणविरुद्धत्वाच्च श्रीभागवतस्य न किन्तु गौडीयपुस्तकस्यादौ सर्वत्र विद्यते इति व्याख्यायते । तस्मै विघ्नविनायकाय नम इत्युत्थापनमेव । किञ्च विहन्ति स्वरूपानन्दैश्वर्यादि इति विघ्नः संसारः तं विनयति खण्डयति । इति विघ्नविनायकः श्रीहरिः तस्मै नम इति वास्तवो ऽर्थः । तमेव नानावादिमतेन समुच्चिनोति यमिति । वेदान्तविदो यं ब्रह्मेति वदन्ति । ब्रह्मैव सदित्यादिश्रुतेः । केचन अन्ये योगिनः परं परमात्मानं । अन्ये सांख्याः प्रधानं पुरुषं तदधिष्ठातारं च । तथान्ये विश्वोद्गतेः विश्वोत्पत्तेः कारणं निमित्तं तार्किकाः । केचन ईश्वरं यज्ञाधिष्ठातारं च । यद्वा ब्रह्मेति संबन्धः । तथा च श्रुतिः । द्वे ब्रह्मणी वेदितव्ये परं चापरं चेति प्रधानमित्यागमिकाः । ततः सर्वोत्पत्तेः । तथा च शैवागमे । आनन्दचिद्घनः स्वामी प्रभुः प्रकृतिरूपधृक् इति । पुरुषं पुरुषरूपं भगवन्तमिति सात्वताः । तथा च । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते इति पुरुषत्वेनाविस्तरामयमात्मेति श्रुतिः । ईश्वरं नियन्तारं अन्तर्यामिणं प्रयोक्तारमिति वा । ईश्वरं कर्तारमिति वा । ईश्वरत्वात्कर्तृत्वमिति श्रीधरस्वामिपादव्याख्यानात् ॥

The author, who closely follows *Śrīdhara-svāmin* as his authority—quoting his commentary constantly under the title of *ṭīkā*—annotates his text throughout from a Vedāntin point of view, just as it offers occasion for his remarks; which seems also the reason why the *skandhas* are treated at such unequal length.

The colophons occur: I., fol. 7*b*; II., fol. 14*a*; III., fol. 17*b*; IV., fol. 21*a*; V., fol. 23*a*; VI., fol. 26*a*; VII., fol. 28*a*; VIII., fol. 29*b*; IX., fol. 30*a*; X., fol. 72*a*; XI., fol. 86*a*, the last *skandha* being despatched in four lines.

*Sk.* III. concludes with the following verse:

इति तृतीयस्कन्धस्य व्याख्यालेशो यथामिति(° मति) ।
गोपालशर्मणा ऽकारि गोपालतोषहेतवे ॥

*Sk.* IV.:

एवं चतुर्थस्कन्धस्य पद्यानां तु क्वचित्क्वचित् ।
गोपालशर्मणा ऽकारि व्याख्यानं हि यथामिति(° मति) ॥

The colophon of *sk.* I. runs: इति प्रथमस्कन्धविवरणलेशः; in all others: ° व्याख्यालेशः ।

It ends: अथ द्वादशे ॥ टीकायां विगता दृश इति दृशः सकाशाद्विगताः अतिप्रियाः संपदः अणिमाद्या इत्यर्थः ॥ मायाकापट्यं सूत्रं यज्ञोपवीताकारमेव न तु वेदाध्ययनसंस्कारादिः स्वीकार एव आयत्तीकरणं न तु वैध(? वेध)संस्कारादिः प्रसाधनं अलंकारः यद्वा प्रसाधनं शुद्धिकरणं कवलं जले मज्जनमेव न मन्त्रादिपूर्वकं । यद्वा प्रसाधनं पापे कृते प्रायश्चित्तं न तु प्राजापत्यादिः ॥ समाप्तश्चायं द्वादशस्कन्धव्याख्यालेशः ॥

The MS. is mentioned by Burnouf (préf., p. clxvi.) under its old number 70.

[H. T. COLEBROOKE.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 3518.

**398 a.** Foll. 203; size 12¼ in. by 4½ in.; careless Devanāgarī writing of 1800 A.D.; eleven lines in a page.

*Bhāgavata-Kathāsaṃgraha* (wrongly called *Citsukhiṭīkā* in some colophons), being partly a commentary or series of glosses on the *Bhāgavatapurāṇa*, and partly (as implied in the title) a mere epitome, generally using the very words of the original, and freely quoting whole verses from it.

A rather inaccurate MS., without any punctuation (which is here supplied in the extracts).

It begins (somewhat corrected): श्रीमदिष्टदेवतायै नमः। श्रीमद्भागवतकथासंग्रहो लिख्यते। ओं नमो भगवते वासुदेवाय ॥

कदाचित्केषां शंका स्यात् भागवतं भिन्नं तन्निराकरोति पद्मपुराणे अंबरीषं प्रति गौतमवचनं।

अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयं ॥

मत्स्यपुराणे पुराणदानप्रस्तावे।

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं * ॥
अष्टादश सहस्राणि पुराणं तत्प्रकीर्तितं।

पुराणार्णवे (*r.* पुराणान्तरे)।

ग्रंथो ऽष्टादशसाहस्रो द्वादशस्कंधसंमितः।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥
गायत्र्या च समारंभस्तद्वै भागवतं विदुः।

श्रीमद्भागवताभिधः सुरतरुस्ताराङ्कुरः सज्जनिः
स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः।
द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं
पर्णान्यष्टदशेष्टदोऽतिसुलभो वर्वर्ति सर्वोपरि † ॥

अथैषा भागवती कथा त्रिविधलोकपवित्रकरी वासुदेवकथाप्रश्न इत्यादि। न केवलं पवित्रकरी पुरुषार्थकरी च।

पिबंति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेन संभृतं।
पुनंति ते विषयविदूषिताशयं
व्रजंति तच्चरणसरोरुहांतिकं ॥

नानाशास्त्रपुराणप्रबंधे चित्तप्रशस्तिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीभागवतशास्त्रं प्रारिप्सुर्वेदव्यासः श्रीकृष्णस्मरणमंगलमाचरति जन्माद्यस्येति। यतो जगतः सृष्टिस्थितिप्रलयं भवति तं परमेश्वरं सत्यं धीमहि ध्यायेम। यो ब्रह्म वेदं [हृदा] मनसैव प्रकाशितवान्। यत्र यस्मिंस्त्रयाणां मायागुणानां तमोरजःसत्त्वानां भूतेंद्रियदेवतारूपः सर्गो ऽमृषा यत्सत्यतयामिथ्या भूतसर्गो ऽपि सत्यवत्प्रतीयते यथा तेजसि वारि बुद्धिः मरीचिकायां प्रसिद्धेत्यादि ॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यश्च श्रैष्ठ्यं दर्शयति धर्म इति ॥ केवलमीश्वराराधनलक्षणो धर्मो ऽत्र निरूप्यते येन धर्मानुष्ठानेन वास्तवं वस्तु श्रीकृष्णो ज्ञातुं शक्यते। अस्तु तावत् श्रवणशीलानामपि ईश्वरस्तत्क्षणात् हृदिस्थो पापानि धुनोति ॥ न केवलं सर्वशास्त्रेभ्यः श्रैष्ठ्यमपि तु तत्परमादरेण सेव्यमित्याह निगमेति।°

This looks more like extracts from *Śrīdharasvāmin's Bhāvārthadīpikā* than an independent commentary such as one would expect to find in the genuine *Citsukhī*,‡ which Burnouf inferred this to be from the title given in the old catalogue. For the most part, however, the work has not even the semblance of a commentary, but consists of the barest outline of the original, composed with a very moderate amount of skill.

The beginnings and colophons of the *skandhas* are as follows:—

I. (foll. 25): इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे एकोनविंशो ऽध्यायः ॥

* Cf. *Bhāg. P.*, XII. 13, 13; and *S'rīdharasvāmin's* comm. on I. 1, 1.

† This is the 7th introductory verse of *S'rīdharasvāmin's Bhāvārthadīpikā* (!).

‡ In *Gopālācārya's Bhāgavatabhūshaṇa* (ed. Bombay 1870; Benares 1874) a commentary by *Citsukhācārya* is mentioned as one of 31 (Sanskrit and Marāṭhī) commentaries on the *Bhāgavatapurāṇa*, and it is also referred to in the *Durjanamukhacapeṭikā* (no. 3546); cf. Burnouf, préf., pp. lxi., lxiii. No such commentary is, however, mentioned in the Cat. Catalogorum (s.v. *Bhāgavatapurāṇa*, and *Citsukha*).

DR.RUPNATHJI( DR.RUPAK NATH )

II. (foll. 8): वरीयानेष ते प्रश्नः । श्रोतव्यानि बहूनि संति किंतु ये ज्ञानिनः तेषां वृथा परमायुः । दिवा° (v. 3, *b* & *a*) । पाठः २ ॥

Col.: इति श्रीभा° म° द्वितीयस्कंधकथासंग्रहो नाम(!) दशमो ऽध्यायः ॥

III. (foll. 21): राजोवाच । कुत्र विदुरमैत्रेययोः संगमः । कथं वा संवादः कदा वा । सूत उवाच । एवं पृष्टो राज्ञा शुकः कथयामास । शुक उवाच । °

Col.: इति श्रीमद्भा° म° तृतीयस्कंधकथासंग्रहः समाप्तिमगमत् ॥

IV. (foll. 19): मैत्रेय उवाच । मनोः शतरूपायां कन्या ३ आकूतिः देवहूतिः प्रसूतिः । आकूतिं रुचये ददौ °

Col. only *skandha* and *adhyāya* (as in I.) without special title.

V. (foll. 17): राजोवाच । कथमात्मारामस्य प्रियव्रतस्य गृहे रतिः । ° Col. without special title.

VI. (foll. 14): राजोवाच । निवृत्तिमार्गः कथितः । तथा स्वायंभुवो मन्वंतरः° Col. without special title.

VII. (foll. 8, marked चि° ७ in margin): राजोवाच । नारायणः सर्वभूतेषु समः । इंद्रस्यार्थे कथं दैत्यानवधीत् । ° Col. without special title.

VIII. (foll. 9, marked चि° ८): राजोवाच । स्वायंभुवस्य मनोर्वंशः श्रुतः किंत्वन्यान्मनून्वद । ° Col. without special title.

IX. (foll. 15, marked चि° ९): राजोवाच । मन्वंतराणि श्रुतानि तेषु हरेर्वीर्याणि च । ° Col. without special title.

X. *b* (foll. 22, marked भा° टी° १०): शुक उवाच । कंसभार्यौ अस्तिः प्राप्तिः । जरासंधाय पित्रे सर्वमुवाच(!) । ° Col. without special title.

X. *a* (foll. 20, marked चि° १०; once चि° टि°): राजोवाच । भवता सोमसूर्ययोर्वंशः कथितः तेषां चरितं च । किंतु यदुवंशे अवतीर्य नारायणः किं कृतवान् वद °

Col.: इति श्रीमद्भा° म° शतसाहस्र्यां संहितायां चित्सुखीटीकायां दशमस्कंधे एकोनपंचाशत्तमो ऽध्यायः ॥

XI. (foll. 16, marked, 1–3 चि° ११; 4–16 भा° टी° ११): अथैकादशस्कंधे कथासंग्रहः ॥ शुक उ° । कृष्णः सरामो दैत्यवधं कृत्वा दुर्योधनादिभिः कोपितान्पांडवान्निमित्तीकृत्य अन्योन्यतः नृपान्हत्वा भूभारं संहृत्य इदमचिंतयत् °

Col.: श्रीमद्भा° म° श° सं° चित्सुखीटीकायां एकादशस्कंधे एकत्रिंशो ऽध्यायः । एवमेकादशस्कंधकथासंग्रहः समाप्तः ॥

XII. (foll. 9, marked भा° टी° १२): शुक उवाच । भविष्यं शृणु । नवमस्कंधे उक्तं बृहद्रथपुत्रो जरासंधः तस्य मार्जारिः तस्य रिपुंजयो भविष्यति । °

It ends with the three verses *Bhāg. P.* XII. 13, 1. यं ब्रह्मा°; 20. नमस्तस्मै भगवते°; 21. योगींद्राय नमस्तस्मै° ॥ ३ ॥ श्रीद्वादशस्कंधकथासंग्रहः समाप्तिमफाणीत् । संवत् १८५७ ° ॥

For another *Bhāgavatakathāsaṃgraha*, see no. 3539.

[H. T. COLEBROOKE.]

## 3519.

**1185 a.** Foll. 66, the first of which is wanting; size 13 in. by 4¾ in.; modern Bengali writing; 8 or 9 lines in a page.

*Bhāgavataṭīkā*, or *Bhāgavata-(gūḍhārtha-)rahasya*, exegetical notes on the *Bhāgavata-purāṇa*—only *skandhas* 1–7 of which are, however, dealt with in this MS.—by *Bhāgavatānanda Gosvāmin*.

The colophon of the different *skandhas* takes the form of the following verse:

रघुनाथकृपादृष्ट्या मया चाप्यल्पबुद्धिना ।
[प्रथम]स्कंदगूढार्थरहस्यं सुनिरूपितं ॥

In the margin of fol. 2 Colebrooke's Paṇḍit has supplied the title, in Devanāgarī: भागवतानंदगोस्वामिकृतश्रीभागवतटीका° पु° पत्र ६३ श्लोक १७७५ ॥ which shows that the last three leaves, written in a different hand from the rest, were added at a later period. At the end, again, these additional leaves are marked thus by the Paṇḍit: भागवतगोस्वामिकृतभागवतटीका । शेषपुत्र ३ श्लोक° ६०



DR.RUPNATHJI( DR.RUPAK NATH )

Properly speaking, the work is not a commentary on the *Bhāgavatapurāṇa*, but a summary of its dogmatical teaching as viewed by the commentator, and set forth in the order of the original text.

It ends: अहमिति आत्मवृत्तान्तेन भक्तिप्रज्ञाया निगुणत्वेन नित्यत्वं प्रतिपादितं ॥

रघुनाथकृपा सप्तम° as above ॥

वालिशो ऽहं महाम्भोधौ निमग्नो रत्नमुद्धरन् ।
रघुनाथ कृपापाङ्गैरवलोकय सस्मितं ॥

इति सप्तमस्कन्दरहस्यं समाप्तं ॥ अथाष्टमस्कन्दरहस्यं ॥ हत इति तमन्वये वर्तमा- end of fol. 66*a*.

[H. T. COLEBROOKE.]

## 3520, 3521.

**2348, 2349.** Foll. 411 (foll. 212 & 213 of which are wanting); size 10½ in. by 4¾ in.; clear Devanāgarī writing of about 1550 A.D.; 10–12 lines in a page.

*Bhāgavatapurāṇa* (*skandha* x.), with short glosses, interwoven with the text, and marked द° टी° (*daśamaskandhaṭīkā*) in the margin. Incomplete.

It begins:

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ति हृदये संवित्तं नृसिंहमहं भजे ॥ १ ॥

विश्वसर्गविसर्गादिनवलक्षणलक्षितं ।
श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् ॥ २ ॥

यत्पादाब्जसुगंधपुष्पतुलसीलोभाद्व्रजंतो ऽप्यहो
  योगिप्रार्थ्यगतिं प्रयांति मधुपा यद्भक्तिहीना अपि ।
अब्भक्षाः पवनाशिनो ऽपि मुनयः संसारचक्रे भृशं
  भ्राम्यंते त्वव(? ऽत्र) गतागतैर्मुहुरहो तस्मै नमो विष्णवे [॥ ३ ॥

दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहं ।
क्रीडद्यदुकुलांभोधौ परमानंदमुदीर्यते (!) ॥ ४ ॥

दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते ।
धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजां ॥ ५ ॥

प्राकृतादिचतुर्धा यो निरोधः स तु वर्णितः ।
तत्तत्प्रसंगतः सृष्टिसंहारादिनिरूपणैः ॥ ६ ॥

कृता नवतिरध्याया दशमे कृष्णकीर्तये ।
आद्यैश्चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयावनेः ॥ ७ ॥

भारं हर्तुं हरेर्जन्म सप्रसंगं निरूप्यते ।
गोकुले मथुरायां च द्वारकायां ततः क्रमात् ॥ ८ ॥

कृष्णलीला त्रिधा प्रोक्ता तत्तद्भेदैस्त्वनेकधा ।
सपंचत्रिंशताध्यायैर्बृहद्वृंदावनादिषु ॥ ९ ॥

गोकुले वसतो लीला वर्ण्यते सुरदुष्करा ।
एकेन यमुनावारिण्यक्रूरेण कृता स्तुतिः ।
एकादशभिराख्याता लीला मधुपुरे कृता ॥ १० ॥

शेषैर्द्वारवतीलीला तन्निर्माणादि वर्ण्यते ।
एवं नवतिरध्याया दशमे विशदार्थकाः ॥ ११ ॥

तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् ।
श्रुत्वा भीतो ऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते ॥ १२ ॥

कृष्णावतारचरितश्रवणामृतनिर्वृतः ।
उक्तानुवादनौत्सुक्याद्राजा पृच्छति तत्पुनः ॥

राजोवाच ॥ कथितो वंशविस्तरो°

Vol. ii. begins with the comment on *adhy.* 33, v. 7; and breaks off with *adhy.* 73, v. 16. Cf. Burnouf, préf., p. clxv. [GAIKAWAR.]

## 3522, 3523.

**387, 388.** Foll. 497 (1–249, 250–497); size 16 in. by 6¾ in.; good, modern Bengalī handwriting; twelve lines in a page.

*Vaishṇava-toshaṇī*, a commentary on the 10th *skandha* of the *Bhāgavatapurāṇa*, by *Sanātana Gosvāmin.*

It begins: श्रीश्रीराधाकृष्णाय नमः ॥

श्रीमन्मदनगोपालं वृन्दारण्यपुरंदरं ।
श्रीगोविन्दं प्रपद्येऽहं दीनानुग्रहकातरं (°कारकं R. M.) ॥

वन्दे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवं ।
प्रेमभक्तिवितानार्थं गौडेष्ववततार यः ॥

श्रीमाधवपुरीं वन्दे यतीन्द्रं शिष्यसंयुतं ।
लोकेष्वङ्कुरितो येन कृष्णभक्त्यमराङ्घ्रिपः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

श्रीभागवतनिष्ठाभ्यै टीकादृष्टिरदायि यैः ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान् ॥

भट्टाचार्यं सार्वभौमं विद्यावाचस्पतीन् गुरून् ।
वन्दे विद्याभूषणं च गौडदेशविभूषणं ॥

वन्दे श्रीपरमानन्दं भट्टाचार्यशिरोमणिं ।
रामभट्टं तथा वाणीविलासं चोपदेशकं ॥

नमामि श्रीमदद्वैताचार्यं श्रीवासपण्डितं ।
नित्यानन्दावधूतं च श्रीमच्चैतन्यवल्लभं ॥

दामोदरस्वरूपादीन् वन्दे चैतन्यपार्षदान् ।
येषां पादरजःस्पर्शादधमो ऽप्युत्तमो भवेत् ॥

वृन्दावनप्रियान् वन्दे श्रीगोविन्दपदाश्रितान् ।
श्रीमत्काशीश्वरं लोकनाथं श्रीकृष्णदासकं ॥

श्रीधरस्वामिपादैर्या व्यंजिता न क्वचित् क्वचित् ।
सेयं श्रीदशमस्कन्धटीका वैष्णवतोषणी ॥

वैष्णवपरितोषः स्याद्यत्र यत्र ततस्ततः ।
लेख्यं वैष्णवसिद्धान्तानुसारेणैव किंचन ॥

येषां प्रोत्साहनेनास्मि प्रवृत्तो ऽत्यन्तसाहसे ।
ते दीनानुग्रहव्यग्राः शरणं मे ऽत्र वैष्णवाः ॥

राधाप्रियप्रेमविशेषपुष्टौ
गोपालभट्टो रघुनाथदासः ।
स्यातामुभौ यत्र सकृत्सहायौ
को नाम सो ऽर्थो न भवेत्सुसिद्धः ॥

श्रीमच्चैतन्यरूपस्य प्रीत्यै गुणवतो ऽखिलं ।
भूयादिदं यदादेशबलेनैव विलिख्यते ॥

श्रीचैतन्यपदाम्भोजगन्धज्ञैरेव वैष्णवैः ।
एषा रसयितुं शक्या टीका वैष्णवतोषणी ॥

Vol. ii. begins shortly before the end of the 39th *adhyāya*.

For another MS. of this work see Rāj. Mitra, Notices, vi., p. 190. The epilogue of that MS. — composed by *Sanātana's* nephew *Jīva Gosvāmin*, and giving an account of the author, and the associates of *Caitanya*, and expressly mentioning this work amongst those composed by *Sanātana* — is not contained in the present MS., which seems to have been copied from one the last leaf of which had been lost, seeing that the last three verses are not commented upon. In the present MS., moreover, the author's name does not occur in any of the colophons of chapters.

According to the Cat. Catt., the work is referred to (? under the title *Vishṇutoshiṇī*) in the *Bhāgavatakramasandarbha* (no. 3530).

It ends: तथा चोक्तं । एतन्निर्विद्यमानानामित्यादि ॥ श्रीभागवतदशमस्कन्धस्य टिप्पणी संपूर्णा ॥ श्लोकसंख्या पूर्वदृष्ट्ये २५५०० ॥ [H. T. COLEBROOKE.]

## 3524.

**877.** Foll. 88; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; good Devanāgarī writing of 1582 A.D.; eleven lines in a page.

Fragment of the *Subodhinī*, a commentary on the 10th *skandha* of the *Bhāgavatapurāṇa*, by *Vallabha Dīkshita*, son of *Lakshmaṇa Bhaṭṭa*, and founder of the *Vaishṇava* sect named after him.

This fragment forms a complete whole in itself in so far as it extends over those five *adhyāyas* of the 10th *skandha* generally known as the *Rāsapañcādhyāyī*, and descriptive of *Kṛishṇa's* sports with the *Gopīs*; viz. *adhys.* 29–33 of our editions, here, however, counted 26–30.

It begins:

ब्रह्मानंदात्समुद्धृत्य भजनानंदयोजने ।
लीलया युज्यते सम्यक् सा तुर्ये विनिरूप्यते ॥

लौकिकस्त्रीषु संसिद्धा तद्द्वारा पुरुषे भवेत् ।
स्वानंदानुभवार्थं हि योग्यतापि निरूपिता ॥

ततो हि भजनानंदः स्त्रीषु सम्यग्विधार्यते ।
तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा ॥ ° [९] ॥

It ends:

विक्रीडितमिति । ° अचिरेणैव धीरो ऽपि भवति । अतः इदं साभिप्रायेण श्रोतव्यमिति फलप्रकरणत्वात् फलमुक्तं ॥ ४० ॥

DR.RUPNATHJI( DR.RUPAK NATH )

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कंधविवरणे त्रिंशत्तमाध्यायविवरणं ॥

संवत् १६३९ वर्षे कार्त्तिकशुदि ६ रवौ श्रद्य श्रीद्वीपमंदिरवास्तव्यं सारस्वतज्ञातीय जोशी (Marāṭhī for *jyotirvid*) देवराजसुतजिता लषितं(लिखितं) पुस्तकं वैष्णवजीवाकेन पठनार्थं लेखकपाठकयोः शुभं भवतु ॥

This MS. is referred to by Burnouf (préf., p. clxvi.) under its old number 1152.

[H. T. Colebrooke.]

## 3525.

**1309.** Foll. 180 (besides three leaves inserted after foll. 71 & 78 to supply defects); size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; seven lines in a page.

*Prakāśa*, a commentary on the 11th *skandha* of the *Bhāgavatapurāṇa*.

The author's name is not given; but a commentary of the same title was composed by *Śrīnivāsa* (for *sk.* III. and X. see Burnell, Tanjore Cat., p. 104*b*).

It begins:

वन्दे वृन्दावनानन्दस्वभावक्रीडनोत्सुकं ।
गोविन्दं गोपरामाणां रमणं चिन्मयविग्रहं ॥

सतामनुग्रहाय भजनौपयिकीं भगवत्कृतामचिन्त्यमाधुरीं लीलामनुवर्ण्य पृथ्वीभवे रूपाणामसतां वधरूपां भगवता साक्षात्परम्परया कृतां लीलां चानुवर्ण्यपरमनिःश्रेयससाधनभजनादिविधिं निरूपयितुं तदङ्गवैराग्याय मौषलप्रसंगं वक्तुं स्वावतारप्रयोजनदैत्यवधमुपसंहरन्नाह कृत्वेति ।

The comment on the last verse, and the colophon run thus:

श्रन्यत्र ग्रन्थान्तरे इह चास्मिन् ग्रन्थे परमहंसगतौ परमहंसप्राप्ये श्रीकृष्णे ॥ इत्येकादशे एकविंशाध्यायप्रकाशः ॥

Burnouf (préf., p. clxvi.) refers to this MS. under its old number 1283. His suggestion that this commentary may belong to *Viśvanātha's Sārārthadarśinī* seems unfounded.

[H. T. Colebrooke.]

## 3526.

**806**a. Foll. 17; size 15¼ in. by 5 in.; modern Bengalī handwriting; nine lines in a page.

*Tattvasandarbha*, the 1st section (*sandarbha*) of *Jīva Gosvāmin's Bhāgavatasandarbha*, in the 7 sections of which — viz.: *Tattvasandarbha*, *Bhagavatsandarbha*, *Paramārthasandarbha*, *Krishṇasandarbha*, *Bhaktisandarbha*, *Prītisandarbha*, and *Kramasandarbha* — the author expounds the doctrines of the *Bhāgavatapurāṇa* in their various aspects, in accordance with the teachings of *Rūpa* and *Sanātana*, and in the order of the original text.

Regarding *Jīva's* authorship see next MS., and H. H. Wilson, Sel. Works, i., p. 167.

It begins: श्रीश्रीरामाय नमः ॥

श्रीकृष्णकृष्णचैतन्य[श्री]सनातनरूपक ।
गोपालरघुनाथाप्त व्रजवल्लभ पाहि मां ॥
तौ संतोषयता सन्तौ ०

The first part of the MS. (foll. 1–12) agrees almost word for word with that of the *Krishṇasandarbha* (no. 3528), to which section this portion has probably to be referred. For a different beginning see Rāj. Mitra, Notices, iv., p. 247. After that it takes a different turn, and (like the MS. referred to) comes to an end rather abruptly on fol. 17*b*:

विरमे[ते]ति (*Bh. P.*, XII. 7, 21) । वृत्तित्रयं जाग्रत्स्वप्नसुषुप्तिरूपं । श्रात्मानं परमात्मानं स्वयं वामदेवादेरिव मायामयत्नानुसंधानेन देवहूत्यादेरिवानुष्ठितेन योगेन वा ततश्च ईहायाः तदनुशीलनव्यतिरिक्तचेष्टायाः ॥ १२ । ७ ॥ श्रीसूतः(? *r.* श्रीसूतोद्दिष्ट०) ॥ उद्दिष्टसंबन्धः ॥ इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीकृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसंदर्भे तत्त्वसंदर्भो नाम प्रथमः संदर्भः ॥ श्रत्र श्लोकसंख्या ४७५ (577 Rāj. M.) ॥ समाप्तश्चायं ग्रन्थः ॥

[H. T. Colebrooke.]

DR.RUPNATH(DR.RUPAK NATH)

3527.

**462 b.** Foll. 26; size 16¼ in. by 5¼ in.; fair, modern Bengalī handwriting (the same as in last MS.); nine lines in a page.

*Paramātmasandarbha,* the 3rd section of *Jīva Gosvāmin's Bhāgavatasandarbha,* treating of the divine spirit.

In the margin of the leaves the treatise is (apparently erroneously) called *Paramārthasandarbha* (cf. Cat. Catt., *s.v.*).

It begins:

तौ संतोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥

अथ परमात्मा विव्रियते ॥ तत्र तं जीवनिरूपणपूर्वकं निरूपयति द्वाभ्यां । क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः । ° (*Bh. P.*, v. 11, 12. 13).

The greater part of the treatise is wanting, the MS. ending abruptly (in the 71st paragraph) at the end of fol. 16*b*, in the middle of a word.

Cf. Rāj. Mitra, Notices, iv., p. 233 (foll. 67).

[H. T. Colebrooke.]

3528.

**462 a.** Foll. 106; the same size and handwriting as in preceding MS.

*Krishṇasandarbha,* the 4th section of the *Bhāgavatasandarbha,* treating of *Krishṇa* as the divine spirit.

It begins: तौ संतोषयता सन्तौ ° ॥ तस्याद्यं ग्रन्थनालेखं ° ॥

अथ पूर्वसंदर्भत्रयेण यस्य सर्वपरत्वं साधितं तस्य श्रीभगवतो निर्धारणाय संदर्भो ऽयमारभ्यते । तत्र प्रथमस्य द्वितीये वदन्तीत्यादिना तदेकमेव तत्त्वं ब्रह्मादितया शब्द्यत इत्युक्तं । तदेव ब्रह्मादित्रयं तस्य तृतीये विविच्यते । °

The subject is treated in 190 paragraphs, ending thus:

गौरश्यामलस्यामलाभिरमलैरद्गौर्विलासोत्सवैर्
नृत्यन्तीभिरशेषमादनकलावैदग्ध्यदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः (°भिः R.M.) सदा
राधामाधवमाधुरीभिरभितश्चित्ते ममाक्राम्यतां (°त्तं °क्र°) ॥

इति कलियुगपावन ° श्रीभागवतसंदर्भे श्रीकृष्णसंदर्भो नाम चतुर्थः संदर्भः समाप्तः ॥

Cf. Rāj. Mitra, Notices, iv., p. 234.

On the first and last pages of this volume the two treatises contained therein are, by Colebrooke's Pandit, assigned to *Rūpa Gosvāmin.* Cf. Burnouf's préf., p. clxvi.

[H. T. Colebrooke.]

3529.

**707.** Foll. 141 (counted 140; no. 61 being double); size 16 in. by 4¾ in.; clear, modern Bengalī writing, by two different hands; nine lines in a page.

*Bhaktisandarbha,* the 5th section of the *Bhāgavatasandarbha,* here ascribed (in the colophon) to *Sanātana Gosvāmin;* treating, in 330 paragraphs, of faith.

It begins: तौ संतोषयता सन्तौ ° ॥ तस्याद्यं ग्रन्थनालेखं ° ॥

अथ पूर्वसन्दर्भचतुष्टयेन संबन्धो व्याख्यातः । तत्र पूर्णसनातनपरमानन्दलक्षणं परतत्त्वरूपसंबन्धि च ब्रह्म परमात्मा भगवानिति त्रिभिराविर्भावतया शब्दितमिति निरूपितं । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः । °

It ends: टीका च अन्तरङ्गां भक्तिमाह त्रिभिः । सर्वभूते चात्मनि चात्मानमीश्वरं स्थितं मामेव ईक्षेतेत्येषा कथंभूतमीश्वरं बहिरन्तःपूर्णमित्यर्थः । तत्कुतः अपावृतं अनावरणं तदपि कुतः यथाखं असङ्गत्वाविभुत्वाच्चेत्यर्थः । अत्र मामेवेति श्रीकृष्णरूपमेवेक्षते न तु केवलान्तर्यामिरूपमित्यभिप्रायेणैवान्तरङ्गां भक्तिमाह इति व्याख्यातं । ततश्च ।

इति सर्वाणि भूतानि सद्भावेन महाद्युते ।
सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्यर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥

इति श्रीसनातनगोस्वामिविरचितः श्रीभक्तिसंदर्भः समाप्तः ॥

[H. T. Colebrooke.]

## 3530.

**814.** Foll. 212 (counted 211; no. 49 being double); size 15¾ in. by 5 in.; modern Bengalī handwriting; eight lines in a page.

*Kramasandarbha,* the 7th (and last) section of *Jīva's Bhāgavatasandarbha,* forming a running (and supplementing) commentary on the *Bhāgavatapurāṇa. Skandhas* I.–V.

It begins: श्रीराधाकृष्णाभ्यां नमः ॥ तौ संतोषयता सन्तौ ० ॥ तस्याद्य ग्रन्थनाले ० लिखति जीवकः ॥

पूर्वं यान्येव वाक्यानि धृतान्यर्थविशेषतः ।
तानि मूलक्रमेणापि धार्याणि क्रमलब्धये ॥
धार्याण्यर्थविशेषार्थमधृतान्यपि कानिचित् ।
तत्रेतिशब्दः कर्तव्यः क्वचिद्व्याख्या च केवला ॥
स्थानं च मुहुरङ्काभ्यां ज्ञेयं संदर्भवाक्ययोः ।
तत्राङ्कात्तत आ शब्दात्तदङ्कादिष्वतीष्यतां ॥
व्याशब्दात्तन्नतव्याख्यागतं तद्वाक्यमीष्यतां (० मिष्यतां) ।
तथा पुनश्चेतिशब्दादन्यत्रापीति दृश्यतां ॥
यत्र व्याख्यागतं वाक्यव्याख्यानं क्वचिदाकृति ।
द्वौ तत्र प्रणवौ लेख्यौ तन्मध्यं तु गृह्यतां ॥
यः स्कन्धाध्याययोरङ्कः स तु तच्छेदकः स्फुटः ।
न तत्र प्रणवापेक्षापीति सर्वत्र वीक्ष्यतां ॥

अथ प्रथमस्कन्धस्य क्रमसंदर्भः ।

At the end of the first *skandha* (fol. 59) we read: इति कलियुगपावन० श्रीरूपसनातनानुशासनभारतीगर्भे सप्तसंदर्भात्मकश्रीभागवतसंदर्भे प्रथमस्कन्धस्य क्रमसंदर्भः समाप्तः ॥

The final colophon runs thus: इति पञ्चमक्रमसंदर्भे षड्विंशः ॥ श्रीभागवतक्रमसंदर्भे पञ्चमक्रमसंदर्भः समाप्तः ॥

For MSS. of the first six *skandhas* of this work see Rāj. Mitra, Notices, iv., pp. 231, 235, 243–45.

On the margin of the last page Colebrooke's Paṇḍit calls the work, in Devanāgarī: श्रीभागवतटी(!) श्रीरूपसनातनगोस्वामिकृता क्रमसंदर्भटीका प्रथमावधि पंचपर्यंत पत्र २११ श्लोक ६५०० ॥ Hence the mistake regarding the authorship of the work, repeated by Burnouf, préf., p. clxvi., from the old catalogue of the India House.

[H. T. Colebrooke.]

## 3531.

**1174** a. Foll. 32; size 13¼ in. by 4¾ in.; good, small, modern Bengalī handwriting; seven lines in a page.

*Śrutistutyarthavivaraṇa,* a philosophical commentary, by *Rādhāmohana,* on the so-called *Vedastuti* (*Śrutistuti* or *Śrutyadhyāya*)—the 87th *adhyāya* of the 10th *skandha* of the *Bhāgavatapurāṇa* — composed with the view of establishing *Krishṇa* as the *Brahman* or divine spirit.

The original text is only vaguely alluded to as '*ayaṃ granthaḥ*' (fol. 8*a*, l. 1 *infr.*), and as being composed in *ślokas* (fol. 3*a*, l. 2).

It begins:

प्रणम्य राधिकाकान्तं श्रीराधामोहनद्विजः ।
पूर्वदृष्ट्या यथाज्ञानं व्याकरोति श्रुतिस्तुतिं ॥

ब्रह्मन्निति टीकायां अप्रमाण्ये कारणरहितानामिति शब्दस्याप्रामाण्ये कारणत्वं प्रमदादिरूपदोषजन्यत्वं वेदवक्तुरीश्वरस्य तादृशदोषरहितत्वेन तदजन्यत्वं वेदानामित्यर्थः तत्प्रश्ने विषयत्वं सप्तम्यर्थः शब्दवृत्तिः । अर्थविशेषबोधानुकूलपदपदार्थयोः संबन्धविशेषः । ०

It ends: कैवल्येन अपृच्यत स्वभावेन निरस्ता तिरस्कृता योनिर्माया येन तं । अत एवाभयं भयनिवर्तकं ॥ ५० ॥ इति श्रुतिस्तुत्यर्थविवरणं ॥

Then follow three lines more, beginning: आपाततोभजनमात्रप्रवृत्त्यर्थं यथाकथकृद्भजने ऽपि लोकानामनर्थनिवृत्तिः स्यादिति ० and ending abruptly: केषाञ्चित् प्राक्तनपुण्यपुण्डकृतपार्षदभावत्वात् —

DR.RUPNATHJI( DR.RUPAK NATH )

The *Vaishṇavatoshaṇī* is frequently quoted in this treatise, which is probably only a part of a larger work on the whole of the 10th *skandha*.

On fol. 1*a* another hand calls the treatise '*śrutyadhyāyaṭīkā śrutistutināmnī*.'

For other commentaries on the same section of the *Purāṇa*, see Rāj. Mitra, Notices, ii., p. 349; vii., p. 222.

[H. T. Colebrooke.]

## 3532.

**2540.** Foll. 101 (of which fol. 42 is wanting, and fol. 57 supplied by another hand); size 11¼ in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

*Nāmacandrikā*, a commentary—by *Raghunātha*, son of *Viṭṭhala* and *Rukmiṇī*, and grandson of *Vallabha*(?)—on the *Kṛishṇasahasranāma*, or *Purushottamasahasranāma*, an enumeration of a thousand (or rather some 1050) epithets of *Kṛishṇa* in 256 *ślokas*, professing to be attached to the *Bhāgavatapurāṇa*.

The commentary begins:

व्रजस्त्रीविप्रयोगाग्निशमनाय य उदितः ।
दिनान्ते ऽद्भुतजीमूतस्तच्छायास्तु सदा मयि ॥ १ ॥

आचार्यचरणद्वंद्वं भक्तिज्ञानाब्जभास्करं ।
नमस्यामि मनःकर्मवाग्भिरंतस्तमोऽपहं ॥ २ ॥

यत्कृपादृष्टिवृष्टेन दैवदग्धो ऽपि तत्क्षणात् ।
प्ररोहति निजेच्छाभिस्तं वंदे कमपीश्वरं ॥ ३ ॥

इह तावत्प्रथमं सकलनिगमकल्पपादपफलरूपश्रीभागवतशास्त्रस्य स्वल्पाक्षरैः सर्वपरिज्ञानार्थं तत्प्रतिपाद्य लीलाविशिष्टश्रीकृष्णसहस्रनामानि विवक्षवो वस्तुनिर्देशरूपं मंगलमाचरन्त्याचार्याः ॥ पुराणपुरुष इति ॥ गीतायामन्यत्रापि पुराणो यः पुरुषः स एव पुरुषोत्तमपदवाच्यः सो ऽत्र श्रीकृष्ण एव । °

Several editions of the original text, under the titles *Purushottamasahasranāma* (-*stotra*) and *Śrīkṛishṇasahasranāma*, have appeared in India.

It ends: ॥ २५५ ॥ श्रीकृष्णेति । श्रीकृष्णभक्तान् पाहीत्यन्वयः ° श्रवणमात्रेणैव परमकल्याणरूप इत्यर्थः ॥ २५६ ॥

कृष्णनामसहस्राख्यमालेयं वाङ्मणीमयी ।
ग्रथिता श्रुतिसूत्रेण रचिता कृष्णपादयोः ॥ १ ॥

श्रीविठ्ठलतनूजेन रुक्मिणीगर्भसंभुवा ।
रघुनाथेन गाथेयं नामसु व्यरचि स्फुटा ॥ २ ॥

इति श्रीमद्वल्लभनन्दनचरणकमलपरागमात्रसनाथरघुनाथस्य कृतौ नामचन्द्रिका समाप्ता ॥

Besides quotations from *Purāṇas* and the epics, illustrative passages are constantly quoted (probably from the *Bhāgavatapurāṇa* itself) simply introduced by '*tad uktam*.' Sometimes we find '*tad uktam bhagavatā*' (foll. 5*b*, 10*a*, 15*b*, 16*b*) or '*bhagavān apy āha* (fol. 12*a*), where *Kṛishṇa* himself seems to speak. Otherwise only: अत एव आचार्यैरप्युक्तं fol. 11*a*; आचार्यैस्तथैवाम्नातं टीकायां fol. 66*b*.

[H. T. Colebrooke.]

## 3533.

**1288.** Foll. 48; size 13 in. by 5 in.; fair Devanāgarī writing of the latter part of last century; nine lines in a page.

*Harilīlā*, an *anukramaṇī* to the *Bhāgavatapurāṇa*, by *Vopadeva*; with a commentary, called *Harilīlāviveka*, by (*Hemādri*, revised by) *Madhusūdana Sarasvatī*.

The text begins:

श्रीमद्भागवतस्कंधाध्यायार्थादि निरूप्यते ।
विदुषा वोपदेवेन मंत्रिहेमाद्रितुष्टये ॥

The commentary begins:

नमः कृष्णाय नित्यैकसच्चिदानंदरूपिणे ।
जगत्सर्गविसर्गादिसाक्षिणे ऽचिंत्यशक्तये ॥



DR.RUPNATHJI( DR.RUPAK NATH )

जयंति वोपदेवस्य वाचो विबुधसंस्तुताः ।
घनसारोज्ज्वलाभासाः क्षीरोदस्येव वीचयः ॥
श्रीमद्भागवतस्यानुक्रमणी तद्विनिर्मिता(हृ° Oxf.) ।
हरिलीलाभिधानेयं यथाबुद्धि विविच्यते ॥

The commentary ends:

हरिलीलाविवेको ऽयं कामराजस्य वेश्मनि ।
कटके रचयां चक्रे तुष्ट्यै हेमाद्रिणा सतां ॥

इति श्रीहरिलीलाविवेकः समाप्तिमगमत् ॥

सरस्वतीश्रीमधुसूदनेन निर्व्यूढमेतद्बुधमोदनेन ।
जनः समस्तो ऽपि रसायनेन व्रजेशभक्तिं व्रजतादनेन ।
शतमष्टौ च पंचाशत्कृत्स्नं ग्रंथविनिर्मितं ॥

For more particulars about this work, cf. Aufrecht, Cat. Bodl., no. 92. See also Burnouf, préf., p. ciii.

For the verse in which the authorship of the commentary is ascribed to *Hemādri*, see the final verse of the same author's *Kaivalyadīpikā* (no. 3542).

[H. T. Colebrooke.]

## 3534.

**484.** Foll. 36; size 12½ in. by 5¼ in.; Devanāgarī writing; twelve lines in a page.

*Harilīlā*, with the *Harilīlāviveka*. A carelessly written, modern MS.

[H. T. Colebrooke.]

## 3535.

**2791b.** Foll. 26; size 10 in. by 5½ in.; good Devanāgarī writing of 1595 A.D.; eleven lines in a page.

*Bhagavadbhaktiratnāvalī*, or simply *Bhaktiratnāvalī*, a compendium of the principal tenets of *Vaishṇava* belief, in the form of verses extracted from the *Bhāgavatapurāṇa*, by *Vishṇupurī*, a native of Tīrabhukti. [A.]

It begins: ये मुक्तावपि निःस्पृहाः प्रतिपदप्रोन्मीलदानंददा°

See Aufrecht, Cat. Bodl., no. 90; Florentine Sansk. MSS., no. 236; Rāj. Mitra, Notices, i., p. 240.

After the 12th chapter this MS. contains 16 verses (instead of 10 of the Oxf. MS.), counted (from the beginning of the work) 396–411, the last three of which, at all events, together with the colophon, evidently belong to the commentary:

साधूनां स्वत एव संमतिरिह स्यादेव भक्त्यर्थिनां°॥[४०]७॥
एष स्यामहमल्पबुद्धिविभवो ऽप्येको ऽपि वा स्यां भुवं
मध्ये भक्तजनस्य मत्कृतिरियं न स्यादवज्ञास्पदं ।
किं विद्याः सरघाः[1] किमुज्ज्वलकुलाः किं पौरुषाः किं [गुणास्
तत्किं सुंदरमादरेण रसिकैर्नापीयते तन्मधु ॥ [४०]८ ॥
इत्येषा बहुयत्नतः कृतवता[2] श्रीभक्तिरत्नावली
तत्प्रीत्यैव तथैव संप्रकटिता तत्कांतिमाला मया[3] ।
अत्र श्रीधरतः समोक्तिलिखने[4] न्यूनाधिकं यत्त्वभूत्
तत्क्षंतु सुधियो ऽर्हथ स्वरचनालुब्धस्य मे चापलं॥[४०]९॥
महायज्ञशरप्राणशशांकगणिते शके ।
फाल्गुने कृष्णपक्षस्य द्वितीयायां सुमंगले ॥ [४]१० ॥
वाराणस्यां महेशस्य सान्निध्ये हरिमंदिरे ।
भक्तिरत्नावली सिद्धा सहिता कांतिमालया ॥ [४]११ ॥

इति श्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंसश्रीविष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलब्धश्रीमद्भक्तिरत्नावलीकांतिमाला(!) समाप्ता ॥

संवत् १६५२ वर्षे मधुमासे सिते पक्षे दशमीसोमवासरे लिखितमेतत् ॥ करकृतमपराधं क्षंतुमर्हंति संतः ॥ शंकरपुरकृतालयेन रामकृष्णेन लिखितेयं भगवद्भक्तिरत्नावली ॥ भट्टश्रीविठ्ठलदास आत्मपठनार्थं च परोपकाराय ॥ शिवमस्तु सर्वजगतः ॥

There is some difficulty in reconciling the date of the work (Śaka 1555 = A.D. 1633–4;

---

[1] शरघा मधुमक्षिकाः comm. (see next MS.).

[2] खलु कृता B. [3] प्रिया B.

[4] श्रीधरमुक्तिलिखने(!) B; श्रीधरसत्तमोक्तिलिखने C.

DR.RUPNATHJI( DR.RUPAK NATH )

cf. Florent. MS.) with the date (Saṃv. 1652 = A.D. 1595) of the present MS., which, as far as appearance goes, one could hardly take to be more modern. [Coll. of Fort William.]

## 3536.

**2592.** Foll. 92; size 11¾ in. by 5 in.; fair Devanāgarī writing of 1732 A.D.; nine lines in a page.

*Vishṇupurī Tairabhukta's Bhagavadbhakti-ratnāvalī*, with the author's own commentary, entitled *Kāntimālā*. [B.]

See Rāj. Mitra, Notices, i., p. 240. The references to the *Bhāgavata* are always given, but they do not seem to correspond to the divisions of our editions.

The concluding verses of the preceding MS. are explained as far as v. 408, after which the text of v. 409 is given, followed by the colophon: इति श्रीपुरुषोत्तम० भक्तिरत्नावली सकांतिमाला समाप्ता ॥

Then follow the verses:

> इति लिखनमनर्घ्यं यत्स्वविज्ञानहेतोर्
> उत भवतु समस्तो दर्शनाद्विष्णुभक्तः ।
> प्रचरतु हरिभक्तिग्राहिणी कापि शक्तिस्
> तदखिलमखिलात्मन्नार्पितं माधवेन ॥
> श्रीकांतस्य तमालशाखिन इव क्लेशच्छिदो जन्मना
> नानाकेलिकथाफलानि मधुराण्याजज्ञिरे यद्भुवि ।
> लक्षीकृत्यपरिक्षितं शुकमुखाद्विस्तारितं तद्रसः
> स्वैरं विष्णुपुरीकृतं ग्रथनमत्पात्रेण संपीयतां ॥

महायज्ञ० गणिते शके । फाल्गुने कृष्ण (marg. corr. शुक्ल) पक्षस्य० ॥ वाराणस्यां महेशस्य० ॥

इति श्रीहरिजीव्यासस्य पुस्तकं श्रीरामनाथेनालेखि ॥ संवत् १७८९ ॥

[Mackenzie Collection.]

## 3537.

**1184 c.** Foll. 39; size 13½ in. by 4¾ in.; fair, modern Bengalī handwriting; eleven lines in a page.

*Kāntimālā*, without the text of the *Bhakti-ratnāvalī*. [C.]

It begins: सत्सदाचारानुमितश्रुतिबोधितप्रारिप्सितान-विघ्नपरिसमाप्तिकारणं श्रीकृष्णकीर्तनरूपं मङ्गलमाचरति श्री-भागवतपद्येनैव ०

In this MS. the verses up to 407 are likewise explained, and then the text of v. 408 is given; but the MS. omits the last two verses containing the date.

Colophon: इति श्रीभक्तिरत्नावली(!) समाप्ता ॥

[H. T. Colebrooke.]

## 3538.

**946.** Foll. 72; size 12 in. by 4¾ in.; fair, modern Devanāgarī writing; eight lines in a page.

Fragment of *Vishṇupurī's Bhaktiratnāvalī*, with an anonymous commentary in Hindi.

As far as fol. 67, the text (vv. 1–87 of the 1st chapter) agrees on the whole with that of the preceding MSS. After this there are only five more *ślokas*, which, however, are not found in this connection in the other MSS.

[H. T. Colebrooke.]

## 3539.

**1234.** Foll. 161 (counted 162, no. 153 being passed over); size 12½ in. by 6 in.; good, modern Bengalī handwriting; twelve, from fol. 64 ten, lines in a page.

*Bhāgavata-Kathāsaṃgraha*, also called *Hari-bhaktitaraṅgiṇī*, an epitome of the *Bhāgavata-purāṇa* with partial quotations of whole verses from the original, by *Keśava Śarman*, or *Keśava Pañcānana Bhaṭṭācārya*, as he calls himself at the end of *skandha* x.



DR.RUPNATHJI( DR.RUPAK NATH )

It begins :

प्रणम्य जगतामीशं श्रीमत्केशवशर्म्मणा ।
कथा भागवती वाच्या हरिभक्तितरङ्गिणी ॥

अशीतिलक्ष इत्यादि यैर्नै श्रुतमित्यादि ।
आगन्तुकव्याधिविघातहेतुरापीयते तिक्तकषायकादि ।
भवस्थिरव्याधिविनाशनाय न पीयते किं मधुरं पुराणं ॥

अथ नानाशास्त्रपुराणप्रबन्धैश्चित्तप्रसादमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्य परमदेवतानुस्मरणलक्षणं मङ्गलमाचरति ॥

यं ब्रह्मवेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ॥

तस्मै नमः यं वेदान्तिनो ब्रह्म वदन्ति मीमांसकाः परं कर्मात्मकं सांख्याः प्रधानं पाताञ्जलाः पुरुषमन्तर्यामिनं नैयायिका ईश्वरमिति जगत्कारणं । वैशेषिका अपि वाशब्दात्परमात्मानं वदन्तीति सर्वत्रान्वयः ॥ सर्वविघ्ननाशकाय सर्वदर्शनसिद्धमुक्त्वा वेदान्तप्रतिपाद्यमेव परमवस्त्वित्याह ॥ ओं जन्माद्यस्य यतो° (*Bh. P.* I., 1) ॥ तं परं परमेश्वरं धीमहि ध्यायेम । अस्य विश्वस्य यतो जन्मादि जन्मस्थितिभङ्गं यतो भवति । अर्थेषु कार्येषु सर्वत्र सद्रूपेणान्वयात् । °

The *skandhas* end as follows: I., fol. 18*b*; II., fol. 21*b*; III., fol. 31*a*; IV., fol. 41*b*; V., fol. 49*b*; VI., fol. 58*a*; VII., fol. 63*b*; VIII., fol. 72*a*; IX., fol. 84*b*; X., fol. 144*a*; XI., fol. 155*a*; XII., fol. 162*b*.

It concludes with the two verses (*Bh. P.* XI., 20, 21): नमस्तस्मै भगवते° ॥ योगीन्द्राय नमस्तस्मै° ॥ followed by the colophon: इति श्रीभागवतकथासंग्रहः समाप्तः ॥

On the margin of the last page another hand has written, in Devanāgarī, the title *Bhāgavatasaṃgrahakathā*; and on fol. 1*a*, in Bengalī and Devanāgarī, *Bhāgavatasaṃgraha*.

The old number of the MS. was 464, under which the work is referred to by Burnouf, préf., p. clxvi.

For another work of the same title see above, no. 3518. [H. T. COLEBROOKE.]

## 3540.

**1491c.** Foll. 51; size 15½ in. by 4¼ in.; modern Bengalī handwriting; six lines in a page.

*Saṃkshepa-Bhāgavatāmṛita,* or *Laghu-Bhāgavatāmṛita,* an epitome of authoritative opinions regarding the divine nature of *Kṛishṇa,* his attributes, and his identity with the different manifestations of *Vishṇu;* abridged, by *Rūpa Gosvāmin,* from a more extensive compendium compiled by his brother, *Sanātana Gosvāmin.*

The MS. contains only the first *khaṇḍa,* called *Śrīkrishṇāmṛita,* while the whole work seems to consist of two *khaṇḍas,* the second being apparently devoted to the praise of *Kṛishṇa's* female companion, *Śrī.*

It begins (with tho numbers added):

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ १ ॥ Cf. [p. 1275*b*, note.

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदं ।
यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ २ ॥

मुखारविन्दनिस्यन्दमरन्दभरतुन्दिनाः(°ला) ।
ममानन्दं मुकुन्दस्य संदुग्धां वेणुकाकली ॥ ३ ॥

श्रीचैतन्यमुखोद्गीर्णा हरे कृष्णेति वर्णकाः ।
मज्जयन्तो जगत्प्रेम्णि विजयन्तां तदाह्वयाः ॥ ४ ॥

श्रीमत्प्रभुपदाम्भोजैः श्रीमद्भागवतामृतं ।
यद्व्रतानि तदेवेदं संक्षेपेण निषेव्यते ॥ ५ ॥

इदं श्रीकृष्णतद्भक्तसंबन्धादमृतं द्विधा ।
आदौ कृष्णामृतं तत्र सुहृद्भ्यः परिविष्यते ॥ ६ ॥

निर्बन्धं युक्तिविस्तारे मयात्र परिमुञ्चता ।
प्रधानत्वात्प्रमाणेषु शब्द एव प्रमाण्यते ॥ ७ ॥

अतस्तैः शास्त्रयोनित्वादिति न्यायप्रदर्शनात् ।
शब्दस्यैव प्रमाणत्वं स्वीकृतं परमर्षिभिः ॥ ८ ॥

किं च तर्काप्रतिष्ठानादिति न्यायविधानतः ।
अमीभिरेव सुव्यक्तं तर्कस्यानादरः कृतः ॥ ९ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

अथोपास्ये मुमुख्यत्वं वक्तुमुत्कर्षभूमतः ।
कृष्णस्य तत्वरूपाणि निरूप्यन्ते क्रमादिह ॥ १० ॥
स्वयंरूपस्तदेकात्मरूप आवेशनामकः ।
इत्यसौ त्रिविधं भाति प्रपञ्चातीतधामसु ॥ ११ ॥
तत्र स्वयंरूपः ॥
अनन्यापेक्षि यद्रूपं स्वयंरूपः स उच्यते ॥ १२ ॥
यथा ब्रह्मसंहितायां ॥ ०

The work is founded mainly on the *Bhāgavatapurāṇa*; but, by way of illustration, extracts are given from other *Purāṇas* and similar works, such as *Vishṇudharmottara*, *Mathurākhaṇḍa* of the *Skandapurāṇa* (fol. 44b), *Bṛihadvaishṇava* (fol. 42a), *Nāradapañcarātra*, *Bhagavadgītā*, and *Harivaṃśa*. Each passage is followed by a short gloss (*kārikā*) added by the compiler.

It ends: यथा तन्त्रे ।

कन्दर्पकोट्यर्बुदरूपशोभा
नीराज्य पादाबुलखाञ्चलस्य (!) ।
कुत्राप्यदृष्टश्रुतिरम्यकान्तेर्
ध्यानं परं नन्दसुतस्य वक्ष्ये ॥

द्वादशमे च । त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोगाद्द्विद्रुममृगाः पुलकान्यबिभ्रन्निति ॥ इति संक्षेपभागवतामृते श्रीकृष्णामृतं नाम पूर्वखण्डं ॥

The title '*Laghubhāgavatāmṛita*' — which also appears in a MS. in Bühler's Cat. of Gujarāt etc. MSS., ii., p. 26 (where no author's name is given) — is inscribed, both in Bengalī and Hindī, on the first page of the MS. It is doubtless meant to convey the same idea as the '*Saṃkshepabhāgavatāmṛita*' of the colophon. In Kielhorn's Cat. of Sansk. MSS. in the Central Provinces (Nagpur 1874) a work of the latter title is attributed (probably erroneously) to *Kṛishṇacaitanya* himself; whilst in Stein's Cat. of Kashmir MSS. (p. 225) no author is mentioned. A *Bhāgavatāmṛita* is mentioned as one of *Sanātana's* works at the end of a MS. (Rāj. Mitra, Notices, vi., p. 193) of that author's *Vaishṇavatoshiṇī* (in an epilogue added thereto by his nephew, *Jīva Gosvāmin*); cf. also Wilson, Essays on the Rel. of the Hindus, i., p. 167; and according to the commentator's explanation (see next MS.) of v. 5 of the introduction, the present work is an abridgment of *Sanātana's* compendium. Wilson, *l.c.*, also credits *Rūpa* with a *Laghubhāgavata*, or abridgment of the *Bhāgavatapurāṇa*.

For another MS. of the same section of the work, see Roth's Cat. of Tübingen MSS., p. 16. [H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3541.

**1418.**—Foll. 116; size 12½ in. by 4¾ in.; fair, modern Bengalī handwriting; six lines in a page.

A commentary on the *Saṃkshepa-Bhāgavatāmṛita*, by *Rādhāmohana Śarman*. Incomplete.

It begins:

राधामुखेन्दुकिरणामृतलोभलोल-
चक्षुश्चकोरपरिहारितमालरूपः ।
रज्यन्नवीनरमणीनलिनीपरीतः
को[ऽ]पि व्रजेन्द्रतनयः परिपातु विश्वं ॥

नत्वा श्रीचरणाम्बुजं परिनमद्वृन्दावनान्तःस्थली-
क्रीडाकाननलम्पटस्य मुरलीरावामृतोद्वर्षिणः ।
श्रीमद्भागवतामृतं सुमधुरं व्याख्यायते श्रीमता
राधामोहनशर्मणा भगवतो ऽद्वैतस्य वंशोद्भुवा ॥

वन्दे चैतन्यचन्द्रं तमद्वैताद्वैतविग्रहं ।
नित्यानन्दमयं कृष्णचरणाम्बुजलिप्सया ॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिकूलविघ्नपरम्परापराभावुकश्रीकृष्णप्रणतिरूपं मङ्गलमादौ शिष्यशिक्षायै दशमनारदोक्तपादान् * दर्शयति । नमस्तस्मा इति ।

* *Bhāg. P.* (Bomb. 1853) x., 87, 46: नारद उवाच ॥
नमस्तस्मै भगवते कृष्णायामलकीर्तये ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥

Fol. 5*b*: श्रीकृष्णस्वरूपनिरूपणे ग्रन्थे ऽस्मिन् शिष्यप्रवृत्त्यर्थं यो धत्त इत्यादिना प्रदर्शितभक्त्यानुग्राहकत्वदार्ढ्याय परमाराध्यत्वप्रदर्शनाय च एकादशस्यपद्यमुद्योतयति । कृष्णवर्णमिति (*Bh. P.* xi., 5, 33) ।

Fol. 8*b*: भगवन्नमस्कारादिकं तत्संपर्कमात्रेण वेणुध्वनिरपि(रेणु° MS.) ममाभीष्टं संपादयितुं समर्थं इति मनसिकृत्य तमेव प्रार्थयते । मुखारविन्देति । ° मुखारविन्दात् निस्यन्दो निर्गमनमरन्दभरः मकरन्दनिकरस्तेन तुन्दिला तत्पूरितत्वेन मधुरा(!) मम मयि आनन्दं आनन्दस्वरूपं श्रीकृष्णं तद्भावं वा संदुग्धां प्रकटयतु । °

Fol. 9*a*: इदानीं शिष्यप्रवर्त्तनाय ग्रन्थस्य प्रेक्षावत्संमतत्वमाह श्रीमदिति श्रीमत्प्रभुमुखाम्भोजैः श्रीमद्भव्यसनातनगोस्वामिमुखपद्मैः मुखचन्द्रैरिति वा यद्भातानि विस्तारितं भागवतामृतं भगवत्स्वरूपनिरूपणादिरूपममृतं एतेन भागवतममृतं यच्चेति व्युत्पत्त्या ग्रन्थनामापि ज्ञेयं तदेव तदर्थतात्पर्यैकमेव इदमनुपदवक्ष्यमाणभागवतामृताख्यं संक्षेपेण निषेव्यते निबध्यते मया रूपगोस्वामिनेति शेषः ।

As contained in this MS., the commentary does not even extend to the end of the first section, but breaks off abruptly, in the middle of fol. 116*b*, in the comment on a *kārikā* — मधुरामिति विस्पष्टं मथुरामण्डले व्रजं । तदाखीं सुहृदां तत्र मधुपुर्यामभावतः ॥ — found on fol. 48*a*, l. 1 of the MS. of the text. There being no colophon, the title of the commentary is not given in the MS. itself; but on fol. 1*a* another hand has inscribed, in Devanāgarī, the erroneous title श्रीराधामोहनगोस्वामिकृतवृहद्भागवतामृतं.

The MS. is referred to, under its old number 1532, by Burnouf, préf., p. clxvi.

[H. T. Colebrooke.]

## 3542.

**2034.** Foll. 145; size $12\frac{3}{4}$ in. by $5\frac{1}{4}$ in.; good Devanāgarī writing, of about 1700 A.D.; 7–14 lines in a page.

*Muktāphala*, a summary of *Vaishṇava* doctrines as propounded in the *Bhāgavata-purāṇa*; composed by *Vopadeva*, son of the physician *Keśava*, and pupil of *Dhaneśa*; with a commentary, entitled *Kaivalyadīpikā*, composed (at his father's house in Kaṭaka) by *Hemādri*, son of *Kāmadeva*, and at the time minister of king *Rāmarāja* (or *Rāmacandra*, A.D. 1271–1309) of Devagiri. [A.]

*Vopadeva's* work, being exclusively based on the *Bhāgavata*, is sometimes described * as a mere commentary or gloss on that *Purāṇa*. It consists of three divisions, treating respectively: (*a*) of the nature of *Vishṇu*, and the true mode of his worship (*Vishṇubhakti*), foll. 1–54; (*b*) of the duties and rites to be performed by his votaries (*Vishṇubhaktijanya*), foll. 54–74; (*c*) of the nine different grades or dispositions (*rasa*) to be attained by them successively in the perception of his all-pervading power, foll. 75–145.

The text begins:

विष्णुं पंचात्मकं वंदे भक्त्याष्टादशभेदया ।
सांगवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥ १ ॥

विष्णुप्रीत्यै चतुर्वर्गचिंतामण्यामजीगणत् ।
भेदान्व्रतानां दानानां तीर्थानां मोक्षवर्त्मनां ॥ २ ॥

मूर्तिप्रासादपूजानां हेमाद्रिर्गणकाग्रणीः ।
विष्णुभक्त्यंगभक्तानां गणयत्युक्तसारधीः ॥ ३ ॥

मुक्ताफलेन ग्रंथेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यंबुना मुग्धमार्कंडेयशिशुश्रिया ॥ ४ ॥

मुक्ताफलं सुखचितस्फुटभक्तिभेद-
प्रत्यक्षराजितलसत्पदपद्मरागं ।
हेमाद्रिसंभवसुवर्णनिवेशरम्यं
कंठे कुरुध्वमवरुंध्वमपूर्वलक्ष्मीं ॥ ५ ॥

तत्रादौ विष्णुप्रकरणं ॥ तत्र विष्णोर्लक्षणं भेदाश्च ॥

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च यो ऽवशिष्येत सो ऽस्म्यहम् ॥ ६ ॥

* As, for instance, in *Gopālācārya's Bhāgavatabhūshaṇa*, printed at Bombay and Benares.

DR.RUPNATHJI( DR.RUPAK NATH )

स द्वेधा। निराकारः साकारश्च। अनवच्छिन्नं चैतन्यं निराकारः। सत्त्वावच्छिन्नं चैतन्यं साकारः॥ रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः। रजसा ब्रह्मा। तमसा रुद्रः। शुद्धे विष्णुरेव। ०

*Hemādri's* commentary, *Kaivalyadīpikā*, begins:

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघम्
    जातस्युपामिह वशे परिकर्ममुख्यैः।
तच्छुद्धसत्त्वमुकुरप्रतिबिंबभावात्
    कृष्णाभिधामुपगतं भुवि भावयेम॥ १॥

समूलघातं प्रणिहत्य योऽधं
    मृणालिनीं चेतयते मनीषां।
यत्पादसंगाज्जगती कृतार्था
    गुरुं विवस्वंतमिहानुवे तं॥ २॥

श्रीवोपदेवस्य निधेर्गुणानां
    जयंति ते ते भुवि वाग्विलासाः।
विकुंठ्य येषु स्वयमीश्वरोऽपि
    सर्वज्ञशब्दं स्वमवैति रूढं॥ ३॥

अस्मिन्नसमस्मिन्नपि वाङ्मयाब्धाव्
    अपारपारीणमनीषयोच्चैः।
विवृण्वतश्चिज्जडवस्तुभेदं
    गुणा गणेया भुवि नास्य कैः कैः॥ ४॥

अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो
    मुदं ददंते ऽत्र न कस्य सूक्तयः।
मुक्ता मृषाद्वेषिमनांस्यनारतं
    वियोगिहृंदीव कलाः कलानिधेः॥ ५॥

तेन मुक्ताफलं तेने यच्छ्लोकमनुगृह्णता।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकां॥ ६॥

मूर्ध्नां त्रिलोकगुरुणाधिमिवेंदुलेखां
    सर्वज्ञमंडनकरीमकलंकशंकां।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
    कुर्यामिमां तदिह यांतु बुधाः प्रसादं॥ ७॥

इह मुमुक्षूपकाराय रुचिरं प्रकरणं चिकीर्षुराचार्यस्तस्य परिसमाप्तिप्रचयपरिपंथिविघ्नविघाताय शिष्टाचारपरिपालनाय च समुचितेष्टदेवतां वंदमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रवृत्त्संगतया संक्षिप्याह। विष्णुमित्यादि। ०

From the comments on vv. 2–5 (throughout interpreted in a double sense) we extract the following passages:

इह च स्वकर्तृकत्वे ऽपि यदुराजमहामंत्रिणा हेमाद्रिणा अभ्यर्थितस्तत्कर्तृकत्वं ख्यापितवान्। तदेवाह। चिंम्निवत्यादि। चतुर्णां धर्मादीनां वर्गश्चतुर्वर्गः। तत्रेष्टसमर्पको ग्रंथश्चिंतामणिः। मणिर्द्वयोरित्यभिधानात् स्त्रीत्वं तस्यां हेमाद्रिव्रतादिभेदानन्नीगणत्। ०॥ गणकाग्रणीः। गणकेषु देशकोशयोरायव्ययौ लिखत्सु अग्रणीर्मुख्यः। ०॥ सती प्रशस्ता भागवतमेव शुक्तिर्जन्मस्थानं यस्य तत्तथा तेन भक्तिर्भजनं कर्तुरनुरागः स एव स्वात्यंबु यस्य तत्तथा तेन। ०। मुग्धो भ्रांतः मार्कंडेयो यस्मिन् शिशौ शिशुरूपे विष्णौ स तथा तस्य श्रीः शोभा यस्मात्तत्तथा तेन। भावितपुंस्कत्वाद्वेभाषाभावः। मार्कंडेयो हि हिमवति पुष्पभद्रातीरे भगवन्मायां दिदृक्षुरतिदीर्घं तपस्तप्यमानः कदाचित्प्रसन्नेन भगवता प्रकटितायां मायायां निखिललोकसंप्रबोदके मुहुर्मज्जनोन्मज्जनानि भजन् अकस्माद्वटपर्णसंपुटे शयानमतिसुंदरं भगवद्बालमालोक्य प्रमुमोह। यो हि मुनिः पुंजिकस्थलादिविभ्रमे पुनर्विभ्रम सो ऽप्यत्र मुग्ध इति शिशोः सुंदरत्वमुक्तं तस्याप्येतदलंकार इत्यतिशयः। एकं च मुक्ताफलं प्रायेण बालानलं करोतीति भंगिविशेषोक्तिः। ०॥ हेमाद्रिः पुरुषविशेषः तत्संभवानि तेनोच्चारितानि सुष्ठु सुरेखाणि यानि वर्णानि अक्षराणि तेषां निवेशेन तत्र तत्रोचितस्थानेषु न्यासेन रम्यं सुश्लिष्टं। वर्णग्रहणेन स्ववाक्यानां स्तोकत्वमुक्तं। तत्कंठे कुरुध्वं कंठस्थं यथा स्यात्तथा ऽभ्यस्यध्वमित्यर्थः। ०

The text of the *Muktāphala* ends (with the numbers supplied from MS. B):

उन्नायतीनामरविंदलोचनं
    व्रजांगनानां दिवमस्पृशद् ध्वनिः।
दध्नश्च निर्मंथनशब्दमिश्रितो
    निरस्यते येन दिशाममंगलं॥ [४५]॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
    ध्यायंतु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे
    ऽप्यावेश्यतां नो मतिरप्यहेतुकी॥ [४६]॥

चतुरेण चतुर्वर्गचिंतामणिवणिज्यया।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात्॥ [४७]॥

निर्मथ्य पयसां राशिं मंदरः कौस्तुभं न्यधात्।
हेमाद्रिर्वचसां मुक्ताफलं रत्नं हृदि प्रभोः॥ [४८]॥

DR.RUPNATHJI(DR.RUPAK NATH)

हेमाद्रिमाद्रियत एव गुणेन येन
तेनैव पूरितसुखेन सुबद्धमेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकंठकुहरे सुषमास्य काचित् ॥ [४९] ॥

द्वे एव चित्रे रामस्य सिंधुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यवृत्तप्रदक्षिणः ॥ [५०] ॥

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥ [५१] ॥

स्वर्गे गीर्वाणनाथः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजः फणिपतिसदृशो यस्य गायंति कीर्तिं ।
यत्तीर्णः शास्त्रपाथोनिधिमखिलमदो ग्रंथरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः केशविर्वोपदेवः ॥

इति मुक्ताफलं समाप्तं ॥

The last verse is not found in the other MSS., nor is it explained in the *Kaivalya-dīpikā*, from which we extract a few passages of comment on the preceding verses (again explained in a double sense):

इह च स्वकर्तृके ऽपि यदुराजमहामंत्रिणा हेमाद्रिणाऽभ्यर्थित आचार्यैस्तत्कर्तृकत्वं ख्यापितवानिति प्रागुक्तं तदेतत्पर्यंते ऽपि स्फावयन्नाह चतुरेणेति । चतुर्वर्गचिंतामण्याख्ये ग्रंथमहोदधेर्वेणिज्या तया चतुरेण विदितग्रंथरचनारीतिविशेषेण । यथा हि वणिज्यायां तत्तद्देशेभ्यस्तानि प्रियवस्तून्याहृत्य पुमान् तत्तद्विषये चतुरो भवति तथैतेन तत्तत्स्मृतीतिहासपुराणादिभ्यस्तानि तानि निःशेषव्रतदानतीर्थमोक्षादिप्रतिपादनपराणि वाक्यान्याहृत्य ग्रंथरचनायां कौशलमासादितं । ततस्तयैव रेखया भागवतस्य तत्तत्स्कंधेभ्यस्तानि तानि विष्णवादिवस्तुचतुष्टयप्रतिपादनपराणि पद्यान्युद्धृत्य मुक्ताफलाख्यं प्रकरणं कृतं । ० [४७] ॥ ० पयसां राशिं क्षीरोदं मंदरो मंथाचलः न्यधात् निक्षिप्तवान् हेमाद्रिर्मेरुः कामदेवात्मजश्च वचसां राशिं भागवताख्यं निर्मथ्य मुक्ताफलाख्यं रत्नं ग्रंथं च प्रभोः श्रीकृष्णस्य हृदि न्यधादित्यर्थः ॥ [४९] ॥ द्वे एवेति । रामो दाशरथिर्देवगिरीश्वरश्च तस्य पुरा त्रेतायां चरित्रेषु मध्ये द्वे एव चित्रे यत्सिंधुः समुद्रो बद्धः यच्च हेमाद्रिर्मेरुः स्वमुपानीतः स्वस्य निकटीकृतः । किंभूतस्य सूर्यस्य रवेरावृत्त्या आवृत्तिं गता प्रदक्षिणी परिभ्रमणी यस्मिन्मेरौ स तथा । ० । अन्यत्रैव तस्य तु रामस्य अधुना यदुकुले अवतीर्णस्य द्वे एव चित्रे यत्सिंधुर्गजमदो बद्धः । सिंधुशब्देन तद्वंतो गजा लक्ष्यंते । सिंधुरिति जातावेकवचनं । प्रत्यर्थिनो राज्ञः पराभूय तत्सिंधुराः स्वगृहे बद्धा इत्यर्थः । यच्च हेमाद्रिर्द्विजविशेषः स्वमुपानीतः स्वसाम्राज्यस्य महामात्यस्य पदे ऽधिकर्तुमित्यर्थः । कीदृशः । सूरिषु पदवाक्यमप्रतीति (*r.* पदवाक्यप्रमाणादिप्रवीणेषु with B, C) आवृत्ता शतशः क्रियमाणत्वादावृत्तिं गता प्रकृष्टा दक्षिणा दानं यस्य स तथा । को हि नाम बृहस्पतिमपि प्रज्ञया प्रहसतस्तादृशस्य मंत्रस्य शिरोमणेर्निजनिकटीकरणाच्चित्रीयते ॥ [५०] ॥ विद्वद्धनेशशिष्ये[णेत्यतिरोहितार्थं] ॥ [५१] ॥ ० । यत्किंचिदत्रभवतः खलु वोपदेवसूरेः कृतिर्निजधिया परिवर्त्यते मे । उद्दिश्य(!) कोविदजनोपकृतिं तदेतदाराधनं भगवतः परमेश्वरस्य ॥

छायावतीममतरामपि नैकचित्रां
पुण्यप्रपामिव भुवि प्रथितां तदीयां ।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
ग्रंथः कृतो ऽत्र कृतिनां हृदुपैति तेषां[1] ॥

अतत्त्वे तत्त्वधीर्येषां तत्त्वे वातत्त्वधीर्नृणां ।
न तानानंदयंत्येता वोपदेवस्य सूक्तयः ॥

यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबंधा दश
प्रख्याता नव वैद्यके ऽथ तिथिनिर्धारार्थमेको ऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्ते(°क्तौ B, C) त्रय-
[स्तस्य भु(°स्य च C)-
व्यंतर्वाणि(भूगिर्वाण C)शिरोमणिरिव गुणाः के केन
[लोकोत्तराः ॥

टीका मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकां ।
हेमाद्रिः कटके चक्रे कामराजस्य वेश्मनि ॥

इति हेमाद्रिदेवविरचिता मुक्ताफलटीका समाप्ता ॥

[Gaikawar.]

## 3543.

**55.** Foll. 163; size $10\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; careless Devanāgarī writing of the latter part of last century; ten lines in a page.

*Vopadeva's Muktāphala* (foll. 52), followed by *Hemādri's Kaivalyadīpikā* (foll. 112; part of fol. 91, and the whole of fol. 92 being, however, left blank). [B.]

---

*Śivapurāṇa*, or rather that section of it commonly passing under that name, in 75 (or 76) *adhyāyas*. [A.]

It begins:

जगतः पितरं शंभुं जगतो मातरं शिवां ।
तत्पुत्रं च गणाधीशं नत्वैतद्वर्णयाम्यहं ॥

For a full analysis see Aufrecht, Cat. Bodl., no. 113. In this MS. the chapters are not numbered. It ends:

इति तस्य वचः श्रुत्वा ह्यानंदं परमं गताः ।
तं चैव पूजयामासुर्नानावस्त्रैः सुशोभनैः ॥
चंदनैश्च विचित्रैश्च नानालंकरणैस्तथा ।
नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्वकं ॥
आशीर्भिर्विविधाभिश्च वर्धयामासुरंजसा ।
संतुष्टाश्चैव ते सर्वे संतुष्टः सूत एव च ॥
परस्परं च संतुष्टाः शिवभक्तिपरायणाः ।
एतदेव परं मत्वा नमंति च भजंति च ॥
एवं यः शृणुयादत्र सर्वान्कामानवाप्नुयात् ।
अंते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात्पुनः ॥ ० ॥

इति श्रीशिवपुराणे व्याससूतसंवादे ज्ञानप्रकरणनिरूपणो नामाध्यायः ॥

In Rāj. Mitra's description of a MS. containing three of the (twelve) *saṃhitās* of the *Śivapurāṇa* (Not., i., p. 66), the *uttarabhāga* of the *Rudrasaṃhitā* would seem to correspond to the present section of the work.

[SIR CHARLES WILKINS.]



DR.RUPNATHJI(DR.RUPAK NATH)

## 3612.

**1876.** Foll. 195; size 11¼ in. by 5¼ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

The same work. [B.]

It ends:

एतदेव परं मत्वा°। एवं यः शृणुयान्नित्यं° ॥ ८५ ॥
अंते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात्पुनः ।
लिखित्वा यस्तु दद्याद्वै पुराणं शिवसंज्ञिकं(°तं) ॥ ८६ ॥
हेमवृषसमायुक्तं चतुर्वेदैश्च संमतं ।
तस्य वासो भवेन्नित्यं शिवलोके न संशयः ॥ ८७ ॥
स तु शिवसमाकारं लभते ऽपापसंयुतः ।
तस्मात्सर्वप्रयत्नेन दीयतां शैवकं द्विजाः ॥ ८८ ॥
तत्रापि दक्षिणा देया सुवर्णानां चतुष्टयं ।
एवं ददाति यो भक्त्या शिवलोके महीयते ॥ ८९ ॥
तत्रस्थो न च्यवेत्क्वापि शिवसायुज्यमाप्नुयात् ।
सत्यं सत्यं पुनः सत्यं नान्यथा मम भाषितं ॥ ९० ॥
इत्युक्त्वा विररामासौ सूतः पौराणिकोत्तमः ॥

इति श्रीशिवपुराणे व्यास° पंचसप्ततितमो ऽध्यायः ॥ ७५ ॥

[Dr. John Taylor.]

## 3613.

**43.** Foll. 239; size 8vo, 6 in. by 9½ in.; fair Devanāgarī writing of 1797 A.D.; eighteen lines in a page.

The same work. [C.]

Concluding verses and colophon as in MS. A.

[H. T. Colebrooke.]

## 3614.

**835.** Foll. 115; size 12¾ in. by 6 in.; legibly written in Devanāgarī, in 1804 A.D.; thirteen or fourteen lines in a page.

The same work. [D.]

It ends as MS. A. This MS. counts 84 *adhyāyas*, but as the marking of the chapters is rather irregular, the number is not easily checked. [H. T. Colebrooke.]

## 3615.

**2659a.** Foll. 179; size 10¼ in. by 6 in.; fair modern Devanāgarī writing; fourteen lines in a page.

The same section of the *Śivapurāṇa*. [E.]

Colophon: इति श्रीशिवपुराणे सनकसूतसंवादे ज्ञानप्रकरणनिरूपणो नामाध्यायः ॥ ७६ ॥ प्रथमं खंडं संपूर्णं ॥

This latter designation was probably added by the copyist with reference to the next section (written in an older hand) bound up with it in the same volume, though the latter is not called 'second *khaṇḍa*.'

The difference in the number of *adhyāyas* between this MS. and C is owing to *adhy.* 17 of B being divided into two *adhyāyas* in this MS. As the numbering of the verses in this MS. is often continued over several chapters, such a subdivision could easily occur.

[Gaikawar.]

## 3616.

**2659b.** Foll. 233 (counted 234, no. 28 having been omitted); size 10¼ in. by 6¼ in.; fair Devanāgarī writing of 1699 A.D.

Another section (? the *Dharmasaṃhitā*) of the *Śivapurāṇa*.

It begins: सनत्कुमार उवाच ॥

एतच्छ्रुत्वा वचस्तस्य सो ऽब्रवीत्तं महामुनिं ।
विस्मयं परमं गत्वा ऋषिं प्रयतमानसः ॥

वासुदेव उवाच ॥

धन्यस्त्वमसि विप्रेंद्र कस्त्वत्तो ऽस्तीह पुण्यकृत् ।
यस्य देवातिदेवस्ते सांनिध्यं कुरुते च मे ॥
दर्शनं मुनिशार्दूल दद्यात्स भगवान् शिवः ।
अपि तावन्ममाप्येवं प्रसादं चेत्करोत्यसौ ॥

उपमन्यु[रु]वाच ॥

अचिरेणैव कालेन महादेवं न संशयं(*r.* °यः) ।
सर्वदेवगणाध्यक्षं द्रक्ष्यसे पुरुषोत्तम ॥

DR.RUPNATHJI( DR.RUPAK NATH )

षोडशाष्टौ वरांश्चैव प्राप्स्यसि त्व महेश्वरात् ।
सपत्नीकात्कथं नादात् त्वं हि देवो जनार्दनः ॥
पूज्यो ऽसि दैवतैः सर्वैः श्लाघनीयः सदा रणे ।
जप्यं च ते प्रदास्यामि श्रद्दधानाय चाच्युत ॥
ब्रह्मण्यः श्रद्दधानश्च सत्यं द्रक्ष्यसि शंकरं ।
स्वात्मतुल्यबलं पुत्रं भविष्यसि(*r.* लभि°) महेश्वरात् ।
देव ज्ञातो ऽसि दृष्टो ऽसि पुत्रकामो भवान्मया ॥
व्यास उवाच ॥
एवं कथयतस्तस्य महादेवाश्रिताः कथाः ।
दिनान्यष्टौ प्रयातानि मुहूर्तमिव तापसाः ॥
नवमे तु दिने प्राप्ते मुनिना स च दीक्षितः ।
मंत्रमध्यापितः शार्वमथर्वशिरसं महत् ॥
जटी मुंडी तु संचारी बभूव नियमान्वितः ।
मुनिना दीक्षितः कृष्णः कुतपी मौंजमेखली ॥
मासमेकं जलाहारी(? निराहारो) द्वितीयं जलमात्रभुक् ।
मासत्रयं वायुभक्षो बभूव सुसमाहितः ॥
पादांगुष्ठाङ्कृततनुः षष्टे चोर्ध्वभुजस्तथा ।
संप्राप्ते सप्तमे मासि संतुष्टो दर्शनं ददौ ॥
हरो महेंद्रचापाद्ये सबलाके पयोधरे ।
पार्वत्या सहितं देवं सहितं(!) चंद्रशेखरं ॥
ब्रह्माद्यैः स्तूयमानं तु पूजितं सिद्धकोटिभिः ।
दिव्यमाल्यांबरधरं भक्तिनम्रैः सुरासुरैः ॥
तं दृष्ट्वा प्रांजलिः कृष्णो देवं तमजमव्ययं ।
सर्वाश्चर्यमयं देवं विस्मयोत्फुल्ललोचनः ॥
नानाविधैः स्तुतिपदैर्वाग्यमेनार्चयत्तदा ।
सहस्रनाम्ना देवेशः स्तुतः कृष्णेन धीमता ॥
ततो देवाः सगंधर्वविद्याधरमहोरगाः ।
मुमुचुः पुष्पवृष्टिं तु साधुवादान्मनोऽनुगान् ॥
निक्षिप्ता पुष्पवृष्टिस्तु वासुदेवस्य मूर्धनि ।
सिद्धैः सुमुनिभिश्चैव अप्सरोभिः समंततः ॥
पार्वत्याश्च मुखं प्रेक्ष्य भगवान्भक्तिवत्सलः(भक्त°) ।
उवाच केशवं तुष्टो रुद्रश्चाप्यविजौजसं(? °मितौजसं) ॥
कृष्ण जानामि भक्तं त्वां मयि नित्यं दृढव्रतं ।
वृणीष्वाष्टौ वरान्मत्तः पुण्यांस्त्रैलोक्यदुर्लभान् ॥
ततस्तद्वचनं श्रुत्वा कृष्णः प्रांजलिमान्वरं ।
प्राह धर्मे मतिर्नित्यं यशश्चाग्र्यं बलं महत् ॥
त्वत्सामीप्यं स्थिरा भक्तिस्त्वयि नित्यं ममास्त्विति ॥ °

Different kinds of metre, and occasionally prose passages are introduced; thus the 3rd *adhyāya* is in the *Indravajra* and *Śikhariṇī* metres.

The following is a list of the (nnnumbered) chapters: [*Śivapurāṇe*] *śaṃkaramāhātmyam* (fol. 5*b*); *tripuradāhaḥ* (fol. 12*b*); *andhakavadhaḥ* (foll. 28*a*, 32*b*); *ruruvadhaḥ* (fol. 36*a*); *ushāharaṇam* (fol. 46*a*); *śumbhaniśumbhavadhaḥ* (fol. 50*a*); *kāmapraśaṃsā* (fol. 53*b*); *dāruvanapraveśaḥ* (fol. 64*b*); stories of different gods and *ṛishis* (foll. 68*b*, 74*b*, 78*b*); *nityanaimittikapūjāvidhiḥ* (foll. 84*b*, 89*a*); *pañcayajñaguṇādhyāyaḥ* (fol. 93*a*); *satpātraguṇādhyāyaḥ* (fol. 97*a*); *pāpabhedādhyāyaḥ* (fol. 102*a*); *narakādhyāyaḥ* (fol. 112*a*); *brāhmaṇapraśaṃsā* (fol. 117*b*); *annadānam* (fol. 118*b*); *pātretipurāṇamāhātmyam* (fol. 121*b*); *dharmaśravaṇamāhātmyam* (fol. 124*b*); on donations (fol. 129*b*); *pṛithivīdānam* (fol. 130*b*); *kāntāradānam* (fol. 132*b*); *pāpanāśanādhyāyaḥ* (fol. 138*b*); (*śiva*)*sahasranāmastavaḥ* (fol. 145*b*); *tulāpurushadānam* (foll. 147*b*, 150*b*); *brahmāṇḍakathanam* (fol. 152*a*); *narakamaṇḍalam* (fol. 154*a*); *brahmāṇḍadānam* (fol. 156*a*); *brahmāṇḍakathanam* (fol. 159*b*); *mṛityuṃjayoddhāraṇam* (fol. 161*b*); *mantrarājaprabhāvaḥ* (fol. 165*a*); *pañcamabrahmākhyānam* (fol. 167*a*); *īśānakalpaḥ* (fol. 168*b*); *mativiśeshaḥ* (fol. 175*a*); *saṃgrāmapraśaṃsā* (fol. 176*b*); *saṃsāracikitsā* (fol. 182*b*); *strīkathanam* (fol. 189*b*); *kālajñānam* (foll. 194*a*, 198*b*); *mantrayogaḥ* (fol. 199*b*); *liṅgaprādurbhāvaḥ* (fol. 203*a*); on different creations (foll. 205*a*, 206*a*, 207*a*, 211*b*, 212*a*, 214*a*); *prithukīrtanam* (foll. 215*a*, 219*a*, 221*a*, 225*a*, 228*b*); *pitṛikalpaḥ* (foll. 229*b*, 231*a*, 233*a*, 234*a*).

The last chapter runs thus (cf. *Harivaṃśa*, 1241 seqq., of which the account here given seems to be a mere epitome): मार्कंडेय उवाच ॥
ते धर्मयोगनिरताः सप्त मानसचारिणः ।
वाय्वंबुभक्षाः सततं शरीरमुपाशोषयन्(!) ॥



DR.RUPNATHJI( DR.RUPAK NATH )

स राजांतःपुरवृतो नंदने मघवानिव ।
क्रीडयित्वा चिरं तत्र सभार्यः स्वपुरं ययौ ॥
अणवहो[1] नाम तस्यासीत्पुत्रः परमधार्मिकः ।
तं विभ्राजः सुतं राज्ये स्थापयित्वा वनं ययौ ॥
तपः कर्तुं समारेभे यत्र ते सहचारिणः ।
स वै तत्र निराहारो वायुभक्षो महातपाः ॥
ततो विभ्राजितं तेन विभ्राजं नाम तद्वनं ।
बभूव यत्र शकुनाश्चत्वारो योगधर्मिणः ।
योगभ्रष्टा[स्]त्रयश्चैव देहत्यागकृतो ऽभवन् ॥
कांपिल्ये नगरे ते तु ब्रह्मदत्तपुरोगमाः ।
जाताः सप्त महात्मानः सर्वे विगतकल्मषाः ॥
शक्तिमंतो ऽत्र चत्वारस्त्रयस्तु परिमोहिताः ।
स्वतंत्रस्त्वणवहाज्जज्ञे ब्रह्मदत्तो महायशाः ॥
छिद्रदर्शी सुनेत्रस्तु वेदवेदांगपारगौ ।
जितौ (*r.* जातौ) श्रोत्रियदायादौ पूर्वजातिसहोषितौ ॥
पंचालो (पां°) बह्वृचस्त्वासीदाचार्यत्व (°त्वं) चकार ह ।
द्विवेदः कंडरीकश्च च्छंदोगो ऽध्वर्युरेव च ॥
ततो ऽणवहः सुतं दृष्ट्वा ब्रह्मदत्तमकल्मषं ।
अभिषिच्य स्वराज्ये तु परां गतिमवाप्नवान् ॥
पंचालकंडरीकस्तु (° कौ तु) पुत्रौ संस्थाप्य मंदिरे ।
विवेश तु वनं तत्र गतौ (*r.* गतः) परमिकां गतिं ॥
ब्रह्मदत्तस्य भार्या तु संततिर्नाम भारत ।
स्वां (? सा) त्वेकभावसंयुक्ता रेमे भार्या सहैव तु[2] ॥
शेषास्तु चक्रवाका वै कांपिल्ये सहचारिणः ।
जाताः श्रोत्रियदायाद (°दा) दरिद्र (°द्राः) स्वकुलेषु च ॥
धृतिमान्सुमहात्मा च तत्त्वदर्शी निरुत्सुकः ।
वेदाध्ययनसंपन्नाश्चत्वारश्छिद्रदर्शिनः ॥
ते योगनिरताः सिद्धाः प्रस्थिताः सर्व एव हि ।
आमंत्रयित्वा ते सर्वे ययुः स्थानानि योगिनः ॥
तस्मिन्संकीर्तिते विष्णोःपदे पापं प्रणम्य (? *r.* प्रणाश्य) तु ।
भूरा ये संप्रपद्यंते अपुनर्भवकांक्षिणः ॥
पापं प्रणाशयत्वद्य तद्विष्णोः परमं पदं ।
शारीरे मानसे चैव पापे वाक्के महामुने ।
कृते सम्यक् पदं भक्त्या पठन् श्रद्धासमन्वितः ॥

[1] Read अणुहो with *Hariv.*; cf. *Mahābh.*, i., 226; Wilson, *Vishṇup.*, 2nd ed., iv., p. 141.

[2] ? Read तां त्वेकभावसंयुक्तां रेमे (? लेभे) भार्यां स हैव तु । cf. *Har.* 1262.

मुच्यते सर्वपापेभ्यः कृष्णनामानुकीर्तना[त्] ।
उच्चार्यमाण एतस्मिन् देवदेवस्य दर्शनात् ॥
इति शिवपुराणं समाप्तं ॥ संवत् १७५६ ॥

If this is really the *Dharmasaṃhitā* of the *Śivapurāṇa*, as Professor Aufrecht believes it to be, it would be the last of the twelve *Saṃhitās* of that work, and would thus indeed 'complete the *Śivapurāṇa*.' Cf. the enumeration of the different sections of this *Purāṇa*, p. 1315, col. 2. [GAIKAWAR.]

## 3617.

**1101.** Foll. 162; size 12½ in. by 6 in.; excellent Devanāgarī writing of 1801 A.D.; eleven lines in a page.

*Vāyavīya-saṃhitā*, another section of the *Śivapurāṇa*, deriving its name from its being promulgated by *Vāyu* (i.e. *Śiva* himself) to the *Rishis*. [A.]

The work consists of two parts, the *pūrva-* and *upari-bhāga*, of 30 *adhyāyas* each.

It begins:

नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यंतहेतवे ॥ १ ॥
शक्तिरप्रतिमा यस्य ऐश्वर्यं चातिसर्वगम्[3] ।
स्वामित्वं च विभुत्वं च स्वभावं संप्रचक्षते ॥ २ ॥
तमजं विश्वकर्माणं शाश्वतं शिवमव्ययम् ।
महादेवं महात्मानं व्रजामि शरणं शिवम् ॥ ३ ॥
धर्मक्षेत्रे महातीर्थे गंगाकालिंदिसंगमे ।
प्रयागे नैमिषारण्ये ब्रह्मलोकस्य वर्त्मनि ॥ ४ ॥
मुनयः संशितात्मानः सत्यव्रतपरायणाः ।
महौजसो महाभागा महासत्त्रं वितेनिरे ॥ ५ ॥
तत्र सत्त्रं समाकर्ण्य तेषामक्लिष्टकर्मणाम् ।
साक्षात्सत्यवतीसूनोर्वेदव्यासस्य धीमतः ॥ ६ ॥
शिष्यो महात्मा मेधावी त्रिषु लोकेषु विश्रुतः ।
पंचावयवयुक्तस्य वाक्यस्य गुणदोषवित् ॥ ७ ॥

[3] शक्तिरप्रतिमा° चापि सर्वगं B.

DR.RUPNATHJI( DR.RUPAK NATH )

उत्तरोत्तरवक्ता च ब्रुवतो ऽपि बृहस्पतेः ।
मधुरश्रवणानां च मनोज्ञपदपर्वणाम् ॥ ८ ॥
कथानां निपुणो वक्ता कालविन्नयवित्कविः ।
आजगाम स तं देशं सूतः पौराणिकोत्तमः ॥ ९ ॥
तं दृष्ट्वा सूतमायातं मुनयो हृष्टमानसाः ।
तस्मै साम च पूजां च यथावत्प्रत्यपादयन् ॥ १० ॥
प्रतिगृह्य स तां पूजां मुनिभिः प्रतिपादिताम् ।
उद्दिष्टमासनं भेजे नियुक्तो[1] युक्तमात्मनः ॥ ११ ॥
ततस्तत्संगमादेव मुनीनां भावितात्मनाम् ।
सोत्कंठमभवच्चित्तं श्रोतुं पौराणिकीः कथाः[2] ॥ १२ ॥
तदा तमनुकूलाभिर्वाग्भिः पूज्य महर्षयः ।
अतीवाभिमुखं कृत्वा वचनं चेदमब्रुवन् ॥ १३ ॥
ऋषय ऊचुः ॥
रोमहर्षण(लोमहर्षण B) सर्वज्ञ भवान्वै भाग्यगौरवात् ।
पुराणविद्यामखिलां व्यासात्प्रत्यक्षदर्शिवान् ॥ १४ ॥
तस्मादाश्चर्यभूतानां कथानां त्वं हि भाजनम् ।
रत्नानामुरुसाराणां रत्नाकर इवार्णवः ॥ १५ ॥
यच्च भूतं च भव्यं च यच्चान्यद्वस्तु वर्तते ।
न तवाविदितं किंचित् त्रिषु लोकेषु विद्यते ॥ १६ ॥
त्वमदृष्टवशादस्मद्दर्शनार्थमिहागतः ।
अकुर्वन् किमपि श्रेयो न वृथागंतुमर्हसि ॥ १७ ॥
तस्माच्छ्राव्यतमं पुण्यं सत्कथाज्ञानसंहितम् ।
अपवर्गफलैकांतमनाचारबहिष्कृतम् ॥ १८ ॥
जगतः सृष्टिसंहारस्थितिहेतुप्रदर्शकम्(°नं B) ।
वेदांतसारसर्वस्वं पुराणं श्रावयाशु नः ॥ १९ ॥
एवमभ्यर्थितः सूतो मुनिभिर्वेदवादिभिः ।
श्लक्ष्णां च न्यायसंयुक्तां प्रत्युवाच शुभां गिरम् ॥ २० ॥

Part I. contains a theogony from the *Śaiva* point of view.

The connection of the work with the *Śaiva-purāna* is explained in the following way. Having enumerated the 18 *Purānas* in the same order as is done in the *Bhāgavata* (except that the *Bhavishya* is mentioned in the sixth place, before *Nāradīya, Mārkaṇḍeya,* and *Āgneya*; see Wilson, *Vishṇup.*, 2nd ed., i., p. xxiii.), the author states (fol. 2*b*) that the *Śaivapurāṇa*, the fourth of the number, consists of the following 12 *Saṃhitās*: 1. *Viśveśvara* (*Vidyeśvara* B; *Vighneśa* Bik., p. 209; consisting of 1000—or 10,000 acc. to Bik.—*ślokas*); 2–5. *Raudra, Vaināyaka, Bhauma*, and *Mātra* (of 8000 each); 6. *Rudraikādaśa* (13,000); 7. *Kailāsa* (6000); 8. *Śatarudra* (3000); 9. *Koṭirudra* (9000); 10. *Sahasrakoṭirudra* (11,000); 11. *Vāyavīya* (4000); and 12. *Dharma-saṃhitā* (12,000). The number of verses here assigned to the present work is probably about correct, a rough estimate yielding 3934 *ślokas*.

Colophon: इति श्रीपुराणे शैवे वायवीयसंहितायां त्रिंशो ऽध्यायः ॥

Part II. begins:

नमः समस्तसंसारचक्रभ्रमणहेतवे ।
गौरीकुचतटद्वंद्वकंचुकांकितवक्षसे ॥ १ ॥
सूत उवाच ॥
उक्ता भगवतो रूपं(लब्धं B) प्रसादमुपमन्युना ।
नियमायोत्थितो[3] वायुर्मध्यं प्राप्ते दिवाकरे ॥ २ ॥
ऋषयश्चापि ते सर्वे नैमिषारण्यवासिनः ।
अथायमर्थः प्रष्टव्य इति कृत्वा विनिश्चयं ॥ ३ ॥ °

This part is chiefly devoted to practical theology, in connection with certain devotional performances to be observed by the sectaries of the creed, and apparently forming part of the one great practice called '*pāśupataṃ vratam*,' whence it might almost seem that this work originated with the *Śaiva* sect of '*Pāśupatas*' as an exposition of their doctrines.

It ends:

सूते कृताशिषि गते मुनयः सुवृत्ता
यागे च पर्यवसिते महति(महिते B) प्रयागे ।
काले कलौ च विषयैः कलुषामयानं(*r.* कलुषायमाणे)
वाराणसीपरिसरे वसतिं वितेनुः ॥

[1] उच्छिष्टमानसं° A; °नियुक्ते B.

[2] पौराणिकीं कथां B.

[3] नियमायास्थितो A.

DR.RUPNATHJI( DR.RUPAK NATH )

अथ च ते पशुपाशमुमुक्षया
स्वकृतया कृतपाशुपतव्रताः ।
अधिकृताखिलबोधसमाधयः
परमनिर्वृतिमापुरनिंदिताः(०पुरसौपदं A) ॥

इत्यादिश्रीमहापुराणे शैवे वायवीयसंहितायामुपरिभागे त्रिंशो ऽध्यायः ॥

For fragments of this work see Aufrecht, Cat. Bodl., p. 76*a*; Rāj. Mitra, Notices, iii., p. 305. [H. T. Colebrooke.]

## 3618.

**1081b.** Foll. 47 and 73; size 13¼ in. by 6¾ in.; clear, modern Devanāgarī writing; twelve to fourteen lines in a page.

*Vāyavīya-saṃhitā*, in two parts, each with a separate pagination. [B.]

Part I. ends: इत्यादिमहापुराणे श्रीशैवे वायवीयसंहितायां पूर्वभागे उपमन्युप्रसादं नाम त्रिंशत्तमो ऽध्यायः । पूर्वभागः समाप्तः ॥

Part II. begins:

ज्ञानं ज्ञानिभिरर्थितं मुनिभिः शक्रादिभिः संस्तुतं
ध्यातं योगिभिरप्रतर्कमनघं शुद्धं च संवित्पदं ।
स्यातं सर्वसुरासुरैर्निजगुणव्याख्यानसंकीर्तनात्
श्रीविश्वेशपदारविंदयुगलं वंदे मुदाहं सदा ॥

सूत उवाच ॥ उक्ता (!) ०

Though even less accurate than A, this copy, besides offering many preferable variants, is useful for clearing up mistakes and doubtful readings in the other MS.

[H. T. Colebrooke.]

## 3619.

**264a.** Foll. 98; size 12½ in. by 4½ in.; fair Devanāgarī writing of the beginning of the present century; 9–11 lines in a page.

*Sāmbapurāṇa*—or *Śāmbapurāṇa*, as it is spelt throughout in these MSS.—one of the *Upapurāṇas*, being specially devoted to the worship of the Sun as the supreme deity. [A.]

The MS. is rather incorrect, especially in its latter portion.

*Adhyāya* 1 runs as follows: श्रीसरस्वत्यै नमः । ओं नम सूर्याय ॥

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरञ्चिनारायणशङ्करात्मने ॥

तिमिरकरिकिरातः प्रत्यहं स प्रभातः
कमलविमलबन्धुः पुण्यकारुण्यसिन्धुः ।
भुवनभवनदीपः कुष्टपापप्रदीपः
सुरमुनिकृतसेवः पातु वो भानुदेवः ॥

समस्तप्राणदेहाय [स]दा विशुद्धबुद्धये ।
त्रयीमयाय देवाय नमो लोकैकसाक्षिणे ॥

पितामहाय कृष्णाय योगिने व्यक्तमूर्तये ।
भूतभव्यभविष्याय विश्वसंसृष्टये नमः ॥

नमस्तस्मै मुनीशाय सूनृताय तपस्विने ।
शान्ताय वीतरागाय तस्मै ज्ञानात्मने नमः ॥

नमस्तस्मै विधात्रे च अव्यक्तप्रभवाय च ।
भूतसंहारतिग्माय भास्कराय गभस्तिने ॥

शक्रो वह्निर्यमो(वह्नि०) रक्षो वरुणो ऽथ समीरणः ।
धनदश्चेश्वरश्चैव अधदूर्द्धे[1] तथैव च ॥

ये दिशो व्याप्य तिष्ठन्ति तस्मै सर्वात्मने नमः ।
नैमिषारण्ये शौनकः कुलपतिः सूतमपृच्छत् ॥

सत्रे द्वादशवार्षिके काले चात्र विश्रावणे ।
एतस्मिन्नन्तरे काले कथामेतामपृच्छत ॥

त्वयात्र कथिताः सूत पुराणा बहुविस्तराः ।
षण्मुखस्य त्वया चादौ पुनर्ब्रह्माण्डमेव च ॥

वायुनापि च यत्प्रोक्तं तथा सावर्णिकेन च ।
मार्कण्डेयं च यत्प्रोक्तं तद्वैशम्पायनेन च ॥

दधीचिना च यत्प्रोक्तं यच्च सर्वेण भाषितं ।
हरिणापि च यत्प्रोक्तमृषिभिः समुदाहृतं ॥

वालखिल्यैश्च यत्प्रोक्तं तच्छ्रुतं चर्षिभिः सह ।
हरिपुत्रकृतं चात्र न त्वया कथितं त्विह ॥

[1] Thus A, B; ? r. अथ ऊर्ध्वे.

DR.RUPNATHJI( DR.RUPAK NATH )

मनःकर्णसुखं सौते प्रीणात्यमृतसंमितं ।
भास्करस्य पुराणं यत्पृष्टं शाम्बेन धीमता ॥
तदेतद् द्वादशाकारं ननु मासार्धमूर्तिकं ।
पुराणमखिलं चात्र सर्वशास्त्रप्रतिष्ठितं ॥
कथयस्व महाभाग यथावत्कृतवानसि ।

सूत उवाच ॥

प्रश्नभारो महानेष यथा वदसि सुव्रत ॥
तन्महाभारताख्यानाद्ब्रह्मर्षेश्रुतिविस्तरात् ।
पुराणानां च सर्वेषां प्रवरः प्रश्न उत्तरः ॥
कथाश्च विविधाश्चात्र पुराणे संप्रतिष्ठिताः ।
वेदार्थस्मृतिसाराणि वर्णधर्माश्रयाणि च ॥
शृणुध्वं मुनयः सर्वे शाम्बाख्यं पापनाशनं ।
पुराणं सर्वरोगघ्नं परं कल्याणदायकं ॥
अत्र नानाविधा पूजा सूर्यस्य च महात्मनः ।
पितुः शापो हि शाम्बस्य नारदस्तत्र कारणं ॥
शापानुग्रहतश्चैव तथा पुरनिवेशनं ।
मण्डलस्य प्रमाणं हि भ्रमेराराधनं[1] तथा ॥
तेजसां शातनं चैव सूर्यस्तवस्तथैव च ।
शाम्बस्य च तदोल्लासं प्रतिमास्थापनं तथा ॥
मगानयनमत्रैव मगमाहात्म्यमेव च ।
पूजाविधिं रवेरत्र पूजानिष्ठास्तथैव च ॥
भूतं भव्यं भविष्यं च मन्त्रवादस्तथैव च ।
उत्पत्तिः प्रलयश्चैव भूतसर्गानुवर्णनं ॥
साङ्गोपाङ्गसमाहारो विधिपूजाप्रवर्तनं ।
वश्याकर्षणं विद्वेषस्तम्भनोच्चाटनादिकं ॥
प्रतिमालक्षणं चैव पूजावासविधानिकं ।
मण्डलानि क्रियायोगाः सिद्धियोगाश्च साधनं ॥
महामण्डलयागश्च सान्निध्यं द्वादशात्मनः ।
भ्रमिमानोपनं[2] चैव पुष्पधूपविधिस्तथा ॥
सप्तमीकरणं चैव उपवासविधिस्तथा ।
प्रोक्षणं यच्च दानस्य फलं यच्च प्रकीर्तितं ॥
वेलाकालविधानं च अर्कधर्मविधिस्तथा ।
धूपकर्मविधिश्चैव जयस्यापि यथाविधि ॥
प्रयताप्रयतस्यैव तथा स्वप्नानुवर्णनं ।
प्रायश्चित्तविधानं च तथाचार्यस्य लक्षणं ।
दीक्षणं सर्वशिष्याणां मन्त्रेष्वेव विनिश्चयः ॥
नर्वाश्च(सर्वे च) विविधा मन्त्राश्चास्मिन्ग्रन्थे समासतः ।
भविष्यन्ति यथान्यायमध्याया विविधाश्रयाः ॥

इति श्रीशाम्बपुराणे उपदेशानुक्रमणं नाम प्रथमो ऽध्यायः ॥

After this exposition of the contents of the whole *Purāṇa*, *Śuka* relates in the following *adhyāya* (which is likewise called the 1st) as to how the Raghuide king *Bṛihadbala* is told by *Vaśishṭha* that *Āditya* is the supreme deity, from whom the whole world emanates and to whom it returns again after its destruction. In the 2nd *adhyāya* this peculiar worship of the Sun is stated to have taken its origin in Śāmbapura, on the banks of the Candrabhāgā or Candrasarit, having been instituted by *Śāmba*—the son of *Kṛishṇa-Vāsudeva* by *Jāmbavatī*, and grandson of *Aditi*—who, having been cursed by his father for an intrigue carried on in his gynaeceum at the instigation of *Nārada*, was visited by an incurable leprosy, from which he was at last delivered by the miraculous power of the Sun, whoso interposition *Śāmba* implored. On *Śāmba's* story cf. the extracts from the *Bhavishyapurāṇa* in Aufrecht's Cat. Bodl., p. 31 seqq.

The chapters are marked as follows: 1*b*. (fol. 3*a*); 2. (fol. 5*a*) *śāmbaśāpaḥ*; 3. (fol. 5*b*) *dvādaśamūrtyupākhyānam*; 4. (fol. 7*a*); 5. (fol. 8*a*) *bhaktyupasthānam*; 6. (fol. 10*a*) *raśmivarṇanam*; 7. (fol. 10*b*) [*sūryasya*] *sarvavyāpitvavarṇanam*; 8. (fol. 12*b*) *sūryanigamaḥ*; 9. (fol. 13*a*); 10. (fol. 15*b*); 11. (fol. 16*a*) [*sūryasya*] *śarīralikhanam*; 12. (fol. 16*b*) praise of Divaspati; 13. (fol. 17*b*) *brahmabhāshitastavaḥ*; 14. (fol. 18*b*) *brahmastotram*; 15. (fol. 20*a*) legend of *Daṇḍanāyaka* and *Piṅgala*; 16. (fol. 20*b*) *maheśvarastotram*; 17. (fol. 22*b*) *devatākhyā*-

[1] Thus A, B; भ्रमिमारोप्य तत्तेजः शातयामास तस्य वै । fol. 14*b*.

[2] भ्रामिमानापनं B; ? भ्रमिमारोपणं or भ्रमेरारोपणं.

DR.RUPNATHJI( DR.RUPAK NATH )

*nam;* 18. (fol. 23*b*) *vyomotpattiḥ;* 19. (fol. 24*a*) places round Mount Meru; 20. (fol. 26*b*) *ādityarathavarṇanam;* 21. (fol. 27*b*) *somavṛiddhikshayaḥ;* 22. (fol. 28*b*) *rāhugrahaṇavicāraḥ;* 23. (fol. 29*b*) *gopānayanam;* 24. (fol. 30*a*) *sūryacakraviniḥsṛitaḥ stavarājaḥ;* 25. (fol. 31*b*) *magānayanam;* 26. (fol. 32*b*) definition of *Maga* and *Yājaka;* 27. (fol. 33*a*) *mokshajñānam;* 28. (fol. 34*a*) description of the *pratimā*, or image of the sun; 29. (fol. 34*b*) *pratishṭhāpanakalpe dārupar̄ikshā;* 30. (fol. 35*b*) the same subject as *adhy.* 28; 31. (fol. 37*b*) *pratishṭhākalpa;* 32. (fol. 38*a*) *dhvajāropaṇam;* 33. (fol. 40*b*) *devayātrā;* 34. (fol. 41*a*); 35. (fol. 42*b*) *agnidhūpavidhikriyā;* 36 and 37 are passed over in both MSS.; 38. (fol. 45*a*); 39. (fol. 46*a*) *japasthānavidhiḥ;* 40. (fol. 47*b*) *dīkshāvidhānam;* 41. (fol. 49*a*); 42. (fol. 50*b*); 43. (fol. 54*b*) *sadācārādhyāyaḥ;* 44. (fol. 55*b*) *chatropānaddānādhyāyaḥ;** 45. (fol. 57*a*) *saptamīkalpaḥ;* 46. (fol. 58*a*) *japavidhiḥ;* 47. (fol. 59*b*) *mudrālakshaṇam;* 48. (fol. 72*a*) *saptasaṃgrahe maṇḍalavidhānam* (mostly in prose intermixed with *mantras*).

After this the numbering of the chapters, as well as the designation *adhyāya*, ceases altogether, the rest apparently forming a second part comprised under the general title of *Jñānottaram*, beginning:

प्रथमं चिंतयेत्पद्मामष्टयंत्रं सकर्णिकं ।
तन्मध्य(°ध्ये) चिंतयेद्देवं भास्करं रश्मिविग्रहं ॥

सहस्रांशुनमस्कारं सूर्यकोटिसमप्रभं ।
महातेजोमयं ध्यात्वादित्यमाह्वानयेद्यः(?°नमेव च) ॥

यस्य हरितवर्णाभा रथे तिष्ठंति वाजिनः ।
अरुणः सारथिर्यस्य रथवाहः स्वयं स्थितः ॥

तमहं लोकसतायः(?°सत्त्वाय) [आ]दित्यमाह्वयाम्यहं ।
आयाहि भगवन्भानो तव यज्ञः प्रवर्तते ॥

This part of the work is divided into short sections as follows: fol. 78*a*, *iti śāmbapurāṇe jñānottare prathamapaṭalaḥ;* fol. 78*b*, *dvitīyapaṭalaḥ;* fol. 79*a*, *vījottaram;* ib., *vījasvaraprasavaḥ;* fol. 80*a*, *vyomasūtram;* fol. 83*b*, *śarīrasādhanaḥ paṭalaḥ;* fol. 84*b*, *sādhakasya vyādhiḥ;* fol. 85*a*, *abhicāravidhiḥ;* fol. 86*a*, *māraṇābhicāraḥ;* fol. 87*a*; fol. 87*b*; fol. 88*b*, *vījaprasave sarvasāmānyasādhanaḥ paṭalaḥ;* fol. 90*a* (bis), *yogavidhiḥ;* fol. 90*b* (bis); fol. 91*a*, *vījaprasavaḥ;* fol. 92*a* (bis); fol. 92*b*; fol. 93*b* (bis), *visarjanavidhiḥ;* fol. 94*a;* fol. 94*b;* fol. 95*b*; fol. 96*b*.

It ends: सूत उवाच ॥

भास्करं(*r.* भास्करेण) हि यत्प्रोक्तं शाम्बाय लवणाम्भसि ।
वृहद्बलाय वसिष्ठ तत्सर्वं कथयामि ते ॥

श्रवणकलितशाम्बो भानुदेवप्रसा[दा]द्
भवति विजितकामः कामिनीकेलिपालः ।
करुणविमलमूर्तिर्धूतपापप्रचण्डो
वलितसकलभोगो याति लोकं च विष्णोः ॥

इति शाम्बपुराणं समाप्तमिति ॥

[H. T. Colebrooke.]

3620.

**1312.** Foll. 149; size 12½ in. by 5 in.; Devanāgarī writing of 1804 A.D.; eight lines in a page.

The same work.

A very inaccurate copy, in three different handwritings, apparently derived from the same original as the preceding one.

[H. T. Colebrooke.]

* After fol. 55 another hand begins. The gap in the text which occurs here is filled up by an additional leaf, which at present counts as fol. 74, but bears the original no. 39. The pagination, indeed, is very irregular and defective: foll. 1–16 are numbered 1–16; in foll. 75–81 the nos. 19–25 are almost entirely cut away; fol. 82 is numbered 256 (?26; but apparently inserted subsequently); foll. 83–98 numbered 27–42.

DR.RUPNATHJI( DR.RUPAK NATH )

## 3621.

**2177 B.** Foll. 46; size 10¾ in. by 4¾ in.; fair Devanāgarī writing of 1593 A.D.; ten lines in a page.

*Agastya-Saṃhitā*, of the *Skanda-Purāṇa* * (?), in 23 *adhyāyas*; inculcating the worship of *Vishṇu* in his different forms (especially that of *Rāma*), as expounded by *Śiva* to *Pārvatī*, and by *Agastya* to *Sutīkshṇa*.

*Adhy.* I. runs thus (with numbers supplied):

अगस्त्यो नाम देवर्षिसत्तमो गौतमीतटे ।
कदाचिद्दंडकारण्ये सुतीक्ष्णस्याश्रमं ययौ ॥ १ ॥

प्रत्युज्जगाम तं भक्त्या गंधपुष्पाक्षतोदकैः ।
पाद्यार्घ्याद्यर्हणं चक्रे तस्मै ब्रह्मविदे मुनिः ॥ २ ॥

सुतीक्ष्णस्तं प्रणम्याह सुखासीनं तपोनिधिं ।
श्रीमदागमनेनैव जीवितं सफलं मम ॥ ३ ॥

अद्य जन्मसहस्रेषु तपः फलति संचितं ।
कामक्रोधादिभिर्भूयो भूयो ऽहं पीडितो मुने ॥ ४ ॥

नाद्राक्षं सम्यगिष्ट्वापि क्रतुभिर्बहुदक्षिणैः ।
सत्पात्रे सर्वदानानि दत्त्वापि मुनिसत्तम ॥ ५ ॥

भवाब्धेस्तरणोपायं तपस्तप्त्वापि दुष्करं ।
किं करिष्याम्यहं तात क्व यास्यामि च मे वद ॥ ६ ॥

इत्युक्तः सो ऽब्रवीत्तेन कुंभभूर्विगतस्पृहः ।
क्षणं विचार्य तत्पौर्वापर्येण मुनिपुंगवः ॥ ७ ॥

अस्ति वक्ष्यामि ते सर्वं रहस्यं वृषभध्वजः ।
यत्प्रत्यपादयत्पूर्वं पार्वत्यै कृपयात्मवित् ॥ ८ ॥

ईश्वर उवाच ॥

कामक्रोधादिभिर्दोषैर्दुष्टास्तत्र [जनाः ? torn] पुनः ।
उत्पद्यंते प्रलीयंते पुनर्व्यामोहितास्त्वया ॥ ९ ॥

रौरवादिषु पच्यंते पुनः संसारिणो भुवि ।
कर्मशेषात्प्रजायंते पंग्वंधबधिरादयः ॥ १० ॥

कृमिकीटादयो भूत्वा पुनः संसारिणो भुवि ।
कुष्ठाद्युपहताः केचिच्चौरव्याघ्रादिभिर्हताः ॥ ११ ॥

प्रविशंति जले ऽग्नौ वा देशाद्देशं व्रजंति च ।
परस्त्रीधनहर्तारस्तापयंति सतः सदा ॥ १२ ॥

देवब्राह्मणवित्तैस्तु येषां जीवनमन्वहं ।
राजसास्तामसा ये च हंतारो वनजीविनः ॥ १३ ॥

पुत्रदारादिभिर्मुक्ता दुःखावर्ते भ्रमंत्यहो ।
कलौ प्रायेण सर्वे ऽपि राजसास्तामसास्तथा ॥ १४ ॥

निषिद्धाचारिणः संतो मोहयंत्यपरान्बहून् ।
यथा भूतः प्रभुर्लोके सेवकाः स्युस्तथाविधाः ॥ १५ ॥

अतो मदीयाः सर्वे ऽपि हिंसकाः स्युः प्रियाः प्रिये ।
वश्याकर्षणविद्वेषस्तंभनोच्चाटनादिषु ॥ १६ ॥

शश्वदावां समाराध्य भवंति फलभागिनः ।
आवाभ्यां पिशितं रक्तं सुरां वापि सुरेश्वरि ॥ १७ ॥

वर्णाश्रमोचितं धर्ममविचार्यार्पयंति ये ।
भूतप्रेतपिशाचास्ते भवंति ब्रह्मराक्षसाः ॥ १८ ॥

पुनस्तदंते जायंते विप्रदेवाधिकारिणः ।
तत्तद्रूपेण जायंते स्वस्वदोषानुरूपतः ॥ १९ ॥

पार्वत्युवाच ॥

नायं धर्मो हि देवेश परेषामुपकारकृत् ।
अतो मे ब्रूहि देवेश धर्मो यस्ते कृपानिधे ॥ २० ॥

ईश्वर उवाच ॥

सत्यं वदाम्यहं देवि यन्मां त्वं परिपृच्छसि ।
हंताहं सर्वलोकानामतो हिंसैव मे प्रिया ॥ २१ ॥

ये वा भूतानि निघ्नंति विधिनाविधिनापि वा ।
समर्पयंति भूतेभ्यो मत्प्रियास्ते सदा प्रिये ॥ २२ ॥

अहं तमोमयो नित्यं हन्मि भूतानि भामिनि ।
मत्कर्म हननं यस्मात्ततो हिंसैव मे प्रिया ॥ २३ ॥

मत्कृत्याचारिणः सर्वे वल्लभा मम वल्लभे ।
लोके स्वाम्यनुरूपेण सेवां कुर्वंति सेवकाः ॥ २४ ॥

भक्त्यार्पयंति ये मह्यं तथापि पिशितादिकं † ।
तृप्तिमुत्पादयंत्येते विधिनाविधिनार्पितं ॥ २५ ॥

ब्रह्मा सृजति भूतानि विष्णुस्तान्येव पालयेत् ।
तान्यहं हन्मि भूतानि कृतिरस्माकमीदृशी ॥ २६ ॥

रजोगुणालयो ब्रह्मा विष्णुः सत्त्वगुणालयः ।
तमोगुणालयो ऽहं स्यां स्वस्वकर्माणि कुर्महे ॥ २७ ॥

तत्तद्गुणानुगुण्येन क्रियते ऽस्माभिरीदृशं ।
भवाब्धेस्तरणं देवि हिंसकानां सुदुर्लभं ।
कामादिग्रस्तचित्तानां कुतो मुक्तिर्वद प्रिये ॥ २८ ॥

---

* The works connected with this *Purāṇa* are arranged alphabetically under the *Saṃhitās* and *Khaṇḍas*.

† Here two half-verses are supplied in the margin, the first of which is, however, partly torn away.



DR.RUPNATHJI( DR.RUPAK NATH )

पार्वत्युवाच ॥
किमुपास्य लभेन्मुक्तिं क्रियया वा कया प्रभो ।
मुमुक्षोः पुनरावृत्तिर्दुर्लभा भवभंजन ॥ २९ ॥
ईश्वर उवाच ॥
शृणु देवि महाभागे रहस्यं कथयामि ते ।
यज्ज्ञात्वा मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ ३० ॥ °

It ends:

रामः सत्यं परं ब्रह्म रामात्किंचिन्न विद्यते ।
सर्वशास्त्ररहस्यन्न मया तव महात्मना ॥
अगस्त्यसंहिता नाम प्रोक्तेयं सर्वकामधुक् ।
अध्यात्मालोकने दीपकलिकाज्ञाननाशनी ॥
भोगमोक्षप्रदा नित्यमायुरारोग्यवर्धिनी ।
श्रुता दृष्टापि लिखिता बहिरंतश्च पावयेत् ॥
आदिमध्यावसानांतं यः सकृद्वा निरीक्षते ।
पापात्मापि समुत्क्रम्य ब्रह्मभूयाय कल्पते ॥
सर्वदालोचयेद्यस्तु ब्रह्मविद्योगिसन्नतिं ।
प्राप्नोति लोकमखिलं लब्धाभीष्टमवाप्नुयात् ॥
पुस्तकं लिखितं यस्य गृहे तिष्ठति पूजितं ।
आयुरारोग्यमैश्वर्यं वर्धते ऽस्य दिने दिने ।
धनेन पुत्रपौत्राद्यैः कुलमस्य प्रवर्धते ॥

इत्यगस्त्यसंहितायां परमरहस्ये त्रयोविंशो ऽध्यायः ॥ संवत् १६५१ वर्षे मार्गशिरवदि १३ भृगौ अद्येह श्रीगिरिवास्तव्यश्रीगौडज्ञातीयश्रीरामेण लिखितं ॥

Neither in the work itself nor in the colophons is the work assigned to the *Skandapurāṇa*; but see the extracts from the next work, according to which the *Agastyasaṃhitā* of the *Skandapurāṇa* is also called *Śaṅkarī Saṃhitā*. It is, however, by no means certain that this is really the work there referred to. In some of the forms and formulas of worship it propounds, the work indeed verges very much on the Tantric type. Though it is distinctly stated that the *Agastyasaṃhitā*, like the present work, was communicated by *Śiva* to *Pārvatī*, one would expect the subject-matter of the principal work of the *Śāṅkarī Saṃhitā* to be on *Śiva*-worship.

For another MS. of this work (beginning in the middle of *adhy.* I., v. 10*b*) see Weber, Berlin Cat., no. 1525. [GAIKAWAR.]

## 3622.

**390.** Foll. 233; size folio, 16¾ in. by 10½ in.; European paper; good, large Devanāgarī writing; eighteen lines in a page.

*Hālāsyamāhātmya* of the *Agastyasaṃhitā* (or *Śaṅkarasaṃhitā*, q.v.) of the *Skandapurāna*; in 71 *adhyāyas*, treating of the legendary history, and religious merits, of the *Hālāsya-kshetra*, its principal *tīrtha*, *Hemābjinī* (*Hemapadmākara*), and various *liṅgas*.

It begins:

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्याये सर्वविघ्नोपशांतये ॥
मातामहं महाशैलं महस्तद(? महत्सदः) पितामहं(? वै°) ।
कारणं जगतां वंदे कंठादुपरि वारणं ॥
ऐश्वरं परमं तत्त्वमादिमध्यांतवर्जितं ।
आधारं सर्वभूतानामनाधारमविक्रियं ॥ १ ॥
अनंतानंदबोधांबुनिधिमद्भुतविक्रमं ।
अंबिकापतिमीशानमनिशं प्रणमाम्यहं ॥ २ ॥
वंदे हालास्यनगरीं वंदे हेमाब्जिनीमपि ।
वंदे सुमीननयनां वंदे सुंदरनायकं ॥ ३ ॥
शिवाय परिपूर्णाय शीतलाय चिदात्मने ।
चिन्ननाथाय नाथाय तेजसे ब्रह्मणे नमः ॥ ४ ॥ ° ५ ॥
इक्षुकोदंडपुष्पेषुपाशांकुशकरोज्ज्वलां ।
उद्यत्सूर्यनिभां देवीं वंदे हालास्यसुंदरीं ॥ ६ ॥ ° ३५ ॥
श्रीकंठपरमेशाख्यज्योतिर्लिंगस्य सन्निधौ ।
शिववन्निर्मलतरमस्ति तीर्थं महत्तरं ॥ ३६ ॥
शिवानि दातुं शक्तत्वात् परत्वात्पावनत्वतः ।
शिवतीर्थमिति प्राहुस्तत्समस्तविचक्षणाः ॥ ३७ ॥
तत्तीरे तपसा क्लृप्ते मंडपे विश्वकर्मणा ।
सहस्रस्तंभसंयुक्ते चंद्रकांतशिलामये ॥ ३८ ॥ ° ३९ ॥
तन्मध्ये ऽतिविचित्रे च विस्तृते व्याघ्रचर्मणि ।
उपविष्टं सूतमुनिं शिवध्यानपरायणं ॥ ४० ॥ ° ४५ ॥
इत्याद्या मुनयः सर्वे शिवभक्तिप्रचोदिताः ।
समागम्य समाधिस्थं दंडवत्प्रणिपत्य च ॥ ४६ ॥
तत्पादपंकजं भक्त्या पंकजैः परिपूज्य च ।
स्तोत्रैः स्तुत्वा महात्मानं पप्रच्छुः परया मुदा ॥ ४७ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ऋषयः ॥ ० ॥ ४८ ॥
शिवक्षेत्राणि सर्वाणि भुक्तिमुक्तिप्रदानि च ।
मेरुमंदरकैलासश्रीपर्वतमुखानि च ॥ ४९ ॥
संक्षेपतो [ऽ]विस्तरेण भवता कथितानि च ।
अल्पबुद्धिभिरस्माभिस्तानि नावधृतानि च ॥ ५० ॥
तस्माद्विशिष्टं सर्वेषां स्थानानां यच्चिरंतनं ।
शंभुनाधिष्ठितं नित्यं तदेकं वक्तुमर्हसि ॥ ५१ ॥ ० ५५ ॥
योगिभिः सनकाद्यैश्च सेवितं गणपुंगवैः ।
ध्यात्वा क्षेत्रोत्तमं शंभोर्वक्तुमारभते मुनिः ॥ ५६ ॥

श्रीसूतः ॥
शृणुध्वमृषयः सर्वे शिवभक्तिपरायणाः ।
विशिष्टतरमेकं यत्स्थानं शंभोः परात्मनः ॥ ५७ ॥ ० ५८ ॥
पुरानन्दवने कुंभसंभवेन मनीषिणा ।
प्रोक्तं तद्विस्तरेणैव वशिष्टादिमहात्मनां ॥ ५९ ॥
वक्ष्ये पुरातनं पुण्यं श्रीमद्धालास्यसंज्ञितं ।
श्रवणात्सर्वपापघ्नं वेदांतेषु प्रकाशितं ॥ ६० ॥
वेदांतार्थोऽतिगूढो यः पुराणेषु प्रविस्तृतः ।
तस्मात्सर्वपुराणेषु हालास्यं प्रतिपादितं ॥ ६१ ॥
तथापि तस्य माहात्म्यं बहु स्कांदे तु विद्यते ।
स्कांदमद्यापि वक्ष्यामि पुराणं श्रुतिसारजं ॥ ६२ ॥
षड्विधं संहिताभेदैः पंचाशत्खंडमंडितं ।
आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता ॥ ६३ ॥
तृतीया शांकरी प्रोक्ता चतुर्थी वैष्णवी तथा ।
पंचमी संहिता ब्राह्मी षष्ठी सा सौरसंहिता ॥ ६४ ॥
तृतीया शांकरी या च संहिता संप्रकीर्तिता ।
सा चतुर्वेदसारादौ श्रुता शक्त्या च शंकरात् ॥ ६५ ॥
शक्त्यंगवासी स्कंदोऽपि संहितां तां समग्रहीत् ।
ततोऽवदत्स्वशिष्याय तां चागस्त्याय पृच्छते ॥ ६६ ॥
अथानंदवने तेन मुनिना दीर्घदर्शिना ।
प्रोक्ता सा पृच्छतां प्रीत्यै वशिष्टादिमहात्मनां ॥ ६७ ॥
अगस्त्यसंहितेत्यासीत्तन्नाम्ना साथ संहिता ।
सर्वान्कामान्या ददाति कामधेनुरिव श्रुता ॥ ६८ ॥
तामद्य वक्ष्ये युष्माकं लोकानां च हिताय च ।
पुरा पुरातने पुण्ये पुराराते: पुरा शुभे ॥ ६९ ॥
वाराणसीति प्रथिते सर्वेषां मुक्तिसिद्धिदे ।
भागीरथीपयःपूरपावनीकृतभूतले ॥ ७० ॥
विशालाक्षीविश्वनाथसांनिध्यात्सर्वसिद्धिदे ।
शिवलिंगप्रतिष्ठां च कर्तुमुत्तम[म]ध्वरं ॥ ७१ ॥
सत्यलोकात्समागत्य ब्रह्मा लोकपितामहः ।
पितामहेश्वरं लिंगं प्रतिष्ठाप्य स्वनामतः ॥ ७२ ॥
अकरोदश्वमेधानां दशकं तस्य सन्निधौ ।
तदानीं नैमिशारण्यप्रमुखाः क्षेत्रवासिनः ॥ ७३ ॥
आययुर्मुनयः सर्वे यज्ञविद्याविशारदाः ।
वशिष्ठवामदेवाद्या महात्मानश्चिरंतनाः ॥ ७४ ॥ ०

An etymology for *Hālāsyanāyaka*, another name for *Śiva*, to whom the *Hālāsyakshetra* is sacred, is attempted on fol. 64*a*:

हालं सागरजं घोरं संहृत्य भुवनत्रयं ।
रक्षतीश(०श्वर)स्तन्नाम्नाम्ना हालास्यनायकः ॥

It ends: श्रीसूतः ॥
शृण्वतां चैव युष्माकं भक्तिश्रीसुंदरेश्वरे ।
श्रीमीनाक्षीपादयोश्च निश्चलास्तु द्विजोत्तमाः ॥
सर्वत्र विजयश्चास्तु युष्माकं सर्वमंगलं ।
वंदे हालास्य नगरीं० (v. 3) ॥
पूर्वं द्विजा भो युष्माभिर्विशिष्टतरमद्भुतं ।
क्षेत्रं तीर्थं च लिंगं च तत्सर्वं कथितं मया ॥
सर्वस्तरति दुर्गाणि सर्वो भद्राणि पश्यतु(०ति) ।
सर्वः सद्गतिमाप्नोति श्रुत्वा हालास्यवैभवं ॥

इति श्रीस्कांदे महापुराणे अगस्त्यसंहितायां हालास्यमाहात्म्ये वसिष्ठऋषीश्वराणां काश्यां मुक्तिमंटपे अगस्त्येन प्रोक्तहालास्येश्वरस्य चतुःषष्टिलीलानुकथनं नाम एकसप्ततितमोऽध्यायः ॥

Then follow five devotional verses:

श्रीमत्कुंभजदेशिकेंद्रवदनांभोजाद्०

Cp. Rāj. Mitra, Notices, vii., p. 27.

[H. T. Colebrooke.]

## 3623, 3624.

**662, 663.** Foll. 598 (counted 639; nos. 311–19, 560–89, 592, 593 being passed over); size 4to, 11¼ in. by 9¼ in.; good, clear Devanāgarī writing; European paper (watermark 1805); sixteen lines in a page.

*Ambikākhaṇḍa*, of the *Skandapurāṇa*, a collection of legends chiefly connected with *Śiva* and *Durgā*, and communicated by *Sanatkumāra* to *Vyāsa*.



DR.RUPNATHJI( DR.RUPAK NATH )

It begins (with the numbers supplied):

हस्त्याननः सकलचंद्रनिभैकदंतः
सर्वात्मजो गणपतिर्भुजगोपवीती ।
विघ्नानि नाशयतु लेख्यविधौ ममासौ
देवी च सा कमलिनी वरदास्तु लक्ष्मीः ॥ १ ॥ °३ ॥
प्रजापतेर्महाक्षेत्रे गंगाकालिंदिसंगमे ।
प्रयागे परमे पुण्ये ब्रह्मणो लोकवर्त्मनि ॥ ४ ॥
मुनयः संशितात्मानस्तपसा क्षीणकल्मषाः ।
तीर्थसंप्लावनार्थाय पौर्णमास्यां कृताह्निकाः ॥ ५ ॥
पौराणिकमपश्यंत सूतं सत्यपरायणं ।
स्नात्वा तस्मिन्महातीर्थे प्रणामार्थमुपागतं ॥ ६ ॥
दृष्ट्वा ते सूतमायांतं ऋषयो हृष्टमानसाः ।
आश्चर्यासनसंवेशं तद्योग्यं समकल्पयन् ॥ ७ ॥
स प्रणम्य ततः सर्वान् सूतस्तान्मुनिपुंगवान् ।
प्रदत्तमासनं भेजे सर्वधर्मागमान्वितः ॥ ८ ॥
तमासीनमपृच्छंत मुनयस्ते समाहिताः ।
ब्रह्मसत्रे पुरासीना नैमिषारण्यवासिनः ॥ ९ ॥
कथितं भारताख्यानं पुराणं च पुरा त्वया ।
तेन नः प्रतिभाषि(°सि)त्वं साक्षात्सत्यवतीसुतः ॥ १० ॥
सर्वागमपरार्थज्ञः सत्यधर्मपरायणः ।
द्विजपूजारतो नित्यं तेन पृच्छा(पृच्छां) त्वमर्हसि ॥ ११ ॥
भारताख्यानसदृशं पुराणाद्यद्विशिष्यते ।
तत्त्वां पृच्छामि वै जन्म कार्त्तिकेयस्य धीमतः ॥ १२ ॥
इमे हि मुनयः सर्वे त्वदुपास्तिपरायणाः ।
स्कंदसंभवशुश्रूषा संजातोत्सुकमानसाः ॥ १३ ॥
उक्तः प्रवर्तते सूतं(सूतः) संसिद्धैर्मुनिपुंगवैः ।
प्रोवाचेदं मुनीन्सर्वान् वरो भूतार्थवाचकः ॥ १४ ॥
शृणुध्वं मुनयः सर्वे कार्त्तिकेयस्य संभवान्(?°वं) ।
ब्रह्मण्यस्य च माहात्म्यं वीर्यं च त्रिदिवाधिकं ॥ १५ ॥
मुमुक्षूणां परं स्थानं शुके जाते महात्मनि ।
सुतशोकाभिसंतप्तो व्यासस्त्र्यंबकमैक्षत ॥ १६ ॥
दृष्ट्वैव स महात्मानं व्यासो ऽभूद्विगतव्यथः ।
विचरन्स तपोलोकान्मुनिः सत्यवतीसुतः ॥ १७ ॥
मेरुशृंगे ऽथ सदृशे(*r.* ददृशे) ब्रह्मणः सुतमग्रजं ।
सनत्कुमारं वरदं योगैश्वर्यसमन्वितं ॥ १८ ॥
विमाने रविसंकाशे तिष्ठंतमनलप्रभं ।
मुनिभिर्योगसंसिद्धैस्तपोयुक्तैर्महात्मभिः ॥ १९ ॥
वेदवेदार्थतत्त्वज्ञैः सर्वधर्मागमान्वितैः ।
सकलावाप्तवेदैस्तु चतुर्वक्त्रमिवावृतं ॥ २० ॥
दृष्ट्वा स तं महात्मानं मुनिर्व्यासो ऽथ संस्थितं ।
ववंदे परया भक्त्या साक्षादिव पितामहं ॥ २१ ॥
ब्रह्मसूनुरथ व्यासं समायातमुदैक्षत ।
परिष्वज्य परप्रेम्णा प्रोवाच वचनं शुभं ॥ २२ ॥
दिष्ट्या त्वमसि धर्मज्ञ प्रसादात् परमेश्वरात्(पा°) ।
अपेतशोक[:] संप्राप्तः पिपिक्षुर्वेदवांछितं(वित्र°) ॥ २३ ॥
श्रुत्वाथ वचनं तस्य ब्रह्मणो मुनिपुंगवः ।
इदमाह वचो विप्राश्चिरं यद्धृदयस्थितं ॥ २४ ॥
कुमारस्य कथं जन्म कार्त्तिकेयस्य धीमतः ।
किं निमित्तं कुतो वास्य इहास्येतद्धि[1] वेदितुं ॥ २५ ॥
कथं रुद्रसुतश्चासावग्निर्गंगासुतः कथं ।
उमायास्तनयश्चैव स्वाहायाश्च कथं सुतः ॥ २६ ॥
स सुतश्चापि मातॄणां [[2] कथं च सः ।
कश्चासौ पूर्वमुत्पन्नः किं तपः कश्च विक्रमः ॥ २७ ॥
सूतसंमोहनं ह्येतत् कथय त्वं यथातथं ।
सूत उवाच ॥
एवं स पृष्टस्तेजस्वी ब्रह्मणः पुत्रसत्तमः ॥ २८ ॥
उवाच च स धर्मज्ञो व्यासायाक्लिष्टकर्मणे ।
तच्छृणुध्वं यथातत्त्वं कीर्त्यमानं मयानघाः ॥ २९ ॥
इति ° संबंधप्रश्नो नाम प्रथमो ऽध्यायः ॥

The MS. counts (in figures) 202 *adhyāyas*; vol. ii. beginning in the middle of *adhy.* 114. The numbering is, however, very irregular, some nos. being omitted, whilst others are read twice, the chapters marked actually amounting to 210 (the first in vol. ii. being *adhy.* 116. Some chapters are also marked in words, but only up to *adhy.* 63 do these numbers tally with the figures given after them; whilst in *adhy.* 124–51 they are considerably in advance of them. A MS. of the work, described in the Notices, vi., p. 117 (where a general abstract of the contents is given), counts 216 *adhyāyas*, but as that MS. shows unmistakable

[1] ? ईहाख्येतद्धि or इच्छाख्येतद्धि. [2] ? supply शरजन्मा.

DR.RUPNATHJI( DR.RUPAK NATH )

traces of the very closest connection with the present one, the numbering there will probably be quite as inaccurate as it is here; but at all events the two MSS. seem to contain the same amount of matter, and terminate in the same abrupt manner.

This MS. ends:

चक्रैः सवज्रैर्मुपलैर्गिरिशृंगैः क्रमैरिपि(°रपि) ।
पिपिषुस्ते रणे ऽन्योन्यं जगर्जे च पयोदवत् ॥
गृह्णतैतान् (गृह्णतो°) सुरान्सेन्द्रान् किमासत(°न्न)दितेः
इत्येवं संप्रचेरुश्च गिरस्तस्मिन्वलार्णवे ॥ [सुताः ।
ते गृहीतायुधाः सर्वे बलवंतो महासुराः ।
मुखैश्चंद्रप्रतिमानगो × × × ◡ – ◡ – ॥
× × × × बभूव भूरतितरां सुदुर्गमा ॥

इति स्कंदपुराणे एकाशीतिसाहस्र्यां संहितायामंबिकाखंडे प्रह्लादनारायणीये इंद्रागमनं समाप्तं ॥ २०२ ॥

An abstract of the contents of the work is given in the Index indicatorius (nos. 3737–38), vol. ii., foll. 77–81. [H. T. COLEBROOKE.]

## 3625.

**2622.** Foll. 157; 11½ in. by 6 in.; good, clear Devanāgarī writing of 1792 A.D. (?); thirteen lines to a page.

*Avantīkhaṇḍa* (or *Avantikhaṇḍa*, *Āvantya-khaṇḍa*), of the *Skandapurāṇa*, in 84 *adhyāyas*, devoted to the legendary history of as many *liṅgas* recognised (in the *Mahākālavana*) in the Avanti country. [A.]

It begins (with the numbers supplied from B):

उमोवाच ॥
पृथिव्यां यानि तीर्थानि पुण्याश्च[1] सरितस्तथा ।
कथ्यतां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥ १ ॥
ईश्वर उवाच ॥
अस्ति लोकेषु विख्याता गंगाद्या सरितां[2] नदी ।
सेविता देवगंधर्वैर्मुनिभिश्च निषेविता ॥ २ ॥
तपनस्य सुता देवी(देवि) यमुना लोकपावनी ।
पितॄणां वल्लभा देवी(देवि) महापातकनाशिनी ॥ ३ ॥
चंद्रभागा वितस्ता च नर्मदामरकंटके ।
कुरुक्षेत्रं गया देवि प्रभासं नैमिषं(निमषं B) तथा ॥ ४ ॥
केदारं पुष्करं चैव तथा कायावरोहणं ।
तथा पण्यतमं देवि महाकालवनं शुभं ॥ ५ ॥
यत्रास्ते श्रीमहाकालः पापेंधनहुताशनः ।
क्षेत्रं योजनपर्यंतं ब्रह्महत्यादिनाशनं ॥ ६ ॥
भुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनं ।
प्रलये ऽप्यक्षयं देवि दुष्प्राप्यं त्रिदशैरपि ॥ ७ ॥
उमोवाच ॥
प्रभावः कथ्यतां देव क्षेत्रस्यास्य महेश्वर ।
यानि तीर्थानि विद्यंते यानि लिंगानि संति वै ॥ ८ ॥
तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ।
देव उवाच ॥
शृणु देवि प्रयत्नेन प्रभावः पापनाशनः ॥ ९ ॥
क्षेत्रमाद्यं महादेवि ममातीव प्रियं सदा ।
यत्र शिप्रा महापुण्या सर्वपापहरा परा ॥ १० ॥
तथा गंधवती पुण्या दिव्या नवनदी प्रिया ।
नीलगंगा चतुर्थी तु श्रेष्ठा नद्यः प्रकीर्तिताः ॥ ११ ॥
आसां तु संगमे स्नात्वा श्राद्धं यः कुरुते नरः ।
गंगायास्त्रिगुणं तद्धि चतुर्वर्गफलप्रदं ॥ १२ ॥
क्षेत्रं योजनमात्रं तु ह्यवंत्यां विद्धि सुव्रते ।
सिद्धिलिंगानि[3] तिष्ठंति भुक्तिमुक्तिकराणि च ॥ १३ ॥
ईश्वराश्चतुरशीतिस्तथाष्टौ[4] संति भैरवाः ।
एकादश तथा रुद्रा आदित्या द्वादश स्मृताः ॥ १४ ॥
षड् विनायकाश्चात्र चतुर्विंशति मातरः ।
यदाह गतवांस्तत्र महाकालवने शुभे ॥ १५ ॥
ब्रह्मविष्ण्वादयः सर्वे तत्राजग्मुर्मुदान्विताः ।
एभिर्व्याप्तमिदं क्षेत्रं देवि योजनमायतं ॥ १६ ॥
दशस्थानगतो विष्णुः सर्वपापप्रणाशनः ।
एषां नामानि यो ऽधीते प्रभाते भक्तितः पुमान् ॥ १७ ॥
विमुक्तः सर्वपापैस्तु रुद्रलोकं स गच्छति ।
उमोवाच ॥
चतुरशीतिलिंगानि[4] त्वयोक्तानीह यानि तु ॥ १८ ॥

[1] कूपाश्च B. [2] गंगा त्रिपथगा B.

[3] सिद्धलिंगानि B. [4] चतुराशीति° MSS.

DR.RUPNATHJI( DR.RUPAK NATH )

तानि विस्तरतो ब्रूहि सर्वपापहराणि तु ।
हर उवाच ॥
शृणु देवि प्रवक्ष्यामि तेषां नामानि यानि तु ॥ १९ ॥
ख्यातं पृथिव्यां प्रथममगस्त्येश्वरमुत्तमं ।
यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ २० ॥ °

The *liṅgas* are: 1. *Agastyeśvara;* 2. *Guheśvara;* 3. *Dhuṇḍeśvara;* 4. *Ḍamarakeśvara;* 5. *Anādikalpeśvara;* 6. *Jvāleśvara;* 7. *Trivishṭapeśvara;* 8. *Kapāleśvara;* 9. *Svargadvāreśvara;* 10. *Karkoṭeśvara;* 11. *Siddheśvara;* 12. *Lokapāleśvara;* 13. *Kāmeśvara;* 14. *Kuṭumbeśvara;* 15. *Indradyumneśvara;* 16. *Īśāneśvara;* 17. *Apsareśvara;* 18. *Kalakaleśvara;* 19. *Nāgacaṇḍeśvara;* 20. *Pratīhāreśvara;* 21. *Kukuṭeśvara;* 22. *Karkaṭeśvara;* 23. *Meghanādeśvara;* 24. *Mahālayeśvara;* 25. *Muktīśvara;* 26. *Someśvara;* 27. *Anarakeśvara;* 28. *Jaṭeśvara;* 29. *Rāmeśvara;* 30. *Cyavaneśvara;* 31. *Khaṇḍeśvara;* 32. *Pattaneśvara;* 33. *Ānandeśvara;* 34. *Kanthaḍeśvara*(!); 35. *Indreśvara;* 36. *Mārkaṇḍeyeśvara;* 37. *Śiveśvara;* 38. *Kusumeśvara;* 39. *Akrūreśvara;* 40. *Kuṇḍeśvara;* 41. *Lampeśvara;* 42. *Gaṅgeśvara;* 43. *Aṅgāreśvara;* 44. *Uttareśvara;* 45. *Trilocaneśvara;* 46. *Vīreśvara;* 47. *Nūpureśvara;* 48. *Abhayeśvara;* 49. *Prithukeśvara;* 50. *Sthāvareśvara;* 51. *Śūleśvara;* 52. *Oṃkāreśvara;* 53. *Viśveśvara;* 54. *Kaṇṭeśvara* (*Kaṇṭakeśvara*); 55. *Siṃheśvara;* 56. *Revanteśvara;* 57. *Ghaṇṭeśvara;* 58. *Prayāgeśvara* (about *Sāvitrī* and king *Priyavrata*); 59. *Siddheśvara;* 60. *Mātaṅgeśvara;* 61. *Saubhāgyeśvara;* 62. *Rūpeśvara;* 63. *Dhanuḥsāhasrakeśvara;* 64. *Paśupatīśvara;* 65. *Brahmeśvara;* 66. *Jalpeśvara;* 67. *Kedāreśvara;* 68. *Piśāceśvara;* 69. *Saṃgameśvara;* 70. *Durdharsheśvara;* 71. *Prayāgeśvara* (love of *Gaṅgā* and king *Śantanu*); 72. *Candrādityeśvara;* 73. *Karabheśvara;* 74. *Rājasthaleśvara;* 75. *Baḍaleśvara* (*Baḍala*, son of the *Yaksha* prince *Maṇibhadra*, when cursed by his father for having entered the private pleasure-grounds of *Kuvera*, is delivered therefrom by worshipping this *liṅga*); 76. *Aruṇeśvara;* 77. *Pushpadanteśvara;* 78. *Avimukheśvara;* 79. *Hanumatkeśvara;* 80. *Susvapneśvara;* 81. *Piṅgaleśvara;* 82. *Kāyāvarohaṇeśvara;* 83. *Bilveśvara;* 84. *Uttareśvara.*

It ends:

आजन्मकृतपापं च स्वल्पं वा यदि वा बहु ।
तत्सर्वं नाशमायाति उत्तरेश्वरदर्शनात् ॥
इत्येवं चतुराशीतिः(चतुरशीतिः) संख्याता ईश्वरस्य च ।
कथिता मे त्वया पृष्टा महाकालवने शुभे ।
संदेहो नात्र कर्तव्यः सत्यमुक्तं मया शुभे ॥
एतेषां चैव ये यात्रां प्रतिलोमानुलोमतः ।
करिष्यंति नरो(?नरा) भक्त्या ते यास्यंति परं पदं ॥
यद्यपि पातकैर्युक्तः पश्येद्भक्त्याथ मानवः ।
स कुलं तारयत्येव पितृकं मातृकं शतं ॥
एष ते कथितो देवि प्रभावः पापनाशनः ।
चतुराशी(°रशी)तिलिंगानि किं भूयः श्रोतुमिच्छसि ॥

इति श्रीस्कंदपुराणे अवंतीखंडे लिंगमाहात्म्ये उमामहेश्वरसंवादे चतुरशीतिलिंगमाहात्म्यं संपूर्णं ॥ इति श्रीलिंगमाहात्म्यं समाप्तं ॥

The title is spelt *Avantīkhaṇḍa* in 63, *Āvantyakhaṇḍa* in 19 (out of the first 21), and *Avantikhaṇḍa* in 2, colophons; whilst in MS. B it is given once as *Āvantyakhaṇḍa*, otherwise always as *Avantīkhaṇḍa*.

The date of the MS. is inscribed on the blank side of the last leaf:

मि° इदं पुस्तकं राजारामलक्ष्मणयजुर्वेदी माध्यंदिनीशाखा वास्तव्यदेशीपिचडगांमप्रगणेनेवासहाली वस्ती उज्जेन (*Rājarāma Lakshmaṇa*, a native of the village of Picand in the pargana Newas, at present living at Ujjain) शाके १७१६ ॥

The MS. looks rather older than this date.

[Mackenzie Collection.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 3626.

**391.** Foll. 149 (counted 152, nos. 63–65 being passed over); size folio, 16½ in. by 10½ in.; copied, for Colebrooke, on European paper; clear Devanāgarī writing; 20–22 lines in a page.

*Avantīkhaṇḍa.* [B.]

This copy is far more incorrect than MS. A, which itself is far from faultless. Moreover, a serious lacuna occurs on fol. 82*a*, l. 7, of the present MS., extending from shortly before the end of *adhy.* 43 to shortly before the end of *adhy.* 47 (corresponding to fol. 74*b*, l. 5, to 86*b*, l. 10, of MS. A), without any indication of the omission. On the other hand, the verses are numbered throughout in this MS. (separately in each *adhyāya*), which is not the case in A. [H. T. Colebrooke.]

## 3627.

**672.** Foll. 169 (counted 170, no. 14 being omitted in the pagination); size 10¼ in. by 4¼ in.; clear Devanāgarī writing, somewhat resembling the Nepalese type (as does also the paper); 9–11 lines in a page.

*Purushottamamāhātmya,* or *Purushottama-kshetramāhātmya,* a section of the *Utkalakhaṇḍa* of the *Skandapurāṇa,* in 45 *adhyāyas,* treating of the legends connected with the sacred places of *Purushottamakshetra* (*Purī*) in Utkala (Orissa), the favourite abode of *Jagannātha-Vishṇu.* [A.]

The first *adhyāya* runs as follows:

मुनय ऊचुः ॥
भगवन् सर्वशास्त्रज्ञ सर्वतीर्थमहत्त्ववित्[1] ।
कथितं यत्त्वया पूर्वं प्रस्तुते तीर्थकीर्तने ॥

[1] सर्वतत्त्वौघतत्त्ववित् C; सर्वतीर्थविशेषवित् D.

पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनं[2] ।
यत्रास्ते दारवतनुः श्रीशो मानुषलीलया ॥
दर्शनान्मुक्तिदः साक्षात्सर्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत्क्षेत्रं केन निर्मितं ॥
ज्योतिःप्रकाशो[3] भगवान्साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन्नास्ते[4] परमपूरुषः ॥
वद त्वं वदतां श्रेष्ठ सर्वलोकगुरो मुने ।
श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः ॥

जैमिनिरुवाच ॥
शृणुध्वं मुनयः सर्वे रहस्यं परमं हि तत्[5] ।
अवैष्णवानां श्रवणे भक्तिस्तत्र न जायते ॥
यस्य संकीर्तनादेव सकलं लीयते तमः ।
स्कंदेन कथितं पूर्वं श्रुत्वा(धृत्वा C) शम्भोर्मुखाम्बुजात् ॥
समक्षं सिद्धदेवौघसभायां मंदरोदरे ।
अहन्यहन्यागमं तत्र देवदेवं समर्चितुं ॥
यथा श्रुतं कथयतो देवानां पुरतो मया[6] ।
अद्याप्येष जगन्नाथः सर्वगः सर्वभावनः ॥
संति क्षेत्राणि चान्यानि सर्वपापहराणि वै[7] ।
एतत्क्षेत्रं परं[8] चास्य वपुर्भूतं महात्मनः ॥
स्वयं वपुष्मांस्तत्रास्ते स्वनाम्ना ख्यापितं हि तत् ।
तत्र ये स्थातुमिच्छंति ते ऽपि सर्वे हतांहसः ॥
किं पुनस्तत्र तिष्ठंतो ये पश्यंति गदाधरं ।
यथा चानुदिनं देवाः(विप्राः B) सिद्धा ब्रह्मर्षयस्तथा ।
समर्चितुं यथायांति[9] देवेशं न तथान्यतः ॥
अहो तत्परमं क्षेत्रं[10] विस्तृतं दशयोजनं ॥

[2] MS. D reads this hemistich: पुरुषोत्तमं महाक्षेत्रं पुण्यं परमपावनं ।

[3] ज्योतिःस्वरूपो C. [4] दारुमयं ब्रह्मास्ते A.

[5] परं कौतूहलं हि नः C.

[6] यथा श्रुतं वः कथये देवानां शृण्वतां पुरः ॥ C.

[7] MS. C and the ed. here add the line: सेवनात्सर्वपापानि नराणां घ्नंति यानि वै । and begin the next with तद्धि क्षेत्रं°.

[8] वरं D; ° क्षेत्रवरं B.

[9] सहायांति D; ° तुमिहायान्ति ed.; A, B omit this *śloka*.

[10] तत्क्षेत्रमाहात्म्यं C.

DR.RUPNATHJI( DR.RUPAK NATH )

तीर्थराजस्य सलिलादुत्थितं वालुकाचितं ।
नीलाचलेन महता मध्यस्थेन विराजितं ॥
एकं स्तनमिव पृथ्व्याः[1] सुदूरात्परिभावितं ।
वराहरूपिणा पूर्वं समुद्धृत्य वसुंधरां ॥
सर्वतः सुसमां(सुषमां A) कृत्वा पर्वतैः सुस्थिरीकृतां ।
सृष्ट्वा चराचरं सर्वं तीर्थानि सरिद्भ्यः[2] ॥
क्षेत्राणि च यथास्थानं संनिवेश्य तथा पुरा ।
ततो विचिंतयामास सृष्टिभारनिपीडितः[3] ॥
पुनरेतां क्रियां गुर्वीं नारभेयं[4] कथं त्विति ।
तापत्रयाभिभूता वा मुच्यंते जंतवः कथं ॥
एवं चिंतयमानस्य मतिरासीत्प्रजापतेः ।
मुक्त्येककारणं विष्णुं स्तोष्ये ऽहं परमेश्वरं ॥

ब्रह्मोवाच ॥

नमस्ते जगदाधार शंखचक्रगदाधर ।
यन्नाभिपंकजादेष जातो ऽहं विश्वसृष्टिकृत् ॥
परमार्थस्वरूपं ते त्वं वै वेत्सि जगन्मय ।
यन्मायया जगत्सर्वं(सर्वमिदं C) निर्मितं महदादिकं ॥
यन्निःश्वाससमुद्भूतं शब्दब्रह्म त्रिधाभवत् ।
उपजीव्य तदेवाहमसृजं भुवनानि वै ॥
त्वत्तो नान्यत्स्थूलसूक्ष्मदीर्घह्रस्वादिकं च न ।
विकारभेदै(°हेतोB)र्भगवंस्त्वमेवेदं चराचरं ॥
कटकादि यथा स्वर्णं गुणत्रयविभागशः[5] ।
स्रष्टा सृज्यं त्वमेवात्र पोष्टा पोष्यं जगत्प्रभो ॥
आधारो ध्रियमाणं च धर्ता(धाता D) त्वं परमेश्वर ।
जगतो ऽस्य गतिर्भर्ता साक्षी त्वं परमेश्वर[6] ॥
त्वत्प्रेरितमतिः सर्वश्चरते च(सर्वं चराचरं A) शुभाशुभं ।
ततः[7] प्राप्नोति सदृशीं त्वयैव विहितां गतिं ॥

चराचरगुरो सर्वजीवभूतकृपामय ।
प्रसीदाद्य जगन्नाथ नित्यं त्वच्चरणस्य मे ॥

जैमिनिरुवाच ॥

एवं संस्तूयमानस्तु ब्रह्मणा गरुडध्वजः ।
नीलजीमूतसंकाशः शंखचक्रादिचिह्नितः[8] ॥
पतगेंद्रसमारूढः स्फुरद्वदनपंकजः ।
आविरासीद् द्विजश्रेष्ठा विवक्षुः स्फुरिताधरः ॥

श्रीभगवानुवाच ॥

यदर्थं संस्तुतो[9] ब्रह्मन्नशक्यः प्रतिभाति सः ।
अनाद्यविद्या सुदृढा दुश्छेद्या कर्मबंधनैः ॥
प्रभवंत्यां कथं तस्यां हीयेते मृतिजन्मनी[10] ।
तथापि चेदेव कृते व्यवसायस्तवानघ ॥
क्रमेणानेन हि भवेत्तत्ते वक्ष्यामि कारणं ।
अहं त्वं त्वमहं ब्रह्मन् मन्मयं चाखिलं जगत् ॥
रुचिस्ते यत्र मे तत्र नान्यथेति विचारय ।
सागरस्योत्तरे तीरे महानद्यास्तु[11] दक्षिणे ॥
स प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदः ।
तत्र ये मनुजा ब्रह्मन्निवसंति सुबुद्धयः ॥
जन्मांतरकृतानां च पुण्यानां फलभोगिनः[12] ।
नाल्पपुण्याः प्रजायंते नाभक्ता मयि पद्मज ॥
एकाम्रकाननाद्यावद्दक्षिणोदधितीरभूः ।
पदात्पदाच्छ्रेष्ठतमा क्रमेण परिकीर्तिता ॥
सिंधुतीरे तु यो ब्रह्मन् राजते नीलपर्वतः ।
पृथिव्यां गोपितं(गोपति C) स्थानं तव चापि सुदुर्लभं ॥
सुरासुराणां दुर्ज्ञेयं(दुर्गेयं A) मायया छादितं मम ।
सर्वसंगपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥
क्षराक्षरावतिक्रम्य वर्ते ऽहं पुरुषोत्तमे ।
सृष्ट्या लयेन नाक्रांतं क्षेत्रं मे पुरुषोत्तमं ॥
यथा मां पश्यसि ब्रह्मन् रूपं चक्रादिचिह्नितं ।
ईदृशं तत्र गत्वैव द्रक्ष्यसे मां पितामह ॥
नीलाद्रेरंतरभुवि कल्पन्यग्रोधमूलतः ।
वारुण्यां दिशि यत्कुंडं रोहिणं नाम विश्रुतं ॥

---

[1] एवं तत्र स्तनं क्षौण्याः A; ऐक्यं तंतुमिव पृथ्व्याः B.

[2] सृष्टा° C; सरितोब्धयः D; सरिद्व्ययः B, C.

[3] Thus A, C; ततो विचिंतयामास सर्वलोकपितामहः। B, D, ed.; to which B, D add the line प्रति स्वदिवं स प्रातः सृष्टिभारनिपीडितः ।

[4] न लभेयं B, D; नालभेयं C; नो लप्स्ये ऽहं ed.

[5] °विभागतः D; ॥ गुणत्रयविभागेन सुवर्णकटकादिवत् C.

[6] साक्षात्त्वं परमेश्वरः C, ed.; B omits this line.

[7] त्वत्तः C, D; तस्मात् ed.

[8] ° चिह्नभृत् ed.; ° चक्रगदाधरः C.

[9] Thus A, D; मां स्तुषे B, ed.; यदर्थमीशिषे C.

[10] मृतजन्मनी B, D; मृत्युजन्मनी C, ed.

[11] That is, the *Svarṇarekhā*, cf. fol. 19*a*, l. 5.

[12] फलभागिनः C, D.

DR.RUPNATHJI( DR.RUPAK NATH )

तत्तीरे निवसंतं मां पश्यंतश्चर्मचक्षुषा ।
तदंभसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥

तत्र व्रज महाभाग दृष्ट्वा मां ध्यायतस्तव ।
प्रकाशं यास्यते[1] तस्य क्षेत्रस्य महिमा परः ।
आश्चर्यभूतः परमस्तवापि च भविष्यति ॥

श्रुतिस्मृतीहासपुराणगोपितं(श्रुतिस्मृतीतिहास° ed.)
मन्मायया तत्र हि कस्य गोचरं ।
प्रसीदतो मे स्तुवतस्तवाधुना
प्रकाशमायास्यति सर्वगोचरं ॥

व्रतेषु तीर्थेषु च यज्ञदानयोः
पुण्यं यदुक्तं विमलात्मनां हि ।
अहर्निवासाल्लभते हि सर्वं(ततो ऽधिकं D, ed.)
निःश्वासवासात्खलु चाश्वमेधिकं ॥

इत्यादिश्य विधिं विप्रास्तदाऽसौ पुरुषोत्तमः ।
पश्यतस्तस्य तत्रैव(तस्यैव C) प्रभुरंतरधीयत ॥

इति श्रीस्कंदपुराणे चतुरशीतिसाहस्रे जैमिनिऋषिसंवादे पुरुषोत्तममाहात्म्ये प्रथ[मो ऽध्यायः] ॥

In *adhyāya* 7 (fol. 20*a*) the locality of the sacred *kshetra* is again described thus:

ओड्रदेश इति ख्यातो(ख्याते C) वर्षे भारतसंज्ञिते ।
दक्षिणस्योदधेस्तीरे क्षेत्रं श्रीपुरुषोत्तमं ॥

तत्र नीलगिरिर्नाम समंतात्काननावृतः ।
तस्योत्संगे कल्पवृक्षः समंतात्क्रोशसंमितः ।
यस्य छायां समाक्रम्य ब्रह्महत्यां व्यपोहति ॥

तस्य पश्चाद्दिशि ख्यातं कुंडं रोहिणसंज्ञितं ।
तत्पूर्णं पावनांभोभिः[2] स्पर्शनादेव मुक्तिदं ॥

तस्य प्राक्तटमास्थाय नीलेंद्रमणिनिर्मिता ।
तनुः श्रीवासुदेवस्य साक्षान्मुक्तिप्रदायिनी ॥

तत्र कुंडे तु यः स्नात्वा(? स्नायात्) दृष्ट्वा श्रीपुरुषोत्तमं ।
अश्वमेधसहस्रस्य फलं प्राप्य विमुच्यते ॥

तत्रास्ते आश्रमश्रेष्ठः ख्यातः शबरदीपकः ।
पश्चिमस्यां दिशि विभो वेष्टितः शबरालयैः ॥

तस्मादेकपदीमार्गो येन विष्ण्वालयं व्रजेत् ।
यत्र साक्षाज्जगन्नाथः शंखचक्रगदाधरः ॥

[1] प्राकाश्यं जायते C. [2] करुणांभोभिः C.

The report of the wondrous religious merits of this locality having reached *Indradyumna*, king of Avantī and Amarāvatī in Mālava, he sends his *purohitas Jaṭila* and *Vidyāpati* to explore the sacred district; and the information brought home by them (furnished chiefly by the *Śabara Viśvāvasu* residing in that region) induces him to visit those places under their guidance; his subsequent adventures and experiences forming the principal subject of the work from ch. 7 onwards. The last chapters contain descriptions of various ceremonies to be performed there, such as *Devasnānavidhi, Jyeshṭhapañcakavrata, Mahāvedīmahotsava, Ratharakshākaraṇavidhi, Śayanotsava, Dakshiṇāyana.*

Cp. Rājendralāla Mitra, Antiquities of Orissa, vol. ii., p. 100 seqq.

The MS., a fairly correct one on the whole, was written by one *Mukunda Rāmadatta*, about the middle of last century.

An edition of the work has been published at Bombay (1869).

It ends:

एतद्वः कथितं पुण्यं क्षेत्रमाहात्म्यमुत्तमं ।
तत्र नित्योषितस्यापि माहात्म्यं ब्रह्मदारुणः ॥
यश्चैतच्छृणुयाद्भक्त्या वाच्यमानं द्विजोत्तमैः ।
अश्वमेधसहस्रस्य फलं सो ऽविकलं लभेत् ॥
अर्धोदयश्च यो योगः स्कंदेन परिकीर्तितः[3] ।
तत्कोटिगुणितं पुण्यं विष्णोर्माहात्म्यकीर्तनात् ॥
प्रातः प्रातर्यः शृणुयात्कपिलाशतदो भवेत् ।
गांगैः पुष्करजैस्तोयैरभिषेकफलं लभेत् ॥
धन्यं यशस्यमायुष्यं पुण्यं संतानवर्धनं ।
स्वर्गप्रतिष्ठागतिदं सर्वपापोपनोदनं ।
एतद्रहस्यमाख्यातं पुराणेषु सुगोपितं ॥
वैष्णवेभ्यो विनान्येषु न तु वाच्यं कदाचन ।
कुतर्कोपहता ये के दुरधीतश्रुतागमाः ॥

[3] Thus A, B, D; अर्धोदयादयो योगाः ° ताः । C; अर्धोदयादिका योगा ये चान्ये परिकीर्तिताः । ed.



DR.RUPNATHJI(DR.RUPAK NATH)

नास्तिका दांभिका नित्यं परदोषोपदर्शिनः[1] ।
अवैष्णवा मोघजीवास्तेभ्यो गोप्यं सदैव हि ॥

इति श्रीस्कंदपुराणे श्रीपुरुषोत्तममाहात्म्यं संपूर्णं ॥ ० ॥

[H. T. COLEBROOKE.]

## 3628.

**1130** b. Foll. 139; size 12 in. by 4½ in.; modern Devanāgarī writing; eleven, from fol. 47 onwards ten, lines in a page.

*Purushottamamāhātmya*, in 61 *adhyāyas*. [B.]

The first 45 *adhyāyas*, ending fol. 117*a*, correspond to the work as contained in the preceding MS. and in the Bombay edition. The remaining chapters contained in this MS. are apparently a later addition, transferring the subject more into the region of mysticism. The MS. is, however, so hopelessly inaccurate, especially in this latter portion, that one can only make one's way with difficulty.

This section begins (somewhat corrected):

स्कंद उवाच ॥

श्रुत्वेत्थं जैमिनेः प्रोक्तं ब्र[ह्म]णो दारुरूपिणः ।
माहात्म्यं सरहस्यं तु मुनयः शौनकादयः ॥
आनंदं परमं प्राप्य विस्मयोत्फुल्ललोचनाः ।
रोमांचान्वितदेहास्तु कृतकृत्या इवाभवन् ॥
अहो बत महत्क्षेत्रं मोचकं हि सुगोपितं ।
अस्माकं भाग्यसंपत्त्या सांप्रतं विष्णुरूपिणं(*r.* ०णां) ॥
साक्षाज्जैमिनिना प्रोक्तं कृतं सर्वसुगोचरं ।
अस्मिन्क्षेत्रे स्थिते साक्षाद्भगवद्द्र(? ०द्रुः) पकाशते(प्र०)॥
मरणान्मुक्तिदो मूढाः कथं यांति यमालयं ।
अहो माया भगवतः सर्वत्र हि निरंकुशाः ॥
विष्णोर्ब्रह्मस्य(? ण्य)रूपस्य क्षेत्रं वापि हितं तथा ।
इहा(इह) नो तत्र यास्यामो निश्चयेन पुनर्यथा ॥ ०

It ends (with corrections):

यो ऽश्रद्दधाने पुरुषे दद्याच्चाधार्मिके तथा ।
प्रेत्य गत्वा स निरयान् शुनां योनिं व्रजेत्ततः ॥

नमस्कृत्य हरिं विष्णुं जगद्योनिं सनातनं ।
अध्येतव्यमिदं शास्त्रं कृष्णद्वैपायनेरितं ॥ २१ ॥

इति श्रीस्कंदपुराणे चतुरशीतिसाहस्रे उत्कलखंडे जैमिनि-ऋषिसंवादे श्रीपुरुषोत्तममाहात्म्ये एकषष्टितमो ऽध्यायः ६१ ॥ समाप्तश्चायं ग्रंथः ॥

The MS. from which an analysis of this work was made in MS. 366 (no. 3738), foll. 221–23, must likewise have contained this additional section.

[H. T. COLEBROOKE.]

## 3629.

**2567.** Foll. 124; size 14 in. by 6 in.; good, clear Devanāgarī writing of the latter part of last century; 11 or 12 lines in a page.

*Purushottamamāhātmya*, in 45 *adhyāyas*.

This MS. shows the greatest variety of various readings, often doubtless of an arbitrary kind.

It begins (fol. 3*a*): नारायणं नमस्कृत्य ० ॥

तं वेदशास्त्रपरिवेष्टितशुद्धबुद्धिं
कर्माबरं सुरमुनींद्रनुतं कवींद्रं ।
कृष्णत्विषं कनकपिंगजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनां ॥

मुनय ऊचुः । ०

At the end of the first *adhyāya* the work is by mistake assigned to the *uttarakhaṇḍa*, instead of the *utkalakhaṇḍa*.

The work is here preceded by a different chapter (of the *Purushottamakshetramāhātmya*)—not ascribed, in the colophon, to the *Skanda-purāṇa*—enjoining certain rites to be observed in connection with the recitation of the *Purāṇa* to which it refers.

This chapter begins: मुनय ऊचुः ॥

भगवन् जैमिने सर्ववेदवेदांगपारग ।
त्वदनुग्रहतो ऽस्माभिर्माहात्म्यं जगदीशितुः ॥

[1] ० दर्शकाः ed.

DR.RUPNATHJI( DR.RUPAK NATH )

क्षेत्रराजस्य तस्यैव यात्राणां चैव सर्वस:(°श:) ।
भगवद्भोजनोद्दिष्ठ(?°ष्टं) प्राशनादिफलं तथा ॥

इंद्रद्युम्नस्य राज्ञो वै वृत्तांतमतिदुर्लभं ।
नीलमाधवरूपं तु दारुब्रह्मप्रकाशनं ॥

श्रुतं त्वद्वदनांभोजाद्गलितं तद्यथाविधि ।
इदानीं श्रोतुमिच्छामस्त्वत्तो हि वदतां वर ॥

सर्वं विस्तरतो ब्रह्मन् वयं सर्वं मुदान्विता: ।
पुराणश्रवणस्यैव यदुक्तं फलमेव तत् ॥

को वा तस्य विधिश्चैव केन साक्षात्तु सांगकं ।
अस्मासु चेदनुक्रोशो यथावद्वक्तुमर्हसि ॥

जैमिनिरुवाच ॥

साधु साधु मुनिश्रेष्ठा यत्पृष्टं परया मुदा ।
तत्र मे प्रीतिरतुला जाता रोमांचकारिणी ॥

तद्व: सर्वं प्रवक्ष्यामि शृणुध्वं सावधानत: ।
पुराणश्रवणारंभे यथाविभवमात्मन: ॥

आदौ संकल्पविधिवत् ब्राह्मणं शुद्धवंशजं ।
अव्यंगान्वयवंशाढ्यं निष्पापं स्वपुरोधसं ॥

सर्वशास्त्रार्थतत्त्वज्ञं भूषणैरतिशोभनैः ।
वस्त्रचंदनमाल्याद्यैर्वृणुयात्पाठसंश्रुतौ ।
कृतांजलिपुटो भूत्वा तत: संप्रार्थयेद्द्विजं ॥

त्वं विष्णुर्विष्णुरेव त्वं न वां भेद: कदाचन ।
निर्विघ्नं मे भवत्वेतत्त्वत्प्रसादात्प्रसीद च ॥

ततो वृतं ब्राह्मणं च बहुमूल्यासने शुभे ।
वासयित्वा च तस्यैव गले मालां विनिक्षिपेत् ॥ °

This chapter ends: मुनय ऊचु: ॥

अहो ऽस्माकं महाभाग्यं यत्पापौघविनाशनं ।
पुराणश्रवणस्यैव फलमस्माभिरेव च ॥

सांगोपांगविधानं च श्रुतं त्वन्मुखपंकजात् ।
धन्या: स्म: कृतकृत्या: स्म: संसारे विगतज्वरा: ॥

इदानीमात्मशक्त्या वै दीयते भवते मुने ।
दक्षिणाफलसंप्राप्तौ प्रसन्नस्त्वं गृहाण च ॥

इत्युक्तवंतो मुनयो ह्यकिंचना:
समित्कुशं पुष्पफलाक्षतादिकं ।
तृप्त्या च तस्मै मुनय: समुत्सुका:
क्षेत्रोत्तमं जग्मुरतीव हर्षिता: ॥

इति श्रीपुरुषोत्तमक्षेत्रमाहात्म्यस्य श्रवणविधि: ॥

[MACKENZIE COLLECTION.]

## 3630.

**2838 c.** Foll. 32; size folio, 12½ in. by 7½ in.; European paper; minute, but clear, Telugu handwriting; 50–53 lines in a page.

*Purushottamamāhātmya* — or *Purushottamakshetramāhātmya*, as it is called throughout in the colophons — in 45 *adhyāyas*.

This is on the whole the most correct of the four MSS. of the work in our collection.

[MACKENZIE COLLECTION.]

## 3631.

**1639 b.** Foll. 63; size 10¼ in. by 4¼ in.; careless Devanāgarī writing of 1762 A.D.; ten lines in a page.

*Kokilāmāhātmya*, a portion of the *Kanakādrikhaṇḍa* of the *Skandapurāṇa*, in 31 *adhyāyas*.

It begins:

एकदा नैमिषे ऽरण्य ऋषय: शौनकादय: ।
सत्रांते सूतमासीनं पप्रच्छुरिदमादरात् ॥ १ ॥

ऋषय ऊचु: ।

सूत सू[त] महाप्राज्ञ छिंध्यस्मद्धस्य(?° द्धृत्स्थ)संशयं ।
य[त्] पृच्छामो वयं सर्वे सविस्तरमेशेषत:(°रं विशेषत:)॥°

Being asked what the *Kokilāvrata* consists in, *Sūta* then relates, in the first four *adhyāyas*, what *Śiva-Śaṅkara* taught *Nārada* on that subject. The ceremony, which is performed by women — married, unmarried, or widows — consists principally in the adoration of an imago of a *kokilā*, made of gold and jewels and posted under a *sahakāra* tree. The object of it is (fol. 4*b*): सुखसौभाग्यवृद्धये ।

पुत्रपौत्राद्यवाप्त्यर्थमिहामुत्र सुखाय च ।
आकल्पं शिवलोके च वासार्थं भर्तृणा सह ॥

The rest of the work (*adhy.* 5–31, fol. 12 to the end) is taken up mainly by the story of *Daksha* and his wife *Śatarūpā*.



DR.RUPNATHJI( DR.RUPAK NATH )

The *adhyāyas* end as follows: 1. fol. 3*b*; 2. *vratārambhakathanam*, fol. 5*a*; 3. fol. 9*a*; 4. *kokilāvratotsargakathanam*, fol. 11*b*; 5. *satījanmakathanam*, fol. 13*a*; 6. *dakshakopa*, fol. 15*a*; 7. *dakshayajnaniścaya*, fol. 17*a*; 8. *dakshayajñārambha*, fol. 19*b*; 9. *dakshasamudvega*, fol. 21*b*; 10. *śivavākyam*, fol. 23*b*; 11. *satīyānam*, fol. 25*b*; 12. *satīdehavisarjanam*, fol. 28*a*; 13. *vīrabhadram*, fol. 29*b*; 14. *dakshayuddhodvega*, fol. 32*a*; 15. *devaparājaya*, fol. 33*a*; 16. *govindāstrapradānam*, fol. 34*b*; 17. *yajñavidhvaṃsanam*, fol. 36*b*; 18. *bhavapralāpa*, fol. 38*b*; 19. *satīvaradānam*, fol. 41*b*; 20. *gaurīvarapradānam*, fol. 44*a*; 21. *brahmaṇo varapradānam*, fol. 46*b*; 22. *śatarūpādakshaprajananavaradānam*, fol. 48*b*; 23. *punardakshayajña*, fol. 50*a*; 24. *dakshaprabodhanam*, fol. 51*b*; 25. *yajñasiddhi*, fol. 53*a*; 27. *devatāgamanam*, fol. 57*a*; 28. *maheśvarodvāha*, fol. 59*a*; 29. *gaurīmaheśvarasaṃgama*, fol. 60*a*; 30. *kumārajanma*, fol. 62*a*; 31. *purāṇaśravaṇamahiman*, fol. 63*b*.

On many leaves the writing has suffered from the sticky condition of the ink.

Dated: संवत् १८१९ नावर्षे फाल्गुनमासे शुक्लपक्षे ७ रवौ ली° दो° प्रेमशंकरदोकपालज्ञात्रिपठनार्थं ॥

[H. T. Colebrooke.]

## 3632, 3633.

**3048, 3049.** Foll. 290 & 223; size 12 in. by 3¼ in.; fair Devanāgarī writing of 1794 A.D. 7–10 lines in a page.

*Kāśīkhaṇḍa*, of the *Skandapurāṇa*; with occasional marginal notes explaining difficult words.

Each volume contains 50 *adhyāyas*. The copyist's signature runs as follows: संवत् १८५१ ज्येष्ठ कृष्ण ७ बुधे लिखितमिदं काश्यां भटवैद्यनाथपौत्रेण भटरामदेवसुतेन रंगनाथेनेति शिवम् ॥

Cf. Weber, Berl. Cat., nos. 489–94; Aufrecht, Cat. Bodl., nos. 120–22; Rāj. Mitra, Bikaner Cat., p. 212. [H. T. Colebrooke.]

## 3634.

**2616.** Foll. 122; size 4to, 11¾ in. by 8¼ in.; modern Telugu handwriting; 22–38 lines in a page.

*Kāśīkhaṇḍa*, *adhyāyas* 1–43.

The MS. terminates abruptly at the end of the leaf, shortly after the beginning of the 44th chapter. [Mackenzie Collection.]

## 3635, 3636.

**2025, 2026.** Foll. 413 & 252 originally; size 15 in. by 7½ in.; fair Devanāgarī writing of 1648–55 A.D.; on an average fifteen lines in a page.

*Kāśīkhaṇḍa*, with a commentary (*Gūḍhārthā*), by *Rāmānanda*, surnamed *Caitanyavana*, son of *Mukundapriya* and *Gandharvī*, grandson of *Gadādhara*, and pupil of *Caturbhuja*, and *Rāmendravana* (? also called *Surendra* or *Devendra*). [A.] It begins:

सच्चिदानंदसंदोहं भक्तैकामोदमंदिरं ।
सादरं प्रणुवे भक्त्या श्रीगोपीजनवल्लभं ॥

See Cat. Bodl., nos. 120–22; Rāj. Mitra, Notices, vi., p. 255 (*uttarārdham*). Editions of both text and commentary have been published at Benares (1868) and Bombay (1881).

In vol. i., fol. 403 (corresponding to fol. 403*b* and 404*a* of MS. B, and containing *adhy*. 49, vv. 29–45) is wanting. This volume contains the *pūrvārdham* (*adhy*. 1–50), and bears the date: संवत् १७१२ वर्षे असाढ वदि ११ सोमे ।

Of vol. ii. the original first 95 leaves have been lost, and replaced by 111 leaves of smaller size, containing the text only (as far as *adhy*. 65, v. 8; fol. 86*a* of B). After this the num-

DR.RUPNATHJI(DR.RUPAK NATH)

bering of the leaves runs on from fol. 96 to 251 (two leaves being numbered 146); and the beginning of this original portion (*adhy.* 66, v. 106) corresponds exactly to fol. 96 of the other MS. This volume is dated: संवत् १९०५ वर्षे वैशाषसुदिपंचमी शनिवारे लिखितं ॥

Apart from those later 111 leaves, two different hands have alternated with each other in producing this MS. [GAIKAWAR.]

## 3637, 3638.

**2753, 2754.** Foll. 413 & 251; size 13 in. by 6½ in.; good Devanāgarī writing of 1780 A.D.; generally 13 or 14 lines in a page.

*Kāśīkhaṇḍa*, with *Rāmānanda's* commentary. [B.]

The pretty close correspondence in the number of leaves, and the distribution of the text and commentary over them, might lead one to assume an intimate connection between this and the preceding MS., were it not that the present MS. frequently offers better readings, and that in this MS. the epilogue ends in a verse (also found in C as well as in the Bombay ed.), giving the commentator's account of his family, wanting in MS. A. In fact, the number of leaves may almost be said to have been traditionally fixed, at least as regards the 2nd part of the work, seeing that the next MS., as well as the Oxford one (no. 122), have the same number of leaves; the deficiency of one leaf in the present MS. (and probably also in the one in the Notices, though there stated to consist of 151 leaves) being solely due to the omission of the commentatorial matter contained on the additional leaf 146 of the preceding MS. (as also on fol. 147 of the next MS.). It can, indeed, scarcely be doubted that all these MSS. were ultimately derived from the same original MS.

Foll. 1–95 of vol. ii. contain the text and commentary to exactly the same point to which the lost leaves of MS. A must have reached.

The epilogue and colophon run as follows:

सच्चिदानंदसंदोहपरिपूर्णैकभानवे ।
भक्तेच्छोपात्तदेहाय कृष्णाय हरये नमः ॥ १ ॥
वेदांते सत्यवत्यात्मज इव मुनये भार्गवो वाथ जीवो
न्याये काणादवर्त्मन्यथ च गुरुतरो गौतमो वाक्षपादः ।
सांख्ये यो देवहूत्यात्मज इव हि तथा वासुकिर्योगशास्त्रे
प्राक्कांडे भट्टतुल्यः स जयति परमः श्रीसुरेंद्रो[1] गुरुर्नः ॥ २ ॥
वेदांते ऽथ पुराणभारतविधौ श्रीसत्यवत्यात्मजः
सांख्ये श्रीकपिलः कणाद इह यो वैशेषिके गोतमः[2] ।
न्याये योगसूत्रे पतंजलिरथो चंद्रप्रभावल्लभो
भट्टाचार्यचतुर्भुजो विजयते प्राक्कांडकौमारिलः ॥ ३ ॥
अकोशा[3] च सकोशा[4] च द्वे टीके लिखिते मया ।
यत्र यस्याभिलाषः स्यात्सा तेन परिगृह्यतां ॥ ४ ॥
आसीत्कश्यपवंशभूषणमणिर्मान्यो मुकुंदप्रियो
विप्रोदारगदाधरस्य[5] तनयः शुक्लांबरः सन्मतिः ।
गंधर्वीजठरे ततः समभवत् श्रीरामनामा सुतस्
तेनेयं विहिता हिताय विदुषां टीका बुधैर्वीक्ष्यतां ॥ ५ ॥

इति श्रीकाशीखंडटीकायां शततमो ऽध्यायः॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भगवत्पूज्यपादशिष्यरामेंद्रवनशिष्येण चैतन्यवनापरपर्यायेण रामानंदेन कृता काशीखंडटीका समाप्ता ॥

[WARREN HASTINGS.]

## 3639, 3640.

**938, 405.** Foll. 453 & 252; size 12¾ in. by 6¼ in.; careless, modern Devanāgarī writing; about fifteen lines in a page.

The same works. [C.]

In vol. ii. no. 428 is passed over in the pagination.

---

[1] Thus B, Rāj. M., eds.; श्रीदेवेंद्रो A, C, Oxf. MS.

[2] गौतमः A, C.

[3] सकोशा A, C.

[4] विकोशा A, C.

[5] धीरो गदाधरस्य C.

DR.RUPNATHJI( DR.RUPAK NATH )

To the epilogue this MS. adds another verse (also found in the Bombay ed.), besides a verse referring to the copyist:

काश्यां श्रीपुरुषोत्तमेन विदुषा भट्टेन शुद्धात्मना
तंत्राध्यात्मपुराणभारतविदोपास्योपकंसारिणा ।
रामानंदमुनींद्रवर्यकृतया गूढार्थया टीकया
सम्यक्संकलितं हिताय विदुषां श्रीकाशिखंडं महत् ॥ ६ ॥

भागीरथीमिश्रवरेण सूरिणा
श्रीवीरसिंहस्य नृपस्य सूनुना ।
विलेखितो ऽयं किल काशिखंडः
सटीक आस्तां प्रमुदे बुधानां ॥

[H. T. COLEBROOKE.]

## 3641.

**905.** Foll. 220; size 15¼ in. by 5 in.; written, in Bengalī characters, by two modern hands (one fair, the other good); eight lines in a page.

*Kāśīkhaṇḍa-bhāvārthadīpikā* (or simply *dīpikā*), a commentary on the *Kāśīkhaṇḍa*, by *Rāmānanda*, or *Rāmaśarman*.*

The work reaches only as far as *adhyāya* XXXII, v. 109. It begins:

आदौ नत्वा गणेशं त्रिजगदघहरं शम्भुनातिदिष्टं
पश्चात् शम्भुं सुरेशं वरदमतिमतां ज्ञानगम्याशुतोषं ।
स्मृत्वा दुर्गां जयाख्यां विपदपरिहरां रामचन्द्रं विभाव्य
काशीखण्डं वरेण्यं सुलभमतिकृद् रामना[मा]थ कश्चित् ॥

नमत नमत धीराः शङ्करं चाशुलभ्यं
तुपत तुपत(!) काली मुण्डमाली करालीं ।
जपत जपत गीतं रामचन्द्रस्य मुक्त्यै
व्रजत व्रजत काशीं तीर्थशासीं महेशीं ॥

संसारामयतप्तानां सारं दुर्गं चतुष्टयं ।
वासः काश्यां साधुसेवा गाङ्गेयं शङ्करार्चनं ॥

संप्राप्य मानवं देहं यः काशीं न च गच्छति ।
स च दण्ड्यः सूर्यपुत्रेणेत्याह(? ॰ण इत्याह) भगवांस्स्वयं ॥

एकाशीतिः सहस्राणि श्लोकानां वर्णितानि वै ।
पुरा व्यासेन श्रीस्कन्दपुराणं तच्च शब्दितं ॥

अष्टादशपुराणानां सारं सारं समुद्धृतं ।
श्रीमत्स्कान्दं सर्वपूज्यं काशीखण्डं विशेषतः ॥

इति पुराणमाहात्म्यवर्णनप्रकरणे व्यासेनैव वर्णितं । तच्च खण्डत्रयात्मकं भवति यथा काशीखण्डमुत्कलखण्डं रेवाखण्डं च ।

काशीतीर्थस्य माहात्म्यं काशीखण्डे विदुर्बुधाः ।
वर्णनं श्रीजगन्नाथक्षेत्रमाहात्म्यमुत्कले ॥
सार्धत्रिकोटितीर्थानां माहात्म्यं विस्तरेण वै ।
रेवाखण्डे वर्णितं स्यात् त्रैखण्डं स्कान्दिकं स्मृतम् ॥

इति तत्रैवोक्तं । तत्र तीर्थानां मध्ये वाराणस्याः प्रधानतासूचनायादौ काशीखण्डमुक्तं । ॰ – – – । अस्यारम्भावधिसमाप्तिपर्यन्तनिर्विघ्नग्रहणकरणकामो ग्रन्थकृत् आदौ गणेशं भक्त्या प्रणमति । तं मन्मह इत्यादि । ॰

The last colophon occurs on fol. 215*b*: इति काशीखण्डे रामानन्दविरचितभावार्थदीपिकायामेकत्रिंशदध्यायः ॥

The MS. breaks off abruptly with the comment on *adhy*. 32, v. 109: शिवाज्ञागृहीतगन्तुब्रह्मणः किमन्तयाः प्रभवन्ति नेतीत्यर्थः । अर्थात् हंसस्योड्डीयमानेन काश्यपि सेत्यगुणावलम्बिनी बभावित्यर्थः ॥ १०९ ॥

[H. T. COLEBROOKE.]

## 3642.

**2406a.** Foll. 16 (one of which, fol. 7, is wanting); size 7¾ in. by 4 in.; indifferent Devanāgarī writing of 1616 A.D.; 8 or 9 lines in a page.

*Gaṅgāsahasranāma*, a collection of 1000 names and epithets of *Gaṅgā*, arranged in alphabetical order, and forming the 29th *adhyāya* of the *Kāśīkhaṇḍa* of the *Skanda-purāṇa*.

It begins: अगस्तिरुवाच ॥

विना स्नानेन गंगायां नृणां जन्म निरर्थकं ।
उपायांतरमस्त्यान्यद् येन स्नानफलं लभेत् ॥ १ ॥
अशक्तानां च पंगूनामालस्योपहतात्मनां ।
दूरदेशांतरस्थानां गंगास्नानं कथं भवेत् ॥ २ ॥

* Thus in the opening verse of ch. 2; whilst the colophons have only *Rāmānanda*. On the first and last pages, Colebrooke's *Paṇḍits*—probably misled by the copyist's slip at the end of verse 1, where they may have supplied रामनाथस्तु—call the author four times *Rāmanātha* (twice *R. Vācaspati*, once *R. Vidyāvācaspati*).

DR. RUPNATHJI( DR. RUPAK NATH )

दानं वाथ व्रतं वाथ मंत्रस्तोत्रं जपो ऽथवा ।
तीर्थोत्तराभिषेको वा देवतोपासनं तु वा ॥ ३ ॥
यद्यस्ति किंचित् षड्वक्त्र गंगास्नानफलप्रदं ।
विधानांतरमत्रैव कथयस्व प्रसादतः ॥ ४ ॥

स्कंद उवाच ॥

अत्र चैवानुमानेन बुध्यस्व कलशोद्भव ।
दध्रे गंगोत्तमांगेन देवदेवेन शंभुना ॥ ५ ॥
स्नानकाले ऽन्यतीर्थेषु जप्यते जाह्नवीजले ।
विना विष्णुपदीं क्वान्यत्समर्थमघशोधने ॥ ६ ॥
गंगास्नानफलं ब्रह्मन् गंगायामेव लभ्यते ।
यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः ॥ ७ ॥ ॰ १२ ॥
ओंकाररूपिण्यजरातुल्यानंतामृतस्रवा ।
अघहराभयाशोकाकालदनंदामृताभया[1] ॥ १३ ॥ ॰

It ends :

एतत्स्तोत्रवरं पुण्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदं ॥
गंगास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितं ।
संस्तोतुं जाह्नवीं तस्मादेतत्स्तोत्रं जपेत्सुधीः ॥

इति श्रीस्कंदपुराणे काशीखंडे गंगासहस्रनाम एकोनत्रिंशो ऽध्यायः ॥ ॰ संवत् १६७१ वर्षे भाद्रपदे शुक्लपक्षे सप्तमी ७ बुधे लिखितं प॰ विश्वनाथवेणीदत्तेन लिखितं ॥

See Rāj. Mitra, Notices, viii., p. 17 (18, commentary). [GAIKAWAR.]

### 3643.

**2710.** Foll. 34; size $8\frac{1}{2}$ in. by 4 in.; indifferent, modern Devanāgarī writing; 10 or 11 lines in a page.

*Kumāramāhātmya*—also called *Skandakshetramāhātmya*, or *Lohācalamāhātmya*—the legendary account of a temple of *Kumārasvāmin* at Sandūr, in the district of Bellary; in 14 *adhyāyas*; professing to belong to the *Skandapurāṇa*.

It begins :

पुरा खलु महानास्ते(? महांतस्ते) तपसा नैमिषे शुभे ।
सर्वे संभूय च मिथो द्विजेंद्राः क्षीणकल्मषाः ॥ १ ॥
ब्रह्माधोक्षजरुद्रेशशिवतत्त्वविचक्षणाः ।
रुद्राक्षमणिसंकृष्टभूषणोत्तमभूषिताः ॥ २ ॥
पंचाष्टाक्षरमन्त्रादिसिद्धांतज्ञानतत्पराः ।
शौनकाद्या महेशस्य साक्षात्कारमचिंतयन् ॥ ३ ॥
वसिष्ठो गौतमः कण्वो भरद्वाजो भृगुर्मुनिः ।
विश्वामित्रोऽङ्गिराः कुत्सो याज्ञवल्क्योऽङ्गिरःसुतः ॥ ४ ॥
एते चान्ये च बहवो महात्मानो महाशयाः ।
अन्योन्यमूचुरे[2] स्वस्वं सिद्धांताश्च(!) तपोधनाः ॥ ५ ॥
तप एव परो मार्गस्तपसा बहु दृश्यते ।
तपसा स्वर्गमाप्नोति देवभूयां गतिं परां ॥ ६ ॥ ॰ ११ ॥
रुद्राक्षमणिसंक्लृप्तं स्फटिकाक्षविराजिताः ।
पंचाक्षरीजपरतः शिष्यसंघसमन्वितः ॥ १२ ॥
सूतः पौराणिकः श्रीमान् भगवानमितद्युतिः ।
मुनीनामंतिकं प्राप स्वच्छंदसुमहत्तयाः[3] ॥ १३ ॥
तं दृष्ट्वा मुनयश्चक्रुः रोमहर्षणमादरात् ।
पूजयामासुरेवैनं सूतं पौराणिकोत्तमं ॥ १४ ॥

ऋषय ऊचुः ॥

अस्माद्भाग्यवशादेतत्त्वत्पदं समलंकृतं ।
बादरायणशिष्येण क्षेत्रं नैमिषमुत्तमं ॥ १५ ॥
धर्मार्थकाममोक्षेषु सदाचारपथेष्वपि ।
त्वया न विदितं किंचित् त्रिषु लोकेषु विद्यते(!) ॥ १६ ॥
तस्मादिद महाभाग भगवन् सिद्धिकारणं ।
इत्युक्तो मुनिभिः सो ऽपि प्रत्युवाच तपोधनः ॥ १७ ॥ ॰ १९ ॥
पुरा महर्षिनिकरैः सनकादिभिरावृतः ।
अध्यास्ते मेरुशिखरे आदिमः कमलासनः ॥ २० ॥
तत्र पूर्णकथां श्रोतुमादृतः संप्रचोदितः ।
सनत्कुमारो मुनिभिः समप्राक्षीत्पितामहं ॥ २१ ॥
दिव्या हि बहवस्तात कथाः कर्णार्तिहृत्तमाः ।
तथापि श्रोतृवृत्तिर्नैस्तृप्तिं जातु न विंदति ॥ २२ ॥
एवं महर्षिणा तेन निशम्य गिरमीरितां ।
पितामहः स्मेरवक्त्रं(? ॰क्त्रः) प्रत्युवाच गिरं शुभां ॥ २३ ॥
स्कंधाभिख्यं मया ख्यातु(ख्यातं) पुराणं विदितं हि वः ।
स्कांदी पुरी तु नाम्ना तु(!) क्षेत्रं क्षेत्रवरं शुभं ॥ २४ ॥
तत्र पुण्यानि तीर्थानि सरितो दुरितापहाः ।
विद्यंते बहवो देवा मत्समाश्च तपोधनाः ॥ २५ ॥

---

[1] अघुदाराभयाशोकालकनन्दा॰ eds.

[2] ? ॰चिरे.

[3] r. स्वच्छंदं सुमहातपाः.

DR.RUPNATHJI( DR.RUPAK NATH )

आकर्ण्य तच तद्यूयं(!) दुरितध्वंसिनीं कथां ।
श्रीस्कंदक्षेत्रमाहात्म्यं कथयामि यथातथं ॥ २६ ॥

इयं स्कांदी पुरी रम्या दिक्कालपूरवंदिता ।
वर्तते श्रीपार्वतेयो यस्यां स्वामी जगत्पतिः॥२७॥०४०॥०
तस्याः प्रांते पुण्यतमो लोहशैल इति श्रुतः॥ ४१॥ ० ४४॥

तस्याद्रेरुर्ध्वभूमौ तु बहवः संति पावनाः ।
तस्मात्पुरं महाक्षेत्रं भुवि दुर्लभमुत्तमं ॥ ४५ ॥
अन्यथा त्रिपुरे वासं कुरुते कथमीश्वरः ।
अत्र षाण्मातुरं देवमुपास्य बहवः सुराः ॥ ४६ ॥
सर्वे संक्रंदनमुखा अत्र सिद्धिमवाप्नुयुः ॥ ४७ ॥
इति श्रीस्कांदे षण्मुखमाहात्म्ये प्रथमो ऽध्यायः ॥

*Adhy.* II., III. the same colophon, foll. 6*a*, 8*a*; IV. ० षण्मुखमाहात्म्ये महासेनाभिषेको नाम चतुर्थोध्यायः । fol. 9*b*; V. ०पुराणे स्कंददर्शनमाहात्म्ये पंचमो० fol. 12*b*; VI., VII. इति श्रीस्कांदे (सप्तमो०) foll. 14*b*, 16*a*; VIII. ०अगस्त्यमहिमावर्णनं नाम० fol. 18*b*; IX.–XI. ०पुराणे (नवमो)० foll. 20*b*–26*a*; XII. लोहाचलमाहात्म्ये द्वादशो० fol. 30*b*; XIII. लोहाचलमाहात्म्ये भीमतीर्थभैरवतीर्थवर्णनं नाम० fol. 32*a*; XIV. ends:

ततस्तत्तोरणं प्राप्य षण्मुखस्य च दर्शनं ।
कृत्वा पापानि दग्धानि भवंति च न संशयः ॥
दिव्यरूपधरस्तस्माद्यामकामो भवेत्तदा ।
शिवदूतास्तदागत्य विमाने समरोप्य(!) च ॥
शिवलोकं समागत्य शिवस्याग्रे निधाय च ।
तस्मात्सर्वप्रयत्नेन वाहनं कारयेद्बुधः ॥
इति श्रीस्कांदे दर्शनवर्णनं नाम चतुर्दशोध्यायः ॥

The title *Kumāramāhātmya* is only found on the title-page, fol. 1*a*, and (कुमा० मा०) on the margin of fol. 1*b*; whilst on a fly-leaf at the beginning the tract is called, in Telugu, '*Sondūru-komārasvāmimahātyam*,' and, in English, '*Lohachalla chatra.*'

[MACKENZIE COLLECTION.]

## 3644.

**389.** Foll. 112; size folio, 16¾ in. by 11 in.; European paper; clear Devanāgarī writing of 1804 A.D.; 26–31 lines in a page.

*Kumārikākhaṇḍa*, or *Kumārīkhaṇḍa*, a section of the *Skandapurāṇa*, treating of *Śiva*-worship and the legendary history of various places sacred to *Śiva*.

The work seems to derive its name from *Kumārikā*, the daughter of *Śataśriṅga* (fol. 61*a*, l. 1), by whose adoration *Mahādeva* was particularly gratified (especially when she worshipped the *Kumāraliṅga* established in *Gupta-kshetra*); so much so, indeed, that he connects his name *Kumāreśvara* with her own: तव नाम्ना च विख्यातो भविष्यामि कुमारिके । (fol. 62*b*).

It begins (somewhat corrected):

मुनय ऊचुः ॥
दक्षिणार्णवतीरेषु यानि तीर्थानि पंच च ।
तानि ब्रूहि विशालाक्ष वर्णमस्पति(?०यस्व हि) तानि च॥
सर्वतीर्थफलं येषु नारदाद्या वदंति च ।
तेषां चरितमाहात्म्यं श्रोतुमिच्छामहे वयं ॥

उग्रश्रवा उवाच ॥
शृणुध्वमत्यद्भुतपुण्यवत्वं[1] कुमारनाथस्य महाप्रभावं ।
द्वैपायनो यन्मम[2] चाह पूर्वं हर्षाम्बुरोमोद्गमचर्चितांगः ॥
कुमारगोता गाथात्र श्रूयतां मम सप्तमः(*r.* सत्तमाः) ।
या सर्वदेवैर्मुनिभिः पितृभिश्च प्रपूजिता ॥
साध्वाचार[:] स्तंभतीर्थं यानिसेवेति[3] मानवः ।
नियतं तस्य वासः स्यान्मम लोके यथा मुनिः(*r.* मुनेः)॥
ब्रह्मलोकाद्विष्णुलोकस्तस्मादपि शिवस्य च ।
पुत्रप्रियत्वात्तस्यापि गुरुलोके महोत्तमः(?) ॥
अत्राश्चर्यकथा या च(*r.* याश्च) फाल्गुनस्य पुरेरिताः ।
नारदेन मुनिश्रेष्ठास्ता वो वक्ष्यामि विस्तरात् ॥
पुरा निमित्ते कस्मिंश्चित्किरीटी मणिपूरकः ।
समुद्रदक्षिणे भागे स्नातुं तीर्थानि पंच सः ॥
वर्जयति सदा यानि भयात्तीर्थानि तापसः ।
कुमारेशं च पूर्वं च तीर्थमस्ति मुनेः प्रियं ॥
स्तंभेशस्य द्वितीयं च समुद्रस्य मुनेः प्रियं ।
बर्करेश्वरमन्यस्य पुलोमप्रियमुत्तमं ॥

1 ०वंतं or ०वत्तं. 2 यं मम. 3 *r.* यो निषेवेत.

DR.RUPNATHJI( DR.RUPAK NATH )

चतुर्थं च महाकालं कारंधमनृपप्रियं ।
भारद्वाजस्य तीर्थं च सिद्धेशाख्यं हि पंचमः ॥
एतानि पंच तीर्थानि ददर्श कुरुपुंगवः ।
तपस्विभिर्वर्जितानि महापुण्यानि तानि च ॥
दृष्ट्वा पार्थो नारदीयानपृच्छत्स महामुनीन् ।
तीर्थानीमानि रम्याणि प्रभावाद्भुतवंति च ॥
किमर्थं ब्रूत वर्ज्यंते सदैव ब्रह्मवादिभिः ।

तापसा ऊचुः ॥

ग्राहाः पंच वसंतेषु(*r.* °त्येषु) हरंति च तपोधनान् ॥
अत एतानि वर्ज्यंते तीर्थानि कुरुमंडन ।
इति श्रुत्वा महाबाहुर्गमनाय महोदधेः ॥
ततस्तं तापसाः प्रोचुर्गंतुं नार्हसि फाल्गुण ।
बहवो घातितास्तैस्तु राजानो मुनयस्तथा ॥
तप्तं(*r.* तप्त्वा) द्वादश वर्षाणि तीर्थानामर्बुदैरपि ।
स्नातः किमेतैस्तीर्थैस्ते मा पतंगव्रतो भव ॥

अर्जुन उवाच ॥

यदुक्तं करुणासारैः सारं तत्किं तु प्रोच्यते ।
धर्मार्थी मनुजो यश्च न स वार्यो महात्मभिः ॥ ० ॥

तापसा ऊचुः ॥

एवं ते कुर्वतः पार्थ दीर्घमायुः प्रवर्धतां ।
सदा धर्मरतिर्भूयाद् याहि स्वं कुरु वांछितं ॥
एवमुक्तो प्रणम्यैतानाशीर्भिरभिसंयुतः ।
जगाम तानि तीर्थानि द्रष्टुं भारतसत्तमः ॥

The MS. is rather incorrect, and its way of marking and numbering the chapters is very irregular and haphazard. Thus *adhy.* 1 ends fol. 2*b* : इति श्रीस्कंदपुराणे सपादलक्षसंहितायां कुमारीखंडे प्रथमो ऽध्यायः; *adhy.* 2, fol. 4*a*; 3, fol. 8*b*; after which there seems to be an omission, the next colophon being that of *adhy.* 9 on fol. 11b; followed by an unnumbered one on fol. 12*b*; and then by *adhy.* 12 on fol. 14*a*; then again by an unnumbered one on fol. 14*b*; and then by *adhy.* 15 on fol. 15*a*; after which the numbering is discontinued. Apparently it is also incomplete at the end.

It ends on fol. 112*b* :

इति वो वर्णितः पुण्यो महीसागरसंभवः ।
शृण्वन् संकीर्तयंश्चैनं सर्वपापैः प्रमुच्यते ॥
य इदं श्रावयेद्विद्वान् महीमाहात्म्यसंभवं ।
सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥
गुप्तक्षेत्रस्य सकलं माहात्म्यं श्रावयेद्यदि ।
सर्वैश्वर्यमवाप्नोति ब्रह्महत्यां व्यपोहति ॥
श्रुत्वेममखिलं खंडं ब्राह्मणाय निवेदयेत् ।
यथाशक्त्या सुवर्णं च गोभूमिं प्रयतः शुचिः ।
संतुष्टे ब्राह्मणे तुष्टो महेशो जायते ध्रुवं ॥

इति श्रीस्कंदपुराणे कुमारिकाखंडे गुप्तक्षेत्रमाहात्म्यं ॥ अत ऊर्ध्वं कापिलस्थानं ॥ यस्यायमाद्यश्लोकः ॥

शौनक उवाच ॥

सूत माहात्म्यमतुलं गुप्तक्षेत्रस्य सूचितं ।
स्थानस्य कपिलस्यापि माहात्म्यं वक्तुमर्हसि ॥ १ ॥

संवत् १८६१ शके २९ आश्विनशुदि १३ त्रयोदशी ॥ ग्रंथं पूर्णं ॥ लीखितं ॥ गुजराति ॥ रावलहरिशंकर ॥ उदिच्य ॥ ब्राह्मण ॥

Then follows a blank leaf marked 113; and another leaf, marked 114, bearing the inscription: अथ कुमारिका ॥ खंडं संपूर्णम् ॥ हरिहर ॥ कृष्णाय नमः ॥ ओं ॥

It may, however, be noticed that the index to this work contained in MS. 366 (foll. 142–157), though referring to another MS. in 163 foll., does not give any more than is contained in the present MS.

The *Varvarīkopākhyānam*, a fragment of which, the *Aparājitastotra*, is contained in the Berlin MS. (Weber, Cat., no. 1350), occurs on fol. 95*b* seqq., the *stotra* referred to beginning in the last line of fol. 101*b*.

[H. T. Colebrooke.]

## 3645.

**187.** Foll. 268; size 12¾ in. by 4¾ in.; large, indifferent, though clear Devanāgarī writing of 1777 A.D.; eight lines in a page.

*Kedārakhaṇḍa* of the *Skandapurāṇa*, treating of *Śiva* legends and *Śiva* worship generally, whence it is also called *Śaivaśāstra*. [A.]



DR.RUPNATHJI( DR.RUPAK NATH )

It begins :

यस्याज्ञया जगत्स्रष्टा विरंचिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमं ।
मुनीनामाश्रमो नित्यं नैमिषारण्यमुत्तमं ॥
तत्र स्थिता हि ऋषयः शौनकाद्यास्तपोधनाः ।
दीर्घसत्रं प्रकुर्वंतः सत्रिणः समचेतसः ॥
तेषां संदर्शनौत्सुक्यादागतो हि महातपाः ।
व्यासशिष्यो महाप्राज्ञो लोमपो(°शो) नाम नामतः ॥
तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः ।
उत्तस्थुर्युगपत्सर्वे सहर्षास्ते समुत्सुकाः ॥
दत्त्वार्घ्यपाद्यं संस्कृत्य मुनयो वीतकल्मषाः ।
तं पप्रच्छुर्महाभागं शिवधर्मं सविस्तरं ॥

मुनय ऊचुः ॥

कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः ।
महिमानं महाभाग ध्यानार्चनसमन्वितं ॥
संमार्जने किं फलं स्यात्तथा रंगावलिषु(°लीषु) च ।
प्रदाने दर्पणस्याथ तथा वै चामरस्य च ॥
दीपदाने किं फलं स्यात्पूजायां किं फलं भवेत् ।
कानि कानि च पुष्पाणि कथ्यतां[1] शिवपूजने ॥
एककालं द्विकालं वा त्रिकालं वापि कथ्यतां ।
प्रासादकरणे चापि भग्ने चैवाथ[2] यत्फलं ॥
प्रेक्षणे च शिवस्याग्रे नटने(नर्तने B) चैव यत्फलं ।
इतिहासपुराणानि वेदाध्ययनमेव च ॥
शिवस्याग्रे प्रकुर्वंति[3] कारयंत्यथवा नराः ।
तेषां नृणां फलं चाद्य कथ्यतां विस्तरेण हि ॥
शिवाख्यानपरो लोको[4] त्वत्तो नान्यो हि विद्यते[5] ।
इति श्रुत्वा वचस्तेषां मुनीनां भावितात्मनां ॥
उवाच व्यासशिष्यो ऽसौ शिवमाहात्म्यमुत्तमं ।

लोमश उवाच ॥

अष्टादशपुराणेषु दशभिर्गीयते शिवः ॥
चतुर्भिर्भगवान्ब्रह्मा द्वाभ्यां देवी तथा हरिः[6] ।
तस्माच्छिवस्य माहात्म्यं वक्तुं को ऽपि न पार्यते[7] ॥
शिव इत्यक्षरं नाम व्याहरिष्यंति ये जनाः ।
तेषां स्वर्गश्च मोक्षश्च भविष्यति न चान्यथा ॥
उदारो हि महादेवो देवानां पतिरीश्वरः ।
येन सर्वं प्रदत्तं हि तस्मात्सर्व[8] इति स्मृतः ॥
ते धन्यास्ते महात्मानो ये भजंति सदाशिवं ।
विना सदाशिवं नैव संसारं तर्तुमीहते ॥
स मूढो हि महापापः शिवद्वेषी न संशयः ।
भक्षितं [हि] गरं येन दक्षयज्ञविनाशनं[9] ॥
कामस्य दहनं येन कृतं राज्ञ्य(राज्ञः) प्रमोचनं ।

मुनय ऊचुः ॥

यथा गरं भक्षितं च यथा यज्ञो विनाशितः ।
दक्षस्य च तथा ब्रूहि परं कौतूहलं हि नः ॥
ब्रह्मादिपरदैवं हि यस्य देवस्य शूलिनः ।
को ऽयं हि कृतवांस्तस्य यज्ञभंगं महत्तरं[10] ॥

The work is divided into 35 *adhyāyas*, the contents of which are briefly these: 1–3. (fol. 16*a*) *Daksha* gives *Dākshāyaṇī* to *Śiva*, and is worshipped by all the *Ṛishis*; *Rudra* interferes with *Daksha's* sacrifices, declares them contrary to divine law and therefore useless; 4. (fol. 22*a*) Fight of the gods on this account; 5. (fol. 33*b*) Arrival of *Nanda* and *Kirāṭa* at *Śivaloka*; 6. (fol. 42*a*) How the *liṅga* drops from *Śiva* when cursed by a *muni* with whose wife he fell in love; 7, 8. (fol. 56*b*) Institution of the *Liṅga* worship; 9. (fol. 65*a*) *kālakūṭotpattiḥ*; 10. (fol. 72*b*) Destruction of the world by this *vishāgni*, and the consequent reconstruction of it; 11. (fol. 78*b*) *samudra-mathane ratnotpattiḥ*; 12. (fol. 82*a*) *amṛitotpattiḥ*; 13. (fol. 95*a*) *devāsurayuddham*; 14.

---

[1] With this word MS. B (fol. 2) begins; this being v. 9 there, as here.

[2] भग्नोद्धारे च B; cf. भग्नं शिवालयं ये च प्रकुर्वंति नरोत्तमाः । प्राप्नुवंति फलं ते वै द्विगुणं नात्र संशयः ॥ fol. 26*a*.

[3] शिवप्रणामं कुर्वंति B. [4] लोके B.

[5] ऽस्ति वै मुने B.

[6] ? चतुर्भिर्भगवान[ब्रा suppl.]ह्मा° A; for this and the preceding line B has simply: अष्टादशपुराणेषु गीयते वै परः शिवः ।

[7] शक्नुयात् B. [8] तस्माच्छर्व B.

[9] दक्षयज्ञो विनाशितः B.

[10] MS. B omits these two lines.

DR.RUPNATHJI( DR.RUPAK NATH )

(fol. 97*b*) *balimukhasarvadaityopasthāpanam;* 15. (fol. 105*b*) Story of *Nahusha* and *Yayāti;* 16. (fol. 113*b*) Story of *Dadhīci;* 17. (fol. 137*a*) *Vṛitrāsuravadhaḥ;* 18. (fol. 154*b*) sacrifice of king *Bali;* 19. (fol. 160*b*) *Bali* gives as much land to *Vishṇu* as he can measure in three steps; 20. (fol. 167*a*) *Girijotpattiḥ;* 21. (fol. 182*b*) Story of *Girijā;* 22. (fol. 192*b*); *Gaurītapaḥphalam;* 23–25. (fol. 210*a*) *Mahādeva's* marriage on the Himālaya mountain; 26. (fol. 214*a*) Birth of the *Vālakhilyas* by *Nārada's* word; 27. (fol. 221*b*) Birth of *Kumāra* (*Kārttikeya*); 28. (fol. 225*b*) *Kumāra's* contest with *Tāraka;* 29. (fol. 233*a*) *Tārakāsurasaṃgrāmaḥ;* 30. (fol. 237*a*) *Tārakāsuravadhaḥ* or *Kumāravijayaḥ;* 31. (fol. 243*a*) *Adhyātmanirūpaṇam;* 32. (fol. 250*b*) *Śvetarājopākhyānam;* 33. (fol. 256*b*) *Śivarātrīmāhātmyam;* 34. (fol. 264*b*) *Śaṅkaravanagamanam;* 35. (fol. 268*b*) *Śabarīrūpavarṇanam.* Cf. Rāj. Mitra, Notices, vi., p. 170 seqq.

It ends: ऋषय ऊचुः ॥

एवमुक्तं त्वया सूत चरितं शंकरस्य च ।
अनेन चरितेनैव संतृप्ताः स्मो न संशयः ॥

सूत उवाच ॥

व्यासप्रसादात् श्रुतमस्ति सर्वं
मया ततः शंकररूपमद्भुतं ।
सुविस्तृतं चाद्भुतवेदगर्भं(°गुह्यं B)
ज्ञानात्मकं परमं(!A, B; *r.* परम)पुण्यरूपं ॥

श्रद्धया परयोपेताः[1] श्रावयंति शिवप्रियं ।
शृखंति चैव ये भक्त्या शंभोर्माहात्म्यमुत्तमं ।
शिवशास्त्रमिदं विप्राः[2] ते यांति परमां गतिं ॥

इति श्रीस्कांदे पुराणे केदारखंडे शैवशास्त्रे पंचत्रिंशतितमोऽध्यायः ॥ ३५ ॥

संवत् १८३४ ॥ मार्गशीर्षमासे कृष्णे पक्षे एकादश्यां भौमवासरे ॥ श्रीबाबू उद्योतसिंघस्य पुरोहितेन भिक्षुकरामेण लिखितं स्वपठनार्थं परोपकारार्थं श्रीकाशीविश्वेश्वरगुरुप्रसादात् । ° ॥ [H. T. Colebrooke.]

[1] परया युक्ताः B. [2] भक्त्या B.

## 3646.

**2246.** Foll. 167 (6 of which are wanting); size 10⅜ in. by 4⅜ in.; good, clear Devanāgarī writing of 1687 A.D.; 11, sometimes 10, lines in a page.

*Kedārakhaṇḍa* of the *Skandapurāṇa.* [B.]

This MS. presents, on the whole, a more correct text than the preceding one, but it is unfortunately incomplete. The leaves wanting are 1, 3, 75–78; the gaps occasioned thereby reaching from I. 1–8, 27–44, and XVII. 56–159 (MS. A, foll. 117*b*–125*b*) respectively. In this MS., on the other hand, the verses of each *adhyāya* are numbered, which is not the case in A.

Dated: संवत् १७ से ४४ समये आश्विनि सुदि चतुर्दसि आदित्यवासरे इदं पुस्तकं केदारखंडं अनंतगिरिनृसिंहभटैर्लिखितं ॥

At the beginning of the MS., there are, in the place of the missing fol. 1, two single, unnumbered leaves (12 and 13 lines in a page resp.), written in another (indifferent, thick) hand, and apparently detached from a MS. of some work on *vratas*, or *ācāra* generally. One of the leaves contains the colophons: इति हेमाद्रौ भविष्योत्तरे सोद्यापनमनंतव्रतं । अथ नष्टदोरकप्रायश्चित्तं। युधिष्ठिर उवाच। ° and अथापनमनंतव्रतोद्यापनं(!)। युधिष्ठिर उवाच । ° [Sir Charles Wilkins.]

## 3647.

**1130 a.** Foll. 102; size 12 in. by 4½ in.; modern Devanāgarī writing; eleven lines in a page.

*Kedārakhaṇḍa.* [C.]

This very incorrect MS. seems to have been copied from MS. A.

[H. T. Colebrooke.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 3648.

**574.** Foll. 55; size 4to, 11½ in. by 9¼ in.; carelessly written in Devanāgarī (by one *Haribhaṭṭa*) in 1803 A.D.; eighteen lines in a page.

*Māyākshetramāhātmya* [A]—also called *Māyāpurīmāhātmya* and *Gaṅgādvāramāhātmya* — in 23 *adhyāyas*, professing to form part of the *Kedārakhaṇḍa* of the *Skandapurāṇa*, and treating of the sacred places in the Kedārakshetra.

*Adhy.* I. (introductory) begins (slightly corrected): सूत उवाच ॥

ततः पूर्वं महाभागाः स्कंदो वै पार्वतीसुतः ।
सर्वं कैलाशमाहात्म्यं कथयामास सुव्रतः ॥ १ ॥
श्रुत्वा तु वरतीर्थानां माहात्म्यं ब्रह्मपुत्रकः ।
पप्रच्छ च ततः स्कंदं गंगाद्वारस्य वैभवं ॥ २ ॥
अत्रान्यानां[1] च तीर्थानां पीठानां च तपोऽन्विताः ।
सो ऽपि स्कंदो महादेवपुत्रः प्रोवाच सर्वशः ॥ ३ ॥
गंगाद्वारादितीर्थानां तथा च सरितां शुभं ।
माहात्म्यं कथयामास ब्रह्मपुत्राय धीमते ॥ ४ ॥
नारदाय च सर्वासां विद्यानां पारदो[2] ऽमितजः ।
येषां च श्रवणात्सद्यो मुच्यते सर्वपातकैः ॥ ५ ॥

ऋषय ऊचुः ॥

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ।
तन्नो(*r.* त्वं नो) दाता महाभाग ज्ञानरत्नस्य सर्वदा ॥ ६ ॥
बहूनि हि पुराणानि श्रुतानि च सुखानि च[3] ।
गंगाया विभवश्चापि राज्ञा(राज्ञां) चैव प्रकीर्तितः ॥ ७ ॥
सर्वेषां देशवर्याणां माहात्म्यानि महांति च ।
श्रोतुमिच्छामहे त्वत्त आकेदारमतः परं ॥ ८ ॥
अवशिष्टानि तीर्थानि मायाक्षेत्रादितः पुनः ।
न हि वेत्ता त्रिलोके ऽपि त्वत्समो लोमहर्षण ॥ ९ ॥

सूत उवाच ॥

साधु साधु महाभागाः पृष्टं यन्मुनिभिः परं ।
तद्वै संप्रति वक्ष्यामि नमस्कृत्य गजाननं ॥ १० ॥
श्रुत्वा वै मानसे खंडे तीर्थानि सुबहूनि च ।
देवागाराणि बहुशः कथाश्च मुनिसत्तमाः ॥ ११ ॥
पुनः पप्रच्छ वै धात्रो गुहं सर्वेश्वरात्मजं ।
विनयावनतो भूत्वा चरणावभिवाद्य च ॥ १२ ॥

नारदो उवाच ॥

देव षण्मुख देवेश पार्वतीसुत नायक ।
मानसादिषु क्षेत्रेषु तीर्थानि प्रवराणि मे ॥ १३ ॥
कथितानि समासेन(महासेन B) भवमुक्तिप्रदानि हि ।
यद्यप्युक्तानि भवता तीर्थानि विविधानि च ॥ १४ ॥
तथापि संशयो मे ऽद्य वर्तते देववंदित ।
त्वन्मुखादेव देवेश श्रुतं काश्यां हि विस्तरात् ॥ १५ ॥
गंगाया विभवश्चापि स्थितिश्च परमात्मनः ।
तेषु द्रोणादयो देवा[4] क्षत्रियाः पांडवादयः ॥ १६ ॥
संसारदुःखसंतप्ता विचिन्वंतो महेश्वरं ।
जग्मुः कैलासशिखरे केदारे शुभदायके ॥ १७ ॥
कथं पुण्यमभूत्तत्तु स्थलं वै परमात्मनः ।
देवेश गोत्रहत्यया तन्मे वद महामते ॥ १८ ॥
कथमस्मिन्स्थले रम्ये गत्वा प्रापुः परं पदं ।
इति मे संशयं छिंद्धि यदि भक्तेषु ते दया ॥ १९ ॥

सूत उवाच ॥

इति श्रुत्वा वचस्तस्य नारदस्य महात्मनः ।
ध्यात्वा क्षणं महादेवं स्मृत्वा तद्वचनं परं ॥ २० ॥
उवाच प्रहसन्वाक्यं वाक्यज्ञं वादिनां[5] वरः ।
नमस्कृत्य महादेवं सर्वदेवनमस्कृतं ॥ २१ ॥

स्कंद उवाच ॥

धन्यो ऽसि त्वं महाभाग धन्यानां प्रवरो मुनिः ।
त्वत्समो नास्ति त्रैलोक्ये भक्तो भक्तिमतां वर॥२२॥ ० २६॥
इदं क्षेत्रं तु यत्पुण्यं(यत्प्रोक्तं B) केदाराख्यं सुपुण्यदं ।
यच्छ्रुत्वापि नरो याति शिवसायुज्यतां मुने ॥ २७ ॥
इमं देशं सकृद् दृष्ट्वा कृतकृत्यो भवेन्नरः ।
यत्र ब्रह्मादयो देवा शिवसंन्यस्तमानसाः ॥ २८ ॥
कथयामि माहात्म्यं ते देशस्य प्रवरं मुने ।
शृणुष्वावहितो भूत्वा गदतो मृडनंदन ॥ २९ ॥
नंदपर्वतमारभ्य यावत्काष्टगिरिर्भवेत् ।
तावत्केदारकं क्षेत्रं शिवमंदिरमुत्तमं ॥ ३० ॥ ० ४० ॥

सूत उवाच ॥

इति श्रुत्वा महाभागा नारदो देशवर्यकं ।
पुनः पप्रच्छ तं स्कंदं तीर्थानां विस्तरं बुधाः ॥ ४१ ॥

इति ० देशप्रशंसा नाम प्रथमो ऽध्यायः ॥ १ ॥

---

[1] ० न्येषां.   [2] *r.* पारगो.   [3] *r.* मुखान्नव.

[4] *r.* विप्राः.   [5] वाग्विदां B.

DR.RUPNATHJI( DR.RUPAK NATH )

II. नारद उवाच ॥

भो भो षएमुख सेनानीर्धन्यो ऽहं भुवि नारदः ।
यो वै त्वन्मुखकंजाद्धि निर्गतं सुमधु प्रभो ॥ १ ॥

पिवामि श्रोत्रपुटकैः क्षुधा मे बाधते न हि ।
इदानीं श्रोतुमिच्छामि तीर्थानि प्रवराणि च ॥ २ ॥

अन्यानि कानि तीर्थानि का[:] का नद्यः शुभावहाः ।
अस्मिन्देशे महादेवपुत्र राजन्नमो ऽस्तु ते ॥ ३ ॥

स्कंद उवाच ॥

शृणु नारद वक्ष्यामि तीर्थानि शुभदानि हि ।
यानि ज्ञात्वैव सपदि मुक्तिभाग्भवति स्फुटं ॥ ४ ॥

गंगाद्वाराच्छृणु प्राज्ञ रत्नस्तंभावधि ध्रुवे(°विधिं ब्रुवे B)।
तथा नंदागिरेः पश्चात्काष्टांते(°तं B) ब्रह्मनंदन ॥ ५ ॥

मायाक्षेत्रं समाख्यातं गंगाद्वारे सुपुण्यदं ।
ब्रह्मणः स्थानतो यावद्योजनानि द्विकं द्वयं[1] ॥ ६ ॥ °

The principal places mentioned in the work are: Droṇāśrama, Kuśāvarta, Bilvaka, Nīlaparvata, Kanakhalatīrtha, Caṇḍikātīrtha. III. सतीदेहोत्सर्गः; IV. यज्ञविध्वंसः; V. यज्ञसंधानं. These three chapters treat of traditions connected with Māyākshetra in particular. VI. नीलपर्वतवर्णनं—Gaṅgādvāra (also called Haridvāra, fol. 20*a*) and Nīlaparvata. VII. बिल्वपर्वतमहिमवर्णनं. VIII. वीरभद्रेश्वरवर्णनं. IX. कनखलोपाख्यानं. X. गोदानफलवर्णनं. XI. अन्नदानवर्णनं. XII. कुशावर्तवर्णनं. XIII. On Vishṇutīrtha. XIV. धर्मध्वजोपाख्यानं—story of *Dharmadhvaja* defending Vipratata against the *rākshasas* *Śūkarāsya* and *Gajānana*. XV. तीर्थसंक्रमोपाख्यानं—Saptasāmudrikatīrtha, Gaṇeśvaratīrtha, Nārāyaṇī nadī, Pārvatītīrtha, Sāravatī dhārā, Bhairavatīrtha, Bhānunadī, Puruhūteśvaratīrtha, Nādeśvarī, Kumudvatī(कौ°A, B) nadī, Reṇukādhārā, Cakru(Cakrū, B)nadī, Rambhā nadī. XVI. कुब्जाम्रकतीर्थोपाख्यानं. XVII. कुब्जाम्रकमहिमवर्णनं. XVIII. कुब्जाम्रकप्रकथनसोमशर्ममायाप्रदर्शनं. XIX. कुब्जाम्रकसंनिधौ तीर्थवरवर्णनं, Kaumudatīrtha, Candreśvaratīrtha, Sārshapatīrtha, Pūrṇamukhatīrtha, Karavīrakatīrtha, Puṇḍarīkatīrtha, Śubhakuṇḍatīrtha, Agnitīrtha. XX. अग्नितीर्थकथनं. XXI. Vāyutīrtha, Candrikānadī, Vāruṇatīrtha, Vārāhatīrtha, Saptasāmudrakatīrtha, Ṛishiparvata, with a large cave inhabited by *Śesha*, the king of serpents, and visited by *Lakshmaṇa*. In this connection the story of *Rāma's* residence in the forest, and the subsequent events, is briefly told, to show how *Lakshmaṇa*, for having slain *Rāvaṇa's* son, *Indrajit*, a *Brāhmaṇa* by caste, was seized with '*rājayakshman*,' of which, as *Vasishṭha* explains, he could only cure himself by a penitential visit to Kubjāmra. XXII. *Vasishṭha* expatiates upon the sacredness of the *Brāhmaṇa's* person (*brāhmaṇānāṃ māhātmyam*) as the '*jaṅgamā mūrtiḥ*' of *Vishṇu*, the supreme deity (*paramātman*). XXIII. Lakshmaṇakuṇḍatīrtha, Munikuṇḍa-, Indrakuṇḍa-, Dhenukuṇḍa-, Nandikuṇḍa-tīrtha; Dharmadhārā, Maheśvarī, Vārāhatīrtha, and Vārāhakshetra; Sūryaputrī nadī, Sūryakuṇḍatīrtha; Gālavatīrtha.

The title '*Māyāpurīmāhātmya*' is not found in this MS., but repeatedly in the colophons of MS. B, which also has frequently simply '*māyākshetre*,' whilst the present often reads '*māyātīrthe*.' The title '*Gaṅgādvāramāhātmya*,' on the other hand, which does not occur in the colophons, but is given as the title of the work on fol. 1*a* of this MS. (whence the leaves are marked throughout गं° द्वा° मा०), only applies to the first 15 *adhyāyas*, or still more properly to *adhy.* 6–15; whilst the remaining chapters 16–23 contain the *Kubjāmrakamāhātmya*. At the end of *adhy.* 15 we read:

इति ते कथितं विप्र गंगाद्वारस्य वैभवं ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ °

and *adhy.* 16 begins: नारद उवाच ॥

कुब्जामृकं(कुब्जाम्रकं B) महातीर्थं वद विस्तरतो मम ।
यथेदं च समुत्पन्नं यथा पुण्यं हि चाभवत् ॥

[1] दशद्वयं B; ? दशाद्धयं.

DR. RUPNATHJI( DR. RUPAK NATH )

In the colophons of *adhy.* 4–6 of the present MS. the treatise is assigned to the '*uttara-khaṇḍa*' of the *Skandapurāṇa*, instead of the *Kedārakhaṇḍa*, to which it is ascribed in the other colophons, and throughout in B.

It ends:

इति ते कथितं देव माहात्म्यं जगदीशितुः ।
हृषीकेशाश्रमे पुण्ये यथा रैभ्यो ह्यनुग्रहं(°गृहं B) ॥
कुब्जाम्रकस्य[1] माहात्म्यं यः शृणोति महामते ।
सो ऽपि वैकुंठनिलये याति ब्रह्म सनातनं ॥
य इदं पठते नित्यं महापातकनाशनं ।
मोक्षदं(मोदते B) त्रिदिवैः सार्धं पितृभिः सह नारद ॥
अस्य[2] क्षेत्रस्य महिमा(माहात्म्यं B) वक्तुं केनापि शक्यते ।
संक्षेपेण मया प्रोक्तं(ख्यातं B) पापघ्नं सर्वकामदं ॥
य इदं पठते श्राद्धे शृणोति च महामते ।
तारिताः पितरस्तेन सत्यमेव न संशयः ॥

इति श्रीस्कंदपुराणे केदारखंडे मायाक्षेत्रमा° कुब्जाम्रकमाहात्म्ये नाम समाप्तं ॥ [H. T. COLEBROOKE.]

## 3649.

**2576.** Foll. 64; size 10½ in. by 5¾ in.; indifferent Devanāgarī writing of 1811 A.D.; 10–12 lines in a page.

*Māyākshetramāhātmya.* [B.]

Colophon: इति श्रीस्कंदपुराणे केदारखंडे मायापुरीमाहात्म्ये कुब्जाम्रकमाहात्म्यं नाम त्रयोविंशतितमो ऽध्यायः २३ ॥

Though the two MSS. are equally incorrect, they are at least independent of each other, and generally help to correct each other's blunders. [MACKENZIE COLLECTION.]

## 3650.

**858.** Foll. 37; size 12¼ in. by 5¼ in.; fair Devanāgarī writing of 1726 A.D.; thirteen lines in a page.

[1] कुब्जामृकस्य B.

[2] ? नास्य.

*Śrīkshetramāhātmya*, in 17 *adhyāyas*, professing to belong to the *Uttarabhāga* of the *Kedārakhaṇḍa* of the *Skandapurāṇa*. It contains descriptions of the sacred places of Śrīkshetra, or Śrīsthala, and the traditions connected therewith; not without poetical beauty in its detail.

*Adhy.* I. runs as follows: ऋषय ऊचुः ॥

सूत सूत महाबाहो व्यासप्रतिनिधे शुभ ।
श्रीक्षेत्रं पुण्यदं लोके श्रूयते हि महामते ॥ १ ॥
कियत्प्रमाणं तत्क्षेत्रं कुत्र तद्विद्यते बुध ।
उत्पत्तिं चैव माहात्म्यं तस्य विस्तरतो वद ॥ २ ॥

सूत उवाच ॥

शृणुध्वं मुनिशार्दूला मत्तो निगदतो द्विजाः ।
यथा पुरा महासेनं पृष्टवान्नारदो मुनिः ॥ ३ ॥
एकदा सुखमासीनं स्कंदं वै पार्वतीसुतं ।
उवाच वचनं रम्यं नारदो मुनिसत्तमः ॥ ४ ॥

नारद उवाच ॥

देवदेव महासेन भक्तानां भक्तवत्सल ।
अनेकविधतीर्थानां पुण्यदानां महामते ॥ ५ ॥
माहात्म्यानि सुरम्याणि कथाभिश्च जगत्प्रभो ।
श्रुतानि त्वन्मुखादेव सर्वदेवनमस्कृत ॥ ६ ॥
इदानीं श्रोतुमिच्छामि माहात्म्यं श्रीस्थलस्य हि ।
कियत्प्रमाणं तत्क्षेत्रं किं पुण्यं तत्र जायते ॥ ७ ॥
कुत्र तद्विद्यते क्षेत्रं कथं पुण्यमभूत्तु तत् ।
एतन्मे शंस भगवन् पार्वतीसुत नायक ॥ ८ ॥

स्कंद उवाच ॥

साधु पृष्टं महाबाहो परोपकृतये त्वया ।
तत्ते संप्रति वक्ष्यामि शृणु नारद भक्तिमन् ॥ ९ ॥
कोलोत्तमांगमारभ्य यावत्कोलकलेवरं ।
तावत्प्रमाणं श्रीक्षेत्रं योजनानां चतुष्टयं ॥ १० ॥
योजनानां त्रयं ख्यातं तिर्यगायतमेव च ।
अतिपुण्यतमं क्षेत्रं सर्वशास्त्रेषु गोपितं ॥ ११ ॥
इदं स्थूलतमं ज्ञेयं सूक्ष्मं वै कथ्यते ऽधुना ।
जीवनेंद्रपुराद्विप्र यावद्धर्मवती नदी ॥ १२ ॥
इति सूक्ष्मं हि कथितमतिसूक्ष्मं निगद्यते ।
खांडवाख्यनदीतीरात् यावच्छिवितपःस्थलं ॥ १३ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

यस्मिन्क्षेत्रे मुनिश्रेष्ठ धर्मनेत्र इति श्रुतः ।
राजा परमधर्मज्ञः स चकार महत्तपः ॥ १४ ॥
विष्णुना सदृशः पुत्रो जायतामिति चिंतयन् ।
वरं प्राप्य कदाचित्तु कृतकृत्यो बभूव ह ॥ १५ ॥
नारद उवाच ॥
भो भो षण्मुख देवेश सर्वशास्त्रार्थपारग ।
कथं वै धर्मनेत्रस्तु चकार सुमहत्तपः ॥ १६ ॥
स्कंद उवाच ॥
शृणु विप्र पुरा वृत्तं शिवमुखान्मया [श्रुतं] ।
तत्ते संप्रति वक्ष्यामि विस्तरेण तपोधन ॥ १७ ॥
हैहयस्य च पुत्रो ऽभूद्धर्मनेत्र इति श्रुतः ।
राजा परमधर्मज्ञो राज्यपालनतत्परः ॥ १८ ॥
अपुत्रः पालयामास राज्यं लोकानुरोधतः ।
कतिचित्त्वथ काले तु निर्गते धर्मनेत्रकः ॥ १९ ॥
निर्ययौ स्वगृहाद्राजा राज्यलोभपराङ्मुखः ।
तपस्तप्तुं महद्देश आजगाम हिमालये ॥ २० ॥
स ददर्श महाक्षेत्रे श्रीसंज्ञे देवपूजिते ।
देवान् पितॄन्मुनिगणान् यक्षान्गांधर्वसत्तमान् ॥ २१ ॥
तान्दृष्ट्वा सहसा राजा परमं विस्मयं ययौ ।
धन्यो ऽस्मि कृतकृत्यो ऽस्मि जीवन्स्वर्गे वसाम्यहं ॥ २२ ॥
इति वै संवदन्(? स वदन्) राजा विचचार वनांतरे ।
ददर्शाथ महाभागं गंगातीरे महामुनिं ॥ २३ ॥
उत्पालकं तप्यमानं मीलिताक्षं समाधिना ।
तं दृष्ट्वा सहसा राजा प्रणनाम भुवि प्रभुः ॥ २४ ॥
पुनः पुनः पपातासौ पदयोस्तस्य धीमतः ।
कृतकृत्यमिवात्मानं ममन्ये(? मन्यते) जगतीपतिः ॥ २५ ॥
तस्याग्रे मुनिवंद्यस्य तस्थौ बद्ध्वा करद्वयं ।
एवं वै वर्तमानस्य वर्षाणां शतमभ्यगात् ॥ २६ ॥
ततो वै मुनिशार्दूलो ददर्श नृपमंतिके ।
उवाच वचनं प्रेम्णोत्पालको मुनिवंदितः ॥ २७ ॥
उत्पालक उवाच ॥
कस्त्वं पुरुषशार्दूल भक्तिमानिव लक्ष्यसे ।
किमर्थमागतो ह्यत्र वने मुनिगणान्विते ॥ २८ ॥
राजोवाच ॥
अहं सोमकुलोत्पन्नो धर्मनेत्र इति श्रुतः ।
पुत्रो वै हैहयेंद्रस्य दासो ऽहं तव धीमतः ॥ २९ ॥
दर्शनं त्वादृशानां तु कर्तुमत्र समागतः ।
अहं हि पुत्ररहितो वैराग्याविष्टमानसः ॥ ३० ॥
आगतो ऽस्मि तपः कर्तुं क्षेत्राणामधिपे शुभे ।
अत्रागत्य मया विप्र दृष्टं कौतूहलं महत् ॥ ३१ ॥
देवा यक्षास्तथा नागा मुनयः किन्नरास्तथा ।
गंधर्वाप्सरसो दैत्या दृष्टाः सर्वे दिवौकसः ॥ ३२ ॥
दृष्ट्वा तान् विस्मयाविष्टो अभूवं मुनिसत्तम ।
अथवायं स्वर्गलोको वर्तते भक्तनायक ॥ ३३ ॥
अथवा दृष्टिदोषो मे अथवा चित्तसंभ्रमः ।
किमिदं भो महाभाग वर्तते मुनिवंदित ॥ ३४ ॥
स्कंद उवाच ॥
इति श्रुत्वा वचस्तस्य धर्मनेत्रस्य धीमतः ।
प्रहस्योवाच भगवानुत्पालो भूपतिं पुनः ॥ ३५ ॥
उत्पालक उवाच ॥
शृणु देव नृपश्रेष्ठ यद्वै दृष्टं त्वयात्र हि ।
भाग्यवानसि हे राजन्नागतः क्षेत्रके परे ॥ ३६ ॥
विस्मयो न त्वया भूप मंतव्यो देवदर्शनात् ।
अत्र वै देवताः सर्वा वसंत्येव हि नित्यशः ॥ ३७ ॥
पूर्वजन्मकृतात्पुण्यात्प्राप्यते हिममंदिरं ।
अत्र वै हि मृतः कश्चिन्न च भूयो ऽभिजायते ॥ ३८ ॥
यत्र देवः शिवः साक्षाद्वर्तते शिवया सह ।
स्वयं समग्रभावेन नंदिभृंग्यादिभिर्नृप ॥ ३९ ॥
काश्यादिषु च तीर्थेषु वसते अंशभागतः ।
अत्र संपूर्णभावेन सदा निवसति प्रभुः ॥ ४० ॥
अहो धन्या मनुष्येषु पश्यंति सकृदेव हि ।
इदं क्षेत्रं महापुण्यं देवा एव न संशयः ॥ ४१ ॥
महापातकिनो ऽप्यत्र यांति वै परमां गतिं ।
किं पुनर्ब्राह्मणाद्याश्च स्वधर्ममनुवर्तिनः ॥ ४२ ॥
पूर्वं हि तारकेणापि वासवाद्या दिवौकसः ।
स्वर्गान्निष्काशिताः सर्वे आजग्मुः पृथिवीं नृप ॥ ४३ ॥
पृथिव्यामटमानास्ते निवासाय महामते ।
न प्रापुः स्थानं कुत्रापि तारकस्य भयाकुलाः ॥ ४४ ॥
विचिन्वंत इति स्थानं देवा इंद्रपुरोगमाः ।
केदारेश्वरके क्षेत्र आजग्मुः शिवदायके ॥ ४५ ॥
इदमेव महास्थानं स्थित्यै चकमिरे सुराः ।
इंद्रकीले महाद्रौ हि इंद्रश्चक्रे निवासकं ॥ ४६ ॥
ततो वै दक्षिणे भागे कीनाशपर्वते शुभे ।
यमश्चकार स्वगृहं रम्यं सर्वसुखप्रदं ॥ ४७ ॥
एवं क्रमेण सर्वत्र निवासं चक्रिरे सुराः ।
युगानि कतिचित्तेषां व्यतीयुर्वसतां नृप ॥ ४८ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

समाराध्य महादेवं सर्वज्ञं पार्वतीपतिं ।
ततः सेनापतिं प्राप्य ययुः स्वर्गं दिवौकसः ॥ ४९ ॥
जित्वासुरगणान्सर्वान् प्रापुर्वै निजकं पदं ।
अस्य वै क्षेत्रराजस्य प्रसादेन नरोत्तम ॥ ५० ॥
धर्मेणेत्र महाराज सुरास्तदवधि भुवं ।
अत्रैव निवसंत्येव क्षेत्रे वै मुक्तिलालसाः ॥ ५१ ॥
केदारमंडलं यावच्छिवलोको न संशयः ।
प्राप्ते कलियुगे घोरे सुरा भूमिं त्यजंति हि ॥ ५२ ॥
विना केदारकं देशं शिवस्थानं नरोत्तम ।
गंगापि स्वकलाभिश्च वर्तते सर्वदात्र वै ॥ ५३ ॥
इति कृत्वा महाराज वर्तते क्षेत्रमुत्तमं ।
यस्य संदर्शनादेव यः कश्चिच्छिवतां व्रजेत् ॥ ५४ ॥
स्कंद उवाच ॥
निशम्येति वचस्तस्य विस्मयं परमं ययौ ।
पुनः पप्रच्छ राजा तु मुनिमुत्फालकं मुने ॥ ५५ ॥

II. The saint relates the history of the sacred locality, beginning with king *Satyaketu's* son, *Satyasandha*, who slays *Kolāsura*, after his father's retirement to the Indrakīla.

The principal *tīrthas*, rivers, mountains, and caves, etc., described are as follows :—

III. Menakānadī, Devatīrtha, Sūryadhārā, Candradhārā, Vahnidhārā, Śyāmalā nadī (or Komalāsurabhavā nadī), Śivatīrtha, Gajavatī dhārā, Pushpadantikā sarit, Bhānumatīśilā, Sūryakuṇḍa, Indraprayāgatīrtha, Drishadvatī nadī and Drishadvatparvata, Kaṇḍikā, Śaktijā nadī, Bhavānīkshetra, Mahādevakshetra (where Nahusha performed his ablutions), Upendrajā nadī, Sthūlakshetra.

IV. Sūkshmakshetra and its *tīrthas*, famous through king *Jīvanendra;* Lāsyatīrtha, Gaurīprayāgatīrtha, Vareśvarī sarit, Ramaṇatīrtha, Indrāṇīnadī, Viśvaprayāgatīrtha, Muktidhārā, Auḍavaparvata, Nāyakakuṇḍa, Munjavatī dhārā, Alarkāśrama, Mañjughoshakshetra.

V., VI. *Atisūkshme tīrthāni*, Śivaprayāga on the river Khāṇḍavā, Kokilā sarit, Vatsajā nadī, Nārāyaṇī nadī, Rājikā nadī, Ḍhuṇḍhiprayāgatīrtha, Kauveraparvata, Puṇyavatī, Sampaddhārā, Śivakuṇḍa and various other *kuṇḍas* without particular names, Śrīsthaṇḍila, Vāsavī śilā in the river Gaṅgā.

*Tīrthas* in *Utphālaka's* own *āśrama:*

VII. Bhairavī dhārā, Kariparvata, Brahmakuṇḍa.

VIII. Aśvatīrtha, Bhṛiṅgī śilā, Dhanustīrtha.

IX. Bhairavītīrtha, Bhairavīpīṭha, Kauverakuṇḍa.

X., XI. *Devīpīṭhāni :* Cāmuṇḍam, Bhairavam, Kāṃsamardanikam, Gaurīpīṭham and Rājarājeśvarīpīṭham.

XII. *Pīṭhas* of Maheśvara, Kamaleśvara, Nāgeśvara, Kaṭakeśvara, Koṭīśvara.

XIII. Vahniśaila.

XIV. *Indrakīlācale tīrthāni :* Manoharī nadī, Devavatī n., Madhumatī n., Manonmanī,[1] Jīvantī n., Indrakīlācalaśaila, Sudyumnasya āśrama, Brahmadravam *ambhas.*

XV. Resuming the *Devyāḥ pīṭhāni* from *adhy.* XI.: Capalāśrīśilā.

XVI. Sacred waters in the wood east of Śivasthala, such as Golakshajā dhārā and others (*jalāni gomūtraprabhavāṇi*); Nāyakamahātīrtha, Gogalatīrtha, Māhendraparvata, Pāvanī nadī, Māhendrī śilā, Alakanandā nadī, Śukrāśrama, Bhārgavaṃ kuṇḍam, Puṇyakuṇḍa, Śaukrī dhārā, Rāmāśrama, Rāmakuṇḍa in the river Gaṅgā, Caitravatī sarit, where *Kshīrasuta* did penance ; Harshavatī ; at its conjunction with the Gaṅgā, there is a *tīrtha* celebrated for the *Śivaliṅga* worshipped under the name of *Tuḍuṅgarīśvara;* Rudratīrtha, Gostava-āśrama. These are the sacred places of Ūrdhvasūkshma.

---

[1] समायाति नदी पुण्या नाम्ना ख्याता मनोन्मनी । तत्र स्नात्वा नरो भक्त्या सर्वपापैः प्रमुच्यते ॥

DR.RUPNATHJI( DR.RUPAK NATH )

XVII. The sacred places in Sthūlakshetra: Harshavān parvataḥ, Harshavatī nadī (*Maheśvarī* is worshipped here under the name of *Tāreśvarī*), Gāṇeśakuṇḍa, Śrīdhārā, Paṭṭavatī nadī, Himavatī nadī, Lohavatī sarit, Koladehaka-parvata, Yaśovatī nadī.

It ends:

पुण्यं पवित्रमायुष्यं माहात्म्यं श्रीस्थलस्य हि ।
कथितं ते मुनिश्रेष्ठ परोपकृतिहेतवे ॥ ४७ ॥

घोरे कलियुगे विप्रा गते ये वै नराधमाः ।
कुर्वंति वासमन्यत्र मुक्तिस्तेषां हि दुर्लभा ॥ ४८ ॥

मृताः श्रीक्षेत्रके ये वै ते नरा मुक्तिभाजनाः ।
धन्यो ऽसि त्वं मुनिश्रेष्ठ यस्येयं नैष्ठिकी मतिः ॥ ४९ ॥

इदं यस्य गृहे नास्ति लिखितं ब्रह्मनंदन ।
श्मशानं तद्गृहं बोध्यं तस्मात्तत्संग्रहेद्बुधः(!) ॥ ५० ॥

लिखितं यस्य गेहे ऽपि माहात्म्यं वर्तते शुभं ।
धन्यास्त एव(!) पुरुषास्तद्गृहं शिवमंदिरं ॥ ५१ ॥

शृणोति यो मुनिश्रेष्ठ श्रीक्षेत्रस्य च वैभवं ।
स्नानं वै सर्वतीर्थेषु दत्ता वा सकला मही ॥ ५२ ॥

व्याकरोति नरो यस्तु पंडिताग्रे मुनीश्वर ।
तस्य पुण्यफलं वक्ष्ये शृणुष्वैकमना भव ॥ ५३ ॥

सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ।
सर्वदानेषु यत्पुण्यं तत्पुण्यं लभतेतराम् ॥ ५४ ॥

श्लोकार्धं श्लोकमेकं वाध्यायमात्रं तथैव च ।
श्रुत्वाक्षरसमानानि वर्षाणि हि शतानि च ॥ ५५ ॥

शिवलोके वसेन्मर्त्यो योगिगम्ये ऽन्यदुर्लभे ।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ॥ ५६ ॥

श्रावयित्रे ब्राह्मणाय देयं वै विपुलं धनं ।
ग्रामवस्त्रसुवर्णानि नो चेद्व्यर्थं श्रुतं भवेत् ॥ ५७ ॥

सूत उवाच ॥

इत्युक्त्वा नारदं स्कंदो विरराम महामतिः ।
नारदो ऽपि हि तच्छ्रुत्वा परं विस्मयमाययौ ॥ ५८ ॥

भो भो मुनिगणश्रेष्ठा नैमिषारण्यवासिनः ।
एतद्वः कथितं क्षेत्रं किमन्यच्छ्रोतुमिच्छथ ॥ ५९ ॥

इति श्रीमहापुराणे एकाशीतिसाहस्रे स्कांदे केदारखंडे श्रीक्षेत्रमाहात्म्ये सप्तदशो ऽध्यायः ॥ श्रीक्षेत्रमाहात्म्यं समाप्तं ॥

शाके ऽष्टवेदार्वनिपालसंमिते
मार्गासिताब्जोद्भवसंज्ञके तिथौ ।
भे चेंदुवारे व्यलिखज्जगन्मणिः
श्रीक्षेत्रमाहात्म्यसुवादिपुस्तकम् ॥

The 'jewel of the world' has performed his task in a very satisfactory manner indeed.

[H. T. Colebrooke.]

## 3651.

**2574 b.** Foll. 5, size folio, 13 in. by 8½ in.; modern, cursive Telugu handwriting, on coarse paper; 39–42 lines in a page.

*Talpagirimahātmya*, a description and legendary account of a hill, dedicated to *Vishṇu*, on the banks of the Pinākinī (Pennar), in the vicinity of Tirupati (Tripeti, Wilson, Mack. Coll.), and professing to form part of the *Kshetrakhaṇḍa* of the *Skandapurāṇa*.

It begins:

याथार्थ्यमाप भुवि यद्भजनात्पिनाकी
तस्मात्पिनाकतटिनीति ततः श्रुताभूत् ।
तस्यां कृपातिशयतः सततं शयानं
वंदे ऽथ तल्पगिरिनाथमहर्निशं तं ॥

भगवत्पद्ममलि(?° मिलिताः) सदा विमलमानसाः ।
नैमिशारण्यमाश्रित्य किमकुर्वंस्तपोधनाः ॥

सूतः ॥ माहात्म्यं पुण्यतीर्थानां सत्संगत्या प्रकाशितं ।
तपोधनानां शांतानां सुखेन समवर्तत ॥

तदा कदाचिच्छरदिंदुसंनिभो
जटाकलापैः परिवीतविग्रहः ।
मूर्तीकृता भक्तिरिव श्रियः पतिर्
विशुद्धविज्ञानविशुद्धचंद्रमाः ॥

परस्य पुंसो ऽद्भुतचेष्टितानि
गायन्विरंच्यो(r.° पंचो)निनदैर्गुणौघान् ।
समाजगामाब्जभवस्य नारदः
सूनुः समाजं किल तत्र तेषां ॥

स्वागतं प्रेक्ष्य मुनयो विस्मिता हृष्टमानसाः ।
अभ्युत्थानासनार्घ्याद्यैः पूजयामासुरादरात् ॥



DR.RUPNATHJI( DR.RUPAK NATH )

उपविष्टे तदारण्ये विष्टरे नारदे मुनौ ।
पप्रच्छुः कुशलं सर्वे मुनिं पुण्यकथोत्सुकाः ॥

मुनयः॥ देवदेव जगन्नाथ सर्वशास्त्रविशारद ।
भवदागमनाद्ब्रह्मन्नुत्फुल्लानि मनांसि नः ॥

कुतो वागमनं ब्रह्मन् को वा देशः पवित्रितः ।
कुत्र पुण्यानि तीर्थानि पुण्यक्षेत्राणि कानि वै ॥

सर्वेश्वरो हरिर्विष्णुर्विशेषात्कुरुते सदा ।
अनुग्रहेण चास्मासु वक्तव्यं किं च नारद ॥

संग्रहेण पुराणाख्यः पुण्यक्षेत्रप्रसंगतः ।
वेंकटाद्रेस्तथैवान्ये पंचयोज्ञमात्रतः (r. पंचयोजन°) ॥

फणिराजगिरिर्नाम विष्णोरायतनं महत् ।
तत्र विष्णुगिरेर्जाता नदी चोत्तरवाहिनी ॥

नाम्ना पिनाकिनी नाम सर्वपापप्रणाशनी ।
तत्रास्ते शेषशयने पद्मनाभः श्रिया सह ॥ °

It consists of a single chapter, counted the 79th of the *Kshetrakhaṇḍa* (of the *Vaishṇava-saṃhitā*) of the *Skandapurāṇa*.

It ends:

वसंति नित्यं ये पुण्याः संनिधौ शेषशायिनः ।
मम काश्यप ते सर्वे संपूज्या दैवतैरपि ॥

य इदं क्षेत्रमाहात्म्यं पठंत्युपदिशंति च ।
शृणोति यस्तु लिखति सत्कृपाभाविताशयः ॥

पुत्रमित्रकलत्रादिभोगैरमितसंपदः ।
प्राप्नोति शिवा धन्यास्ते ममानंदमुपेयुषः ॥

इति चरणानतस्य काश्यपर्षेर्
अखिलवरांश्च विकीर्य हृष्टचित्तः ।
शिरसि फणीगिरेरवाच्च (r. °वाक्) शायी
विलसति शौरिरहींद्रभोगमंचे ॥

इति स्कंदपुराणे वैष्णवसंहितायां क्षेत्रखंडे तल्पगिरिमाहात्म्ये एकोनाशीतितमो ऽध्यायः ॥

[Mackenzie Collection.]

## 3652.

**840 a.** Foll. 59; size $12\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; clear, modern Devanāgarī writing; nine lines in a page.

*Gaṇeśamāhātmya* (as it is called throughout in the margins)—or *Vināyakamāhātmya* (as it is called in the colophons)—of the *Skanda-purāṇa*, in 24 *adhyāyas*.

In form of a dialogue between *Skanda* and *Śiva*, it gives an account of (seven of) the different forms in which *Gaṇeśa* revealed himself for the benefit of gods and men.

It begins:

स जयति सिंदुरवदनो देवो यत्पादपंकजस्मरणं ।
वासरमणीयामसां सिं(? राशिं) नाशयति विघ्नानां ॥

स्कंद उवाच ॥
शिव शंभो महेशान सर्वज्ञ सुखदायक ।
आख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखांबुजात् ॥ १ ॥
विचित्राणि सुपुण्यानि सर्वाघशमनानि च ।
शाक्तशांकरसौराणि बहूनि वैष्णवानि च ॥ २ ॥
येषां श्रवणमात्रेण पलायंते महापदः ।
पुरुषार्थाः प्रसिध्यंति महादेव जगत्पते ॥ ३ ॥
तथापि तृप्तिं नो यामि पायं रयसुधामिव (r. पायं सु°) ।
अतस्त्वं कृपया ब्रूहि गणेशचरितं मम ॥ ४ ॥
अवतारान्सेतिहासान्सर्वकामप्रपूरकान् ।
शरण्यानस्य लोकस्य वक्तुमर्हसि शंकर ॥ ५ ॥

शिव उवाच ॥
सम्यक्पृष्टं त्वया स्कंद सर्वसंतोषकारक ।
गणेशचरितं वक्ष्ये सेतिहासं तवानघ ॥ ६ ॥
निर्गुणो निरहंकारो निर्विकल्पो निराकृतिः ।
निरामयो निरीहो यो गणेशो ऽसौ निगद्यते ॥ ७ ॥
अरूपो रूपवांश्चैव नानारूपधरस्तथा ।
भक्तिगम्यो ऽस्वरूपो ऽसौ ज्ञानगम्यः स्वरूपवान् ॥ ८ ॥
सूर्यविष्णुस्वरूपो ऽसौ शक्तिशंकररूपभृत् ।
मरुद्भिः स्तूयमानो ऽसौ ब्रह्मविद्यादिभिस्तथा ॥ ९ ॥
चराचरहितार्थाय नानारूपावतारवान् ।
तत्राप्याद्यावतारं ते कथयामि षडानन ॥ १० ॥
कदाचित्प्रलये जाते पूर्वभूते जगत्त्रये ।
योगशायी निराकारो गुणातीतो निराश्रयः ॥ ११ ॥
चिदानंदघनो नित्यः स्वप्रकाशो जगन्मयः ।
योगिगम्यो[1] ऽगम्यरूपो गम्यागम्यस्वरूपधृक् ॥ १२ ॥

[1] योगीगम्यो MS.

DR.RUPNATHJI( DR.RUPAK NATH )

चक्रे स ईक्षां पुरतो विभाव्य च प्रतापवान् ।
मत्तो ह्यन्यो न चेहास्ति बिभेम्यहमतः कुतः ॥ १३ ॥
एकाकी तानयुक्रेति बहु स्यामि(? स्यान्मे) महात्मनः ।
इति मत्वा ससर्जाग्रे रजः सत्वं तमस्तथा ॥ १४ ॥
गुणैस्त्रिभिस्त्रिधा भूतो ब्रह्मविष्णुशिवाभिधः ।
यद्रूपं रजसा भूतं ब्रह्मेति प्रथितं तथा ॥ १५ ॥ °

1. *vakratuṇḍāvatāravarṇanam* (55 vv.); 2. *cintāmaṇyupākhyānam* (65 vv.); 3. do. (61 vv.); 4. do. (54 vv.); 5. *cintāmaṇyupākhyāne cintāmaṇyavatāravarṇanam* (36 vv.); 6. *cintāmaṇipraśaṃsane lakshyavijayavarṇanam* (68 vv.); 7. *cintāmaṇipraśamane gaṇadaityavadha* (67 vv.); 8. *kapila-cintāmaṇiprāptivarṇanam* (44 vv.); 9. *pārvatīvarapradānam* (76 vv.); 10. *gajāsurapraśaṃsanam* (69 vv.); 11. *gajānanāvatāravarṇanam* (78 vv.); 12. *sindūravadha* (41 vv.); 13. *vighnarājāvatāra* (63 vv.); 14. do. (76 vv.); 15. *vallālasenavarṇanam* (disguised as a *Brāhman, Vallāla-Vināyaka,* appears to slay the *Asura Śaṅkha* and his brother *Kamala;* 66 vv.); 16. *mayūreśvaravijñānavarṇanam* (by sacrificing, *V.* causes a peacock to appear, mounting which, he, as *Mayūreśvara,* goes to attack *Kamala;* 47 vv.); 17. *mohanāśastranivāraṇam* (*Lābha,* son of *Buddhi* assists *Mayūreśvara* in neutralising the effect of the magic arms of the enemy; 47 vv.); 18. *mayūreśvarāvatāravarṇanam* (*Kamala* is slain, and *M.* rewarded by the gods; 68 vv.); 19. *bhṛigurājavāsavarṇanam* (*Bhṛigu* tells the *Daitya* king *Dhūma* of *Mahishāvatī,* that he (the king), in a former existence, was king *Vikṛiti,* whose piety was once put to the test by *Nārada* disguised as an old *Brāhman;* 47 vv.); 20. *sumadāmādhavavarṇanam* (the story of the *Kshatriya Mādhava,* living at the same city, who puts away his childless wife *Sumadā,* but takes her back after twelve years, when, by the favour of *Vishṇu,* or rather *Vināyaka,* she becomes pregnant; 46 vv.): 21. *vivāravarṇanam* (*Dhūma,* whilst setting out on a warlike expedition, hears a voice from heaven saying that *Sumadā* will bear a son who shall kill the king, whereupon he returns to consult with his ministers and sons; 43 vv.); 22. *vidramapalāyanam* (*Vidrama,* an officer, is sent by the king with a body of men to kill *Sumadā;* and, finding her sleeping with her husband on a couch, has them carried thereon to the wood, where, through divine interposition, they finally escape; 43 vv.); 23. *dhūmraketuvarṇanam* (*Sumadā* gives birth in the wood to a son, who turns out to be the 6th incarnation of *Vināyaka—raktāṅga, śvetavasana, caturbāhu, trilocana, śūrpakarṇa, viśālāksha,* with *bhālacandra, kamala* and *paraśu*—who, as *Dhūmraketu*—or *Dhūmaketu,* as he is called in the text, as against the colophon—destroys *Dhūma* and the *Daityas;* 55 *śl.*); 24. *gaṇeśāvatāravarṇanam* (as *Gaṇeśa,* his 7th incarnation, *Vināyaka* assists *Śiva* in destroying *Tripura*). Though it is expressly stated that there are twelve incarnations of *Vināyaka,* nothing is said of the remaining five.

The work concludes with a lengthy commendation of the wonderful results accruing from its study, ending thus:

दुःखप्रशमनं स्तोत्रं देवैर्येद्धि पुरा कृतं ।
विनायकस्य तत्प्रीत्यै पठेद्दुःखस्य मुक्तये ॥ ८१ ॥
मत्कृतस्तोत्रपाठेन विजयो जायते नृणां ।
मुच्यंते पितरस्तस्य शृणुयाच्छ्रावयेदिदं ॥ ८२ ॥
अयं गोप्यतमः स्कंद महिमा ते मयेरितः ।
यत्नात्स गोपनीयस्य(°यः स्याद्) गुरोरपि पुरः [प्रियात्[न्] ॥ ८३ ॥
व्यास उवाच ॥
शिवेन गदितो विप्राः स्कंदाय पृच्छते ऽखिलः ।
वैनायको ऽयं महिमा स भवद्भ्यो निवेदितः ॥ ८४ ॥

इति श्रीस्कंदपुराणे विनायकमाहात्म्ये (thus always) शिवस्कंदसंवादे गणेशावतारवर्णनो नाम चतुर्विंशो ऽध्यायः समाप्तः ॥ २४ ॥



DR. RUPNATHJI (DR. RUPAK NATH)

The MS. is rather incorrect, especially in its latter part.

For another MS. of the work—*Gaṇeśamāhātmya*, stated to belong to the *Gaṇeśakhaṇḍa* of the *Skandapurāṇa*—see Rāj. Mitra, Notices, v., p. 62. [H. T. Colebrooke.]

## 3653.

**3154.** Foll. 91; size folio, 11½ in. by 17½ in.; European paper; well written in Devanāgarī (from fol. 33*a*, l. 19, by a different hand); first 31–36, afterwards 26 lines in a page.

*Tāpīkhaṇḍa*, or *Tāpīmāhātmya*, of the *Skandapurāṇa*, describing all the sacred localities on and near the river Tapatī where *liṅgas* are established, and narrating the legends connected therewith. Not very correct.

It begins:

पूर्वापरौ भावयती पयोधी
तीर्थैरशेषैः परिमंडिता च ।
अनेकजन्मांतरपापहंत्री
पुत्री दिवाटस्य पुनाति लोकान् ॥ १ ॥

आख्यातं शंकरेणैतन्माहात्म्यं भालजोद्भवं ।
शृणवतां सर्वदेवानां कैलासे षण्मुखस्य हि ॥ २ ॥

रोमशो ऽपि समाकर्ण्य तत्र संसदि संस्थितः ।
पश्चात्स कथयामास गोकर्णस्य महात्मनः ॥ ३ ॥

गोकर्णो रोमशाच्छ्रुत्वा माहात्म्यं सकलं महत् ।
मुनीनां द्वापरस्यांते कथयामास भूतले ॥ ४ ॥

ततस्ते मुनयः सर्वे शृणवा (*r.* श्रुत्वा) माहात्म्यमद्भुतं ।
गोकर्णं परिपृच्छन्ति ते रोमांचितविग्रहाः ॥ ५ ॥

मुनय ऊचुः ॥
पृच्छंति मुनयः सर्वे गोकर्णं मुनिपुंगव ।
तीर्थानि वद संक्षेपात्तापीतीरद्वयस्य च ॥ ६ ॥

गोकर्ण उवाच ॥
शृणवंतु मुनयः सर्वे महालिंगानि यानि वै ।
तपत्युभयतीरस्य महापापहराणि च ॥ ७ ॥

धर्मक्षेत्रे च धर्मेशं तपनेशं च तापने ।
गोकर्णं सिद्धनाथं च महेशं पार्वतीवने ॥ ८ ॥ °

On fol. 2*b* the following 21 names of the river Tapatī are enumerated:

सत्या सत्योद्भवा श्यामा कपिला कपिलांबिका ।
तापनी तपनाहाह्वा(?) नासत्या नासिकोद्भवा ॥
सावित्री साहस्रकरा सनकामृतस्यंदना ।
सुषुम्ना सूक्ष्मरमणी सर्पा सर्पविषापहा ॥
तिग्मा तिग्मरया तारा तम्रा(? ताम्रा) तापीति विश्रुता ।
एकविंशतिनामानि तपत्याः कथितानि वै ॥

Of the many names occurring in this work those mentioned in the colophons may here be given: Rāmeśvarakshetra, foll. 4*a*, 24*a*, 27*a*, 32*b*; Śarabhaṅgatīrtha and Golānadī, fol. 7*b*; Sanandanatīrtha, fol. 8*a*; Uccaiḥśraveśvarakshetra, fol. 8*b*; Sthāneśvaraliṅga, fol. 8*b*; Prakāśakakshetra, fol. 10*a*; Gautameśvara *and* Akshamālātīrtha, fol. 10*a*; Karaṅkapāvanatīrtha, fol. 10*b*; Khañjanasya muner āśramaḥ, fol. 11*b*; Brahmeśvaraliṅga, fol. 12*b*; Bhīmeśvaratīrtha, fol. 13*b*; Śivatīrtha, fol. 15*a*; Cakratīrtha, Kāśyapī sarit, Akshareśvara, fol. 15*b*; Sāmbādityatīrtha, fol. 16*a*; Gaṅgeśvara, fol. 18*b*; Arjuneśvara, fol. 19*a*; Vāsaveśvara, fol. 21*a*; Mahisheśvara, fol. 21*b*; Dhāreśvara, fol. 22*a*; Ambikeśvara, fol. 22*b*; Āmardakeśvara, fol. 23*b*; Kapileśvara, fol. 25*b*; Badhireśvara, fol. 26*a*; Vyāghreśvara, fol. 26*b*; Virahā nadī, fol. 27*b*; Piṅgalaprasthe Vaidyanāthatīrthaḥ *or* Dhanvantaritīrthaḥ, fol. 28*b*; Gautameśvara, fol. 29*b*; Galiteśvara, Nāradeśvara, fol. 31*a*; Someśvara, foll. 34*a*, 80*b*; Ratneśvara, fol. 35*b*; Ulkeśvara, fol. 38*b*; Varuṇeśvara, fol. 39*a*; Śaṅkhatīrtha, fol. 40*b*; Kaśyapeśvara, fol. 41*b*; Sāmbārkatīrtha, fol. 42*a*; Moksheśvaratīrtha *or* Mokshatīrtha, foll. 43*a*–48*b*; Bhairavībhuvaneśvarī, foll. 44*a*–48*b*; Kapāleśvara, fol. 52*b*; Candreśvara, fol. 53*b*; Koṭīśvara, Ekavīrā, fol. 56*a*; Bhavamocanaliṅga, fol. 57*a*; Hari-

DR.RUPNATHJI( DR.RUPAK NATH )

harakshetra, fol. 58*b*; Ambarīsheśvara, fol. 68*b*; Aśvatīrtha, fol. 70*a*; Bharateśvara, fol. 70*b*; Gupteśvara, fol. 72*b*; Vāritāpyakshetra, fol. 76*b*; Kurukshetra, fol. 77*b*; Aṭavyeśvara, fol. 82*a*; Siddheśvara, fol. 87*a*; Śītaleśvara, fol. 89*a*; Nāgeśvara, Jaratkāreśvara, Pātālavila, Tāpīsāgarasaṃgama, fol. 91*a*.

It ends:

जन्मांतराभ्यासविकल्पनामा
    मुक्काविमुक्तः पदवीं स याति ।
इदं पुराणं पठते च नित्यं
    शृणोति यो वै द्विजसंनिकाशात् ॥ ५६ ॥
यथा [स्व]शक्त्या प्रददाति दानं
    प्राप्नोत्यसौ तीर्थफलं हि सम्यक् ।
जलावगाहेन चिराय गंगा-
    रेवासदातोयनिभालनेन ॥ ५७ ॥
सरस्वतीसंगमतोयपानात्
    पुनाति जंतून् शरणेन तापी ॥ ५८ ॥

इति श्रीस्कंदपुराणे तापीमाहात्म्ये तापीखंडे श्रीसागरसंगमे नगेश्वरजरत्कारेश्वरश्रीपातालविलश्रीतापीसागरसंगमप्रभावं समाप्तं॥

[H. T. Colebrooke.]

## 3654.

**2842b.** Foll. 16 (paged 1–31); size 4to, 9½ in. by 7 in.; coarse Indian paper; modern Telugu handwriting; fourteen lines in a page.

*Tuṅgaśailamāhātmya*—or *Korukāṇḍakshetramāhātmya*, as it is called on the title-page—a legendary account of the Temple of *Śiva* and holy place of Tuṅgaśaila or Korkonda, in the Rājamahendri district (Wilson, Mack. Coll., 2nd ed., p. 135); in 4 *adhyāyas*, professing to form part of the *Skandapurāṇa*.

It begins:

सूतं सर्वार्थविदुषं सर्वे संभूय मौनिनः ।
प्रेम्णानुयुयुजुर्भक्त्या (?) व्यासांतेवासिसत्तमं ॥
सूत पाराशर्यमुनेश्छात्रवर्य सुधीमणे ।
गोदावर्या महानद्याः प्रभावश्रवणे नरः ॥
मानसं सुखमत्यंतमन्वभूज्जगतां हिता (हितं) ।
अखंडायास्तु गौतम्याः समीपे तुंगसंज्ञितः ॥
शैलो महांस्तत्र हरिर्नृहरिः पद्मया सह ।
उवास भक्तवरदः कलिकल्मषनाशनः ॥
कथमाविरभून्नत्र नृसिंहः पद्मया सह ।
आख्याहि श्रोतुमस्माकं कौतूहलमुपस्थितं ॥
इत्युक्तो मुनिभिः सूतः प्रहृष्टात्मा सुकोविदः ।
जगाद हर्षयन्भक्त्या मुनीनां हृदयं मुहुः ॥
महर्षयो महोदाराः शृणुतेदं सुपावनं ।
माहात्म्यमतिपापघ्नं श्रवणाद्भावुकावहं ॥
नृहर्यक्षस्य तुंगाद्रिनिवासस्य रमायुजः ।
यावद्वक्तुं फणींद्रो ऽपि नालं किमुत मादृशाः ॥ ०

It ends:

लक्ष्मीयुजो नृसिंहस्य माहात्म्यं प्रति मौनिनः ।
चराचरजगद्व्यापी नृहरिर्भक्तवत्सलः ॥
परेषामप्रधृष्यात्त्राशत्रुनामज्ञकेसरी[1] ।
भक्ताभयेन सततं संसेव्यो नृहरिर्हरिः ॥
प्रह्लादादय एवास्य प्रमाणं भक्तरक्षणे ।
शिक्षणे दुष्टचित्तानां समर्थो ऽघविमर्दनः ॥

इति श्रीस्कंदपुराणे तुंगशैलमाहात्म्ये चतुर्थो ऽध्यायः ॥

[Mackenzie Collection.]

## 3655.

**2578a.** Foll. 32 (paged 1–64); size folio, 12½ in. by 8 in.; modern Telugu handwriting; 30–43 lines in a page.

*Nāgarakhaṇḍa* of the *Skandapurāṇa*: two sections thereof, viz. *Viśvakarmopākhyāna* and *Viśvakarmavaṃśavarṇana*.

I. *Viśvakarmopākhyāna* begins (somewhat corrected):

श्रीकंठो जगदाधारो वेदवेद्यो महेश्वरः ।
उमापतिस्त्रिनयनः सर्वदेवमयः प्रभुः ॥ १ ॥
सर्वज्ञः सच्चिदानंदरूपो भुजगभूषणः ।
इंद्रादिसुरसंसेव्यः पायाद्भस्मविलेपनः (!) ॥ २ ॥

[1] ? ० धृष्यत्वात् शत्रूणां ०.

DR.RUPNATHJI( DR.RUPAK NATH )

सर्वज्ञो जगतां पतिस्त्रिनयनः श्रीशप्रियः शंकरो
वाणीवल्लभपूजितस्य(? स्व)महिमा संदीप्तलोकप्रियः ।
देवेंद्रादिसुरार्चितांघ्रियुगलश्चंद्रार्धचूडामणिर्
जेयात्संततमंबिकाप्रियसुरः[1] सत्कीर्तिदीप्ताश्रयः ॥ ३ ॥०

1. (vv. 1–79) इति स्कंदपुराणे नागरखंडे शिवषण्मुखसंवादे विश्वकर्मोपाख्याने देवीप्रश्न[यो] नाम प्रथमोऽध्यायः ॥ p. 4; 2. (vv. 80–190) इति ० विश्वकर्ममाहात्म्ये विश्वकर्मप्रपंचसृष्टिर्नाम० p. 8; 3. (vv. 191–308) इति० शंकरषण्मुखसंवादे विश्वकर्मसृष्टिकरणे जगदुत्पत्तिप्रकरणं नाम० p. 14; 4. (vv. 309–362) इति ० विश्वकर्मसृष्टिप्रकरणे ब्राह्मण्यगायत्रीनिर्णयः० p. 16; 5. (vv. 363–420) इति ० विश्वकर्मोपाख्यान उपनयनसंस्कारः० p. 19; 6. (vv. 421–470) इति ० शिवषण्मुखसंवाद उपनयनविधिः p. 21; 7. (vv. 471–506) इति श्री० नाग० शिव० सकलभूतसंभवः p. 22; 8. (vv. 471–567) इति ० विश्वकर्मतनयोत्पत्तिः p. 25; 9. (vv. 568–645) इति स्कं० शि० जगदुत्पत्तिनिर्णयः p. 28; 10. (vv. 646–747) इति श्री ० ना ० शि ० ज्योतिषग्रहनक्षत्रराशिनिर्णयः p. 31; 11. (vv. 748–790) इति श्री० ना० हनुमत्प्रभवः p. 32; 12. (vv. 791–1207) इति स्कं० ना० विश्वकर्मोपाख्यानो द्वादशोऽध्यायः ॥ खंडं समाप्तं॥ p. 47.

II. *Viśvakarmavaṃśavarṇana* begins :

षण्मुख उवाच ॥

देवदेव महादेव सर्वज्ञ जगतां पते ।
सदाचारं मम ब्रूहि वंश्यानां विश्वकर्मणः ॥ ०

1. (vv. 1–84) इति स्कंदपुराणे विश्वकर्मवंशानुवर्णने गायत्रीमहिमानुवर्णनं p. 51; 2. इति स्कं० विश्वकर्मकुलाचारविध्युपाख्यानो नाम० p. 56; 3. (?); 4. (?); 5. इति स्कं० नागरखंडे स्कंदेश्वरसंवादे विश्वकर्मवंशानुवर्णनं p. 61; 6. begins :

तद्वृत्तांतं शृणु सुत श्रावये श्रवणोत्सवं ।
शैवं वैष्णवशाक्तेयं गाणपत्यस्तथैव च ।
चार्वाकबौद्धाविति च षण्मतानि विदुर्बुधाः ॥

ईश्वर उवाच ॥

शृणु षण्मुख विश्वेश वेदागमविनिश्चयं ।
योषितात्(०तः) पुरुषाश्चैव स्वयमेव नपुंसकः ॥ ०

Col. : इति स्कंदपुराणे षण्मुखमहेश्वरसंवादे षण्मतस्थापनं नाम षष्ठोऽध्यायः ॥ [MACKENZIE COLLECTION.]

[1] ? ० प्रियसरोः MS.

## 3656.

**2752.** Foll. 324 (counted 325, no. 316 being omitted); size 16½ in. by 8¼ in.; good Devanāgarī writing of 1796 A.D.; thirteen lines in a page.

*Hāṭakeśvaramāhātmya*, of the *Nāgarakhaṇḍa* of the *Skandapurāṇa*, a collection of legends and traditions connected with the Hāṭakeśvarakshetra, or 'field of the golden lord,' on the Kāverī. [A.]

It begins :

स धूर्जटिजटाजूटो जयतां विजयाय वः ।
यस्यैकपलितभ्रांतिं करोत्यद्यापि जाह्नवी ॥ १ ॥

ऋषय ऊचुः ॥

हरस्य पूज्यते लिंगं कस्मादेतन्महामते ।
विशेषात्संपरित्यज्य शेषांगानि सुरासुरैः ॥ २ ॥
तस्मादेतन्महाभाग यथावद्वक्तुमर्हसि ।
सांप्रतं सूत कार्त्स्न्येन परं कौतूहलं हि नः ॥ ३ ॥

सूत उवाच ॥

प्रश्नभारो महानेष यो भवद्भिरुदाहृतः ।
कीर्तयिष्ये तथाप्येनं नमस्कृत्य स्वयंभुवे ॥ ४ ॥
आनर्तविषये चास्ति वनं मुनिजनाश्रयं ।
मनोज्ञं सर्वसत्त्वानां सर्वर्तुफलितद्रुमं ॥ ५ ॥
तत्राश्रमपदं रम्यं सौम्यसत्त्वनिषेवितं ।
अस्ति तापससंकीर्णं वेदध्वनिविराजितं ॥ ६ ॥
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशिभिस्तथा ।
दंतोलूखलिभिर्विप्रैः सेवितं चाश्मकुट्टकैः ॥ ७ ॥
स्नानहोमपरैश्चैव जपस्वाध्यायतत्परैः ।
वानप्रस्थैस्त्रिदंडैश्च हंसैश्चापि कुटीचरैः ।
स्नातकैर्यतिभिर्दांतैस्तथा पंचाग्निसाधकैः ॥ ८* ॥
कस्यचित्त्वथ कालस्य भगवांस्त्रिपुरांतकः ।
सतीवियोगसंतप्तो भ्रममाण इतस्ततः ॥ ९ ॥

* The figures have been shifted forward from here by one half-*śloka* from where they are placed in the MSS. From v. 22 this MS. rights itself by repeating that number after the odd half-*śloka*. From v. 34 MS. A is a full verse in advance in the numbering, as is B from v. 37.

DR.RUPNATHJI( DR.RUPAK NATH )

तस्मिन्वने समायातः सौम्यसत्त्वनिषेविते ।
क्रीडंति नकुला यत्र सार्धं सर्पैः सुहर्षिताः(प्र० B) ॥१०॥
पंचाननाश्च मातंगैर्वृकदंशास्तथाखुभिः ।
काकाः कौशिकसंघैश्च वैरभावविवर्जिताः ॥ ११ ॥
ततश्च भगवान् रुद्रो दृष्ट्वाश्रमपदं तदा ।
नग्नः कपालमादाय भिक्षार्थं प्रविवेश ह ॥ १२ ॥
अथ तस्य समालोक्य रूपं गात्रसमुद्भवं ।
अदृष्टपूर्वं तापस्यः सर्वाः कामवशं गताः ॥ १३ ॥
गृहकर्माणि संत्यज्य[1] गुरुशुश्रूषणानि च ।
शिष्टाः[2] संभाषणं चक्रुः स्थाने स्थाने च संस्थिताः[3] ॥१४॥
एका सा[4] कापि धान्याय[5] चक्रे तस्यावगूहनं ।
विभ्रमा सर्वगात्रेषु तापसस्य महात्मनः ॥ १५ ॥
तथान्याः कौतुकाविष्टा धावंत्यः सर्वतोदिशं ।
दृश्यंते च समुद्दिश्य विस्तारितविलोचनाः ॥ १६ ॥
काश्चिदर्धानुलिप्तांग्यः काश्चिदेकांजितेक्षणाः ।
ऊर्ध्वसंयमितैः[6] केशैस्तथान्यास्त्यक्तबालकाः ॥ १७ ॥
एवमालोक्यमानः स कामिनीभिर्महेश्वरः ।
बभ्राम राजमार्गेण भिक्षां देहीति कीर्तयन् ॥ १८ ॥
अथ ते मुनयो दृष्ट्वा तं तथा विगतांबरं ।
कामोद्भवकरं स्त्रीणां प्रोचुः कोपारुणेक्षणाः ॥ १९ ॥
यस्मात्पांथ(०पाप B) त्वयास्माकमाश्रमो ऽयं विडंबितः ।
तस्माल्लिंगं पतत्वाशु तवैव(तथैव B) वसुधातले ॥ २० ॥
एतस्मिन्नंतरे भूमौ लिंगं तस्य पपात तु ।
भित्त्वाथ धरणीपृष्ठं पातालं प्रविवेश ह ॥ २१ ॥
सो ऽपि लिंगपरित्यक्तो लज्जायुक्तो महेश्वरः ।
गर्तां गुर्वीं समाश्रित्य तथाभूतः समाविशत् ॥ २२ ॥
अथ लिंगस्य पातेन त्रैलोक्यभयशंसिनः ।
उत्पाता दारुणास्तस्थुः सर्वत्र द्विजसत्तमाः ॥ २३ ॥
शीर्यंते गिरिशृंगाणि पतंत्युल्का दिवापि च ।
त्यजंति सागराः सर्वे मर्यादां च निजां[7] शनैः ॥ २४ ॥
अथ देवगणाः सर्वे भयसंत्रस्तमानसाः ।
शक्रविष्णुमुखा जग्मुर्यत्र देवः पितामहः ॥ २५ ॥

[1] गृहकर्म परित्यज्य B. [2] मिथः B.
[3] ताः स्थिताः B. [4] ? एकासां.
[5] धन्याया B. [6] अर्धसंयमितैः B.
[7] शनैः B.

प्रोचुश्च प्रणताः स्तुत्वा स्तोत्रैस्तं श्रुतिसंभवैः ।
त्रैलोक्यसृष्टिरूपं च (यत् B) कमलासनसंस्थितं ॥ २६ ॥
किमिदं किमिदं[8] देव वेत्सि न(वर्तते B) ह्यधरोत्तरं ।
त्रैलोक्यं सकलं येन व्याकुलत्वमुपागतं ॥ २७ ॥
प्रलयस्येव चाहानि(चिह्नानि B) दृश्यंते पद्मसंभव ।
किं सांप्रतमकाले ऽपि भविष्यति परिक्षयः ॥ २८ ॥
सर्वेषां सुरमर्त्यानां दैत्यानां मंत्रकोविद ।
गतिर्भयार्त्तदेहानां सर्वलोकपितामह ॥ २९ ॥
तेषां तद्वचनं श्रुत्वा देवानां चतुराननः ।
उवाच सुचिरं ध्यात्वा ज्ञात्वा दिव्येन चक्षुषा ॥ ३० ॥
प्रलयस्य न कालो ऽयं सांप्रतं सुरसत्तमाः ।
शृणुध्वं यन्निमित्तोत्था महोत्पाता भवंत्यपि ॥ ३१ ॥
ऋषिभिः पातितं लिंगं देवदेवस्य शूलिनः ।
शापेनात्मीये देशे कलत्रार्थं महात्मभिः ॥ ३२ ॥
तेनैतद्व्याकुलीभूतं त्रैलोक्यं सचराचरं ।
तस्माद्गच्छामहे तत्र यत्र देवो महेश्वरः ॥ ३३ ॥
येनास्मद्वचनाच्छीघ्रं तल्लिंगं निदधाति सः ।
नो चेद्भविष्यति व्युत्क्रमकाले चापि[9] संशयः ।
त्रैलोक्यस्यापि कृत्स्नस्य सत्यमेतन्मयोदितं ॥ ३४ ॥
अथ देवगणाः सर्वे ब्रह्मविष्णुपुरःसराः ।
आदित्या वसवो रुद्रा विश्वे देवास्तथाश्विनौ ॥ ३५ ॥
प्रजग्मुस्त्वरितास्तत्र यत्र देवो महेश्वरः ।
गर्तामध्यगतः[10] सुप्तो कलया[11] परया वृतः ॥ ३६ ॥ ० ५८ ॥

*Śiva* is then prevailed upon to resume the *liṅga* on condition that it is to be worshipped by gods and men:

स तथेति प्रतिज्ञाय लिंगमादाय च प्रभुः ।
स्थाने नियोजयामास सर्वदेवाधिपूजितं ॥ ५९ ॥
ततो हाटकमादाय तदाकारं पितामहः ।
कृत्वा लिंगं स्वयं तत्र स्थापयामास हर्षितः ॥ ६० ॥
प्रोवाचायं तु भो विप्राः साधुवादेन[12] नादयन् ।
लोकत्रये समस्तानां शृण्वतां त्रिदिवौकसां ॥ ६१ ॥
यस्माद्यमिदं लिंगं हाटकेन विनिर्मितं ।
ख्यातिं यास्यति सर्वत्र पाताले हाटकेश्वरं ॥ ६२ ॥

[8] कोमदं ! B. [9] व्युत्क्रमकालेनापि B.
[10] गर्त्या० A; गर्ता० B. [11] लज्जया B.
[12] ? साधुनादेन B.

DR.RUPNATHJI( DR.RUPAK NATH )

तथान्ये मनुजा ये च हाटकादीनि भक्तितः ।
मणिमुक्तासुरत्नैश्च कृत्वा लिंगानि कृत्स्नशः ॥ ६३ ॥
त्रिकालं पूजयिष्यंति ते यास्यंति परां गतिं ।
मृन्मयं संपरित्यज्य नीचधातुमयं तथा ॥ ६४ ॥
एवमुक्त्वा चतुर्वक्त्रः सह सर्वैर्दिवालयैः ।
जगाम त्रिदिवं सो ऽपि कैलाशं शशिशेखरः ॥ ६५ ॥
एतस्मात्कारणाल्लिंगं पूज्यमत्र सुरासुरैः ।
हरस्य चोत्तमांगानि परित्यज्य विशेषतः ॥ ६६ ॥
ततः प्रभृति तल्लिंगं स्वयं ब्रह्मा व्यवस्थितः ।
भगवान्वासुदेवश्च तेन पूज्यं शिवं हि तत् ॥ ६७ ॥
यस्तु पूजयते नित्यं श्रद्धायुक्तेन चेतसा ।
त्र्यंबकाच्युतब्रह्माद्यास्तेन स्युः पूजितास्त्रयः ॥ ६८ ॥
तस्मात्सर्वप्रयत्नेन शिवलिंगं प्रपूजयेत् ।
स्पर्शयेदीक्षयेन्नित्यं कीर्तयेच्च द्विजोत्तमाः ॥ ६९ ॥
इति श्रीस्कंदपुराणे तृतीयपरिछेदे (A, B) लिंगोत्पत्तिः ॥

For a general view of the contents of the work, we subjoin the principal topics (also noted in the *Sūcīpattra* contained in MS. 366, foll. 130–138, and referring to the leaves of the present MS.). Fol. 3: Story of king *Triśaṅku* of the *Solar* race. Fol. 5: *Acaleśvara-Śiva*. Fol. 9: Nāgavila, the abode of the *Nāgas*. *Ratnaśriṅgaparvata*. Fol. 10: *Indra's* visit to *Dadhīci's* hermitage in Pushkara (?), on the eastern bank of the Sarasvatī, to ask him to give up his bones for a thunderbolt to be used against *Vṛitra*. *Tuṅgaśriṅgaparvata*. Fol. 12: *Himālaya* and his three sons, *Maināka*, *Nandivardhana*, and *Ratnaśriṅga*. Fol. 13: *Camatkāra*, king of Ānarta, affected with leprosy by killing a hind, is healed by visiting the *Śaṅkhatīrtha*. Fol. 17: *Vaimanakapuram*. Fol. 18: Story of *Vidūra*, king of the *Haihayas*. Fol. 26: *Bālasaṅkhyatīrtha*. Fol. 28: *Mṛigatīrtha*. Fol. 29: Story of the *Brāhmaṇa* *Candraśarman* at Camatkārapura. Fol. 30: *Gokarṇa*, a *Brāhmaṇa* of Mathurā. Fol. 32: *Vaitaraṇī nadī*. Fol. 37: *Vatsa*, the *Brāhmaṇa*. *Kāmyakavana*. Fol. 42: *Nāgatīrtha*. Fol. 43: King *Indrasena*. Fol. 49: *Kālaprabha Dānava*. Fol. 51: *Citreśvarapīṭha*. Fol. 52: *Muni Durvāsas*. Fol. 54: *Dhundhumāratīrtha*. King *Bṛihadaśva's* son *Kuvalayāśva*, surnamed *Dhundhumāra* (for having slain the *Daitya* *Dhundhu* at Marujāṅgala), with his two wives *Devayānī* and *Śarmishṭhā*, establishes *liṅgas* in Camatkārapurakshetra. *Brāmī śilā*. Fol. 55: *Ratnamayī śilā* and *Sarasvatī-hrada* in the same *kshetra*; *Rishi Maṅkaṇaka* (*vishavidyāvicakshaṇaḥ*) bathes in that pool, and deprives the snakes of their venom. Fol. 61: *Abravīti*, son of king *Balavardhana*, born deaf and dumb, is cured by bathing at Sārasvatatīrtha in the Hāṭakeśvarakshetra. Fol. 62: Story of king *Rudrasena* of Kāntī-purī, who, being originally the son of a merchant at Vaidiśa-pura, during a famine, migrates with his wife to Saurāshṭra; and after worshipping *Mahākāla* during the annual wake and fast near Camatkārapura, they both die of hunger, and are born again as king *R.* and as *Padmāvatī*, daughter of the king of Daśārṇa; whereupon they again marry and each year attend the Vaiśākhī-jāgara in honour of *Mahākāla*. Fol. 70: *Saudāsa*, son of king *Mitrasaha*, unjustly cursed by *Vasishṭha*, becomes a *Yātudhāna*, and when restored, is freed from his foul smell by bathing in the Bhrūṇagarta. Fol. 72: Effigy of *Carmamuṇḍā devī*. Foll. 73-4: *Muni Gālava*, being childless, by worshipping the sun at the Sāmbāditya or Vaṭeśvarāditya, Sureśvara (? liṅga), obtains a son whom he calls *Vaṭeśvara*. Fol. 74: Pilgrimage of *Gāṅgeya*, son of *Śantanu*, to the shrine of *Āditya*. Fol. 75: *Pauṇḍraka*, son of *Kshudra*, healed of leprosy. Fol. 76: *Vidura* of Hastināpura, being without a son, goes on a pilgrimage to Hāṭakeśvarakshetra, as advised by *Gālava*. Fol. 77: *Agastya's*

DR.RUPNATH(DR.RUPAK NATH)

'*śoshaṇī nāma vidyā*,' consisting of an *ātharvaṇamantra*, by which he dries up the ocean. Fol. 78: *Śarmishṭhā*, daughter of king *Vṛika*; and the *Śarmishṭhā-tīrtha*, named after her. Fol. 81: *Ṛishi Romaka*. Fol. 82: *Citraratha*, king of Daśārṇa. Fol. 88: *Tāraka Dānava*, son of *Hiraṇyāksha*. Fol. 91: *Bhānumatī*, daughter of *Balabhadra*, wife of *Duryodhana*. Fol. 104: *Veṇumahīpāla*; *Vasudeva* and his three wives *Devakī*, *Rohiṇī*, *Suprabhā*, and his three children (one from each) *Kṛishṇa*, *Balabhadra* and *Mādhavī*. Fol. 109: King *Pratīpa* and his two sons, *Devāpi* and *Śantanu*. Fol. 113: King *Ambarīsha* and his son *Suvarcas*. Fol. 114: King *Ajāpāla* builds a temple for the *Devī Prajāpāleśvarī*. Fol. 115: King *Śveta*. Fol. 131: *Citraśarman*, son of *Vatsa*. Fol. 136: *Damayantī*, wife of the king of Ānarta. Fol. 139: King *Prabhañjana* and his son *Trijāta*. Fol. 141: *Devarātadvija*, of the *Maudgalya* family, and his son *Kratha*; *Rudramāla nāga*. Fol. 147: *Bhaṭṭikā brāhmaṇī*; *Kshemaṃkarī*, daughter of king *Prabhañjana*, married to *Revataka*, king of Saurāshṭradeśa. Fol. 149: *Mahisha Dānava*, son of *Hiraṇyāksha*. Fol. 155: *Śuddhakarajaka*. Fol. 157: *Mukhāra-tīrtha*; *Lohajaṅgha brāhmaṇa*, of the *Māṇḍavya* family. Fol. 159: *Karṇotpalātīrtha*. Fol. 164: King *Ara*, son of *Bṛihadbala*; *Yājñavalkya*, *purohita* of *Supriya*, husband of *Gaṇavatī* and of *Maitreyī*, father of *Kātyāyana*. Fol. 170: *Candrakūpikā vāpī*; *Khaṇḍaśilā kūpikā*; *Hārīta dvija* and his wife *Pūrṇakalā*. Fol. 177: The *dvija Upādhyāya*, of the Kaśyapa race. Fol. 179: King *Vasusena* of Ānarta, having died and gone to heaven, is constantly tormented by hunger and thirst; and, being told by *Indra* that, though he had always been a munificent giver, he had never given away food and drink, he sends *Nārada* to tell his son *Satyasena* of this, who thereupon takes to regularly feeding Brāhmans, and having '*prapās*' erected for wayfarers. Fol. 182: *Phalavatī*, daughter of *Jābāli* and *Rambhā*. Fol. 183: the *Gandharva Citrāṅgada* falls in love with her. Fol. 188: *Vyāsa* and his wife *Vaṭikā*; *Śuka* born to them. Fol. 190*a*: *Hiraṇyakaśipu* and his son *Andhaka*. Fol. 192*a*: *Śukra*, the *Bhārgava*, obtains from the *Devī* the *mṛitasaṃjīvinī vidyā* (*amṛitavatī vidyā*) by which the slain *Dānavas* are brought to life again. Fol. 194*a*: King *Suratha* deprived of his kingdom, and re-instated through the intercession of *Vasishṭha*. Fol. 199*a*: In Vaidiśa-pura, ruled over by king *Citravārsha* (? *Citravarman*), also called *Bṛihatsena*, the miserly *Kshatriya Maṇibhadra* has obtained great power; and, though deformed and dwarfish, wooes a fair *Kshatriya* maiden, *Mālikā*, the daughter of *Vīrabhadra*; the mother's objections are met by the father with the verses:

इह लोके हि धनिनां (Böhtlingk, Sprüche,
[2nd ed., no. 1143) ° ॥

न सा विद्या न तच्छिल्पं न तत्कार्यं(तद्दानं) न सा कला।
अर्थार्थिभिर्न तज्ज्ञानं धनिना यत्र दीयते(ib. 3482)॥

अर्थेभ्यो ऽपि हि वृद्धेभ्यः संभृतेभ्यस्ततस्ततः ।
प्रवर्तंते क्रियाः सर्वाः पर्वतेभ्यो यथापगाः (ib. 618) ॥

अशनादिंद्रियाणीव स्युः कार्याण्यखिलानि हि ।
सर्वस्मात्कारणाद्वित्तं(*r.* एत°) सर्वसाधनमुच्यते(ib.718)॥

अर्थार्थी जीवलोको ऽयं° प्रयाति दूरतः (ib. 608) ॥

The young wife is kept jealously, Brāhmans coming to the house being forbidden to look at her; once, however, a young Brāhman, *Pushpa*, looks her in the face whilst she is washing his feet, and is ejected from the house half-dead and bleeding from blows; by worshipping the sun at Camatkārapura, he obtains from the deity two little balls (*guṭikā*),



DR. RUPNATHJI(DR. RUPAK NATH)

a black and a white one, which, when taken in the mouth, are to make him assume the form of *Maṇibhadra* or his own; by this means he introduces himself into the house of the absent *M.*, who, on arriving, is taken up as an impostor and hanged; in his latter days, *Pushpa* expiates his guilt by worshipping at the Pushpāditya shrine. Fol. 205: *Rohitāśva*, son of *Hariścandra*. Fol. 209: *Ṛicīka*, son of *Bhṛigu*(!), marries *Satyavatī*, daughter of *Gādhi*, and sister of *Viśvāmitra*, whereupon she is cursed by her brother; rivalry between *Vasishṭha* and *Viśvāmitra*. Fol. 220: *Jayasena*, son of the king of Kāśī, establishes a shrine to *Pañcapiṇḍikā Devī*. Fol. 225: *Gāyatrīvivāhavarṇanam*. Fol. 234: *Audumbarī*, daughter of the *Gandharva Parvata*, in consequence of a curse, is born as the daughter of the Brāhman *Devaśarman* and his wife *Subrāhmaṇī*; and her emblem comes to be put up in the centre of the Sadas at every sacrifice. Fol. 244: *Ratnāvatī*, daughter of the king of Ānarta and his wife *Mṛigāvatī*, is to be married to *Bṛihadbala*, king of Daśārṇa, whom she has chosen from seeing his picture amongst those of many others. But, having allowed herself to be kissed by a young Brāhman (*Parāvasu*, son of *Viśvāvasu*) in the presence of her father and numerous people, in order to cleanse him of the guilt incurred in drinking spirits (*madya*) unawares, she is rejected (as a '*punarbhū*') by her betrothed; and, refusing to marry anyone else, she elects to lead a life of devotion to *Śiva*. Fol. 253: *Kumbhaka*, the *Cāṇḍāla*. Fol. 262: *Bālamaṇḍana-tīrtha*. Fol. 263: *Ahalyā*, wife of *Gautama*, turned into stone, and *Jayasena Sureśvara* (*Indra*), her paramour, smashed into a thousand pieces. Fol. 267: *Kalaśodadhimanthanam*. Fol. 270: *Ratnāksha*, king of Ayodhyā. Fol. 271: *Jalaśāyinas tīrtham*; *Ratnāditya-tīrtha*. Fol. 272: *Kushṭaharāśraya-tīrtha*. Fol. 273: *Niścalā*, wife of *Sāmba* (son of *Jambuvatī*), and daughter of *Nandinī*. Fol. 283: *Sitāśva*, king of Pāñcāladeśa; *Agniveśya brāhmaṇa*. Fol. 292: *Vṛika*, son of *Andhaka*; *Kshīrasamudravarṇanam*. Fol. 297: *Aśvasena*, king of Ānarta. Fol. 309: *Raktaśṛiṅga parvata*; king *Kaumārīśvara*, father of *Kuśadhvaja*. Fol. 320: *Muni Duḥśīla*. Fol. 323: *Kṛiti*, a descendant of *Śunaḥśepha*, father of *Śunaḥputra*, and grandfather of the *muni Nārāyaṇa*.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends: सूत उवाच ॥

एतत्पुराणमखिलं पुरा स्कंदेन भाषितं ।
भृगवे ब्रह्मपुत्राय तस्माल्लेभे तथांगिराः ॥ १ ॥
ततश्च च्यवनः प्रापत् स ऋचीकस्ततो[1] मुनिः ।
एवं परंपराप्राप्तं सर्वेषु भुवनेष्वपि ॥ २ ॥
स्कंदपुराणमेतच्च (स्कांदं पु° B) कुमारेण पुरोद्धृतं ।
यः शृणोति सतां मध्ये नरः पापात्प्रमुच्यते ॥ ३ ॥
इदं पुराणमायुष्यं वर्णानां च सुखावहं ।
निर्मितं षण्मुखेनेह नियतं सुमहात्मना ॥ ४ ॥
एवमेतत्पुराख्यातमाख्यानं भद्रमस्तु वः ।
हाटकेश्वरक्षेत्रस्य माहात्म्यं शृणुते नरः ।
न तस्य पुण्यसंख्यानं कर्तुं शक्येत केनचित् ॥ ५* ॥
यथा हि वर्षतो धारा यथा वा दिवि तारकाः ।
गंगायां सिकता यद्वत्तद्वत्संख्या न विद्यते ॥ ६ ॥
यो नरः शृणुयाद्भक्त्या दिनानि च कियंति वै ।
सर्वार्थसिद्धो भवति य इमां पठते कथां ॥ ७ ॥ ° १४ ॥
अतः संपूजनीयस्तु व्यासः शास्त्रोपदेशकः ।
गोभूहिरण्यवस्त्राद्यैर्भोजनैः सार्वकामिकैः ॥ १५ ॥
य एवं भक्तियुक्तस्तु श्रुत्वा शास्त्रमनुत्तमं ।
पूजयेदुपदेष्टारं शैवं पदमवाप्नुयात् ॥ १६ ॥
पुराणश्रवणादेव अनेकभवसंचितं ।
पापं प्रशममायाति सर्वतीर्थफलं लभेत् ॥ १७ ॥

---

[1] सद्य° B; सद्यवा° A.

* The MSS. keep the numbers after each second line, the odd line being thus left at the end.

इति श्रीस्कंदपुराणे तृतीयपरिछेदे (thus throughout; नागरखंडे तृ° fol. 84*b*) हाटकेश्वरक्षेत्रमाहात्म्यनागरखंड: ॥ संवत् १८५३ आश्विनशुक्ल १० भौमवासरे संपूर्णम् ॥ ग्रंथसंख्या १३८५० ॥

This MS., whilst mnch less correct than the other, is more convenient for refercnce, the chapters and different interlocutors being clearly marked by being written in red ink.

[Coll. of Fort William.]

## 3657.

**423.** Foll. 476 (counted 466; nos. 129–38 and 247 being used twice; and no. 171 passed over); size 12 in. by 6 in.; fair, modern Devanāgarī writing; twelve lines in a page.

*Hāṭakeśvara-māhātmya.* [B.]

Colophon: इति श्रीस्कंदपुराणे तृतीयपरिछेदे हाटकेश्वरमाहात्म्ये पुराणश्रवणमाहात्म्ये नगरस्कंदं समाप्तं ॥

[H. T. Colebrooke.]

## 3658.

**2679.** Foll. 18; each intended to fold so as to form two leaves; size 8½ in. by 7¾ in.; modern Telugu handwriting; 20–22 lines in a page, with a blank stripe across the middle.

*Parvatakhaṇḍa*, of the *Skandapurāṇa*; or rather a section thereof, the *Siddhavaṭasthalakalpa*, or *Śrīśailadakshiṇadvārasthalakalpa*, a legendary account of Siddhavaṭa (on the Śrīśaila). Rather incorrect.

It begins: श्रीसिद्धवटस्थलकल्पम् ॥ श्रीसूत: ॥

पूतं(?सुपूतं) जाह्नवीतीरे ब्रह्ममानससंभव:(°वं) ।
सनत्कुमारं योगींद्रं सिद्धयोगिप्रसेवितं ॥ १ ॥
महासिद्धाश्रमे रम्ये देशे कुंजे गुहांतरे ।
कुशास्तीर्णमहापीठे सुस्थितं योगचिंतनं ॥ २ ॥
दृष्ट्वा व्यासो महात्मानो[1] साक्षात्सत्यवतीसुत: ।
तदागमं परीक्ष्येदं ब्रह्मपुत्रो महामति: ॥ ३ ॥
प्रत्युत्थानं तत: कृत्वा संपूज्य विधिवत्कृत:(°तं) ।
व्यासोत्थितं(!) योगिवर्यं प्राह सुस्निग्धया गिरा ॥ ४ ॥
श्रीवेदव्यास: ।
श्रीशैलदक्षिणद्वारस्थलकल्पं महामते ।
सर्वलोकहितार्थाय वद मे योगिपुंगव ॥ ५ ॥ °

The tract consists of five *adhyāyas* of 85, 89, 70, 75 and 118 *ślokas* respectively.

It cnds:

आयुरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्धनं ।
राज्यलाभं शुभं सौख्यं विष्णुसायुज्यमाप्नुयात् ॥ ११८ ॥

इति श्रीस्कंदपुराणे श्रीमत्पर्वतखंडे शिवाशिवरहस्ये व्याससनत्कुमारसंवादे श्रीशैलदक्षिणद्वारस्थलकल्पे पंचमावरणस्थितदेवसंदर्शनजपपूजाहोममाहात्म्यनिरूपणं नाम पंचमोध्याय: ॥

[Mackenzie Collection.]

## 3659.

**463.** Foll. 236; folio, size 10¾ in. by 17 in.; European paper; clear Devanāgarī writing; 25–27 lines in a page.

*Prabhāsakshetramāhātmya*, or simply *Prabhāsakhaṇḍa*, a section of the *Skandapurāṇa*, treating of the sacred places of Gujarāt and Surat. It begins (cp. Bik. Cat., p. 215):

नारायणं नमस्कृत्य ° ॥
क्षेत्रं क्षेत्रवरं समर्थं[2] विमलं प्राभासिकं भासुरं
सोमेश: सुरसंयुत: क्षितितले यैर्वीक्षितो ह्यक्षणै: ।
ते तीर्त्वा विनतांतरं भवभयं भूत्याभिसंभूषिता:
स्वर्गं यानवरै: प्रयांति सुकृतैर्यज्ञैश्च संयोजिता:[3] ॥
प्रसरद्बिंदु(दू)नादाय शुद्धामृतमयात्मने ।
षट्त्रिंशत्तत्त्वदेहाय नमश्चिन्मात्रमूर्तये ॥
सत्रांते सूतमनघं नैमिषेया महर्षय: ।
पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणं[4] ॥
त्वया सूत महाबुद्धे भगवान्ब्रह्मवित्तम: ।
इतिहासपुराणार्थं व्यास: सम्यगुपासित: ॥

---

[1] °नं or °सौ.

[2] समेत्य Bik. MS.

[3] स्वर्गं यान्तरै: प्रयान्ति सुततैर्यज्ञैर्येषा यज्विन: ॥ Bik.

[4] Prof. Aufrecht points out the identity of the introduction here beginning with vv. 2–8 of the first *adhyāya* of the *Kūrmapurāṇa*.



DR.RUPNATHJI(DR.RUPAK NATH)

तस्य ते सर्वरोमाणि वचसा हृषितानि यत् ।
द्वैपायनं तु भगवांस्ततो[1] ऽभूद्रोमहर्षणः ॥

भवते प्रथमं व्याजहार देवः स्वयं विभुः ।
मुनीनां संहितां वक्तुं सूत पौराणिकीं कथां ॥

त्वं हि स्वायंभुवे यज्ञे सुत्याहे वितते हरिः ।
संभृतः संहितां वक्तुं व्यासेन पुरुषोत्तम ॥

तस्माद्भवंतं पृच्छामः पुराणं स्कंदकीर्तितं ।
प्रभासक्षेत्रमाहात्म्यं ब्राह्मी यात्रा श्रुता पुरा ॥

अधुना वीक्ष्य वै रौद्रीं यात्रां सर्वार्थसंयुतां ।
वक्तुमर्हसि चास्माकं पुराणार्थविशारद ॥

मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ।
प्रणम्य शिरसा प्राह गुरुं सत्यवतीसुतं ॥

लोमहर्षण उवाच ॥

श्रीवत्सांकं जगद्योनिं हरिमोंकाररूपिणं ।
अप्रमेयं गुरुं देवं निर्मलं निर्भयाश्रयं ॥

अहं शुचिपदं व्योमव्यापकं सर्वगं शिवं ।
उदासीनं निरायासं निष्प्रपंचं निरंजनं ॥

शून्यं विंदुस्वरूपं तु ध्येयं ध्यानविवर्जितं ।
अस्ति नास्तीति यं प्राहुः सुदूरं चांतिके च तत् ॥

मनोग्राह्यं परं धाम पुरुषाख्यं जगन्मयं ।
हृत्पंकजसमासीनं तेजोरूपं निरिंद्रियं ॥

एवंविधं नमस्कृत्य परमात्मानमीश्वरं ।
कथां वदिष्ये द्विविधां द्विशरीरां तथैव च ॥

दिव्यभाषासमोपेतां वेदाधिष्ठानशोभितां ।
पंचसंधिसमायुक्तां षडलंकारभूषितां ॥

सप्तसाधनसंयुक्तां रसाष्टगुणरंजितां ।
गुणैर्नवभिराकीर्णां दशदोषविवर्जितां ॥

विभाषाभूषितां तद्वदेकायत्तां मनोहरां ।
पंचकारणसंयुक्तां चतुष्कारणसंयुतां ॥

पुनश्च द्विविधां तद्वद् ज्ञानसंदोहदायिनीं ।
व्यासेन कथितां पूर्वं शृणुध्वं पापनाशिनीं ।
यां श्रुत्वा पापकर्मापि गच्छेद्धि परमां गतिं ॥

दुःखत्रयविनिर्मुक्तः सर्वातकविवर्जितः ।
न नास्तिके कथां पुण्यामिमां ब्रूयात्कदाचन ॥

श्रद्दधानाय शांताय कीर्तितये(कीर्तिमते) द्विजातये ।
निषेकादिः श्मशानांतो मंत्रैर्यस्यादितो विधिः ॥

तथैवार्थे ऽधिकारो ऽस्ति न्यायं[3] नान्यस्य कस्यचित् ।
चतुष्पक्षावदानस्य विशुद्धब्राह्मणस्य च ॥

श्रोतुमत्राधिकारो ऽस्ति शास्त्रे ऽस्मिन्वेदसंमिते ।
कथां पुराणां प्रवरो देवदेवो महेश्वरः ॥

नदीनां च यथा गंगा वर्णानां ब्राह्मणो यथा ।
अक्षराणां तु सर्वेषामोंकारः प्रथमो यथा ॥

पूज्यानां तु यथा माता गुरूणां तु यथा पिता ।
तथैव सर्वशास्त्राणां पुराणं स्कंदकीर्तितं ॥

पुरा कैलासशिखरे ब्रह्मादीनां च संनिधौ ।
स्कांदं पुराणं कथितं पार्वत्यग्रे पिनाकिना ॥

पार्वत्याः षण्मुखस्याग्रे(!) तेन नंदीगणाय(नंदि°) वै ।
नंदिना चापि कुमाराय(!) तेन व्यासाय धीमते ॥

व्यासेन तु समाख्यातं भवद्भ्यो ऽहं प्रकीर्तये ।
यूयं सद्भावसंयुक्ता यतः सर्वे महर्षयः ।
तेन मे भाषिता श्रद्धाभवतां(?°नवतां) स्कंदसंहिता ॥

इति स्कांदे बृहत्प्रभासपुराणे प्रथमो ऽध्यायः ॥ १ ॥

ऋषय ऊचुः ॥

कथाया लक्षणं ब्रूहि गुणदोषान्सविस्तरं ।
आर्षेयपौरुषेयाणां काव्यचिह्नपरीक्षणं ।
कथं ज्ञेयं महाबुद्धे श्रोतुमिच्छामहे तव ॥

सूत उवाच ॥

अहं संक्षेपतो वक्ष्ये पुराणानामनुक्रमं ।
ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवं ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरं ॥

निर्गतं ब्रह्मणो वक्त्राद् ब्राह्मं[4] वैष्णवमेव च ।
शैवं भागवतं चैव भविष्यं नारदीयकं ॥

मार्कंडेयमथाग्नेयं[5] ब्रह्मवैवर्तमेव च ।
लैंगं तथा च वाराहं स्कांदं वामनमेव च ॥

DR.RUPNATHJI(DR.RUPAK NATH)

---

[1] ? Read द्वैपायनस्य तु भगांस्ततो.

[3] ? चायं.

[4] One expects पाद्मं here.

[5] The present enumeration of the *Purāṇas* and *Upapurāṇas* corresponds on the whole to that given in the *Kūrmapurāṇa*, where some MSS. here read मार्कंडेयमथ ज्ञेयं cf. Aufrecht, Cat., p. 8*a*, l. 2; Wilson, *Vishṇup.*, transl., 2nd ed., i., p. xxiv., with Hall's statement that without the *Āgneya* there would be only 17 names. This, however, is only true if (as seems the case in the above list) the *Brahmāṇḍa* is not to be included among the 18; for the '*S'aivam Bhāgavatam*' could scarcely have been intended for a single *Purāṇa*.

कौर्मं मात्स्यं गारुडं च वायवीयमनंतरं ।
अष्टादशं समुद्दिष्टं सर्वपातकनाशनं ॥

एकमेव पुरा ह्यासीद् ब्रह्मांडं शतकोटिधा ।
ततो ऽष्टादशधा कृत्वा वेदव्यासो युगे युगे ।
प्रख्यापयति लोके ऽस्मिन्साक्षान्नारायणांशजः ॥

अन्यान्युपपुराणानि मुनीनां कथितानि तु ।
तानि वः कथयिष्यामि संक्षेपादवधार्यतां ॥

आद्यं सनत्कुमारोक्तं नारसिंहमतः परं ।
तृतीयं नांदमुद्दिष्टं[1] कुमारेण तु भाषितं ॥

चतुर्थं शिवधर्माख्यं साक्षान्नंदीशभाषितं ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परं ॥

कापिलं मानवं[2] चैव तथैवोशनसेरितं ।
ब्रह्मांडं वारुणं चान्यत्कालिकाह्वयमेव च ॥

माहेश्वरं[3] तथा सांबं सौरं सर्वार्थसंचयं ।
पराशरोक्तं परमं मारीचं भार्गवाह्वयं ।
एतान्युपपुराणानि कथितानि द्विजोत्तमाः ॥ ०

Regarding the connection between the *Skandapurāṇa* and the *Prabhāsakhaṇḍa*, the *Sūta* remarks as follows here (fol. 3*b*):

स्कांदं तु सप्तधा भिन्नं वेदव्यासेन धीमता ।
एकाशीतिसहस्राणि शतं चैकं च संख्यया ॥

तस्यादिमो विभागस्तु स्कंदमाहात्म्यसंयुतः ।
माहेश्वरसमाख्यातो द्वितीये(०यो) वैष्णवस्य च ॥

तृतीये(०यो) ब्रह्मणः प्रोक्तः सृष्टिसंक्षेपसूचकः ।
काशीमाहात्म्यसंयुक्तश्चतुर्थः परिपठ्यते ॥

रेवायां पंचमो भाग उज्जयिन्याः प्रकीर्तितः[4] ॥
षष्ठ[:]कल्पार्चनं विश्व(विश्वं)तपोमाहात्म्यसूचकः ॥

सप्तमो ऽथ विभागो ऽयं स्मृतः प्रभासिको[5] द्विजाः ।
सर्वे द्वादशसाहस्रं विभागाः साधिकाः स्मृताः ॥

अस्मिन्प्राभासिके सर्वो वर्ण्यते क्षेत्रविस्तरः ।
तीर्थानां चैव माहात्म्यं माहात्म्यं शंकरस्य च ॥

अन्येषां चैव देवानां माहात्म्यं च प्रकीर्तितं ।
इति भेदः पुराणानां संक्षेपात्कथितो द्विजाः ॥

There are upwards of 330 chapters (many of them very short), but they are not numbered. Cp. Rāj. Mitra, Bikaner Cat., p. 215.

It ends thus:

इति वस्त्रापथक्षेत्रमाहात्म्ये बलिनिग्रहः ॥ पार्वत्युवाच ॥

दत्त्वा स दक्षिणां दैत्यो गृहीत्वा किं जनार्दनः ।
चकार किं तत्राचक्ष्व परं कौतूहलं हि मे ॥

ईश्वर उवाच ॥

एवमुक्तः सुरदेवि गृहीत्वा मेदिनीं हरिः ।
बलिं निर्वासयामास पूर्णे तु यज्ञकर्मणि ॥

प्राप्ते दक्षिणां लब्ध्वा संपूर्णो ऽयमतो ऽध्वरः ।
गृहीत्वा तद्बले राज्यं मनुपुत्रे नियोजितं ॥

द्वीपांतरे च ते दैत्या विष्णुना प्रेरिताः स्वयं ।
पतालनिलया ये तु ते तत्रैव निवासिताः ॥

देवानां परमो हर्षो जातो हि बलिनिग्रहे ।
पुत्रमित्रकलत्राणि त्यक्त्वा प्राप्तो हिमाचलं ॥

विधा परां संभवेयं(?) दध्यौ देवं जनार्दनं ।
परमात्मानमात्मानं द्रष्टारं स्वहृदि स्थितं ॥

तद्देहस्थं हरिं ज्ञात्वा देवराजः समागतः ।
बलिं पातालनिलयं ततश्चक्रे सुरेश्वरः ॥

बलिदैत्यपुरभ्रंशः संजातो बलिनिग्रहे ।
निवासाय पुनश्चक्रे वामनो वामनस्थलीं ॥

वामनेन पुरा यत्र कृतं पंचाग्निसाधनं ।
तत्रस्थं ब्राह्मणं गार्ग्यं पप्रच्छ भगवान्हरिः ॥

कस्मिन्स्थाने मया कार्यं वैष्णवं नगरं सदा ।
यत्र मुक्तिर्भवेन्नृणां प्रेतमुक्तिश्रयायने(?) ॥

उभावपि गतौ पूर्वं द्रष्टुं रैवतकिं(०तिकं) गिरिं ।
परीक्ष्य तत्र भूभागं नगरार्थं नियुज्यते ॥

यतिधर्मेण वस्तव्यं कुमुदाद्रौ पुरा कृतं ।
चातुर्वर्ण्येन सर्वेण राज्यं तत्रैव रोच्यते ॥

वस्त्रापथाद्दक्षिणतः स्थापनीयं पुरं शुभं ।
विष्णुना कारिता तत्र पुरी वामनसंज्ञिता ॥

[1] स्कांद० ed. of *Kūrmap.*; भांद० Aufrecht, *l.c.*

[2] Both Aufrecht, *l.c.*, and the ed. of the *Kūrmap.* here read वामनं, whilst most other works read indeed '*Mānavam.*'

[3] In the list given in the *Pārāśara Upapurāṇa* (above, p. 1230*a*) the '*Vāsishṭham Laiṅgasaṃjñam*' is the same as our '*Māheśvaram*'; cf. *Sūtasaṃhitā* (no. 3688).

[4] This is Prof. Aufrecht's suggestion for भागे साज्ज-यिन्या प्रकीर्तिता ॥ read by the MS.

[5] ? प्रभासश्चे MS.

DR.RUPNATHJI( DR.RUPAK NATH )

दत्ता वै विप्रमुख्येभ्यः कारिता विश्वकर्मणा ।
सार्धकोटिस्तु तीर्थानां भद्रायामास्थितो विष्णुः ।
पाताले वासितो बलिस्ते . . . . भाविनि ॥
सार्धकोटित्रयं प्रोक्तं मधुमत्यां हरेः पुरे ।
सर्वेषां विस्तरः प्रोक्तः प्रभासे वृद्धिसंज्ञके ॥
वामनस्थली(!) स्थितो विष्णुः पाताले वासितो बलिः ।
मधुमत्यां माधवो देवः सर्वकामफलप्रदः ॥
इति ते कथितं सर्वं प्रभासं रवियोजनं(च वि° Bik.)।
प्रोक्तं द्वादशसाहस्रं स्मरणात्सर्वसिद्धिदं ॥

इति श्रीस्कंदपुराणे चतुरशीतिसहस्रसंहितायां रुद्रप्रोक्तप्रभासक्षेत्रयात्रायां प्रभासखंडः समाप्तो ऽयं ॥

The pagination of the MS. is interrupted after fol. 132 (or rather, fol. 133, no. 114 being used twice). After that one leaf is lost, and another hand seems to begin, counting first from 1–12 and then again from 1–24. The rest, from 1–67, is in the same hand again as the first 133 leaves. Here foll. 2, 7 and 30 are wrongly bound between 27 and 28, and fol. 30 does not properly fit into the text.

[H. T. COLEBROOKE.]

## 3660.

**29 b.** Foll. 103; size 9½ in. by 4¼ in.; fair Devanāgarī writing of 1772 A.D.; twelve lines in a page.

*Dvārakāmāhātmya* of the *Prahlādasaṃhitā* of the *Skandapurāṇa*.

It begins: श्रीशौनक उवाच ॥

कथं सूत युगे ह्यस्मिन् रौद्रे वै कलिसंज्ञिके ।
बहुपाखंडसमा(r. सं)कीर्णे प्राप्स्यामो मधुसूदनं ॥

See Cat. Bodl., no. 124.

Colophon: इति श्रीस्कंदपुराणे प्रह्लादोक्तसंहितायां द्वारकामाहात्म्ये प्रह्लादबलिसंवादे चतुस्त्रिंशो ऽध्यायः ॥ ° संवत् १८२९ वर्षे श्रावणमासे शुक्लपक्षे एकादशीरविवासरे लिखितं वीरमग्रामवासिनाटौलकज्ञातीय भटकुंभरजी लिखितोऽयं ग्रंथः॥

[H. T. COLEBROOKE.]

## 3661.

**2338.** Foll. 230; size 10¾ in. by 6 in.; modern Devanāgarī writing; ten lines in a page.

*Bṛihad-Brahmottarakhaṇḍa* of the *Skandapurāṇa*.

For a complete analysis of the work see Aufrecht, Cat. Bodl., no. 126. The present MS. is not very correct.

[GAIKAWAR.]

## 3662.

**1432 b.** Foll. 75; size 12¼ in. by 6 in.; good Devanāgarī writing of 1797 A.D.; 12–14 lines in a page.

*Brahmottarakhaṇḍa* of the *Skandapurāṇa*, in 22 *adhyāyas*.

Its beginning is identical with that of the larger work. Cf. Aufrecht, Cat. Bodl., nos. 127, 128; Rāj. Mitra, Not., viii., p. 19. The work has been repeatedly printed in India.

[H. T. COLEBROOKE.]

## 3663.

**1211.** Foll. 80 (one of which, no. 42, is wanting); size 12¼ in. by 6 in.; legibly written, in modern Devanāgarī; twelve lines in a page.

*Brahmottarakhaṇḍa*, in 22 *adhyāyas*.

Bound up with it, between fol. 62 and 63, are three leaves, in the Bengālī character, size 19½ in. by 3 in., containing fragments of the beginning of a tantric work called *Bṛihat-tantra* (apparently specially extracted for this purpose), the first chapter turning on the subject of the *brahmāṇḍa*.

This extract begins: देव्युवाच ।

देवदेव महादेव संसारार्णवतारक ।
कालसंख्यां महादेव क्रमशः कथय प्रभो ॥

DR.RUPNATHJI(DR.RUPAK NATH)

को वा नित्यो महादेव नश्वरं वा किल प्रभो ।
स्थूलसूक्ष्मादि ब्रह्माण्डं श्रोतुमिच्छामि सांप्रतं ॥
श्रीमहादेव उवाच ।
प्राणप्रिये महेशानि यदुक्तं तत्त्वमुत्तमं ।
नानातन्त्रविधानेन शृणुष्व कथयामि ते ॥
वृहत्तन्त्रविधानेन स्मादौ तत् शृणु पार्वति । etc.

And on the last page we road: इति वृहत्तन्त्रे शिवगौरीसंवादे ब्रह्मनिरूपणं ॥

[H. T. Colebrooke.]

## 3664.

**2550.** Foll. 77, and an additional leaf between foll. 17 & 18; sizo 12¾ in. by 6¼ in.; fair Devanāgarī writing of 1785 A.D.; 12 or 13 lines in a page.

The same work, in 22 *adhyāyas*.

Dated: संवत् १८४३ शाक १७०७ पींगलनामसंवत्सरे आषाढे मासे शुक्लपक्षे एकादश्यां भृगुवासरे तद्दिने इदं पुस्तकं स्वामी शारदापुरी तस्य शिष्य अलषपुरी पत्तने ग्रामसिका-पुरवासी श्रीसदाशिवार्पणमस्तु ॥

[Mackenzie Collection.]

## 3665.

**44.** Foll. 88; 8vo, size 9¼ in. by 6¼ in.; legibly written in the Bengali character, in 1797 A.D.; 26–28 lines in a page.

*Uttarakhaṇḍa* of the *Śivapurāṇa*, ascribed to the *Brahmottarakhaṇḍa* of the *Skandapurāṇa*; in 36 *adhyāyas*.

It begins:

वागीशो दक्षिणाङ्गादजनि मधुरिपुर्वामतो यस्य वेदा[1]
बाहोर्यो वै मुनीन्द्रैरजगतहृदयैर्गीयते[2] सामगानैः ।
गीर्वाणाः शक्रमुख्या दितिसुतसहिता यं विदुर्न स्वरूपो[3]
यः कर्ता पाति हर्ता सकलजगदिदं शम्भवे ऽस्मै नमो ऽस्तु ॥

See Aufrecht, Cat. Bodl., no. 129.

In the 23rd *adhyāya* tho *Purāṇas* are enumerated (fol. 55*b*) in the samo order as in the *Vishṇu* (iii. 6) and the *Bhāgavata* (xii.) *Purāṇas*. From the *ślokas* characterizing the several works, wo may extract:

यत्तु पूर्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत्पुराणं हि पुराणज्ञा वदन्ति हि ॥
भगवत्याश्च दुर्गायाश्चरितं यत्र वर्तते ।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकं ॥

Tho connection of tho work with the *Skandapurāṇa* is not referred to in any of the colophons.

It ends:

एवं चतुर्दशीनक्तमाहात्म्यं कथितं तव ।
सर्वपापहरं साक्षाच्छिवलोकप्रदायकं ॥
इमं नक्तविधिं तखण्डे श्रुत्वा भक्तिपरायणः ।
चतुर्दशीनक्तफलं प्राप्नोति नरसत्तमः ॥

इति श्रीशिवपुराणोत्तरखण्डे तण्डिवामदेवसंवादे चतुर्दशी-नक्तव्रतमाहात्म्यं षट्त्रिंशो ऽध्यायः ॥ शकाब्दाः १७१९ ॥ मार्गशीर्षे कृष्णपक्षे चन्द्रवासरे अष्टाविंशतिदिवसे दशदण्डसमये पुस्तकं समाप्तं ॥ शैवं पुराणं स्वाक्षरं श्रीरामजयब्रह्मचारिणः ॥

[H. T. Colebrooke.]

## 3666.

**2842 d.** Foll. 9 (paged 1–18); 4to, size 9½ in. by 7 in.; coarse Indian paper; modern Telugu handwriting; 18–21 lines in a page.

*Bhīmakhaṇḍa*, a legendary account of the *Bhīmeśvara liṅga* at Dracheram (Drākshārāma), in tho Rājamahendri district (Wilson, Mack. Coll., 2nd ed., p. 139); in four *adhyāyas*, professing to form part of the *Skandapurāṇa*.

It bogins:

श्रीमद्गौरीलताश्लिष्टं जटापल्लवशोभितं ।
विबुधाभीष्टफलदं शंभुकल्पद्रुमं भजे ॥
ऋषय ऊचुः ॥
विश्वसेन तथा काश्यामधिक्षिप्तो महामुनिः ।
उक्ता मोक्षपदं काशीं व्यासो मोक्षपदं हि नः ॥

---

[1] r. वेधा.   [2] r. मुनीन्द्रैरवनतहृदयैर्गीयते.
[3] नो विदुर्यस्य रूपं Aufr.

DR.RUPNATHJI( DR.RUPAK NATH )

शिष्यैः सहावसत्कुत्र किं वा तीर्थमसेवत ।
तत्सर्वं वाग्विदां श्रेष्ठ वक्तुमर्हसि सूत नः ॥

सूतः ॥ वाराणस्यां महेशस्य कौपीनचलितस्तदा ।
प्राप्य गंगानदीतीरं शिष्यसंघसमन्वितः ॥
मद्गुरुः सर्वधर्मज्ञः कृष्णद्वैपायनो मुनिः ।
पितृव्यां[1] यानि तीर्थानि तानि तीर्थानि तापसाः ॥०

It ends:

ततो ऽगस्त्यं प्रणेमुस्तं मुनिशिष्याः ससंभ्रमं ।
भक्तिसौहार्दविनयैस्ते वैशंपायनादयः ॥
अथ [तौ तु] महात्मानौ तुल्यभागा(०गौ) नदीतटे ।
विल्वकांतारमध्येंदुकांतशीतशिलातपे ॥
उपविष्टौ मुनिवरौ द्वीपोद्भवघटोद्भवौ ।
चक्रतुः प्रियसंलापैस्तौ किंचित्कालयापनं ॥

इति स्कंदपुराणे श्रीभीमखंडे चतुर्थो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

## 3667.

**2686.** Foll. 88; size 9¾ in. by 4¾ in.; fairly written in Devanāgarī; 9 or 10 lines in a page.

*Śambhalagrāmamāhātmya*, a legendary account of the shrines in and about Sambhalpur in Gondwana; in 27 *adhyāyas*, professing to form part of the *Bhūkhaṇḍa* of the *Skandapurāṇa*.

It begins:

नारायणं नमस्कृत्य ० ॥ अगस्तिरुवाच ॥
पार्वतीहृदयानंद सर्वज्ञांगभव प्रभो ।
किंचित्प्रष्टुमनाः स्वामिन् तद्भवान्वक्तुमर्हति ॥ २ ॥
नंदग्रामस्य(नंदि०) माहात्म्यं श्रुतं सर्वं विशेषतः ।
शंभलस्य च माहात्म्यं सविशेषं वदस्व मे ॥ ३ ॥

स्कंध उवाच ॥

साधु साधु महाबुद्धे अगस्ते च द्विजोत्तम ।
कुलोचितं ब्राह्मणानां भवतां प्रतिपादितं ॥ ४ ॥
वेदाभ्यासः कृतः पूर्वं गुरवश्चापि तोषिताः ।
धर्मशास्त्रपुराणेषु श्रुत्वा धर्मस्त्वयादृतः ॥ ५ ॥

[1] r. पृथिव्यां.

क्षालितं मुक्तिपुंजद्भिरशुभं(? मुक्तिवीचीभि०) नृशरीरिणां ।
कोविदोऽस्ति भवानेव जीविते जीवितेतरे ॥ ६ ॥
कलेवरं पूतिगंधि सदैवाशुचिभाजनं ।
सुतीर्थपुण्यपुण्येन सम्यग्विनिर्मितं त्वया ॥ ७ ॥ ०

It ends: स्कंद उवाच ॥

एतत्ते कथितं ब्रह्मन् शंभलस्य प्रदक्षिणं ।
मामेव च त्वया पृष्टं लोकोपकृतिहेतवे ॥ १ ॥ ० ९ ॥
तस्माच्छंभलमाहात्म्यं गोपनीयं प्रयत्नतः ।
नंदग्रामस्य(नंदि०) माहात्म्यं कथितं शंभलस्य च ॥ १० ॥
अतः परं प्रवक्ष्यामि शालग्रामस्य चोत्तमं ।
माहात्म्यं कथयिष्यामि शृणुष्वैकाग्रमानसः ॥ ११ ॥
यः शृणोति नरो नित्यं माहात्म्यं शंभलस्य च ।
अपुत्रो लभते पुत्रं धनहीनो धनं बहु ॥ १२ ॥
स्त्रियं लभते कामो स्त्री(? स्त्रीकामो) धर्मार्थं कर्मबंधनी ।
भ्रष्टराज्यो लभेद्राज्यं विरक्तो मोक्षमाप्नुयात् ॥ १३ ॥

इति श्रीस्कंदपुराणे भूषंडे नंदग्रामानंतरं शंभलग्राममाहात्म्ये श्रवणवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ समाप्तं शुभं संवत् १८६६ आषाढकृष्णत्रयोदश्यां चंद्रवासरे लिपितमिदं त्रिपाटीनंदरामेण ॥

For two other MSS. of this treatise, consisting of only 24 *adhyāyas*, see Aufrecht, Cat. Bodl., no. 125; Rāj. Mitra, Notices, v., p. 59 (the defective *śloka* of which, following the 1st in this latter MS., being the 18th of the present MS.). The matter contained in these two MSS. seems to correspond to *adhy.* 1–20 of our MS., their *adhy.* 5 and 6 corresponding to *adhy.* 5, and their *adhy.* 21–24 to *adhy.* 19 of this MS., where this main portion ends (fol. 72*b*): स्कंद उवाच ॥

नंदिग्रामस्य माहात्म्यं हरेश्चैव द्विजोत्तम ।
कथितं च महाभाग शालिग्रामं निशामय ॥

The remaining seven *adhyāyas* treat of the ceremony of *pradakshiṇa*, or devotional circumambulation of *Vishṇu's* temple (*harimandira*), the Mahodakī (*Maṇikarṇikā*) pond, and other sacred spots at, or near, Śambhalagrāma, to be performed especially on the two days of new-moon (*sinīvālī-kuhū*).

DR.RUPNATHJI(DR.RUPAK NATH)

This section begins: अगस्तिरुवाच ॥

भगवन्देव देवेश लोकनाथात्मज प्रभो ।
जगदीश जगदाधार संशयो ऽस्ति महान्मम ॥ १ ॥
तमहं प्रष्टुमिच्छामि त्वं मे वद षडानन ।
हरिमंदिरमाहात्म्यं कथितं मे कृपानिधे ॥ २ ॥
तीर्थानां च फलं पुण्यं सविस्तरमुदाहृतं ।
स्नाने दाने च पूजायां विधानं कथितं त्वया ॥ ३ ॥
न चात्र कथितः स्वामिन् प्रदक्षिणविधिर्मम ।
तमहं श्रोतुमिच्छामि प्रसादात्तव सुव्रत ॥ ४ ॥

The great efficacy of the ceremony is illustrated by two stories, viz.: that of the wicked Brāhman *Gaṅgādatta*—of Vaiśyagrāma (*iti khyātaḥ*), near Ahicchatra in Pāñcāladeśa—and the pious *Vaiśya Dharmadāsa* of Śambhalagrāma (*adhy.* 22); and that of the profligate *Kaliṅga* king *Subāhu* who, when expelled by his three brothers (*Dīrghabāhu, Suratha,* and *Madhu*), betakes himself to the sacred village; and though he there continues his wild life to the end, the punishments of the 21 hells prove afterwards without effect on him, because of his having once performed the *pradakshiṇa* ceremony (*adhy.* 25, 26).

[MACKENZIE COLLECTION.]

## 3668.

**1682.** Foll. 33; size 9½ in. by 4 in.; fair Devanāgarī writing of 1755 A.D.; 13 or 14 lines in a page.

*Mārgaśīrshamāhātmya,* a *Vaishṇava* tract, on the rites to be performed during the month of *Mārgaśīrsha,* in 16 *adhyāyas,* professing to form part of the *Skandapurāṇa.*

It begins:

देवकीनंदनं कृष्णं जगदानंदकारणं ।
भुक्तिमुक्तिप्रदं वंदे माधवं भक्तवत्सलं ॥ १ ॥
सूत उवाच ॥
श्वेतद्वीपे सुखासीनं देवदेवं रमापतिं ।
चतुर्वक्त्रो नमस्कृत्य पप्रच्छ पितरं तदा ॥ २ ॥
ब्रह्मोवाच ॥
हृषीकेश जगन्नाथ पुण्यश्रवणकीर्तन ।
प्रष्टव्यं ब्रूहि मे देव सर्वज्ञ सकलेश्वर ॥ ३ ॥
मासानां मार्गशीर्षो ऽहमित्युक्तं भवता पुरा ।
तस्य मासस्य माहात्म्यं ज्ञातुमिच्छामि तत्त्वतः ॥ ४ ॥
को देवस्तस्य किं दानं कथं स्नानं विधिश्च कः ।
पुरुषैश्चात्र किं कार्यं भोक्तव्यं किं रमापते ॥ ५ ॥
वक्तव्यं किं तथा पूजा ध्यानं मंत्रादिकं च यत् ।
तत्र यत्क्रियते कर्म तत्सर्वं ब्रूहि मे ऽच्युत ॥ ६ ॥
श्रीभगवानुवाच ॥
साधु पृष्टं त्वया ब्रह्मन् सर्वलोकोपकारिणा ।
यस्मिन्कृते कृतं सर्वमिष्टापूर्तादिकं भवेत् ॥ ७ ॥
सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ।
तत्फलं समवाप्नोति मार्गशीर्षे कृते सुत ॥ ८ ॥
तुलापुरुषदानाद्यैर्यत्फलं लभते नरः ।
तत्फलं प्राप्यते पुत्र माहात्म्यश्रवणात्किल ॥ ९ ॥
वेदाध्ययनदानाद्यैः सर्वतीर्थावगाहनैः ।
संन्यासेन च योगेन नाहं वश्यो भवे नृणां ॥ १० ॥
स्नानेन दानेन च पूजनेन
होमेन मौनेन जपादिभिश्च ।
वश्यो यथा मार्गशिरे च मासि
तथा न चान्येषु सुगुह्यमुक्तं ॥ ११ ॥
अन्यधर्मादिकं चोक्त्वा गोपितं मार्गशीर्षिकं ।
मत्प्राप्तेः कारणं मत्वा देवैः स्वर्गनिवासिभिः ॥ १२ ॥
ये केचित्पुण्यकर्माणो मम भक्तिपरायणाः ।
तेषामवश्यं कर्तव्यं मार्गशीर्षे मदापनं ॥ १३ ॥

He then relates how he himself taught the Gopīs to observe the *Mārgaśīrsha* rites. *Adhy.* 2. expounds the ceremonies to be performed during that month; 3. the *puṇḍra* mark; 4. *taptamudrā*, etc.; 5. *pañcāmṛitasnapanam*; 6. *ghaṭānāda*; 7. the favourite flowers of *Hṛishīkeśa*; 8. the *tulasī* plant; 9. *naivedyam*; 10. *naivedyānantarakāryam*; 11, 12. ceremonies performed on the 11th day; 13. do., on the 12th day; 14. *brāhmaṇapūjā*, *kṛishṇanāmakīrtanam*; 15. *kṛishṇadhyānam*, *mantram*, *bhāgavata-pāṭhaḥ*; 16. eulogy of *Mathurā*, as the most sacred of *tīrthas*.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends:

यथा ते कथितं [कार्यं] मार्गशीर्षं मम प्रियं ।
करोति यो नरो भक्त्या तस्य पुण्यफलं शृणु ॥
तीर्थायुतेषु यत्पुण्यं यत्फलं व्रतकोटिभिः ।
सर्वयज्ञेषु यत्पुण्यं तत्पुण्यं समवाप्नुयात् ॥
अपुत्रो लभते पुत्रं निर्धनो धनमेव च ।
विद्यार्थी च तथा विद्यां रूपार्थी रूपमाप्नुयात् ॥
ब्राह्मणो ब्रह्मवर्चसी क्षत्रियो विजयी भवेत् ।
वैश्यो निधिपतित्वं(?) शूद्रः शुध्येत पापकात् ॥
यद्दुर्लभं च दुष्प्राप्यं त्रिषु लोकेषु मानद ।
तत्सर्वं प्राप्नुयान्मर्त्यो सहोमासे न संशयः ॥
अतिदुर्लभा हि मद्भक्तिर्मम वश्यकरी शुभा ।
सर्वा संप्राप्यते पुत्र सहोमासे न संशयः ॥
मम प्रीतिकरं मासं सर्वदा मम वल्लभं ।
सर्वं संप्राप्यते युष्मात्(?पुत्र) मत्प्रसादाच्चतुर्मुख ॥
किं बहुना प्रसादेन श्रवणात्कीर्तनाच्च मे ।
सर्वं संपूर्णतां याति [न] न्यूनं च न संशयः ॥

इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये भगवद्ब्रह्मसंवादे षोडशो ऽध्यायः ॥ १६ ॥ [H. T. COLEBROOKE.]

## 3669.

**552.** Foll. 191; folio, size $10\frac{3}{4}$ in. by 17 in.; European paper; large, clear Devanāgarī writing; 22–24 lines in a page.

*Revākhaṇḍa*, or *Narmadākhaṇḍa*, of the *Skandapurāṇa*, in 115 *adhyāyas* (counted as 125).

It begins:

मज्जन्मातंगकुंभच्युतमदमदिरा[मोद]मत्तालिजालं
स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगं ।
सायंप्रातर्मुनीनां कुच(*r.* कुश)कुसुमचयैश्छन्नतीरस्थनीरं ।
पायाद्वो नर्मदांभः करिकलभकराक्रांतरंहस्तरंगं ॥ १ ॥
एकदा पर्वते रम्ये कैलासे सुरसेविते ।
नानापक्षिसमाकीर्णे नानाद्रुमलताकुले ॥ २ ॥
मंदाकिन्याः प्रवाहेण सर्वतः प्लाविते शुभे ।
ध्यानयोगपरै रम्ये मुनिभिः समधिष्ठिते ॥ ३ ॥
झिल्लीझंकारमिश्रेण विहंगविरुतेन च ।
निर्झराणां निनादेन सर्वतः प्रतिनादिते ॥ ४ ॥
तत्राजगाम भगवान् शिवो भुजगभूषणः ।
नानावेषाकृतिधरैः स्वगणैरन्वितस्तदा ॥ ५ ॥
फलान्यमृतकल्पानि केचित्खादंति वै गणाः ।
गर्जंति केचिद्विनदंति केचिन्नृत्यंति केचिद्भुवि विप्रवंतः॥६॥
वदंति केचिद्देवेशं केचिदायंति हर्षिताः ।
दिव्यसिंहासनासीनं पार्वत्या सहितं हरं ॥ ७ ॥
तेषां मध्ये समुत्थाय स्कंदो वचनमब्रवीत् ।
कृतांजलिपुटो भूत्वा साष्टांगं प्रणिपत्य च ।
सृष्टिसंहारकर्तारं सुरासुरनमस्कृतं ॥ ८ ॥
ब्रह्मविष्णुवंद्यवरदं भक्तानां भक्तवत्सलं ।
त्रिनेत्रं नीलकंठाय ज्ञाताज्ञातस्वरूपिणे ॥ ९ ॥
ईश्वराय विनाशाय सप्तलोकनिवासिने ।
नमः कांतार्धदेहाय गजचर्मावगुंठिने ॥ १० ॥
सद्यो वामस्तथा घोरः पुरुषपतये नमः ।
ईशानपरमेशाय सदाशिव नमो ऽस्तु ते ॥ ११ ॥
ऋग्यजुःसामरूपाय अथर्वाय नमो ऽस्तु ते ।
नमः कालाग्निरूपाय सप्तलोकनिवासिने॥ १२ ॥ ० १४ ॥
जिह्वाचपलभावेन खेदितो ऽसि मया प्रभो ।
क्षमस्व मम ईशान अज्ञानाज्ज्ञानतो ऽपि वा ॥ १५ ॥
श्रीईश्वर उवाच ॥
वरं वृणीष्व भद्रं ते स्तवेनानेन सुव्रत ।
ददामि ते न संदेहो वरं मनसि कांक्षितं ॥ १६ ॥
स्कंद उवाच ॥
यदि तुष्टो ऽसि मे तात वरं दातुं ममेच्छसि ।
उत्तरे तु दशाभागे हर्म्या हेममयाः शुभाः ॥ १७ ॥
शतं भौमास्तु विस्तीर्णा हेमप्राकारतोरणाः ।
नानामणिसुमुक्ताढ्या वज्रवैडूर्यमंडिताः ॥ १८ ॥
तंत्रीमधुरवाणो [च] वेणुवीणा सहस्रशः ।
प्रेक्षणीयैर्नृत्यगीतैर्दिव्यकांतिमनोहरैः ॥ १९ ॥
कस्यैतानि गृहाणीति मेरोरुत्तरतः शिव ।
त्वत्प्रसादात्तदिच्छामि परं कौतूहलं मम ॥ २० ॥
श्रीशिव उवाच ॥
शृणु स्कंद सुरश्रेष्ठ कथ्यमानं निबोध मे ।
मृगस्थानपुरे ये वै राहुसूर्यसमागमे ॥ २१ ॥ ०

The following may serve as an index to the work: 2. *ādikalpaḥ*; 3–5. *dvitīyaḥ*, *caturthaḥ*, *avatāraḥ*; 6. *narmadāmāhātmyam*; 7. *aśvatīrtham*; 8. *tripurī*; 9. *markaṭītīrtham*;

DR.RUPNATHJI(DR.RUPAK NATH)

10, 11. *matanga(ṛishi)vyākhyānam*; 12. *gangājalatīrtham*; 13. *matsyeśvaratīrtham*; 14. *śushkatāpī*; 15. *kārtavīryopākhyānam*; 16, 17. *nāgeśvaratīrtham*; 18. *janakayajnaḥ*; 19. *saptasārasvataḥ gandharvaḥ*; 20. *brahmahatyāparicchedaḥ*; 21. *kubjā*; 22. *vilvāmrakoṭpattiḥ*; 23. *harikeśakathanam*; 24. *revākubjāsaṃgamaḥ*; 25. *māheśvaratīrtham*; 26. *gardabheśvaratīrtham*; 27. *karamardeśvaratīrtham*; 28. *māndhātur upākhyānam*; 29. *amareśvaratīrtham*; 30. *catuḥsaṃgamaḥ*; 31. *pañcalingatīrtham*; 32. *brāhmaṇasya (jābāleḥ) striyā saha svargārohaṇam*; 33. *pātāleśvaraḥ*; 34. *indradyumnayajñe nīlagangāvatāraḥ*; 35. *vaiḍūryaparvataḥ*; 36. *kapilāvatāraḥ*; 37. *kalpāntadarśanam*; 38. *cakrasvāmivarṇanam*; 39. *vimaleśvaratīrtham*; 40. *sūtrayāgavarṇanam*; 41. *kāverī*; 42. *vegā*; 43. *eraṇḍīsaṃgamaḥ*; 44. *durvāsācaritram*; 45. *śalyāviśalyā nadī*; 46. *bhṛigupatanam*; 47. *oṃkāramahimā*; 48. *pañcabrahmātmakaḥ stavaḥ*; 49. *vārāhasvargārohaṇam*; 50. *kapilāsaṃgame dhundhumāropākhyānam*; 51. *mucukundakuvalayāśvasvargārohaṇam*; 52. *narakavarṇanam*; 53. *narakalakshaṇam*; 54. *karmagativarṇanaṃ yamena*; 55. *godānamahimā*; 56. *mātangāśramatīrtham*; 57. *narmadāmāhātmyam*; 58. *śivalokavarṇanam*; 59. *śivamahimā*; [60–69 left out;] 70. *vānarahemadehaḥ*; 71. *rantidevo rājā*; 72. *mātṛistutiḥ*; 73. *kubjā*; 74. *vishṇukīrtanam*; 75. *narmadāmāhātmyam*; 76. *aśokavanikā*; 77. *vāgīśvarapuram*; 78. *vārāhamahimā*; 79. *śambhustutiḥ*; 80. *yayātiśuklatīrtham*; 81. *dvīpeśvaratīrtham*; 82. *vishṇustutiḥ*; 83. *meghanādalingam*; 84. *dārutīrtham*; 85. *devatīrtham*; 86. *dāruvanaprasange narmadeśvarakīrtanam*; 87. *karañjeśvaratīrtham*; 88. *kuḍaleśvaratīrtham*; 89. *pippaleśvaratīrtham*; 90. *guhyāvatīrtham*; 91. *pañcalingamahimā*; 92. *mṛikaṇḍāśramaḥ*; 93. *hariṇeśvaraḥ*, *vāṇeśvaraḥ*, *lubdhakeśvaraḥ*, *dhanurīśvaraḥ* and *rāmeśvaraḥ*, 5 *lingāni*; 94. *andhakavadhaḥ*; 95. *andhakavadhavarapradānam*; 96. *śūlabhedotpattiḥ*; 99. *dīrghatapā ṛishiḥ*; 100. *citrasena ṛishiḥ*; 101. *śabarasvargārohaṇam*; 102. *bhānumatīsvargārohaṇam*; 103. *arkatīrtham*; 104. *ādityeśvaratīrtham*; 105. *agastyatīrtham*; 106. *bhasmāngavadhaḥ*; 107. *maṇināgatīrtham*; 108. *gopāleśvaratīrtham*; 109. *śankhacūḍātīrtham*; 110. *parāśareśvaratīrtham*; 111. *nandītīrtham*; 113. *hanūmadīśvaratīrtham*; 114. *urasaṃgame somanāthatīrtham*; 115. *kapileśvaratīrtham*; 116. *cakratīrtham*; 117. *candrādityeśvaratīrtham*; 118. *yamahāsatīrtham*; 119. *vyāsatīrtham*; 120. *prabhāsatīrtham*; 121. *mārkaṇḍeśvaralingam*; 122. *manmatheśvaratīrtham*; 123. *eraṇḍatīrtham*; 124. *cakratīrtham*; 125. *revācaritam*.

Besides the names here enumerated, many more *tīrthas* and legends are, however, referred to in the body of the work, the colophons, as a rule, mentioning only the last of those treated of in each chapter. It ends:

इति ते ऽखिलमाख्यातमाख्यानं नार्मदं नृप ।
सर्वसस्यसमायुक्ता मही पादे या(!) महीतले ॥
यद्यदिष्टं भवेत्तत्र तद्देयं श्रद्धया परं ।
श्रद्धापूतं च यत्कर्म तदेवात्र परत्र च ॥
कर्तारमुपतिष्ठेत न संदिग्धं न नास्तिकं ।
इति ते ऽखिलमाख्यातमाख्यानं नार्मदं नृप ॥
कुरु त्वमास्तिको भूत्वा रेवातीर्थावगाहनं ।
भुक्तिमुक्तिं च लभ्यासि राज्यं च हतकंटकं ॥
रेवाप्रभावादचिरान्मा कुरुष्वात्र संशयं ॥
सूत उवाच ॥
तच्छ्रुत्वा राजशार्दूलो मार्कंडेयस्य भाषितं ।
अर्घं दत्त्वा यथान्यायं पूजयित्वा ऋषींस्तदा ।
अश्वैर्गजैश्च रत्नैश्च ऋषिभिः सह धर्मराट् ॥
तीर्थयात्रां चकाराशु नर्मदायां युधिष्ठिरः ।
उत्तरे दक्षिणे तीरे नर्मदाया महात्मना ॥

इति श्रीस्कंदपुराणे रेवाखंडे युधिष्ठिरमार्कंडेयसंवादे रेवाचरितं शतत्युत्तर[thus generally after 100]पंचविंशतितमो ऽध्यायः ॥ इति नर्मदाखंडं समाप्तं ॥



DR.RUPNATHJI(DR.RUPAK NATH)

For another MS. of this work, apparently differing considerably from the text of the present MS., see Rāj. Mitra, Notices, v., p. 42.

[H. T. Colebrooke.]

## 3670.

**644a.** Foll. 87 (counted 86; no. 45 being double); size 13 in. by 6½ in.; careless Devanāgarī writing of 1795 A.D.; eleven lines in a page.

*Vaiśākhamāhātmya* of the *Skandapurāṇa*, in 24 *adhyāyas*, devoted to the religious ceremonies to be performed in honour of *Vishṇu* in the month of *Vaiśākha*. Rather incorrect.

It begins: सूत उवाच ॥

भूयो ऽप्यंगभुवं राजा ब्रह्मणः परमेष्ठिनः ।
पुण्यं माधवमासस्य माहात्म्यं[1] पर्यपृच्छत ॥ १ ॥

अंबरीप उवाच ॥

सर्वेषामपि मासानां त्वत्तो माहात्म्यमंजसा ।
श्रुतं मया पुरा ब्रह्मन् यदा चोक्तं तदा त्वया ॥ २ ॥
वैशाखः प्रवरो मासो मासेष्वेतेषु निश्चितः ।
इति तस्माद्विस्तरेण माहात्म्यं माधवस्य च ॥ ३ ॥
श्रोतुं कौतूहलं विद्वत्[2] कथं विष्णुप्रियो ह्यसौ ।
केचिद्[3] विष्णुप्रिया धर्मा मासे माधववल्लभे ॥ ४ ॥ °

It ends:

लिखितं पुस्तकं येषां गृहे तिष्ठति मानद ।
तेषां मुक्तिः समास्या[4] हि किमु तच्छ्रवणात्मनां ॥ ६८ ॥
इति श्रीस्कंदपुराणे वैशाखमाहात्म्ये चतुर्विंशो ऽध्यायः ॥ २४ ॥

The work has been printed several times at Bombay. The edition of 1879 (which alone has been consulted) counts 25 *adhyāyas*; *adhy.* 12 of the MS. (vv. 188) being there divided into two (12 and 13, of 38 and 72 vv. resp.).

[H. T. Colebrooke.]

## 3671, 3672.

**1431, 238.** Foll. 171 & 186; size 12½ in. by 6¼ in.; fairly written, in Devanāgarī, by three different hands, up to 1804 A.D.; 12 or 13 lines in a page.

*Śivarahasyakhaṇḍa*, of the *Śaṅkarasaṃhitā* (cf. *Agastyasaṃhitā*) of the *Skandapurāṇa*.

The work is divided into seven *kāṇḍas*, four of which are contained in the first, and three in the second volume.

I. *Sambhavakāṇḍa*, in 50 *adhyāyas* (foll. 80), begins:

ओंकारनिलयं देवं गजवक्त्रं चतुर्भुजं ।
पिचिंडिलमहं वंदे विघ्नेशं गणनायकं ॥ १ ॥
सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ २ ॥
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
वक्रतुंडः शूर्पकर्णो हेरंबः स्कंदपूर्वजः ॥ ३ ॥
षोडशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥ ४ ॥
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।
सुब्रह्मण्यं प्रणम्याहं सर्वज्ञं सर्वगं सदा ॥ ५ ॥
अभीप्सितार्थसिद्ध्यर्थं प्रवक्ष्ये नामषोडश(? °शं) ।
प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कंद एव च ॥ ६ ॥
अग्निभूयतृतीयः स्याद्बाहुलेयश्चतुर्थकः ।
गांगेयः पंचमो विद्यात् षष्ठः शरवणोद्भवः ॥ ७ ॥
सप्तमः कार्त्तिकेयः स्यात् कुमारः स्यादथाष्टकः ।
नवमः षण्मुखश्चैव तारकारिर्देश स्मृतः(!) ॥ ८ ॥
सेनान्येकादशश्चैव गुहो द्वादश एव च ।
त्रयोदशो ब्रह्मचारी षण्मातुरश्चतुर्दशः ॥ ९ ॥
क्रौंचभित्पंचदशकः षोडशः शिखिवाहनः ।
एतत्षोडशनामानि जपेत्सम्यक् सदादरं ॥ १० ॥
विवाहे दुर्गमे मार्गे दावाग्नौ गिरिगह्वरे ।
कवित्वे च महाशास्त्रे विज्ञानार्थी फलं लभेत् ॥ ११ ॥
कन्यार्थी लभते कन्यां जयार्थी लभते जयं ।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं ॥ १२ ॥
आयुरारोग्यवश्यं च धनधान्यसुखावहं ॥ हरिः ओम् ॥

---

[1] माधवमाहात्म्यं नारदं ed. [2] ब्रह्मन् ed.
[3] r. के च. [4] करस्था ed.

DR.RUPNATHJI( DR.RUPAK NATH )

पुरा काश्यां चतुर्वक्त्रस्तताप परमं तपः ।
स्रष्टुकामः प्रजाः सर्वाः कृपया परमेशितुः ॥ १ ॥
तस्मिन्महेशचरणपरिचर्यापरायणे ।
मुनयः कतिचित्पुण्ये स्थित्वा गार्हस्थ्य उत्तमे ॥ २ ॥
वैखानसाश्रमे तप्तुं तपो नियतमानसाः ।
प्रापुस्तन्निकटं प्रष्टुं तदर्हं स्थानमुत्तमं ॥ ३ ॥
ततस्तमभिवाद्यैते ऽपृच्छन्प्रांजलयो विधिं ।
देव कुत्र वयं स्थित्वा वानप्रस्थपरायणाः ॥ ४ ॥
तपः कुर्मो वदैतत्त्वं नमस्ते प्रपितामह ।
इति तेषां समाकर्ण्य वचनं वारिजासनः ॥ ५ ॥
ध्यात्वा मुहूर्तमादाय कुशकूर्चं मनो व्यधात् ।
तानालोक्याह यत्रानः शीर्यते निर्जने वने ॥ ६ ॥
तद्वनं वः क्षमं कर्तुं तप इत्यनुशास्य तान् ।
विससर्ज तदा ब्रह्मा शिवं ध्यात्वा शिवामपि ॥ ७ ॥
ततस्तु नेमिः सा क्वापि चारुस्वच्छशिलातले ।
शीर्णा तैरन्वितारण्ये तद्वनं तेन निर्मितं ॥ ८ ॥
गंगा हिमवतो यत्र चंद्रमंडलनिःसृता ।
अवतीर्णावनीभागे भगीरथपदानुगा ॥ ९ ॥
शंभोः कपर्दविलसत्कृतमालासुगंधिनी ।
तया तं नैमिषं पुण्यं सर्वलोकैकपावनं ॥ १० ॥ ° १४ ॥
तत्र सत्रं समाकर्ण्य समारब्धं मुनीश्वरैः ।
मुनेः सत्यवतीसूनोरंतेवासी तपोनिधिः ॥ १५ ॥
सूतः पौराणिकः श्रीमान् पुरारिचरणप्रियः ।
संप्राप तरसा तेषां मुनीनां भाग्यगौरवात् ॥ १६ ॥
तं दृष्ट्वा ते मुनिश्रेष्ठाः प्रीतिकंटकितत्वचः ।
सपर्यया तदा सूतं ते सर्वे पर्यपूजयन् ॥ १७ ॥
निर्दिष्टमानसं भेजे तत्पूजां मुदितांतरः ।
सूतः पौराणिकः श्रीमान् स्मयमानमुखांबुजः ॥ १८ ॥
तदा तमनुकूलाभिर्वाग्भिस्ते वाग्विदां वरं ।
प्रीतिं विधाय ते ऽपृच्छन् कथाः पौराणिकाः शुभाः॥१९॥

मुनयः ॥

वयं नैमिषमासाद्य कृतार्था वचनाद्विधेः ।
तदिदानीं वदास्माकं स्कंदस्य चरितं महत् ॥ २० ॥ °

In the 2nd *adhyāya* we find the following enumeration of the *Purāṇas*, with a statement regarding the subdivisions of the *Skandap.*:

भूत्वा नारायणो व्यासः सत्यवत्याः सुतो महान् ।
संक्षिप्य चतुरो वेदान् स मुनिर्बादरायणः ॥ २५ ॥
पैलादिभ्यो विभज्यैमान् पृथक्पृथगसंकरं ।
दशधा चाष्टधा कृत्वा पुराणानि मुनीश्वराः ॥ २६ ॥
मह्यं करुणया प्रादाद्गुरुः सत्यवतीसुतः ।
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥ २७ ॥
भविष्यं नारदीयं च मार्कंडेयमतः परं ।
आग्नेयं ब्रह्मवैवर्तं लैंगं वाराहमेव च ॥ २८ ॥
स्कांदं च वामनं चैव मात्स्यं कौर्मं * च गारुडं ।
ब्रह्मांडं चेति पुण्यो ऽयं पुराणानामनुक्रमः ॥ २९ ॥
तत्र शैवानि शैवं च भविष्यं च द्विजोत्तमाः ।
मार्कंडेयं तथा लैंगं वाराहं स्कांदमेव च ॥ ३० ॥
मात्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वराः ।
ब्रह्मांडं च दशेमानि त्रीणि लक्षाणि संख्यया ॥ ३१ ॥
ग्रंथानां महिमा सर्वैः शिवस्यैव प्रकाश्यते ।
असाधारणया मूर्त्या नाम्ना साधारणेन च ॥ ३२ ॥
वदंति शिवमेतानि शिवस्तेषु प्रकाश्यते ।
विष्णोर्हि वैष्णवं तच्च तथा भागवतं तथा ॥ ३३ ॥
नारदीयपुराणं च गारुडं वैष्णवं विदुः ।
ब्राह्मं पाद्मं ब्रह्मणो द्वे अग्नेराग्नेयमेककं ॥ ३४ ॥
सवितुर्ब्रह्मवैवर्तमेवमष्टादश स्मृतं ।
चत्वारि वैष्णवानीशविष्ण्वोः साम्यपराणि वै ॥ ३५ ॥
ब्रह्मादिभ्यो ऽधिकं विष्णुं प्रवदंति जगत्पतिं ।
ब्रह्मविष्णुमहेशानां साम्यं ब्राह्मे पुराणके ॥ ३६ ॥
अन्येषामधिकं देवं ब्रह्माणं जगतां पतिं ।
प्रवदंति दिनाधीशं ब्रह्मविष्णुशिवात्मकं ॥ ३७ ॥ ° ४३ ॥
तत्र स्कांदं प्रवक्ष्यामि पुराणेषु त्रयोदशं ॥ ४४ ॥
संहिताभिस्तथा षड्भिर्लक्षैर्ग्रंथैर्विराजितं ।
दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः ॥ ४५ ॥
श्रद्धेयानि द्विजवरैस्तेषां धर्मास्तु तत्र यत् ।
सत्त्वं शुक्लं समादिष्टं सुखं ज्ञानास्पदं तु यत् ॥ ४६ ॥ ° ५३ ॥
तेष्वपीदं मुनिश्रेष्ठाः स्कांदं सुखदमुत्तमं ।
सर्ववेदांतसारस्य पंचाशत्खंडमंडितं ॥ ५४ ॥
आद्या सनत्कुमारीया द्वितीया सूतसंहिता ।
ब्राह्मी तु संहिता पश्चात्तुरीया वैष्णवी मता ॥ ५५ ॥

* In most other works the *Kaurma* is placed before the *Mātsya*.

DR.RUPNATHJI( DR.RUPAK NATH )

पंचमी शांकरी ज्ञेया सौरी षष्ठी तु संहिता ।
आद्या तु पंचपंचाशत्सहस्रैः * श्लोककैर्युता ॥ ५६ ॥
द्वितीया संहिता विप्राः षट्सहस्रैरलंकृता ।
त्रिसाहस्रैर्युता ब्राह्मी पंचभिर्वैष्णवी युता ॥ ५७ ॥
त्रिंशद्भिः शांकरी युक्ता खंडैर्द्वादशभिस्तथा ।
षष्ठी तु सौरी संयुक्ता सहस्रेणैककेन सा ॥ ५८ ॥
ग्रंथलक्षयुतं स्कांदं पंचाशत्खंडमंडितं ।
तदद्य संप्रवक्ष्यामि युष्मभ्यं विप्रपुंगवाः ॥ ५९ ॥
तत्र या संहिता प्रोक्ता शांकरी वेदसंमिता ।
त्रिंशत्सहस्रैर्ग्रंथानां विस्तरेण सुविस्तृता ॥ ६० ॥
आदौ शिवरहस्याख्यं खंडमद्य वदामि वः ।
तत्त्रयोदशसहस्रैः सप्तकांडैरलंकृतं ॥ ६१ ॥
पूर्वः संभवकांडाख्यो द्वितीयस्त्वासुरः स्मृतः ।
माहेंद्रस्तु तृतीयो हि युद्धकांडस्ततः स्मृतः ॥ ६२ ॥
पंचमो देवकांडाख्यो दक्षकांडस्ततः परं ।
सप्तमस्तु मुनिश्रेष्ठा उपदेश इति स्मृतः ॥ ६३ ॥
तत्र सर्वगुहस्यैव चरितं वर्णितं पुरा ।
विक्रमं तस्य सेनान्यो व्यासेन मुनिना द्विजाः ॥ ६४ ॥
इदमिह विबुधानामार्तिमोहापनोदं
प्रकटितमनुभावं कीर्तयंत्येव नित्यं ।
श्रुतिपुटमधु (श्रुतिपठमनु B) भूयो भूय एवाद्रियंते
भुवि सुतपशुपत्नीबंधुमित्रै रमंते ॥ ६५ ॥

II. *Āsurakāṇḍa*, in 15 *adhyāyas* (foll. 26), begins:

ओं श्रीशिवप्रियं देवं देवानामधिदैवतं ।
भजे ऽहं विघ्नराजं तं विघ्नहंतारमव्ययं ॥ १ ॥
कविं कवीनामीशानं गणानां गणनायकं ।
वक्रतुंडं महाकायं विघ्नेशं तं नमाम्यहं ॥ २ ॥
कार्त्तिकेयं महासेनं कुमारं पुष्करस्रजं ।
नमामि केकिकंठस्थं किंकिणीनादमेदुरं ॥ ३ ॥
ऋषय ऊचुः ॥
भगवन्सूत सर्वज्ञ पुराणार्थविशारद ।
शूरस्य सिंहवक्त्रस्य तारकस्य महौजसः ॥ ४ ॥
अन्येषामपि दैत्यानामुत्पत्तिं च तथा क्रियां ।
विस्तरेण वदाद्य त्वं शुश्रूषा महती च नः ॥ ५ ॥
सूत उवाच ॥
शृणुध्वमृषयः सर्वे कुमारायामितौजसे ।
उक्तं गौरीपतिना पूर्वं तद्वो वक्ष्याम्यनुक्रमात् ॥ ६ ॥
अस्ति दैत्यगुरुः कश्चित् काश्यपाख्यस्तपोधनः ।
ब्रह्मसूनुर्जितक्रोधः सत्यवाग्धर्मतत्परः ॥ ७ ॥ ०

III. *Vīramāhendrakāṇḍa*, in 7 *adhyāyas* (foll. 13), begins: श्रीशंकर उवाच ॥

अथ वाचं निशम्यायं स्कंदस्तां गुरुणोदितां ।
वीक्ष्यैनं करुणादृष्ट्या तिष्ठेत्याह तदा द्विजाः ॥ १ ॥
ततः प्रोवाच वचनं ब्रह्मविष्णुपुरोगमान् ।
देवानन्वेष्य सेनानीर्हितार्थं श्रवणप्रियं ॥ २ ॥
शृणुध्वममराः सर्वे ब्रह्मविष्णुपुरस्कृताः ।
शूरं सबांधवं हत्वा स्थापयिष्यामि वो ध्रुवं ॥ ३ ॥
प्रेष्यस्तदर्थं को वा स्याद्दूतस्तस्य बलाबले ।
उन्नतिनिम्नतां ज्ञातुं मर्मज्ञो वा विचक्षणः ॥ ४ ॥
तदाकर्ण्य वचः सर्वे वीरबाहुं बलोत्कटं ।
निश्चित्यानुमतिं लब्ध्वा स्कंदस्यैनं सुरोत्तमाः ॥ ५ ॥ ०

IV. *Yuddhakāṇḍa*, in 35 *adhyāyas* (foll. 52), begins: सूत उवाच ॥

भानुकोपस्तु निर्गत्य रथमारुह्य तत्क्षणात् ।
गत्वा गेहं स्कंदं बुद्धा कवचवज्रनिष्ठुरं ॥ १ ॥
तूणीरविलसत्पृष्ठभागः खड्गलसत्करः ।
अंगुलित्राणरमणीयोऽंगुलीभिर्मनोहरः ॥ २ ॥
गोधाचर्मावृतात्मीयमणिबंधोन्नरस्थलः ।
तप्तजांबूनदोद्भास्वत्पीतांबरपरिष्कृतः ॥ ३ ॥
वीरपट्टावृतस्तद्वन्नानाभरणभूषितः ।
द्रोणप्रसूनव्यरुचद्दामोद्दामप्रभावतः(?) ॥ ४ ॥ ०

V. *Devakāṇḍa*, in 7 *adhyāyas* (foll. 14), begins: सूत उवाच ॥

अथ वीक्ष्य गुहो देवान् जयंतप्रमुखानिह ।
बंधितानानयेत्याह वीरबाहुं तदासुरैः ॥ १ ॥
स तथेति विनिर्गत्य गुहाज्ञां शिरसा वहन् ।
जयंतादीनवाप्याथ वंदितस्तैर्महाबलः ॥ २ ॥
वृत्तांतमुक्त्वा तान् शीघ्रादानयित्वा समागतः ।
प्रणम्य ते गुहं दृष्ट्वा स्तुतिं चक्रुस्तरां तदा ॥ ३ ॥

* Cp. the statement in the *Sūtasaṃhitā*: ग्रंथतश्चैव षड्विंशत्सहस्रेणोपलक्षिता । आद्या तु संहिता विप्रा द्वितीया षट्सहस्रका ॥

तानुवाच कृपांभोधिः सुखिनो भवताधुना ।
स्वर्गभोगान्यथापूर्वं भुक्ता यूयमिति द्विजाः ॥ ४ ॥
कृताशिषो जयंतादिदेवाः परमया मुदा ।
प्रणेमुरिंद्रमभ्यासे स्थितमग्नौभुवस्तदा(!) ॥ ५ ॥ ०

VI. *Dakshakāṇḍa*, in 40 *adhyāyas* (foll. 50), begins: ऋषय ऊचुः ॥

दक्षाध्वरस्त्वया प्रोक्तः पुरा सूत तपोधन ।
जयंतायेंद्रपुत्राय समासेन बृहस्पतिः ॥ १ ॥
प्रोक्तवानिति तं भूयो विस्तराद्वक्तुमर्हसि ।
तदेतेषां वचः कर्णे कृत्वा प्राह ऋषीश्वरः ॥ २ ॥
शृण्वंतु ब्राह्मणाः सर्वे भवंतो ब्रह्मवित्तमाः ।
सत्यलोके पुरा ब्रह्मा सर्वैर्देवैस्तपोधनैः ॥ ३ ॥
ऋषिभिर्दशभिः पुत्रैः प्रजापतिभिरास्थितः ।
दक्षो ऽयं प्रथमस्तस्य पुत्राणां ब्राह्मणोत्तमाः ॥ ४ ॥ ०

VII. *Upadeśakāṇḍa*, in 85 *adhyāyas* (foll. 122), begins:

विश्वेश्वरं विश्ववंद्यं विमलज्ञानबोधकं ।
उपदेशपादपूर्त्यर्थमुमापुत्रं नमाम्यहं ॥ १ ॥
ऋषय ऊचुः ॥
अस्ति मेरोरुदग्भागे महाकैलासपर्वतः ।
समीपतोऽडभिज्ञेश्च भवतेति समीरितं ॥ २ ॥
किंरूपो ऽयमृषिश्रेष्ठ किंप्रमाणः किमुच्छ्रयः ।
एतत्सर्वं विशेषेण वक्तुमर्हसि तापस ॥ ३ ॥
सूत उवाच ॥
इति तेषां वचः श्रुत्वा प्राह पौराणिकोत्तमः ।
शृणुध्वं ब्राह्मणाः सर्वे गुह्याद्गुह्यतरं परं ॥ ४ ॥
अस्ति मेरोरुदग्भागे महाकैलासपर्वतः ।
सांबस्य सगणस्यायं सभक्तस्येंदुमौलिनः ॥ ५ ॥
संवासो योजनानां च त्रिंशत्कोटिभिरावृतः ।
औन्नत्यमेतद्द्विगुणमस्य ज्ञेयं द्विजोत्तमाः ॥ ६ ॥ ०

It ends:

इह लोके परत्रापि स्कंदसायुज्यमाप्नुयात् ।
तस्मादहरहर्नित्यं श्रोतव्यमभिवृद्धये ॥ १४० ॥
सूतात्मजस्य वचसोति(? ०सेति)मुनींद्रवर्याः
संतोषवार्धिलहरीत(? ०सं)निमग्नचित्ताः ।
संभाष्य सूतमपि –◡◡– विसृज्य
प्रापुस्तदाश्रयपदं त्रिदिवानधिश्रीः(!) ॥ १४१ ॥

इति श्रीस्कंदपुराणे शंकरसंहितायां शिवरहस्यखंडे उपदेशकांडे पंचाशीतितमो ऽध्यायः ॥ ८५ ॥ संवत् १८६१ ॥

The date, though only referring to the last 31 leaves, may be applied to the whole of the MS.

A prose paraphrase in Telugu of the whole of the *Śivarahasyakhaṇḍa*, by *Mudigoṇḍa Brahmāya Liṅgārādhya*, was published, at Madras, in 1859. [H. T. COLEBROOKE.]

## 3673.

**382 b.** Foll. 43; folio, size 16¼ in. by 10¾ in.; European paper; good Devanāgarī writing; thirty lines in a page.

The first or *Sambhava-Kāṇḍa* of the *Śiva-rahasyakhaṇḍa*.

This MS. is rather more correct than the corresponding section of the last MS. [H. T. COLEBROOKE.]

## 3674.

**1688.** Foll. 79 & 43; size 9½ in. by 4 in.; modern Devanāgarī writing; eight lines in a page.

Two fragments of the seventh or *Upadeśa-Kāṇḍa* of the *Śivarahasyakhaṇḍa*; comprising *adhyāyas* 9–28 and 39–47 respectively.

In the first fragment two leaves are numbered 40, and fol. 20 of the second fragment is bound up with the first between foll. 19 and 20. [H. T. COLEBROOKE.]

## 3675.

**382 a.** Foll. 29; folio, size 16¾ in. by 10¾ in.; clear Devanāgarī writing; thirty lines in a page.

*Sanatkumārasaṃhitā*, of the *Skandapurāṇa*, in 21 *adhyāyas*, containing *Śaiva* legends,

DR.RUPNATHJI( DR.RUPAK NATH )

especially regarding visits of gods and kings to sacred places in the neighbourhood of Kāśī where famous *liṅgas* are established.

*Sanatkumāra* seems to have given its name to the work as one of the chief interlocutors and narrators.

The MS. is very incorrect. It begins (somewhat corrected):

सुदृढं योगमारूढैर्गूढमंत: प्रढौकितं ।
वंदे योहनमह्विघ्नं(? यो ऽहन्न०) प्रौढं ढौंढविनायकं ॥१॥

तप:प्रसन्नश्रीकंठप्रसादामातुलप्रभं(? ०सादादतुलप्रभं) ।
श्रीदंडपाणिं काशीस्थं योगक्षेमपरं(? ०करं) श्रये ॥ २ ॥

योगाभ्यासेन शक्तास्तपसेनचरता(?) भक्तिमार्गे ऽप्यगाधे
नांतस्था: प्राणिनो ये कलिमलकलुषास्तानशेषान्भवाब्धौ ।
उद्धर्तुं य: कृपालुर्निवसति सगणे(०णो) विश्वपा साकमीशो
देव्या[:] क्षेत्रे [ऽ]विमुक्ते स भवतां श्रेयसे विश्वनाथ:
[गणेश:] ॥ ३ ॥

सनत्कुमार उवाच ॥

कृत्वोद्वाहं देवदेवो ऽथ देव्या
मैरीकामान्मुंजवत्पर्वतेंद्रात् ।
ब्रह्मेंद्रादीन्दैवतांस्तान्विसृज्य
क्रीडासक्तो नंदिमुख्यैर्गणेशै: ॥ ४ ॥

देव्या: प्रीत्यै कामरूपैरनंतै:
सिंहव्याघ्रर्क्षाननै: सारिकास्यै: ।
कैश्चित्सारंगाश्वनागैणकाक-
क्रोडश्वाविड्रो(? ड्डो)श्वहंसादिपक्षै: ॥ ५ ॥ ० १० ॥

देव्युवाच ॥

कादंबसंख्यागणनायकानां
रूपाणि कर्माणि बलानि चैषां ।
पुण्यानि पूर्वत्र कृतानि तानि
प्रसीद सर्वज्ञ न मे ऽस्ति तृप्ति: ॥ ११ ॥

आविष्कारितगंभीरगूढभावो महेश्वर: ।
आघ्राय वदनांभोजं तामेवात्मगिरं जगौ ॥ १२ ॥

ईश्वर उवाच ॥

नैषां प्रसंख्यानमितं(०दं) स्वरूपं
कर्माण्यमेयानि बलानि चौर्यें ।
पुण्यानि चाथापि वदामि देवि
ना[ना]नतान्मे रतिरस्ति काचित् ॥ १३ ॥ ०

1. *viśveśvaragaṇānuvarṇanam* (20 *ślokas*); 2. *kāśyapavarṇanam* (150); 3. *mokshopāyanirūpaṇam* (32); 4. *viśveśvaraliṅgāvirbhāvakathanam* (30); 5. *pāpaharaṇopāyavarṇanam* (53); 6. *bhavānīvarṇanam* (71); 7. *yātrāvarṇanāpraśaṃsā* (34); 8. *devānām avimuktāntaḥpraveśavarṇanam* (33); 9. *tīrthāvalīparibhṛita-bhāgīrathīpraveśavarṇanam* (54); 10. *śivayor nṛityakathanam* (45); 11. *hiraṇyapraśaṃsā* (100); 12. *prabhākara(sya) kāśīpraveśaḥ* (28); 13. *pāśupatavratopadeśaḥ* (94); 14. *prabhākarasya kāśīvāsapradānam* (72); 15. *garuḍeśvarayātrāvarṇanam* (48); 16. *kalivyākulasatvaravyāsavārāṇasīpraveśakathanam* (74); 17. *vyāsabhikshāṭanavarṇanam* (106); 18. *vyāsasamayakathanam* (150); 19. *adābhyeśvaramāhātmyavarṇanam* (116); 20. *kāśīdharmanirūpaṇam* (89); 21. *vyāsacaritravarṇanam* (51).

It ends: सूत उवाच ॥

इत्युक्त्वा भगवान्व्यास: सह लोकैर्महामुनि: ।
मणिकर्णिकामहातीर्थं प्रययावतिहर्षित: ॥

स्नात्वा तत्र विधानेन पृथग्विश्वेश्वरं शिवं ।
पूजयित्वा विधानेन मुक्तिमंडपमाश्रित: ॥

उपास्य दक्षिणामूर्तिं कृत्वा नक्तं यथाविधि ।
रात्रिशेषं दिव्याख्यानैर्जगतीश्वरसन्निधौ ॥

उपादिदेश भगवान् क्षेत्रमाहात्म्यमुत्तमं ।
यथावद्यततो(?) सर्वं न मुंचति कथंचन ॥

महापत्स्वपि यत्नेन ते ऽपि विज्ञानकाशिक:[1] ।
समुखं न्यवसन्क्षेत्रे प्राप्ताखिलमनोरथा: ॥

इत्येतद्व्यासचरितं पवित्रं पापनाशनं ।
य: पठेद्व्यासचरितं स विघ्नैर्नाभिभूयते ।
सर्वकार्येषु सर्वत्र व्यासस्य वचनं यथा ॥ ५१ ॥

इति श्रीस्कंदपुराणे सनत्कुमारसंहितायां व्यासचरित्रवर्णनं नामैकविंशो ऽध्याय: ॥ २१ ॥ सनत्कुमारसंहिता समाप्ता ॥

[H. T. Colebrooke.]

---

[1] ? ० कांक्षिण:.

DR.RUPNATHJI( DR.RUPAK NATH )

## 3676.

**1432 a.** Foll. 40; size 12¼ in. by 6 in.; rather careless Devanāgarī writing of 1705 A.D.; 13 or 14 lines in a page.

*Kārttikamāhātmya*, in 26 *adhyāyas*, ascribing itself to the *Sanatkumārasaṃhitā* of the *Skandapurāṇa*.

In form of dialogues between the principal gods and between the *Ṛishis* and *Vālakhilyas*, it contains speculations on the divine powers invested in each of them, and on the benefit derived from devotions held in honour of *Vishṇu* in the month of Kārttika.

It begins: ऋषय ऊचुः ॥

मुनिश्रेष्ठा वालखिल्याः सर्वलोकहितेच्छया ।
कलौ कलुषचित्तानां लोकानां दीनभाषिणां ॥ १ ॥
ज्ञानविज्ञानहीनानां शिश्नोदरसुखैषिणां ।
क्षणभंगुरबुद्धीनां स्वार्थैतत्परमानसां(॰चेतसां) ॥ २ ॥
कथं प्रसन्नो भगवान्भविष्यति जनार्दनः ।
श्रुतं चेद्भास्करमुखाद्ब्रूत व्रतमुत्तमं ॥ ३ ॥ ०

It ends:

सर्वरोगापहं सर्वपापनाशकरं शुभं ।
धनधान्यकरं मुक्तेर्निदानं कार्त्तिकव्रतं ॥ २२ ॥
विष्णुप्रीतिकरं नानार्थि[ति]तार्थफलप्रदं ।
यः करोति नरो भक्त्या तस्य पुण्यफलं महत् ॥ २३ ॥

इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये षड्विंशतितमो ऽध्यायः ॥ २६ ॥ संवत्सतशे १७६२ ॥ मन्मथसंवत्सरे ॥ शके १६२७ ॥ दुर्मुखनामसंवत्सरे दक्षिणायणे भाद्रपदशुद्धपौर्णिमास्यां १५ विठ्ठलभदयाध्येनेरकर काश्यां लिखितं ॥ स्वार्थं वा परार्थं वा ॥

The index indicatorius in MS. 366 contains (foll. 217-18) an abstract of the contents of a "*skānde amṛitasāroddhāre kārttikamāhātmyam*," but it is evidently a different work from the present.

There are two Bombay editions of this work, a printed (1854) and a lithographed one (1860). [H. T. COLEBROOKE.]

## 3677.

**2581.** Foll. 44; size 11 in. by 5¾ in.; fair, modern Devanāgarī writing; twelve lines in a page.

*Kārttikamāhātmya, adhyāyas* 1-24.

[MARSDEN.]

## 3678.

**372 a.** Foll. 35; size 10 in. by 4 in.; indifferent Devanāgarī writing of 1681 A.D.; 11 or 12 lines in a page.

*Tulasīmāhātmya* [A], of the *Sanatkumārasaṃhitā* of the *Skandapurāṇa*, in 15 *adhyāyas*; praising the miraculous qualities of the Tulasī plant, and raising it to the rank of a goddess to which divine worship is to be offered.

In the colophons of 5 of the 15 *adhyāyas* of the present MS. (viz. *adhy.* 8, 10, 12, 13, 14), though otherwise agreeing with the other MS., the treatise is assigned to the *Padmapurāṇa*.

It begins: सूत ० ॥

पुरा कदाचिद्दैत्यारिः प्रणिपत्य बृहस्पतिं ।
विजिज्ञिपन्महाभागं[1] सर्वज्ञं वंशिनां वरं ॥
भगवन् प्राणिनः सर्वे त्रैलोक्ये साधिते[2] मया ।
दुर्वृत्ता दुःखसंपन्नाः सदाचारविवर्जिताः ॥
संसारसागरे मग्नाः संकीर्णेतरजातयः ।
जातिभ्रष्टाः प्रवर्तंते हीनाचाराश्च हिंसकाः ॥
मोक्षमार्गः खिलीभूतो(ख॰ B) धर्मध्वजविनाशितः ।
संपदश्च विनश्यंति क्षणमात्रेण वै गुरो ॥
पुरुषार्थो भविष्यंति येनोपायेन सुव्रत ।
ब्रूहि तत्त्वविदां श्रेष्ठ सर्वसंपत्समृद्धिदं ॥

बृहस्पतिरुवाच ॥

साधु पृष्टं महाभाग त्रैलोक्यैश्वर्यवर्धन ।
श्रीमहातुलसीदेव्या गुणाः सर्वे त्वयोदिताः[3] ॥

[1] r. व्यजिज्ञप॰. [2] साधिता B. [3] मयो॰ B.



DR.RUPNATHJI( DR.RUPAK NATH )

सिध्यंति नात्र संदेहः सा लक्ष्मीः सर्वसिद्धिदा ।
येनैव वर्धिता देवी स लक्ष्मीभाजनं भवेत् ॥
यत्र तिष्ठति सा देवी तत्र नृत्यंति संपदः ।
तस्याः प्रभावं देवेश कल्पकोटिशतैरपि ।
वक्तुं नालमतो वक्ष्ये संक्षेपात्पाकशासन ॥
हिरण्यकशिपोः पुत्रः प्रह्लादो भूसुताय वै ।
नरकाय(नारदाय B) जगादेवं तुलसीकाष्ठवैभवं ॥

प्रह्लाद उवाच ॥
सूनो तुलस्या माहात्म्यं शृणु यत्पूजया पुमान्[1] ।
भुक्त्वेह वांछितान्भोगानंते मोक्षमवाप्नुयात् ॥
आस्ते हि तुलसीकाष्ठं मुष्टिमात्रं धरासुत ।
सांनिध्यं कुरुते(कुर्वते) तत्र देवा नारायणादयः ॥
तुलसीकाष्ठमाहात्म्यं श्रवणात्पठनादपि ।
इयत्तया परिच्छिद्य मया वक्तुं न शक्यते ॥ ०

It ends:

यस्तु श्रीतुलसीगंधमाघ्राति द्विजसत्तमः[2] ।
स एव गंता तद्विष्णोः पदमत्यंतदुर्लभं ॥
एवंप्रभावा सा देवी तुलसी पुण्यदायिनी ।
इमां तु तुलसीगाथां श्राद्धकाले तु यः पठेत् ।
सर्वे ते पितरस्तस्य यास्यंति परमां गतिं ॥
इदं पवित्रं परमं सर्वपापप्रणाशनं ।
यः पठेत्प्रातरुत्थाय स देवैरपि पूज्यते ॥

इति श्रीस्कंदपुराणे सनत्कुमारसंहितायां तुलसीमाहात्म्ये पंचदशो ऽध्यायः ॥ ० संवत् १७३८ मनचैत्रशुक्लत्रितीयायां शनिवारे टक्कानगरे लिखितं तुलसीमाहात्म्यमिति ॥

[H. T. COLEBROOKE.]

## 3679.

**1856.** Foll. 50; size 11 in. by $4\frac{1}{4}$ in.; good Devanāgarī writing of 1726 A.D.; nine lines in a page.

*Tulasīmāhātmya.* [B.]

Dated: श्रीशके १६४८ पराभवसंवत्सरे होनभट्ट उंडाळेकर तुलसीमाहात्म्यं लिखितं ॥

[DR. JOHN TAYLOR.]

---

[1] तत्पूजया ० A ; यत्पूजयाम्यहं B.

[2] B om. this line.

## 3680.

**2559.** Foll. 61; folio, size $13\frac{3}{4}$ in. by $10\frac{1}{2}$ in.; modern Telugu handwriting; about thirty lines in a page.

*Triśiragiri-māhātmya*, or *Triśiraśaila(nātha)-māhātmya*, of the *Sanatkumārasaṃhitā* of the *Skandapurāṇa*; "a legendary account of the hill of Triśira or Tricanapali, an outwork of Laṅkā in the days of *Rāvaṇa*, under charge of a demon named *Triśiras*, killed by *Rāma*" (Wilson, Mack. Coll., p. 135); including an account of the Cola kings.

It begins:

नैमिशारण्यनिलया मुनयः शौनकादयः ।
अष्टांगयोगनिरता ब्रह्मज्ञानैकतत्पराः ॥
मुमुक्षवो महात्मानो निर्ममा ब्रह्मवादिनः ।
धर्मज्ञा अनसूयाश्च सत्यव्रतपरायणाः
जितेंद्रिया जितक्रोधाः सर्वभूतदयाळवः ।
भक्त्या परमया युक्ता अर्चयंतः सदाशिवं ॥
तपस्तेपुर्महापुण्ये नैमिशे मुक्तिदायिनि ।
एकदा ते महात्मानः समाजं चक्रुरुत्तमं ॥
कथयंतो महापुण्याः कथाः पापप्रणाशनीः ।
मुक्तिं मुक्त्युपायं च जिज्ञासंतः परस्परं ॥ ०

The work seems to be incomplete. There are 56 *adhyāyas*, the last of which is however without a colophon, ending thus:

इति पूर्वं समासेन कथितं मुनिपुंगवे ।
तच्छ्रुत्वा करिकालोऽपि कुंभजान्मुनिपुंगवात् ॥
न्यायार्जितं च सकलं द्रव्यमर्पितवान्मृधे ।
अगस्त्यचोदितो राजा राक्षसैर्घोरकर्मभिः ॥
खिलीकृतानि तीर्थानि द्वादशात्यद्भुतानि च ।
प्रकाशितानि पुण्यानि यतनोद्भक्तिसंयुतः ॥

Foll. 49–61 have been wrongly inserted first in the volume.

On a special treatise on the Cola dynasty, assigned to the *Bhavishyottarapurāṇa*, see above, no. 3456. [MACKENZIE COLLECTION.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3681.

**2730 c & d.** Foll. 25; small 4to, size 8¼ in. by 6 in.; clear, modern Devanāgarī writing; 23–28 lines in a page.

Two treatises professing to belong to the *Sahyādrikhaṇḍa* of the *Skandapurāṇa*.

I. *Vānavāsīkshetramāhātmya*, celebrating the neighbourhood of Vānavāsī, as a locality hallowed by the worship of *Madhukeśvara-Śiva*, and by the fact of his *Devī* having been born at the foot of mount Sahya; and professing to form *adhyāyas* 22–26 of the *Sahyādrikhaṇḍa* of the *Sanatkumārasaṃhitā* of the *Skandapurāṇa*.

It begins: बाणवासिक्षेत्रमहिमा लिख्यते ॥

ऋषय ऊचुः ॥

भगवन्सूत सर्वज्ञ वानवासीति या त्वया ।
पुरा प्रोक्ता महाबुद्धे कुत्रास्ते सा पुरी शुभा ॥ १ ॥
केनादौ निर्मिता चेयं कथं पुण्यतराभवत् ।
एतत्सर्वं च विस्तार्य वक्तुमर्हस्यशेषतः ॥ २ ॥

श्रीसूतः ॥

शृणुध्वं तत्कथां पुण्यामृषयः शंसितव्रताः(संशित°) ।
सर्वाघौघक्षयकरीं श्रोतॄणां विस्मयप्रदां ॥ ३ ॥
कल्पादौ भगवान् ब्रह्मा सृष्ट्वा लोकान्यथाक्रमशः ।
तत्रत्यानां जनानां च सदाह्लादनकारिणः ॥ ४ ॥
नदीनदतटाकांश्च पुरीर्निर्माय सप्त च ।
पश्चादुपपुरीः सप्त निर्ममे जगतां पतिः ॥ ५ ॥
तासां नामानि पुण्यानि शृणुध्वं मुनिपुंगवाः ।
वानवासी कुशा लंका काश्मीरी कुंडिनी पुरी ॥ ६ ॥
जहरी मंदरी चेति ह्युपपुर्यः प्रकीर्तिताः ।
कृते तु कौमुदी प्रोक्ता त्रेतायां बैदवी तथा ।
द्वापरे तु जयंती स्याद् वानवासी कलौ युगे ॥ ७ ॥ °

The ascendancy which *Śivaism* gained in those parts over other forms of worship is symbolized, in *adhy.* 24, by an account of a dispute between the gods of the *Trimūrti* for precedence, decided in favour of *Śiva* by his own self-assertion; whilst other legends are introduced to illustrate the marvellous efficacy of acts of devotion performed there. Thus, in *adhy.* 22, the story of *Caṇḍikā*, the quarrelsome wife of *Mārtāṇḍa dvija* of Barbaradeśa, who had to be put away by her husband, and who, when she died, became a *paiśācī* in 15 successive transformations, until she atoned for her sin by paying homage to *Madhukeśvara*, and became released. Another story (in *adhy.* 23) is that of the redoutable brigand *Huṇḍa*, and his atrocious wife *Pulkasī*, who were finally overcome by *Malla nṛipati*, after invoking the assistance of the powerful god.

It ends: इत्यादिमहापुराणे स्कांदे सनत्कुमारसंहितायां सह्याद्रिखंडे षड्विंशो ऽध्यायः ॥

II. *Mayūravarmākhyāna*, the story of *Mayūravarman*, or *Śikhivarman*, of Jayantīpura; in a different version from that contained in G. Da Cunha's edition of the *Sahyādrikhaṇḍa* (pp. 334 seqq.; see next MS.). Rather incorrect.

It begins (fol. 13*b*): मयूरवर्माख्यानं लिख्यते ॥

अभूदभूमः(!) प्रथितः(*r.* °तं) पृथिव्यां
पुरं जयंतीपुरमित्युदारं ।
पुरंदरस्यापि पुरीमपास्य
स्थितेव यत्र स्थितिरथी(? स्थिरधीः) सदा श्रीः ॥
तदिदं पृथिवीजयार्जितं विजयंतीपुरमित्युशंति च
कनकाद्रिपुरं परे जगुर्वनवासीपुरमीरयंत्यदः ।
नवनंदसमाह्वया नृपा नव सिंहासनसंश्रयास्त्विह
नवमास्पदवृत्तयः पुरा नवमायां किल राज्यपा दधुः ॥ °

Whilst much is made of the miraculous feats performed by the hero of the story, and the adventures he went through before his accession to the throne, comparatively little is said of the memorable event of his reign, viz. the introduction of Brāhmans from the north into this part of the southern peninsula.



DR.RUPNATHJI( DR.RUPAK NATH )

His policy, however, is shown to have been continued by his son *Trinetra Kādamba*, who spread these apostles of civilization further south to Gokarṇa, the country "which in former times had been purified by the arrows of *Rāma*, and by *Śiva*." Cf. Wilson, Mack. Coll., i., pp. 95, 96.

The tract consists of 287½ *ślokas*, the last five of which have been added by another hand, the last leaf of the original MS., and with it the colophon, having apparently been lost. Whether it is meant to be included in the *Skandapurāṇa* does not now appear, though the subject-matter makes its connection with the *Sahyādrikhaṇḍa* very probable.

It ends: ते ह्युत्तरसहस्राख्याः सम्यक्त्वेषु(!) प्रकीर्तिताः ॥ इति देशोत्पत्तिपद्धतिः ॥ [MACKENZIE COLLECTION.]

## 3682.

**2703.** Foll. 221 (counted 219; nos. 48, 142, 214, 215 being double, and nos. 116 & 121 omitted); size 8½ in. by 4 in.; Devanāgarī character, written by several hands in 1806 A.D.; 7–9 lines in a page.

Two sections of the *Sahyādrikhaṇḍa*, and one section of the *Sūtasaṃhitā* of the *Skandapurāṇa*.

This *Khaṇḍa*, containing the legendary record of the region along the Sahyādri range (especially the North Canara country), has been edited (Bombay 1877) by G. Da Cunha. The MS. contains these two sections of that *khaṇḍa*:—

I. (Foll. 1–141.) *Reṇukāmāhātmya* of the edition (foll. 389–440), begins:

लक्ष्मीचारुकुचद्वंद्वकुंकुमांकितवक्षसे ।
नमो नृसिंहनाथाय सर्वमंगलमूर्तये ॥
सप्तहाटककेशांतज्वलत्पावककांचन ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥

ऋषयः ॥ यत्त्वया कथितं स्कंद भुक्तिमुक्तिफलप्रदं ।
विचज्रं(विरजं ed.) मेखलं तीर्थं तदस्माभिः श्रुतं प्रभो ॥
मातृतीर्थमिति ख्यातं [प्रणीतादक्षिणे तटे] । °

The gods, vanquished by the Dānavas, appeal for help to *Vishṇu*, who tells them that he will be born from *Aditi-Pārvatī*, who is to enter human form as *Ekavīrā* or *Reṇukā*, the daughter of *Reṇu* (*adhy.* 1, 2). Birth of *Reṇukā* (*adhy.* 3, 4), and of *Jamadagni* (*adhy.* 5–7). Marriage of the two (*adhy.* 9–12), and birth of *Jāmadagna Paraśurāma* (*adhy.* 13). The boy's training in arms and his return (*adhy.* 14–19). Subsequently, whilst *Rāvaṇa* and the Rākshasas are causing trouble, *Kārtavīrya*, king of the Haihayas—who is no other than *Arjuna*—arrives to assist *Jamadagni* (*adhy.* 29); but on being refused the gift of *Kāmadhenu*, he becomes his deadly enemy: we have thus another version of the story of the quarrel of *Vasishṭha* and *Viśvāmitra* over the cow. *Jamadagni* is slain (*adhy.* 35), and *Paraśurāma*, to avenge his father, challenges and kills *Kārtavīrya* (*adhy.* 47), and subsequently exterminates the Khatriyas and Rākshasas (*adhy.* 50). The remainder of this section is devoted to the glorification of *Paraśurāma*, and the institution of sacred *tīrthas* such as Rāmatīrtha (fol. 123*a*), Cakratīrtha (fol. 123*b*), and Mātṛitīrtha (fol. 137*b*). It breaks off at the bottom of fol. 141*b*, after 2½ *ślokas* following the end of *adhy.* 58 (*mātṛitīrthavarṇanam*). In the edition, the *Reṇukāmāhātmya* consists of only 40 *adhyāyas*, corresponding to *adhy.* 1–42 of the MS. (where *adhy.* 31 and 38 form two chapters each); this correspondence, however, only extends to ed. *adhy.* 40, v. 35, where, from the middle of the first half-verse, the MS. (fol. 96*a*, l. 6) is quite different. Between foll. 96 and 97 the end of *adhy.* 42 and beginning of 43 is wanting.

DR.RUPNATHJI( DR.RUPAK NATH )

II. (Foll. 142–165.) ′[*Mayūravarmākhyāna*], being *adhy.* 7–10 of the *Uttarārdha* — here called *Uttarakāṇḍa* after the first two chapters, afterwards *Uparibhāga*—of the *Sahyādrikhaṇḍa*, as edited; with two new chapters — *mayūravarmotpattiḥ* and *ahicchatrabrāhmanāṇayanam*— inserted between 7 and 8.

It begins: ऋषय ऊचुः ॥

भगवन्सूत सर्वज्ञ पुराणेष्वतिकोविद ।
किमर्थं भार्गवो देशं चकाराब्धौ स्वयंविभुः ॥

By throwing his axe three *yojanas* into the sea from the top of the Sahyādri, *Paraśurāma* reclaims land which he first bestows on the Brāhmans, but takes from them again; whereupon it comes under the sway of *Mayūravarman*, or *Śikhivarman* (fol. 145*a*), who founds 32 villages (foll. 145*a*, 151*b*) and the town of Jayantikā (fol. 148*b*) or Vānavāsī (or Vanavāsipura, the modern Bangwasi), into which he introduces Brāhmans from Ahicchatrā (fol. 150*a*). The chapters have no numbers, space being left in the colophons for them.

From fol. 186*b*, l. 1 infr. to 205*b*, 2 infr., this section is repeated in a more correct form; three more chapters (11–13 of the ed.) being added thereto, ending: इति श्रीस्कांदे सह्याद्रौ पातित्यकथनं ॥

III. (Foll. 166*a*–186*b*). A chapter claiming to be taken from the *Jñānayogakhaṇḍa* of the *Sūtasaṃhitā* (but partly vernacular), beginning: तौलव द्वाविंशद्ग्रामनामानि भेदाः। आदौ पश्चिमषोडशग्रामभेदा लिख्यंते। कारेंडेरु। कर्कोडि। मरण। कोलिविमाडु।° and ending: इति श्रीस्कंदपुराणे सूतसंहितायां ज्ञानयोगखंडे सासनविधिकथनं ॥ [MACKENZIE COLLECTION.]

3683.

**2704.** Foll. 25; size 8 in. by 6 in.; clear, modern Devanāgarī writing; 12 or 13 lines in a page.

A section of the (*uparibhāga* of the) *Sahyādrikhaṇḍa* of the *Skandapurāṇa*.

It consists of 13 *adhyāyas*, treating of two different subjects, viz.:—

I. *Adhyāyas* 1–10. [*Ishupāta-*]*Rāmakshetramāhātmya* [A], being another version of the myth of *Paraśurāma* reclaiming land from the sea by shooting an arrow into it.

It begins (with the numbers supplied):

सूत उवाच ॥

नैमिषे निमिषक्षेत्रे ऋषयः सत्रमासत ।
शतसंवत्सरं दीर्घं नानापक्षिद्विसंकुलं [1] ॥ १ ॥
तत्रासन्नृषयः सर्वे दिव्या भौमाश्च [2] नित्यशः ।
यज्ञनारायणं [3] साक्षाद्यज्ञैर्देवैर्महर्षिभिः [4] ॥ २ ॥
वेदैश्च सवनैः स्तोत्रैः शस्त्रैरस्त्रैश्च संयुताः [5] ।
मंत्रानुमंत्रिताः सर्वा देवता निवसंति हि [6] ॥ ३ ॥
त्रयाणामपि लोकानामुत्सवः समभूत्तदा ।
इंद्रादयो देवगणा देवाचार्यपुरोगमाः [7] ।
शौनकं मुनिशार्दूलं पुरस्कृत्य ययुस्तदा ॥ ४ ॥
तानागतान्समालोक्य [8] ऋषयः प्रश्रयान्विताः [9] ।
उत्तस्थुः [10] परमप्रीत्या शौनकं चेदमब्रुवन् ॥ ५ ॥
अहो धन्यतमो लोके [11] स एव पुरुषो महान् ।
यस्यागमनमात्रेण सर्वे प्रमुदिता जनाः ॥ ६ ॥
वयमत्र समासीनाः सत्रयागचिकीर्षया ।
कर्मावसाने चास्माकं कालो नैवातिवर्तते ॥ ७ ॥
कथाभिः सुविचित्राभिरितिहासैः पुरातनैः ।
त्वं नः सुखयितुं कालमर्हो ऽसि [12] पुरुषोत्तम ॥ ८ ॥

---

[1] Thus A, B; ऋषिसंघसमावृतं ed. (from the var. lects. here given, some idea may be formed of the edition).

[2] दिव्यभोगाश्च B; दिव्यभोगांश्च ed.

[3] Thus A, ed.; यज्ञे नारायणं B.

[4] ° यज्ञदेवै ° ed.

[5] शास्त्रै ° संयुते ed.

[6] मंत्रानुमंत्रितान्सर्वान्दैवतानि वसंति हि । ed.

[7] B, ed. omit this and the next line.

[8] समालक्ष्य B, ed.

[9] ऋषयश्च दयान्विताः ed.

[10] ततस्तु ed.

[11] लोकात् ed.

[12] सुखवसत्कालमहोसि (!) ed.

DR.RUPNATHJI( DR.RUPAK NATH )

इत्युक्तो मुनिशार्दूलैः शौनकः करुणानिधिः ।
द्वैपायनं पुरस्कृत्य वरमासनमास्थितः ॥ ९ ॥
कथयामास विविधाः कथाः सर्वमनोरमाः ।
धर्मान्देशाश्रितान्कालयुगपर्वतसंश्रितान्[1] ॥ १० ॥
वर्णसंकरजानां च[2] कर्माण्युच्चावचान्यपि ।
एवं कथयतस्तत्र कालो बहुतिथो[3] गतः ॥ ११ ॥
कदाचिदागतस्तत्र ऋषिसंघसमावृतः ।
जामदग्न्यो मुनिवरस्तपसा[4] प्रज्वलन्निव ॥ १२ ॥ ° ३६ ॥
इति तेषां वचः श्रुत्वा जामदग्न्यो महामुनिः ।
शौनकं प्रेरयामास तीर्थमाहात्म्यकीर्तने ॥ ३७ ॥

इति श्रीस्कंदपुराणे सह्याद्रिखंडे रामक्षेत्रमाहात्म्ये प्रथमो ऽध्यायः ॥

शौनक उवाच ॥
शौनको ऽहं प्रवक्ष्यामि क्षेत्रमाहात्म्यमुत्तमं ।
रामस्य रेणुकेयस्य(*r.* रै°) इषुपातांकितस्य च ॥ १ ॥
रामेण रेणुकेयेन(रै°) भूमिः सर्वस्वदक्षिणा ।
दत्ता विप्राय विधिवत्कश्यपाय महात्मने ॥ २ ॥ °

The first *adhyāya* corresponds to the last *adhyāya* but one (the 20th) of the *uttarārdha* of the *Sahyādrikhaṇḍa* in the edition, but the latter seems to contain nothing corresponding either to the remaining 9 *adhyāyas*, or to the succeeding tale.

It ends: शौनक उवाच ॥
इदमाख्यानकं सर्वं पुरंदरजयावहं ।
यः पठेच्छृणुयाद्वापि संपद्दिनं वियुज्यते ॥

इति श्रीस्कंदपुराणे सह्याद्रिखंडे इषुपातरामक्षेत्रमाहात्म्ये दशमो ऽध्यायः ॥

II. *Adhyāyas* 11–13. *Pushpadantopākhyāna* (rather incorrect), beginning:

ऋषय ऊचुः ॥
शौनकस्त्वं महान्योगी सर्वधर्मविदां वरः ।
नानाकथानकज्ञो ऽसि मितवाक्सत्यभाषणः ॥
रामक्षेत्रस्य माहात्म्यं रेणुकेयस्य(रै°) वै श्रुतं ।
तेनास्माकं हि संतोषः संजातो चोपमातितः(!) ॥

तथापि श्रोतुमिच्छामो त्वन्मुखांभोजतः पुनः ।
अस्मिन्क्षेत्रे जनिष्यंते स्वर्गाच्च्युता दिवौकसः ॥
गंधर्वा यक्षसाध्याश्च शिवविष्णुगणास्तथा ।
शापेन स्वेच्छया वापि येन केनापि हेतुना ॥ °

The *Gandharva Pushpadanta*, having heedlessly disturbed the divine service of *Śiva's* worshippers, is condemned by the god to become deprived of his reason (*cetanāhīna*) and of the power of motion (*niśceshṭatā*); but on addressing *Śiva* with the *Mahimnaḥ stava* (महिम्नः पारं ते°)—which is indeed ascribed to a *Pushpadanta*—is pardoned for his offence against the god, whilst that committed against the pious worshippers is to be expiated by the *Gandharva* undergoing a term of earthly existence in the Sahyādri region. The events that are to take place during this time are, in some way, connected with the Śaka year 1634:

अतः स मर्त्यलोके ऽस्मिन् अष्टाविंशतिपर्यये ।
कलावस्मिंश्च भविता शाके वै शालिवाहने ॥
वेदाग्निरसभूवर्षे सैय्याद्रिविषयेष्वपि(सह्या°) ।
भौंसलानां कुले नूनं भविष्यति सुबुद्धिमान् ॥
नागाह्वयो महातेजाः सर्वविद्याविशारदः ।
पूर्वसंस्कारतश्चारुगानविद्यापरः सदा ॥
गीतवादित्रकुशलः स्वबुद्ध्या मूर्छनाविदः ।
ततः किंचित्समास्थित्वा(!) पितृगृहे ऽपि लालितः ॥
ततः स्वबुद्धिमादाय पितृराज्ञा(?°राष्ट्रं) प्रगृह्य च ।
उल्लंघ्य सय्यशिखरं(सह्य°) यः कश्चित्पर्वते वसन् ॥
करोति स महत्कीर्तिं(!) शस्त्रविद्याविशारदः ।
विष्णुभक्तिपरो नित्यं करोति द्विजपालनं ॥
ततश्चंद्राख्यनगरं संप्राप्य विक्रमेण च ।
स्थित्वा तत्र महद्भक्तिं(!) वैष्णवीं प्रकरिष्यति ॥

It ends:

ततः पुनः समासाद्य स्वस्थलं नागभूभुजः ।
सचिवैः सह धर्मात्मा शास्ते राज्यं विद्यार्जितं ॥
महोत्साहात्पुनस्तत्र द्विजसंतर्पणादिकं ।
दत्त्वा भूरिधनं चारुवासांसि विविधानि च ॥

[1] धर्मान्देशाश्रितः कालो युगपर्वतसंस्थितान् ed.
[2] वर्णसंकरजातांश्च ed.; ° संकरतानां च B.
[3] बहुतरो ed.
[4] जामदग्न्यैर्मुनिवरैस्तपसा ed.

DR.RUPNATHJI(DR.RUPAK NATH)

गायकान्मागधान्नाद्ध्यान् नाना वै स्तुतिपाठकान् ।
स्वबाहुविक्रमेणार्थेकर्ता पालनमद्भुतं ॥
यः शृणोतीदमाख्यानं नागेंद्रस्य जयावहं ।
सर्वान्कामानवाप्नोति विष्णुसान्निध्यमेव च ॥

इति श्रीस्कंदपुराणे सह्याद्रिखंडे पुष्पदंतोपाख्याने त्रयोदशोऽध्यायः ॥ [MACKENZIE COLLECTION.]

## 3684.

**2618a.** Foll. 46 (paged, in European figures, 215–308); 4to, size 9⅝ in. by 7¼ in.; modern Telugu handwriting; 32–42 lines in a page.

*Uttara-sahyādrikhaṇḍa*, or Part II. (*uparibhāga*) of the *Sahyādrikhaṇḍa*.

I. *Rāmakshetramāhātmya* [B], in 10 *adhyāyas*, beginning:

सह्यसर्वोद्भवान् सूत नदीक्षेत्राश्रमादिकान् ।
महर्षीणां च तीर्थानां महिमानं वदस्व नः ॥ १ ॥

सूतः ॥ नैमिषे निमिषक्षेत्रे ०

In the colophons, the episode is six times assigned to the *Sahyādrikhaṇḍa*, thrice to the *Uttara-sahyādrikhaṇḍa*, and once to the *Uparibhāga* of the *Sahyādrikhaṇḍa*.

At the end (p. 221) a note is appended, stating that 10 *adhyāyas* are omitted (*atra sthale daśa adhyāyāḥ patitāḥ*). Nevertheless, the MS. resumes with the 20th *adhyāya*—perhaps a mistake for 21, seeing that in counting the subsequent chapters, no. 36 is omitted. Of the succeeding six *adhyāyas* (20–25), *adhy*. 22 is called *Paraśurāmacaritra*, and 24-5 *Virūpākshamahodaya*.

II. *Maṅgīśamāhātmya*, *adhy*. 26(?27)–42, beginning: सूतः ॥

इत्थं निशम्य शितिकंठसुतात्पवित्राम्
मार्कंदकारणकथामथ[1] सो ऽप्यगस्त्यः ।
नत्वाथ षण्मुखपदं परमादरात्तं
प्रष्टुं प्रचक्रम इह स्वमनीप्सितं[2] यत् ॥

The 12 *adhyāyas* of which the *Maṅgīśa-māhātmya*(!) consists in the edition (pp. 533–576), correspond to *adhy*. 26–35 of the MS. (*adhy*. 30 = *adhy*. 5 + 6 of ed.); whilst for the remaining six *adhyāyas*, there is nothing corresponding in the edition.

This additional portion begins: ऋषयः ॥

एके चित्तसंस्थिता विप्रा उत्तरस्यां दिशि द्विजाः ।
ते रामं च कृपानिधिमाजग्मुर्वरमीप्सवः ॥

It ends:

मृगेंद्रमार्गात(°त्र)दवप्रदूरे मातंगयूथान्यपि संचरंति ।
तथा भवद्घोररुठारमार्गोदाक्रंदतो नूनमहो नरेंद्राः ॥

इति श्रीस्कांदे उपरिभागे मंगीशमाहात्म्ये द्विचत्वारिंशोऽध्यायः ॥

III. *Pātityagrāmanirṇaya* (foll. 15–22), 11 *adhyāyas*, numbered 88–90, 191–193, 174, 175, 194, 124, 125, and corresponding, in the same order, to *adhy*. 9–19 of the *Uttarārdha* of the *Sahyādrikhaṇḍa* as edited (p. 338 seqq.).

It begins: श्रीऋषयः ॥

सूत सर्वपुराणार्थविज्ञानविमलाशय ।
तव मुखेंदुगलितं कथापीयूषमंगलं ॥
पीत्वा श्रुतिपुटैर्भूयः पिपासा वर्धते हि नः ।
अतः कथामृतं श्रोतुं पुण्यं पापभवार्तिहं ॥
रहस्यं विविधं जन्मन्[3] त्वया मतिमतां वर ।
श्रुतानि सकलान्यद्य धर्माणि विविधानि च ॥
द्वात्रिंशद्ग्रामनामानि ग्रहभेदानि यानि च ।
पूर्वमेव त्वयैवोक्तं पातित्यग्रामसंज्ञिकं ॥ ०

Colophon: इति श्रीसह्याद्रौ उपरिभागे पातित्यग्रामे पंचविंशशततमो ऽध्यायः ॥

IV. *Śambhugirimāhātmya* (of the *Mārkaṇḍeya-saṃhitā*) of the *Uparibhāga* of the *Sahyādrikhaṇḍa* (foll. 23–31b), *adhyāyas* 1–12.

It begins: शौनकः ॥

बहूनि क्षेत्रमुख्यानि त्वयोक्तानि श्रुतानि वः (? नः) ।
पुनरन्यन्महाक्षेत्रं सूतो(सूत) नो वद पावनं ॥

[1] मानंदकानन° ed.  [2] इदं स्वमनोपितं ed.

[3] Thus also ed.

DR.RUPNATHJI(DR.RUPAK NATH)

साक्षाद्व्याससमुखात्सर्वं त्वया श्रुत्वावधारितं ।
धर्माश्च बहवः संति श्रुतिस्मृतिसमन्विताः ॥

The first colophon runs thus: इति श्रीसह्याद्रौ स्कांदे मार्कंडेयसंहितायां उपरिभागे शंभुगिरिमाहात्म्ये प्रथमो ऽध्यायः ॥

It ends:

शुक्लपक्षे नवम्यां तु भृगुवारे विशेषतः ।
सोमवारे ऽनुमत्या वा दुर्गानुग्रहसिद्धये ॥
दंपती समलंकृत्य वासोगंधविभूषणैः ।
भोजयेत्साधुनान्नेन तस्य माया प्रसीदति ॥

इति श्रीस्कांदे सह्याद्रौ उपरिभागे शंभुगिरिमाहात्म्ये द्वादशो ऽध्यायः ॥

v. *Āmalakīgrāmamāhātmya* (foll. 31*b*–46), *adhyāyas* 52–70, etc. It begins:

श्रुत्वैतत्पुण्यमाख्यानं त्रैगर्तो राजसत्तमः ।
पूजयामास विप्रेंद्रमुपमन्युं विधानतः ॥
नमस्कृत्य ततः प्राह भक्तिनम्रात्मकंधरः ।

त्रैगर्तः [॥]

नह्यया दोग्धुं[1] नदी पापविनाशिनी ॥
कुतश्च कारणाज्जाता केन वा निर्मिता पुरा ।
सर्वमेतत्समाचक्ष्व शिष्याय प्रणताय मे ॥

उपमन्युः ॥

पुरा क्षत्रवधं रामः कृत्वा भृगुकुलोद्भवः ।
त्रिस्सप्तकृत्वः पृथिवीं पर्यैपं(? पर्यटन्) नैकवीरहा ॥ °

This section is incomplete. The last colophon occurs on the last page: इति श्रीस्कांदे सह्याद्रिखंडे आमलकीग्राममाहात्म्ये सप्ततितमो ऽध्यायः ॥

The MS. then continues for a few more lines, when it breaks off abruptly in the middle of the verse:

स्कंदः॥ इत्युक्त्वा प्रणम्यादौ दत्तात्रेयो ऽथ रेणुकां।

In the edition there seems to be nothing corresponding to the two sections here noticed under IV. and V.

[MACKENZIE COLLECTION.]

[1] ? Three *aksharas* seem to be wanting here. Prof. Aufrecht suggests न शक्यत इयं बोढुं.

## 3685.

**2702.** Foll. 7; large 8vo, size 8¾ in. by 6 in.; clear, modern Devanāgarī writing; European paper; 15–18 lines in a page.

*Kesarakshetramāhātmya*, in three *adhyāyas*, assigned to the *Sahyādri-uttarakhaṇḍa*.

The tract (composed in rather incorrect Sanskrit) celebrates the miraculous power of a *liṅga* established, at Kesarakshetra, by *Mitratapas*, or *Satyatapas*, son of *Brahmatapas*, and grandson of *Jñānatapas*, residing at Candragiri. The locality derives its name from a famous *Kesara* tree in the district of Bakulakshetra.

It begins: श्रीसत्यनाथेश्वराय नमः ॥

स्कंद उवाच ॥

वंदे शंभुं सकलदुरितध्वांतसूर्यं त्रिनेत्रं
विष्णुब्रह्मादिभिरपि सदा पूज्यमानंदरूपं ।
भक्ताभीष्टप्रदनिखिलयोगिहृद्ध्यानगम्यं
मायातीतं सुरगणनुतं वेदवेदांतवेद्यं ॥ १ ॥

भूयो ऽपि केसरक्षेत्रमाहात्म्यं परमाद्भुतं ।
प्रवक्ष्यामि मुनिश्रेष्ठाः सर्वाभीष्टफलप्रदं ॥ २ ॥
स दृष्ट्वा बकुलक्षेत्रं तपते कृतनिश्चयः ।
बहुपुष्पफलोपेतं केसरद्रुमसन्निधौ ॥ ३ ॥
तत्रैत्य मुनिभिः सार्कं वुतजं(उ°) कारमुद्यतः(? कर्तुमु°)।
गृहीत्वा सितधारं च स्वधितिं मुनिपुंगवः ॥ ४ ॥
कुशाद्यं हर्तुकामो ऽसौ ययौ काननमुत्तमं ।
समित्कुशादिकं तत्र छित्त्वा छित्त्वा भुवस्थले ॥ ५ ॥
स्थापयामास स मुनिः स्वागते मुनिपुंगवैः ।
स्थापितुं तत्र तत्रैव भारं कृत्वा पृथक्पृथक् ॥ ६ ॥
कुशच्छेदनकाले तु मुनेस्तस्य महात्मनः ।
अभवत्तर्जनीछेदप्रमादो मुनिसत्तमाः ॥ ७ ॥
तदा मित्रतपा नाम मुनिः शिव शिवेति च ।
जपन्नेकाग्रचित्तस्तु शिवध्यानपरो ऽभवत् ॥ ८ ॥ °

It ends:

तदारभ्य तु तत्क्षेत्रे मुनयो ऽभीष्टलब्धकाः ।
इति निश्चित्य मनसा शिवपादार्चने रताः ॥ २० ॥

DR.RUPNATHJI( DR.RUPAK NATH )

दिने दिने सुधावाप्यां स्नात्वा लिंगार्चनं कृताः(!) ।
एतस्मिन्वकुलक्षेत्रे उवाच मुनिसत्तमाः ॥ २१ ॥
इदं रहस्यं परमं ये शृण्वंति जना भुवि ।
लभते कामिजाः(°कं) सद्यो प्राप्नुयात्परमां गतिं ॥ २२ ॥
इति सह्याद्युत्तरखंडे केसरक्षेत्रमाहात्म्ये तृतीयो ऽध्यायः ॥

The edition of the *Sahyādrikhaṇḍa* (and six *māhātmyas*) contains nothing corresponding to this tract. [MACKENZIE COLLECTION.]

## 3686.

**1803.** Foll. 29; size 14¾ in. by 6¼ in.; fair Devanāgarī writing of the latter part of last century; seventeen lines in a page.

*Harihareśvaramāhātmya* (or *Hariharamāhātmya*, as it is called in one of the colophons), a treatise, in 18 *adhyāyas*, inculcating devotion to *Vishṇu* and *Śiva*, in their combined form of *Harihara*, as originally communicated by *Vasishṭha* to *Dilīpa*, and professing to form part of the *Sahyādrikhaṇḍa* of the *Skanda-purāṇa*. It begins:

विद्याविज्ञानसानंदसरागमुखपंकजं ।
परं ब्रह्मगुणारामं शुद्धरामं समीमहि ॥ १ ॥
आनंदांकुरसद्भावसंभावितचराचरं ।
भक्तानंदभुवं वंदे देवीमाधां(?°द्यां) गिरं शिवां ॥ २ ॥
अनंतपारसंसारपारावारान् खलीलया ।
अजां वत्सपदां(?) चक्रे यस्तं वंदे गुरुं हरिं ॥ ३ ॥
निरालंबो मायानुभव इतरालोकनभिदा
समाभातानंतो मृगसलिलपूरोच्चय इव ।
यदानंदांभोदोदयविततशांतिर्द्वैतिगिरिस्
ततो ऽनंतप्रेमांबुकणवशतो ऽभूदनुदितः ॥ ४ ॥
तमीश्वरमुमाकांतमनुमादृरवैभवं ।
परमात्मानमानंदं शिवं वेदांतमीमहि ॥ ५ ॥
यो दृशो[1] ऽपि न दृक्पथे भुवि च सन्नप्यूर्ध्वमाभासते
नानाभूतिनिदानमेकमजयन् यः शैलरूपो ऽपि सन् ।
यत्सान्निध्यमवाप्य भुक्तिमगमन्प्रेता अपि व्याहता
स श्रीमुक्तियशःप्रदो हरिहरो देयादलं मंगलं ॥ ६ ॥
नमस्तस्मै चिदंभोधिलसत्कामद्रुमालये ।
कृतलीलाविलासाय नरसिंहाय योगिने ॥ ७ ॥
कल्याणवल्लिदानानां यत्कृपाभूत्तुपासतां(?°भूदुपासतां)।
तमुदारमुमाकांतमाधारं जगतां प्रभुं ॥ ८ ॥
सूत उवाच ॥
पुरा नैमिषसंवादे नैमिषे शौनकादयः ।
सूतं चित्रकथा दिव्याः पप्रच्छुरतुरंजनीः ॥ ९ ॥
ऋषय ऊचुः ॥
सूतानंतकथास्त्वत्तः श्रुताः पौराणिकाः प्रियाः ।
तासु नः श्रद्दधानानां माहात्म्यं वद चेद्दरं ॥ १० ॥
वाराणसी शिवक्षेत्रं द्वारका विष्णुवल्लभा ।
प्रयागं ब्रह्मणः क्षेत्रं भास्करस्य पदानि च ॥ ११ ॥
मायापीठानि सिद्धानां साधनानि बहून्यलं ।
श्रुतानि बहुशस्तेषु न योगः सर्वतः श्रुतः ॥ १२ ॥
इदानीं योगिनां सिद्धिः कामिनां सिद्धिदं वरं ।
पुरश्चरणसत्पीठमक्लेशं हृतपातकं ॥ १३ ॥
देवतानां च तीर्थानां सिद्धिदानां च सर्वशः ।
एकवासो भवेद्यत्र तत्क्षेत्रं वदतां वर ॥ १४ ॥

The great shrine of *Harihara* is situated on the west coast, near the mouth of the river Kṛishṇā (fol. 4*a*, l. 6):

पश्चिमांबुनिधेस्तीरे पश्चिमाभिमुखे स्थितः ।
नाम्ना हरिहरो देवो रूपद्वयसमाश्रितः ॥
एकं पर्वतरूपेण द्वितीयं लिंगरूपधृक् ।
सर्वकामप्रदो ऽनंतः सेवितः स सुरासुरैः ॥

Fol. 5*b*, l. 12:

सह्याद्रेस्तीर्थमुख्यानि श्रुतानि भवतो मया ॥
सावित्र्या उत्तरे तीरे कृष्णासागरसंगमे ।
पंचक्रोशेन विस्तीर्णं मुक्तिक्षेत्रं वसुंधरं ॥
तीर्थोत्तमं हरिहरं सिंधोस्तीरे उदीरितं ।
तस्योद्भवं समाचक्ष्व महिमानं च षण्मुख ॥

To this place it was that *Agastya*, the founder of this creed, emigrated with his wife *Lopāmudrā* from Kāśī to do honour to *Harihara* and institute the rules, expounded in the following chapters, by which his disciples should be guided. The Mayūrādri is likewise specified (foll. 16 and 17) as one of the places

[1] ? दृश्यो.



DR RUPNATHJI( DR RUPAKNATH )

where *Agastya* established the *liṅga* Harihareśvara. The saint *Dattātreya*—who is held in equal veneration amongst *Vaishṇavas* and *Śaivas*, and who, in the *Sahyādrikhaṇḍa* proper, plays a leading part in the counsels of *Paraśurāma* when the latter is preparing for revenge on *Kārtavīrya*—is mentioned in the first chapter in connection with *Rāma*.

Perhaps the treatise originated in the peculiar doctrines of some sect of *Śaiva Yogins* (cf. Wilson, Ess. on Hindu Rel., i., p. 205).

It ends:

द्यौर्मूर्धा यस्य देवस्य लोकपाला विभोर्भुजाः ।
चंद्रसूर्यानला नेत्रत्रयं श्रोत्रेषु वै दिशः ॥ ६३ ॥

वायुर्गंधवहः श्वासो हृदयं वियदीशितुः ।
पादौ रसा रोमकूपास्तारका पक्ष्मणी वयः ॥ ६४ ॥

इंद्रियाणि विभोर्देवा देह एतच्चराचरं ।
मुखमग्निः सरिन्नाथ उपस्थं यस्य मूदखु(?) ॥ ६५ ॥

तमजं देवदेवानामीश्वरं व्यापकं शिवं ।
अष्टधा शतधा पंच चतुर्विंशतिधा स्थितं ॥ ६६ ॥

पश्य सद्रूपं मम तु तदात्मा गौतमः पुरा ।
अकस्मात्पुरुषं दृष्ट्वा दृष्ट्वा हरिहरेश्वरं ॥ ६७ ॥

इति श्रीहरिहरेश्वरमाहात्म्ये स्कांदे सह्याद्रिखंडे अष्टादशो ऽध्यायः ॥ १८ ॥ ०

The edition of the *Sahyādrikhaṇḍa* does not contain this *Māhātmya*.

[MACKENZIE COLLECTION.]

## 3687.

**2838 b.** Foll. 19; folio, size 12½ in. by 7½ in.; European paper; small, but clear, Telugu handwriting; 34–36 lines in a page.

*Siṃhācala-māhātmya*, or *Nrisiṃhakshetra-māhātmya*, an account of a temple of *Vishṇu* on the Lion-mount near Vizagapatam, in 28 *adhyāyas*.

The first *adhyāya* runs as follows:

त्राहीति व्याहरंतं त्रिदशरिपुसुतं त्रातुकामो रहस्ये
विश्रस्थं[1] पीतवस्त्रं निजकटियुगले नव्यहस्तेन गृह्णन् ।
वेगश्रांतं नितांतं भगपतिममृतं पाययन्नन्यपाणौ
सिंहाद्रौ[2] शीघ्रपातक्षितिपिहितपदः पातु मां नारसिंहः ॥

ऋषय ऊचुः ॥

श्रुतं हि क्षेत्रमाहात्म्यं जगन्नाथस्य जैमिने ।
सर्वपापक्षयकरं त्वत्तो ऽस्माभिस्तु विस्तरात् ॥

तन्निवेदितमाहात्म्यं क्षेत्रमाहात्म्यमेव च ।
तस्योत्सवांश्च सकलानुपचारान्यथाक्रमं ॥

कृतार्था श्रोत्रवृत्तिर्नः कृता ब्रह्ममुने तथा ।
श्रोतव्यं नान्यदस्तीह भवान्नारणकारणं ॥

नृसिंहमंत्रराजेन जगन्नाथः समर्चितः ।
ब्रह्मणेति त्वया प्रोक्तमिंद्रद्युम्नकृते पुरा ॥

तद्वयं श्रोतुमिच्छामो नृसिंहस्य विशेषतः ।
माहात्म्यं तस्य विस्तार्य सर्वज्ञाद्भवतो ऽधुना ॥

नरसिंहः परब्रह्मेत्यस्माभिर्निश्चितं मुने ।
एतत्सर्वं महाभाग वक्तुमर्हसि नः स्फुटं ॥

ऋषीणां श्रद्दधानानां गुरुस्त्वं परमो मतः ॥

जैमिनिः ॥

स्थानानि नरसिंहस्य संत्यनेकानि भूतले ।
सुगुप्तानि च रम्याणि पर्वतेषु वनेषु च ॥

भूतानि च भविष्याणि भुक्तिमुक्तिप्रदानि वै ।
विविधान्यन्यरूपाणि संत्यद्भुततमानि च ।
तेषु मुख्यानि चत्वारि प्रथितानि विशेषतः ॥

अहोबलं हरंपापं कृतशौचं तथैव च ।
सिंहाचलं तथैतेषां चतुर्थं मुनिसत्तमाः ॥

अहोबले महाक्षेत्रे नृसिंहस्तंभसंभवः ।
विदार्य दैत्यं करजैर्हिरण्यकशिपुं स्थितः ॥

यत्र दारयते दैत्यं नृसिंहस्य दिवौकसः ।
अहो बलमिति प्राहुः कथ्यते तदहोबलं ॥
हरंपापे तथा क्षेत्रे बिडालनरकेसरी ।
आस्ते भैरवरूपेण कालमूपकसंहरः ॥

---

[1] Read विश्रब्धं.

[2] The word सिंह is throughout written with श, and the ह is apparently doubled after the *anusvāra*; though it has rather the appearance of शिंह्य (शिंह्याद्रि, शिंह्याचल, नृशिंह्य etc.).

DR.RUPNATHJI( DR.RUPAK NATH )

यत्र पापानि सर्वाणि ह्रियंते दृष्टिमात्रतः ।
तत्कथ्यते हरंपापं क्षेत्रं मुक्तिप्रदं द्विजाः ॥

कृतशौचे तथा क्षेत्रे शत्रुचक्रविहिंसकः ।
योगानंदमयो ह्यास्ते योगिनीचक्रसेवितः ॥

दैत्यासृग्व्याप्तवपुषो यत्र शौचं हरेर्मुदा ।
मूर्तिमद्भिः कृतं तीर्थं कृतशौचं तदुच्यते ॥

सिंहाकारो गिरिर्यत्र नृसिंहाधिष्ठितः स्थितः ।
भुक्तिमुक्तिप्रदं तद्धि क्षेत्रं सिंहाचलं स्मृतं ॥

यदा हिरण्यकशिपुं प्रह्लादं पंचवार्षिकं ।
पातयामास जलधौ दैत्यैः संत्यक्तसौहृदः ॥

तदा तद्रक्षणार्थं तु वैकुंठादागतः स्वयं ।
तत्र शांतस्वरूपेण ह्यास्ते नरहरिर्द्विजाः ॥

नृसिंहो येन रूपेण वर्तते पुरुषोत्तमे ।
तथा तेनैव रूपेण सिंहाद्रौ वसति ध्रुवं ॥

कुंदाभसुंदरतनुः परिपूर्णचंद्र-
बिंबानुकारिवदनो द्विभुजस्त्रिनेत्रः ।
शांतस्त्रिभंगिललितक्षितिगुप्तपादः
सिंहाचले जयति देववरो नृसिंहः ॥

ताक्ष्यान्यपीतवसनांचलदत्तहस्त-
युग्मोन्नतांसवलयीकृत –⏑–– ।
संस्तभ्यकर्णयुगलश्च सटाभिरामः
सिंहाचले जयति देववरो नृसिंहः ॥

It ends:

य एतच्छ्रावयेद्भक्त्या नृसिंहस्याग्रतो द्विजाः ।
नृसिंहक्षेत्रमाहात्म्यं सर्वपापैः प्रमुच्यते ॥

सांगेन वेदपाठेन यत्फलं लभते द्विजाः ।
पठन्नेतत्प्रयत्नेन शश्वदाप्नोति तत्फलं ॥

कृतशौचं हरंपापं सिंहाचलमहोबलं ।
गत्वा यत्फलमाप्नोति दृष्ट्वा तत्र नृकेसरिं ।
प्राप्नोति तत्फलं मर्त्यः सत्यं सत्यं ब्रवीमि वः ॥

नृसिंहोत्सवकालेषु दर्शनार्थं समागतान् ।
श्रावयेच्छ्रद्दधानाय तस्य शृण्वंतु यत्फलं ॥

तस्य ये पितरः पूर्वे ये च मातामहादयः ।
ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदं ॥

इति श्रीस्कंदपुराणे सिंहाचलमाहात्म्ये अष्टाविंशो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

## 3688.

**140.** Foll. 191; size 13¾ in. by 7 in.; fair, modern Devanāgarī writing; 21–33 lines in a page.

*Sūtasaṃhitā*, of the *Skandapurāṇa*, in four *khaṇḍas* (the last subdivided into two sections); with *Mādhavācārya's* commentary, entitled *Sūtasaṃhitā-tātparyadīpikā*. [A.] Now published in the *Ānandāśrama* Series.

I. *Śivamāhātmyakhaṇḍa* (foll. 29), in 13 *adhyāyas*, begins—after 11½ verses (सौम्यं महेश्वरं°) belonging to the third section:—

ऐश्वरं परमं तत्त्वमादिमध्यांतवर्जितं ।
आधारं सर्वलोकानामनाधारमविक्रियं ॥ १ ॥

अनंतानंदबोधांबुनिधिमद्भुतविक्रमं ।
अंबिकापतिमीशानमनीशं[1] प्रणमाम्यहं ॥ २ ॥

सत्रावसाने मुनयो विशुद्धहृदया भृशं ।
नैमिषीया महात्मानमागतं रोमहर्षणं ॥ ३ ॥

दृष्ट्वा यथार्हं संपूज्य प्रसन्नेंद्रियमानसाः ।
पप्रच्छुः संहितां पुण्यां सूतं पौराणिकं मुदा ॥ ४ ॥

एवं पृष्टो मुनिश्रेष्ठैः सूतः सर्वार्थदायिनं ।
महादेवं महात्मानं ध्यात्वा व्यासं च भक्तितः ॥ ५ ॥

समाहितमना भूत्वा विलोक्य मुनिसत्तमान् ।
वक्तुमारभते सूतसंहितां श्रुतिसत्तमां ॥ ६ ॥

सूत उवाच ॥

ब्राह्मं पुराणं प्रथमं द्वितीयं पाद्ममुच्यते ।
तृतीयं वैष्णवं प्रोक्तं चतुर्थं शैवमुच्यते ॥ ७ ॥

ततो भागवतं प्रोक्तं भविष्याख्यं ततः परं ।
सप्तमं नारदीयं च मार्कंडेयं तथाष्टमं ॥ ८ ॥

आग्नेयं नवमं पश्चाद् ब्रह्मवैवर्तमेव च ।
ततो लैंगं वाराहं च ततः स्कांदमनुत्तमं ॥ ९ ॥

वामनाख्यं ततः कौर्मं मात्स्यं तत्परमुच्यते ।
गारुडाख्यं ततः प्रोक्तं ब्रह्मांडं तत्परं विदुः ॥ १० ॥

---

[1] For verses 1 and 2 see above, p. 1224*a*, ll. 23 seqq., where the wrong reading अनिशं—comm. ईशानमनीशा-नमिति (!) संसारिणो हि अनीशितृत्वात्पुरुषांतरपरतंत्रत्वाच स्वयमनीशाना ईशवंतश्च ।



DR.RUPNATHJI( DR.RUPAK NATH )

ग्रंथतश्च चतुर्लक्षं पुराणं मुनिपुंगवाः ।
अष्टादशपुराणानां कर्ता सत्यवतीसुतः ॥ ११ ॥

कामिकादिप्रभेदानां यथा देवो महेश्वरः ।
अष्टादश पुराणानि श्रुत्वा सत्यवतीसुतात् ॥ १२ ॥

अन्यान्युपपुराणानि मुनिभिः कीर्तितानि तु ।
आद्यं सनत्कुमारेण प्रोक्तं वेदविदां वराः ॥ १३ ॥

द्वितीयं नारसिंहाख्यं तृतीयं नांदमेव च ।
चतुर्थं शिवधर्माख्यं दौर्वासं पंचमं विदुः ॥ १४ ॥

षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः ।
अष्टमं मानवं प्रोक्तं ततश्चोशनसेरितं ॥ १५ ॥

ततो ब्रह्मांडसंज्ञं तु वारुणाख्यं ततः परं ।
ततः कालीपुराणाख्यं विशिष्टं मुनिपुंगवाः ॥ १६ ॥

ततो वासिष्ठलिंगाख्यं प्रोक्तं माहेश्वरं परं ।
ततः सांबपुराणाख्यं ततः सौरं महाद्भुतं ॥ १७ ॥

पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परं ।
भार्गवाख्यं ततः प्रोक्तं सर्वधर्मार्थसाधकं ॥ १८ ॥

लक्षं तु ग्रंथसंख्याभिः सर्वविज्ञानसागरं ।
स्कांदमद्याभिवक्ष्यामि पुराणं श्रुतिसंमितं ॥ १९ ॥

षड्विधं संहिताभेदैः पंचाशत्खंडमंडितं ।
आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता ॥ २० ॥

तृतीया शांकरी विप्राश्चतुर्थी वैष्णवी मता ।
तत्परा संहिता ब्राह्मी सौरांत्या संहिता मता ॥ २१ ॥

ग्रंथतश्चैव षट्त्रिंशत्सहस्रेणोपलक्षिता ।
आद्या तु संहिता विप्रा द्वितीया षट्सहस्रिका ॥ २२ ॥

तृतीया ग्रंथतस्त्रिंशत्सहस्रेणोपलक्षिता ।
तुरीया संहिता पंचसहस्रेणाभिनिर्मिता ॥ २३ ॥

ततो ऽन्या त्रिसहस्रेण ग्रंथेनैव विनिर्मिता ।
अन्या सहस्रतः सृष्टा ग्रंथतः पंडितोत्तमाः ॥ २४ ॥

द्वितीयां संहितां वक्ष्ये सर्वपापप्रणाशिनीं ।
मुनिभिर्देवगंधर्वैः पूजितामतिशोभनां ॥ २५ ॥

चतुर्धा खंडिता सापि पवित्रा वेदसंमिता ।
शिवमाहात्म्यखंडाख्यः प्रथमः परिकीर्तितः ॥ २६ ॥

द्वितीयो ज्ञानयोगाख्यः सर्ववेदांतसंग्रहः ।
तृतीयो मुक्तिखंडाख्यश्चतुर्थो यज्ञवैभवः ॥ २७ ॥

आद्यः सप्तशतं प्रोक्तं ग्रंथतः पंडितोत्तमाः ।
द्वितीयो ग्रंथतः सप्तशतं त्रिंशत्ततो ऽधिकं ॥ २८ ॥

ततो ऽधिकं च सप्तैव मुनयः परिकीर्तितः ।
तृतीयं षट्शतं विप्राः सप्तत्रिंशद्विवर्जितः ॥ २९ ॥

चतुर्थस्तु मुनिश्रेष्ठाः सहस्राणां चतुष्टयं ।
उपर्यधोभागभेदाद् द्विधा भूतः स उच्यते ॥ ३० ॥

आद्यस्त्रयोदशाध्यायो द्वितीयो विंशतिस्तथा ।
तृतीयो नव विप्रेंद्राश्चतुर्थस्तु तथैव च ॥ ३१ ॥ ०

II. *Jñānayogakhaṇḍa* (foll. 24), in 20 *adhyāyas*, begins:

कैलासशिखरे रम्ये नानारत्नसमाकुले ।
नानापुष्पसमाकीर्णे नानामूलफलोदके ॥ १ ॥

नानावल्लीसमाकीर्णे नानामृगसमाकुले ।
नानावृक्षसमाकीर्णे नानायोगिसमावृते ॥ २ ॥ ० ३ ॥

नानापक्षिसमाकीर्णे नानागंधर्वसेविते ।
सुखासीनं सुप्रसन्नं सुनेत्रं सुस्मितं शुचिं ॥ ४ ॥ ० ८ ॥

स्वयं स्वमेव ध्यायंतं सूतं बुद्धिमतां वरं ।
विष्णुवृद्धो विशालाक्षो वत्सः कुंडिन आरुणिः॥९॥ ० १४॥

समागम्य समाधिस्थं दंडवत्प्रणिपत्य च ।
स्तोत्रैः स्तुत्वा महात्मानं पप्रच्छुः पंडितोत्तमाः ॥ १५ ॥

III. *Muktikhaṇḍa* (foll. 16), in 9 *adhyāyas*, begins:

सौम्यं महेश्वरं साक्षात्सत्यविज्ञानमद्वयं ।
वंदे संसाररोगस्य भेषजं परमं मुदा ॥ १ ॥

यस्य शक्तिरुमा देवी जगन्माता त्रयीमयी ।
तमहं शंकरं वंदे महामायानिवृत्तये ॥ २ ॥

यस्य विघ्नेश्वरः श्रीमान्पुत्रः स्कंदश्च वीर्यवान् ।
तं नमामि महादेवं सर्वदेवनमस्कृतं ॥ ३ ॥

यस्य प्रसादलेशस्य लेशलेशलवांशकं ।
लब्ध्वा मुक्तो भवेज्जंतुस्तं वंदे परमेश्वरं ॥ ४ ॥ ० ७ ॥

यं विशिष्टजनाः शांता वेदांतश्रवणादिना ।
जानंत्यात्मजनाः वंदे तमहं सत्यचित्सुखं ॥ ८ ॥

हरभक्तो हिरण्याक्षः शैवपूजापरायणः ।
अंबिकाचरणस्नेह ईश्वरांघ्रिपरायणः ॥ ९ ॥

क्रांतः क्लेशहरः क्लीव ईशपूजापरायणः ।
ओंकारवल्लभो लुब्धो लोलुपो लोललोचनः ॥ १० ॥

DR.RUPAKNATHJI( DR.RUPAK NATH)

महाप्राज्ञो महाधीमान्महाबाहुर्महोदरः ।
शक्तिमाञ्छक्तिदः शंकुः शंकुकर्णः शनैश्चरः ॥ ११ ॥
भगवान्भग्नपाशश्च भवो भवभयापहः ।
भगदर्पो भवप्रीतो भागज्ञो भंगुराशुभः ॥ १२ ॥
अग्निवर्णो जपावर्णो बंधूककुसुमच्छविः ।
विरक्तो विरजो विद्वान्वेदपारायणे रतः ॥ १३ ॥
समचित्तः समग्रीवः समलोष्टाश्मकांचनः ।
शाकाशी फलमूलाशी शत्रुमित्रविवर्जितः ॥ १४ ॥
कालरूपः कलामाली कालतत्त्वविशारदः ।
अडिमांडो[1] मुनिश्रेष्ठः सोमनाथप्रियः सुधीः ॥ १५ ॥ ०

*Sūta*, meeting the *Ṛishis*, instructs them on the subject of '*mukti.*'

IV. *Yajñavaibhavakhaṇḍa* :—

A. *Adhobhāga* (foll. 78), in 47 *adhyāyas* :

एवमाद्यंतनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं सांबं संसारविषभेषजं ॥ १ ॥
सत्रावसाने संनद्धाः सर्ववेदार्थवेदिनः ।
सर्वलोकहिते युक्ताः सारासारविवेकिनः ॥ २ ॥ ० ९ ॥
श्रौतस्मार्तसदाचाराः सर्वगोत्रर्षयो वराः ।
व्यासप्रसादसंपन्नं विश्वज्ञानमहोदधिं ॥ १० ॥
विश्वात्मवेदिनं साक्षाद्विध्वस्तभवकाननं ।
स्तुत्वा भक्त्या महात्मानं तुष्टुवुः सूतमुत्तमं ॥ ११ ॥
एतस्मिन्नंतरे श्रीमान्महाकारुणिकोत्तमः ।
सर्वज्ञः सर्वभूतानामभीष्टफलदः प्रभुः ॥ १२ ॥
प्रादुरासीन्महातेजा रात्रौ सूर्य इव स्वयं ।
तं दृष्ट्वा मुनयः सर्वे विस्मिता गद्गदस्वराः ॥ १३ ॥ ०

B. *Uparibhāga* (foll. 45), consisting of (*a*) *Brahmagītā Upanishadaḥ* (*Brahmavidyā*), in 12 *adhyāyas*; and (*b*) *Sūtagītā Upanishadaḥ*, in 8 *adhyāyas*, begins :

मुनय ऊचुः ॥
भवता सर्वमाख्यातं संक्षेपाद्विस्तरादपि ।
इदानीं श्रोतुमिच्छामो ब्रह्मगीतामनुत्तमां ॥ १ ॥
सर्वविज्ञानरत्नानामाकरस्य महात्मनः ।
कृष्णद्वैपायनस्यैव भवाब्धिभ्यः सुशिक्षितः ॥ २ ॥

[1] अग्निमंडो B; ? r. अणीमांडो.

It ends :

पुराणसंहितामिमामतिप्रियेण यः पुमान् ।
शृणोति संसृतिं पुनर्न याति याति शंकरं ॥ ८७ ॥
परा तु भूतिरद्वया विज्ञायते च तस्य सा ।
शिवा च वाचि नृत्यति प्रियेण शंकरोऽपि च ॥ ८८ ॥
सत्यबोधसुखपूर्णलक्षणं तत्समर्थविभवं सनातनं ।
भात्स्वरूपमशुभापहं शिवं भक्तिगम्यममलं सदा नुमः ॥ ८९ ॥
या तु भूतिरमला सदोदिता वेदमानिरता शुभावहा ।
तामतीव सुखदामहं शिवां केशवादिजनसेवितां नुमः ॥ ९० ॥
वेदपद्मनिकरस्य भास्करं देवदेवसदृशं घृणानिधिं ।
व्यासमिष्टफलदं गुरुं नुमः शोकमोहविषवेगभेषजं ॥ ९१ ॥
ये वेदवेदांतपरा महाजनाः
शिवाभिषेकनिरस्तकिल्बिषाः ।
नमामि वाचा शिरसा हृदा च तान्
भवाहिवेगस्य निकारकानहं ॥ ९२ ॥

इति श्रीसूतसंहितायां यज्ञवैभवखंड उपरिभागे स्कंदपुराणे सूतगीतायामष्टमो ऽध्यायः ॥

---

*Mādhavācārya's* commentary begins :

प्रणमामि परं ब्रह्म यतो व्यावृत्तवृत्तयः ।
अविचारसहं वस्तु विषयीकुर्वते धियः ॥ १ ॥
श्रीमत्काशीविलासाख्यक्रियाशक्तीशसेविता ।
श्रीमत्त्र्यंबकपादाब्जसेवानिष्णातचेतसा ॥ २ ॥
वेदशास्त्रप्रतिष्ठात्रा श्रीमन्माधवमंत्रिणा ।
तात्पर्यदीपिका सूतसंहितायां विधीयते ॥ ३ ॥

On fol. 4*a*, the commentator gives the following analysis of the work (figures being substituted for his word-numbers):—

I., 1. ग्रंथावतारः; 2. पाशुपतव्रतं; 3. नंदीश्वरविष्णुसंवादेन ईश्वरप्रतिपादनं; 4. ईश्वरपूजाविधानं पूजाफलं च; 5. शक्तिपूजाविधिः; 6. शिवभक्तपूजा; 7. मुक्तिसाधनं; 8. कालपरिमाणतदनवच्छिन्नस्वरूपकथनं; 9. पृथिव्युद्धरणं; 10. ब्रह्मणा सृष्टिकथनं; 11. हिरण्यगर्भादिविशेषसृष्टिः; 12. जातिनिर्णयः; 13. तीर्थमाहात्म्यं ॥

II., 1. ज्ञानयोगसंप्रदायपरंपरा; 2. आत्मना सृष्टिः; 3. ब्रह्मचर्याश्रयविधिः; 4. गृहस्थाश्रमविधिः; 5. वानप्रस्थाश्रमविधिः; 6. संन्यासविधिः; 7. प्रायश्चित्तं; 8. दानधर्मफलं; 9. पापकर्मफलं; 10. पिंडोत्पत्तिः; 11. नाडीचक्रं; 12.

DR.RUPNATHJI( DR.RUPAK NATH )

नाडीशुद्धिः ; 13. अष्टांगयोगे यमविधिः ; 14. नियमविधिः ; 15. आसनविधानं ; 16. प्राणायामविधिः ; 17. प्रत्याहारविधानं ; 18. धारणाविधिः ; 19. ध्यानविधिः ; 20. समाधिः ॥

III., 1. मुक्तिमुक्त्युपायमोचकप्रदचतुर्विधप्रश्नः ; 2. मुक्तिभेदकथनं ; 3. मुक्त्युपायकथनं ; 4. मोचककथनं ; 5. मोचकप्रदकथनं ; 6. ज्ञानानुत्पत्तिकथनं ; 7. गुरूपसदनशुश्रूषणमहिमा ; 8. व्याघ्रपुरे देवानामुपदेशः ; 9. ईश्वरनृत्यदर्शनं ॥

IV.*a*, 1. वेदार्थप्रश्नः ; 2. परापरवेदार्थविचारः ; 3. कर्मयज्ञवैभवं ; 4. वाचिकयज्ञः ; 5. प्रणवविचारः ; 6. गायत्रीप्रपंचः ; 7. आत्ममंत्रः ; 8. षडक्षरविचारः ; 9. ध्यानयज्ञः ; 10. ज्ञानयज्ञः ; 11–15. ज्ञानयज्ञविशेषाः ; 16. ज्ञानोत्पत्तिकारणं ; 17. वैराग्यविचारः ; 18. अनित्यवस्तुविचारः ; 19. नित्यवस्तुविचारः ; 20. विशिष्टधर्मविचारः ; 21. मुक्तिसाधनविचारः ; 22. मार्गप्रामाण्यं ; 23. शंकरप्रसादः ; 24, 25. प्रसादवैभवं ; 26. शिवभक्तिविचारः ; 27. परपदस्वरूपविचारः ; 28. शिवलिंगस्वरूपकथनं ; 29. शिवस्थानविचारः ; 30. भस्मधारणवैभवं ; 31. शिवप्रीतिकरं जीवब्रह्मैक्यविज्ञानं ; 32. भक्त्यभावकारणं ; 33. परतत्त्वनामविचारः ; 34. महादेवप्रसादकारणं ; 35. संप्रदायपरंपराविचारः ; 36. सद्योमुक्तिकरक्षेत्रमहिमा ; 37. मुक्त्युपायविचारः ; 38. मुक्तिसाधनविचारः ; 39. वेदानामविरोधः ; 40. सर्वसिद्धिकरकर्मविचारः ; 41. पातकविचारः ; 42. प्रायश्चित्तविचारः ; 43. पापशुद्ध्युपायः ; 44. द्रव्यशुद्ध्युपायः ; 45. अभक्ष्यनिवृत्तिः ; 46. मृत्युसूचकं ; 47. अवशिष्टपापस्वरूपकथनं ॥

IV.*b*, 1. ब्रह्मगीता ; 2. वेदार्थविचारः ; 3. साक्षिशिवस्वरूपकथनं ; 4. साक्ष्यस्तित्वकथनं ; 5. आदेशकथनं ; 6. दहरोपासनं ; 7. वस्तुस्वरूपविचारः ; 8. तत्त्ववेदनविधिः ; 9. आनंदस्वरूपकथनं ; 10. आत्मनो ब्रह्मतत्त्वप्रतिपादनं ; 11. ब्रह्मणः सर्वशरीरस्थितिः ; 12. शिवस्य अहंप्रत्ययाश्रयत्वं ; 13. सूतगीता ; 14. आत्मना सृष्टिः ; 15. सामान्यसृष्टिः ; 16. विशेषसृष्टिः ; 17. आत्मस्वरूपकथनं ; 18. सर्वशास्त्रार्थसंग्रहः ; 19. रहस्यविचारः ; 20. सर्ववेदांतसंग्रहः । इति सामान्येनाध्यायार्थाः कथिताः ॥

Colophon of commentary: इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे सूतगीतासूपनिषत्सु अष्टमोऽध्यायः ॥ समाप्तेयं सूतसंहिता ॥

[H. T. Colebrooke.]

## 3689.

**644 b-d.** Foll. 32+54+56; size 13 in. by 6½ in.; careless, modern Devanāgarī writing; 7–14 lines in a page.

*Sūtasaṃhitā*, with *Mādhavācārya's* commentary. *Khaṇḍas* I.–III., bound in the reverse order: *Muktikhaṇḍa*, *Jñānayogakhaṇḍa*, and *Śivamāhātmyakhaṇḍa*. [B.]

Every now and then the accompanying commentary has been omitted through the carelessness of the copyist. At the beginning of the *Muktikhaṇḍa*, the first 11½ *ślokas* are omitted, the beginning of the commentary on *Khaṇḍa* I. being given instead. In this respect there would seem to be some kind of connection between this and the preceding MS.

[H. T. Colebrooke.]

## 3690.

**716.** Foll. 30; size 14 in. by 6½ in.; indifferent Devanāgarī writing of 1749 A.D.; 19–23 lines in a page.

*Sūtasaṃhitā*, with *Mādhavācārya's* commentary. *Khaṇḍa* I., or *Śivamāhātmyakhaṇḍa*.

The MS., which is pretty correct, was written at Benares, in Saṃvat 1806, for *Jagannātha Bhaṭṭa*.

[H. T. Colebrooke.]

## 3691, 3692.

**58, 59.** Foll. 241 (counted 240, two leaves being numbered 83); size 10¼ in. by 4 in.; fairly good Devanāgarī writing of 1618 A.D.; 11–14 lines in a page.

*Setumāhātmya*, of the *Skandapurāṇa*, in 52 *adhyāyas*; treating of the sacred places of Setubandha or Rāmasetu (Adam's Bridge), also called Rāmeśvara after one of its islands, and principal shrines.

DR.RUPNATHJI( DR.RUPAK NATH )

It begins :

नैमिषारण्यनिलया मुनयः शौनकादयः ।
अष्टांगयोगनिरतास्तत्त्वज्ञानैकतत्पराः ॥ १ ॥
मुमुक्षवो महात्मानो निर्ममा ब्रह्मवादिनः ।
धर्मज्ञाना अनसूयाः सत्यव्रतपरायणाः ॥ २ ॥
जितेंद्रिया जितक्रोधाः सर्वजीवदयालवः ।
भक्त्या परमया विष्णुमर्चयंतः सनातनं ॥ ३ ॥
तपस्तेपुर्महात्मानो नैमिषे मुक्तिदायिनि ।
एकदा ते महात्मानः समाजं चक्रुरुत्तमं ॥ ४ ॥
कथयंतो महापुण्यां कथां पापप्रणाशिनीं ।
भुक्तिमुक्त्युपायांश्च जिज्ञासंतः परस्परं ॥ ५ ॥
षड्विंशतिसहस्राणामृषीणां भावितात्मनां ।
तेषां शिष्यप्रशिष्याणां संख्या कर्तुं न शक्यते ॥ ६ ॥
अत्रांतरे महाविद्वान् व्यासशिष्यो महामुनिः ।
अगमन्नैमिषारण्यं सूतः पौराणिकोत्तमः ॥ ७ ॥
तमागतं मुनिश्रेष्ठं ज्वलंतमिव पावकं ।
अर्घ्याद्यैः पूजयामासुर्मुनयः शौनकादयः ॥ ८ ॥
सुखोपविष्टं तं सूतमासने परमे शुभे ।
पप्रच्छ परमं गुह्यं लोकानुग्रहकांक्षया ॥ ९ ॥

ऋषयः ॥

सूत धर्मादितत्त्वज्ञ स्वागतं मुनिपुंगव ।
श्रुतवांस्त्वं पुराणानि व्यासात्सत्यवतीसुतात् ॥ १० ॥
अतः सर्वपुराणानामर्थज्ञो ऽसि महामुने ।
कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ॥ ११ ॥
कथं वा लिप्स्यते मुक्तिर्जीवानां भवसागरात् ।
कथं हरे हरौ वापि नृणां भक्तिः प्रजायते ॥ १२ ॥
केन सिध्येत तपसः कर्मणस्त्रिविधं फलं ।
एतच्चान्यच्च नः सर्वं सूत त्वं कृपया वद ।
ब्रूयुः स्निग्धाय शिष्याय गुरवो गुह्यमप्युत ॥ १३ ॥
इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः ।
वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादिमं ॥ १४ ॥

श्रीसूतः ॥

सम्यक्पृष्टमिदं विप्रा युष्माभिर्जगतो हितं ।
रहस्यमेतद्युष्माकं वक्ष्यामि शृणुतादरात् ॥ १५ ॥
मया नोक्तमितः पूर्वं कस्यापि मुनिपुंगवाः ।
मनो नियम्य विप्रेंद्राः शृणुध्वं भक्तिपूर्वकं ॥ १६ ॥
अस्ति रामेश्वरं नाम रामसेतौ पवित्रके ।
क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमं ॥ १७ ॥

The rest of the first chapter is devoted to the praise of this wonderful place in general terms. In the second *adhyāya*, the story of *Rāma* bridging the ocean with the help of the monkey *Nala* is related, concluding with an enumeration of the principal *tīrthas* on the island :

चतुर्विंशतितीर्थानि संति विप्राः प्रधानतः ।
प्रथमं चक्रतीर्थं स्याद्वेतालवरदं तथा ॥ १०४ ॥
ततः पापविनाशाख्यं तीर्थं लोकेषु विश्रुतं ।
ततः सीतासरः पुण्यं ततो मंगलतीर्थकं ॥ १०५ ॥
ततः सकलपापघ्नी नाम्ना चामृतकूपिका ।
ब्रह्मकुंडं ततस्तीर्थं ततः कुंडं हनूमतः ॥ १०६ ॥
आगस्त्यं हि ततस्तीर्थं रामतीर्थं ततः परं ।
ततो लक्ष्मणतीर्थं स्याज्जयतीर्थमतः परं ॥ १०७ ॥
ततो लक्ष्म्याः परं तीर्थं अग्नितीर्थमतः परं ।
चक्रतीर्थमतः पुण्यं शिवतीर्थमतः परं ॥ १०८ ॥
ततः शंखाभिधं तीर्थं यमुना(?) च ततः परं ।
गंगातीर्थं ततः पश्चात् गयातीर्थमनंतरं ॥ १०९ ॥
ततः स्यात्कोटितीर्थाख्यं ततः साध्यामृतं तथा ।
मानसाख्यं ततस्तीर्थं धनुःकोटिमतः परं ॥ ११० ॥
प्रधानतीर्थान्येतानि महापापहराणि च ।
कथितानि द्विजाः श्रेष्ठाः सेतुमध्ये गतानि वै ॥ १११ ॥

The detailed description of these places and the legends connected therewith form the subject of the subsequent chapters. Vol. II. commences with v. 3 of chapter 27.

It ends :

ततो व्यासः सपूतः सन् शिष्यैः सह समन्वितः ।
अनुज्ञाप्य मुनीन्सर्वान् कैलासं पर्वतं ययौ ॥ २६१ ॥
ऋषयो नैमिषारण्यनिलयास्तुष्टमानसाः ।
प्रत्यहं सेतुमाहात्म्यं शृण्वंति च पठंति च ॥ २६२ ॥
तथा सर्वेषु लोकेषु श्रोतव्यं च सदा बुधैः ॥

इति श्रीस्कांदेपुराणे सेतुमाहात्म्ये सेतुवर्णनकथनं नाम द्विपंचाशत्तमो ऽध्यायः ॥ ५२ ॥ इति सेतुमाहात्म्यं संपूर्णं ॥ ० ॥ स्वस्ति श्रीमन्नृपशालिवाहन शके १५५० आनंदनामसंवत्सरे भाद्रपदवदिचतुर्थी रवौ उभयसागरयोर्मध्ये गंधमादनपर्वते भास्करक्षेत्रे श्रीरामेश्वरदेवसन्निधौ उपासनी(०सीन) श्रीरघुनाथभट्टेन लिखितमिदं सेतुमाहात्म्यं ॥

DR.RUPNATHJI( DR.RUPAK NATH )

The praise of the *Gandhamādana* mountain (यो ऽम्भोधौ सेतुरूपेण वर्तते गन्धमादनः ।) forms the subject of the 10th *adhyāya*. The local origin of the work indicated by the description of the places, taken in connection with the origin of the MS. itself, and the great care with which it is written, might make one inclined to think that the work was perhaps composed by *Raghunātha* himself. [H. T. COLEBROOKE.]

## 3693.

**382 c.** Foll. 18; folio, size 16¼ in. by 10¾ in.; European paper; good Devanāgarī writing; 25–28 lines in a page.

*Saurasaṃhitā*, of the *Skandapurāṇa*, in 16 *adhyāyas*, claiming to have been originally revealed by the Sun (*Sūra*) to *Yājñavālkya*.

The work consists chiefly of cosmogonic theories, and speculations on the origin and the cure of evil, and on the nature and attributes of the Absolute as represented by *Śiva* (or *Sadāśiva*), the fountain-head of all true knowledge, and therefore the chief object of human worship; whilst the Sun, however, also comes in for a certain amount of adoration.

It begins:

ओं नमो ऽहंपदार्थाय परंतास्वरूपिणे[1] ।
भास्कराय नमस्तस्य (°स्मै) भवाय भयहारिणे ॥ १ ॥
नमः सांबाय सर्वाय सर्वविज्ञानदायिने ।
स्वशक्तिरचितेदंताहंतारूपाय साक्षिणे ॥ २ ॥
समस्तजगदुत्पत्तिस्थितिनाशैकहेतवे ।
रुद्रविष्णुविरिंचादिस्वरूपाय नमो नमः ॥ ३ ॥
प्रणम्य सांबमीशानं सर्वदेवनमस्कृतं ।
पुराणं संप्रवक्ष्यामि जगतामभिवृद्धये ॥ ४ ॥
सत्रांते सूतमद्वैतं जटावल्कलसंयुतं ।
त्रिपुंड्रावलिभिर्दीप्तं भस्मोद्धूलितविग्रहं ॥ ५ ॥
सर्वशास्त्रार्थतत्त्वज्ञं सर्वभूतहिते रतं ।
व्यासशिष्यं विशेषेण महाभक्तं शिवस्य तु ॥ ६ ॥

[1] तत्पदार्थस्वरूपिणे Rāj. M.

स्वयमेवागतं शंभोः प्रसादादेव केवलं ।
तेजसा भासयन्सर्वं चेतनाचेतनात्मकं ॥ ७ ॥
वालखिल्या महात्मानो महाशक्तिसमास्थिताः ।
पुराणसंहितां पुण्यां पप्रच्छुः पुण्यगौरवात् ॥ ८ ॥
भवता भगवान् व्यासः सर्वज्ञः करुणानिधिः ।
पुराणविद्यासिद्ध्यर्थं पुरा सम्यगुपासितः ॥ ९ ॥
तेन पौराणिकी विद्या व्यासेनामिततेजसा ।
उपदिष्टा तयास्माकं (? तवा°) वक्तुं तामर्हसि प्रभो ॥ १० ॥
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ।
वक्तुमारभते विद्यां नमस्कृत्य पिनाकिनं ॥ ११ ॥
सूत उवाच ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
भविष्यं नारदीयं च मार्कंडेयसमाह्वयं ॥ १२ ॥
आग्नेयं ब्रह्मवैवर्तं लैंगं वाराहमेव च ।
स्कांदं च वामनं चैव कौर्मं मात्स्यं च गारुडं ॥ १३ ॥
ब्रह्मांडं चेति पुण्यो ऽयं पुराणानामनुक्रमः ।
अन्यान्युपपुराणानि कथितानि महर्षिभिः ॥ १४ ॥ ° १५ ॥
आद्यं सनत्कुमारोक्तं नारसिंहं ततः परं ।
तृतीयं स्कांदमुद्दिष्टं कुमारेण तु भाषितं ॥ १६ ॥
चतुर्थं शिवधर्माख्यं पुराणं नंदिनेरितं ।
ततो दुर्वाससंप्रोक्तं नारदीयं ततः परं ॥ १७ ॥
कापिलं मानवं चैव तथैवोशनसेरितं ।
ब्रह्मांडं च ततः पुण्यं वारुणाख्यं ततः परं ॥ १८ ॥
ततः कालीपुराणाख्यं कालकंठं च नामतः ।
ततो वासिष्ठलिंगाख्यं नाम्ना माहेश्वरं त्विति ॥ १९ ॥
ततः शांबपुराणाख्यं सुसूक्ष्ममिति चेरितं ।
ततः सौरपुराणाख्यं सावित्रमिति चेरितं ॥ २० ॥
पाराशर्यं च मारीचं भार्गवं मुनिपुंगवाः ।
सर्वाण्युपपुराणानि शिवज्ञानकराणि वै ॥ २१ ॥
स्कांदमद्याभिवक्ष्यामि लक्षग्रंथविनिर्मितं ।
षड्विधं संहिताभेदैः पंचाशत्खंडमंडितं ॥ २२ ॥
संहितानां बुधास्तासु या सा सौरसमाह्वया ।
तामहं संप्रवक्ष्यामि संहितामतिशोभनां ॥ २३ ॥
पुरा सूरसमाख्येन कथिता भानुना यतः ।
याज्ञवल्क्याय तेनैव संहिता सौरसंहिता ॥ २४ ॥
सौरसंज्ञा तु सा त्वत्र ग्रंथतस्तु सहस्रतः ।
निर्मिता सर्वविज्ञानसागरा पावनी परा ॥ २५ ॥ °

DR.RUPNATH(DR.RUPAK NATH)

It ends:

भवंतो ऽपि महादेवप्रसादात्सौरसंहिता ।
श्रुतवंतस्त्वहो भाग्यं भवता मन्मुखांबुजात् ॥ ९२ ॥
संहिता पोडशाध्यायैर्निर्मिता सौरसंहिता ।
महाकारुणिकेनैव व्यासेनामिततेजसा ॥ ९३ ॥
यः पठेच्छृणुयाद्वापि श्रद्धया सौरसंहितां ।
यथावत्तस्य वेदार्थः प्रतिभाति न संशयः ॥ ९४ ॥
बलेन महता तुल्यो ब्रह्मणा ब्रह्मवर्चसा ।
धरण्या क्षमया तुल्यः प्रभावेन शिवेन तु ॥ ९५ ॥
विद्यया मत्समः साक्षात्तेजसा भास्करोपमः ।
श्रिया धनदतुल्यः स्यान्न हि संशयकारणं ॥ ९६ ॥
इत्युक्त्वा भगवान्सूतः सर्वज्ञः सांबमीश्वरं ।
ध्यात्वा परमया भक्त्या पपात विवशो भृशं ॥ ९७ ॥
वालखिल्या महात्मानं व्यासशिष्यं कृपाकरं ।
यथार्हं पूजयामासुः सूतं सुमनसादरात् ॥ ९८ ॥
इति श्रीस्कांदे महापुराणे सौरसंहितायां पोडशो ऽध्यायः ॥

Cf. Rāj. Mitra, Notices, v., p. 48, where the work is assigned to the *Kāśīkhaṇḍa* of the *Skandapurāṇa*. [H. T. Colebrooke.]

## 3694, 3695.

**82, 83.** Foll. 446 (counted 445; nos. 104 & 153 being used twice, and no. 363 being passed over); size 12½ in. by 6 in.; clear Devanāgarī writing of 1796 A.D.; twelve lines in a page.

*Himavatkhaṇḍa*, a section of the *Skandapurāṇa*, in 185 *adhyāyas* [A]; treating principally of the sacred places in the Himālaya country, and the various *liṅgas* connected therewith.

It begins:

यस्यात्मा हिमशैलजा गणपतिः सूर्यो हि विष्णुर्हरः
पंचास्यैः सुविभूषितः पशुपतिस्तेषां च पंचात्मकैः ।
त्रैलोक्यं सचराचरं त्रिगुणजं पंचात्मभिः संदधे
यो ऽजस्रं हि रसादिभिश्च भगवांस्तस्मै नमः शंभवे ॥ १ ॥
ऋषय ऊचुः ॥
मुनीश्वर प्रसादात्ते श्रुतं मेरोः प्रशंसनं ।
भूयश्च श्रोतुमिच्छामो माहात्म्यं हिमवद्गिरेः ॥ २ ॥
तत्र तपः कृतानां यद्(? कृतं न्यायाद्) देवानां च विशेपतः ।
माहात्म्यं तत्र तीर्थानां शृण्वतां वद नो विभो ॥ ३ ॥
लोमहर्ष उवाच ॥
शृणुध्वं विप्रशार्दूला यद्वृत्तांतं पुराभवत् ।
तयोर्मिथो हि संवादमगस्त्यस्कंदयोर्गिरौ ॥ ४ ॥
माहात्म्यं चैव तीर्थानां हरात्मजं महाविभुं ।
पप्रच्छ खलु सेनानीं कुलशैले घटोद्भवः ॥ ५ ॥
अगस्त्य उवाच ॥
प्रदिष्टं भवता यद्यच्छ्रुतं देवीशयोर्मुखात् ।
भवान्सर्वज्ञ एवार्य सर्वज्ञात्मोद्भवो यतः ॥ ६ ॥
पीत्वा तव मुखांभोजान्निःसृतं वाङ्मयामृतं ।
न तृप्यामि तथा स्कंद घर्मार्तः सलिलं यथा ॥ ७ ॥
प्रमाणं च सुमेरोर्हि तच्छृंगाणां प्रशंसनं ।
अधिष्ठानानि देवानां त्वत्प्रसादाच्छ्रुतं मया ॥ ८ ॥
भूधराणां यथोत्पत्तिं तीर्थानां तेषु जन्मनां (जन्मिनां B) ।
हिमालयस्य माहात्म्यं वद मे शंकरप्रिय ॥ ९ ॥
स्कंद उवाच ॥
ईश्वरेणैव मे प्रोक्तं मणिमये शिलोच्चये ।
तत्सर्वं ते प्रवक्ष्यामि समासेन घटोद्भव ॥ १० ॥ °

We subjoin an index to the chapters, supplemented by the abstract of the work in the 'Index indicatorius' in MS. 366 (no. 3138):—

1. *pushkaraprādurbhavaḥ* (story of the *Asuras* *Madhu* and *Kaiṭabha*); 2. *medinyuddharaṇam*; 3. *saptadvīpasamudravarṇanam*; 4. *lokasargaḥ*; 5. *pātālavarṇanam*; 6. *saptalokavarṇanam*; 7. *meruhimālayayor vivāhārthaṃ pitṛikanyāyācanārthaṃ hemakūṭe nāradagamanam*; 8.–10. *himācalamāhātmyaṁ*; 11. *bhasmarudrākshamāhātmyam*; 12. *śakrotpattiḥ*; 13. *agnyutpattiḥ*; 14. *yamotpattiḥ*; 15. *nirṛititapasyā*; 16. *varuṇatapasyā*; 17. *vāyutapasyā*; 18. *vāyo rājyaprāptiḥ*; 19. *kuveratapasyārājyaprāptiḥ*; 20. *rudratapasyā*; 21. *dikpatitvaprāptiḥ*; 22. *dhruvalokavarṇanam*; 23. *daityāhvānam*; 24, 25. *devānāṃ yuddhodyogaḥ*; 26–29. *devāsurasaṃgrāmaḥ*; 30. *devānāṃ parājayaḥ*; 31. *varāheṇa hiraṇyākshayuddham*; 32. *sundaraśailamāhātmyam*; 33. *kāmākhyāmāhātmyam*;



DR.RUPNATHJI( DR.RUPAK NATH )

34, 35. *varāhamāhātmyam*; 36. *umātapasyāsiddhiḥ*; 37–39. *gaurīdvādaśamāsavratam*; 40. *kauśikodbhavāyā vratadānādi*; 41. *kauśikīmāhātmye śumbhaniryāṇam*; 42. *śumbhavadhaḥ*; 43. *kauśikīmāhātmyam*; 44. *umāvrate gaṇḍakīmāhātmyam*; 45–48. *nīlakaṇṭhamāhātmyam*; 49. *yaśodhārāmāhātmye** *tripurāsuravadhaḥ*; 50. *hiraṇyakaśipuvadhaḥ*; 51. *viśvāmitratapaḥsiddhiḥ*; 52. *saptāpsarogaṇasiddhiḥ*; 53. *devāsuraniryāṇam*; 54. *tārakavadhaḥ*; 55. *kṛishṇaprabhāmāhātmyam*; 56. *muktikshetrotpattiḥ*; 57. *vadarikāśramamāhātmyam*; 58, 59. *pārvatīvivāhārthaṃ vishṇupreshitanāradagamanam*; 60. *pārvatīvivāhaḥ*; 61. *baleḥ pātālapraveśanam*; 62. *alakanandā-bhāgīrathīsaṃgame devaprayāgaḥ, kāmaprayāgaḥ, brahmaprayāgaḥ, vishṇuprayāgaḥ*; 63. *durvāsaḥśāpaḥ*; 64. *budhāvatāraḥ*; 65. *jātismaratīrthaṃ daityānāṃ pātālasthitiḥ*; 66. *brahmatīrthamāhātmyam*; 67. *liṅgatīrthamāhātmyam*; 68. *dharmatīrthamāhātmyam*; 69, 70. *nepālamāhātmyam*; 71. *paśupatikshetram*; 72. *paśupatipurī*; 73. *nepālamāhātmyam*. Vol. II.: 74. *paśupatimāhātmye liṅgotpattiḥ*; 75. *jyotirliṅgotpattiḥ*; 76. *īśvarastutivākyam*; 77. *paśupatisthāvaraliṅgotpattiḥ*; 78. *nandīśvarapradānam*; 79. *śleshmātakavarapradānam*; 80. *paśurūpaśivakrīḍanam*; 81, 82. *śleshmātakavanadarśanam*; 83. *hariṇeśvaramāhātmyam*; 84. *rāvaṇatapaḥsiddhiḥ*; 85. *dakshiṇagokarṇeśvaraḥ, nepālagokarṇeśvaraḥ*; 86. *vāgmatīsambhavaḥ*; 87. *śaṅkhamūlamāhātmyam*; 88. *vāgmatītīrthamāhātmyam*; 89, 90. *virūpākshatīrtham*; 91. *kaphīśvaratīrtham*; 92. *kaśyapeśvaramāhātmyam*; 94. *ugratīrtham*; 95. *dhaneśvaramāhātmyam*; 96. *pushpatīrthavikaṭeśvaramāhātmyam*; 97. *śacītīrtham*; 98. *bhāleśvaragandharvatīrthayor māhātmyam*; 99. *gupteśvaratīrtham*; 100. *nīleśvaratīrtham*; 101. *campakeśvara-sarasvatīkuṇḍatīrthayor māhātmyam*; 102. *rāmeśvaratīrtham*; 103. *kāleśvaratīrtham*; 105. *udārakeśvaratīrtham*; 106. *gopālavyāghratīrthayor māhātmyam*; 107. *brahmatīrtham*; 108. *suvarṇatīrtham*; 109. *nandītīrtha-nandikeśvarayor māhātmyam*; 110. *gavāṃ tīrtham, gokhureśvaramāhātmyam*; 111. *bhadratīrtham, paṇḍukeśvaramāhātmyam*; 112. *gālavatīrtham, kūṭeśvaramāhātmyam*; 113. *asitatīrtham, asiteśvaramāhātmyam*; 114. *bhairaveśvaramāhātmyam*; 115. *brahmatīrtham, brahmeśvaramāhātmyam*; 116. *skandatīrtham, skandeśvaramāhātmyam*; 117. *pushpavṛishṭiparvate nṛisiṃhatīrtham, śatarudramāhātmyam*; 118. *kākeśvaratīrtham*; 119. *maṇicūḍeśvaramāhātmyam*; 120. *yogagaṅgā, yogeśvaramāhātmyam*; 121. *nārāyaṇeśvarahradaḥ*; 122. *yogatīrtham, jyotirliṅgam*; 123. *ratnacūḍeśvaraḥ*; 124. *vīranadī, vāgīśvaraḥ*; 125, 126. *kīleśvaraḥ*; 127. *vīrabhadratīrtham, vālmīkeśvaraḥ*; 128. *rudratīrtham, maṅgaleśvaraḥ*; 129. *vimalodakagaṅgā, vimaleśvaraḥ*; 130. *anantaliṅgam*; 131. *vṛiddhagaṅgā*; 132. *somaliṅgam*; 133. *gośṛiṅgatīrtham, gobharāṭeśvaraḥ* (!); 134. *bhṛiṅgeśvaraḥ*; 135. *triliṅgeśvaraḥ*; 136. *kupiteśvaraḥ*; 137. *sarveśvaraḥ*; 138. *rudratīrtham, golakeśvaraḥ*; 139. *mīnatīrtham, mātṛitīrtham*; 140. *bhasmatīrtham, candanabharāṭeśvaraḥ*; 141. *pakshatīrtham, paksheśvaraḥ*; 142. *piṇḍārakatīrtham, caṇḍikeśvaraḥ*; 143. *dharmeśvaraḥ*; 144. *paitāmahatīrtham, gokarṇeśvaraḥ*; 145, 146. *hanumattīrtham, rudradhārātīrtham, pātālagaṅgā, koṭīśvaraḥ*; 147. *vāṇeśvaraḥ*; 148. *mayūratīrtham, jñāneśvaraḥ*; 149. *kūpatīrtham, parvateśvaraḥ*; 150. *jaleśvaraḥ*; 151. *gupteśvarī*; 152. *mṛigasthalī*; 153, 154. *kirāteśvaraḥ*; 155. *bhasmagaṅgākuṇḍam*; 156. *bhuvaneśvaraḥ*; 157. *rudrāgāreśvaraḥ*; 158. *vāsukīvaradānam*; 159. *paśupatisiddheśvaraḥ*; 160, 161. *vāgmatītīrtham* (cf. no. 3697); 162,

* The Yaśodhārā (thus A, B throughout), near which *Tripura* is slain, is a river flowing together with the Dharmadhārā.

DR.RUPNATHJI( DR.RUPAK NATH )

163. *vaiśālādhipasatyavatīpraveśanam ;* 164. *dharmadattasya śivalokagamanam ;* 165. *mṛigopākhyānam ;* 166. *vajravarapradānam ;* 167. *pradyumnottare indradamanavijayaḥ ;* 168. *setubandhanam ;* 169. *umāvarapradānam ;* 170. *pradyumnatīrtham ;* 171. *pradyumnanāradasamāgamaḥ ;* 172. *daityamohaḥ ;* 173. *prabhāvatīharaṇam ;* 174. *indradamananāradavākyam ;* 175. *prabhāvatīkaustubhaharaṇam ;* 176. *vāgmatīvarapradānam ;* 177. *śaṅkhāsuravadhaḥ ;* 178. *dānāsuravadhaḥ ;* 179, 180. *śakratāpasainyavadhaḥ ;* 181. *kacchapāsuravadhaḥ ;* 182. *kṛishṇatīrthayātrā ;* 183. *suprabhāpraveśanam ;* 184. *śakraprasthāpanam ;* 185. *nepālamāhātmye pradyumnottare yādavapratyāgamanam.*

It ends:

यः शृणोति नरश्रेष्ठः प्रद्युम्नविजयं शुचिः ।
श्रद्दधानः सदा भक्त्या सर्वैनोभिः प्रमुच्यते ॥
यः पुनः परया भक्त्या विद्यां संपूज्य चार्हणैः ।
शृणोति श्रद्दधानो वै तस्य पुण्यफलं शृणु ॥
जांबूनदमये याने परिवारैः समं बुधः ।
आस्थाय प्रमथैः सम्यगाद्रियाणो पुनः पुनः ॥
रुद्रकन्याकरोद्धूतैश्चामरैर्व्यंजयन् (°र्वीजितो B) मुदा ।
नीयते गगने नैशं वाद्यगीतैर्विनोदयन् (°दितः B) ॥
माहात्म्यं वै वरहिमगिरेः किं ब्रुमश्चाद्भुतं तद्
यच्छृंगेषु प्रसभमनिशं संति देवाः प्रसिद्धाः (ससिद्धाः B)।
जामातेशो वसति मुनयो यस्य पुत्री च गौरी
सद्याप्यार्या[:] क्षणमपि पृथक्ते न मुंचंति शृंगं ॥

इति श्रीस्कांदे हिमवत्खंडे नेपालमाहात्म्ये प्रद्युम्नोत्तरे यादवप्रत्यागमनं नाम पंचाशीत्युत्तरशततमो ऽध्यायः ॥ १८५ ॥ समाप्तो ऽयं खंडः ॥ [H. T. COLEBROOKE.]

## 3696.

**2547.** Foll. 372 (counted 371, two leaves being numbered 278); size 13¾ in. by 7¼ in.; fair, modern Devanāgarī writing; 13 or 14 lines in a page.

*Himavatkhaṇḍa*, of the *Skandapurāṇa*, in 185 *adhyāyas*. [B.] [MACKENZIE COLLECTION.]

## 3697.

**2935.** Foll. 13; size 11 in. by 5¼ in.; modern Devanāgarī writing (Nepalese paper); twelve lines in a page.

*Vāgvatītīrthayātrāprakāśa*, a treatise on the sacred places along the river Vāgvatī or Vāgmatī (Vāṅmatī), by *Gaurīdatta Paṇḍita*, son of *Rāmabhadra*.

The subject is treated in two chapters, corresponding to *adhyāyas* 160 and 161 of the *Himavatkhaṇḍa* of the *Skandapurāṇa*, to which it forms a kind of commentary.

It begins:

गौरीशं प्रणम्यादौ हिमवत्खण्डसंमतः ।
श्रीवाग्वतीतीर्थयात्राप्रकाशः क्रियते मया ॥ १ ॥
श्रीवाग्वतीं तां मनसा स्मरामि
विचित्ररूपां शिववक्त्रसंभवाम् ।
उच्चाद्रिकूटादवनीमुपागतां
स्वच्छांबुकल्लोलवहां पुनः पुनः ॥ २ ॥

अथ हिमवत्खण्डानुसारेण वाग्वतीतीर्थयात्रा ॥ तत्प्रमाणम् ॥ सेतुभिन्नाद्ब्रह्मसरस्वतीं यावत् ॥ विरूपाक्ष उवाच ॥

भगवञ्छ्रोतुमिच्छामि भूयो ऽहं भवतो ध्रुवम् ।
वाग्वत्याः संगमस्थानमित्युक्तं भवताधुना ॥
कं तीर्थं च समारभ्य स्नातव्यं केषु केषु च ।
एतद् ब्रूहि मुनिश्रेष्ठ सर्ववार्ताविशारद ॥

सिद्धर्षिरुवाच ॥

सेतुभिन्नं महातीर्थमारभ्य स्नायतां द्विज ।
श्रीवाग्मत्युद्भवा (°वो) यत्र ततः कामं लभिष्यसि ॥

इति सिद्धर्षिर्विरूपाक्षं प्रति सेतुभिन्नाद्वाग्वतीसंभवं यावत् ॥

सेतुभिन्नं समारभ्य विरूपाक्षो घटोद्भव ।
वाङ्मतीसंभवा[द्] यावद्भक्त्या स्नात्वा हि तेषु च ॥

इत्यगस्त्यं प्रति स्कन्दवचनाच्च । श्लेष्मान्तकवनस्य मुक्तिक्षेत्रत्वकथने चतुर्दशयोजनात्मकत्वं शिवपुराणादिप्रतिपादितं लिंगयात्रात्मकं क्षेत्रप्रमाणम् । अत्रोक्तं तु तीर्थप्रमाणमिति ॥ तत्र प्रथमं सेतुभिन्नतीर्थे स्नानम् । तत्रेतिकर्तव्यता ब्राह्मणवरणपूर्वकेन ॥

प्रातःकृत्यं समुत्तीर्य यथाविभवविस्तरैः ।
प्रसन्नमानसो भूत्वा तीर्थस्नानोत्सुको भवेत् ॥



DR.RUPNATHJI( DR.RUPAK NATH )

उपस्करं समादाय गृहात्प्रनिःसृतो (॰प्रणिः॰) बहिः ।
स्नातुं गच्छामि वाग्वत्यां कृत्वेति मनसा व्रजेत् ॥
आर्यातीर्थे जलाप्लावं कर्तुं गच्छामि सांप्रतं ।
वाचोक्त्वा मनसा चिंत्य गृहाद्बहिः पथि व्रजेत् ॥ इति ॥

आर्यातीर्थेत्युपलक्षणं मुख्यत्वात्तदुपादानं । अथ वाग्वतीदर्शनमंत्रः । ओं

नमस्ते वाग्वति देवि सर्वदुष्कृतनाशिनि ।
अद्य मे धूनितं पापं दर्शनात्ते चिरार्जितम् ॥ इति ॥
प्रणम्य गौरवात्तीर्थं शिखां बद्धा यथाविधि ।
कुशोदकं समादाय संकल्पेत हि वाक्यतः ॥
तिङ्सुबन्तयुतं वाक्यमात्मनेपदि युज्यते ।
मध्ये कामं च हेतुं च तिथ्यादिं (॰दि) वाक्यमुच्चरेत् ॥
मासं पक्षं तथा वारं तिथिं नक्षत्रमेव च ।
योगं नाम स्वगोत्रं च अद्यादिः काम एव च ॥
अद्यामुष्मिन्यथामासे यथापक्षे दिने तिथौ ।
नक्षत्रे च यथायोगे स्वस्मिंस्तीर्थे ततः परम् ।
वदेत्स्नानमहं कुर्वे साधारणमतं मुने ॥

इति साधारणसंकल्पान्ते । ॰

I. After 1. Setubhinnatīrtham (ending fol. 3a), the following bathing-places (mostly dedicated to Śiva in one form or another) are dealt with: 2. Durgākuṇḍatīrtham, fol 3a; 3. Gopālatīrtham (near Śikharapura); 4. Dāmodaratīrtham; 5. Sarvaushadhirasatīrtham (where the water flowing from the Karkoṭakahrada joins the river); 6. Gaṇeśatīrtham, fol. 3b; 7. Anantatīrtham; 8. Cakratīrtham (to *Pradyumneśvara*); 9. Bhṛigupātatīrtham (to *Muktīśvara*); 10. Pramodatīrtham (to *Rāmeśvara*); 11. Kāyanirmalatīrtham (to *Nirmaleśvara*), fol. 4a; 12. Śakratīrtham; 13. Pañcanadatīrtham (to *Pañcaliṅgeśvara;* at the confluence of Vāgvatī and Vishṇumatī); 14. Kālatīrtham (to *Yameśvara Śiva;* near Kāntipura, *i.e.* Kāṭhmāṇḍu), fol. 4b; 15. Mṛityuṃjayatīrtham (to *Sarveśvara Śiva;* near Kumbheśvarasthāna); 16. Sahodaravadhamocanatīrtham (to *Jñāneśvara;* at the confluence of Bhadramatī and V.); 17. Śaṅkhamūlatīrtham, or Uttaraprayāga (to *Kumbheśvara;* at the confluence of Maṇimatī and V.), fol. 5a; 18. Amarāvatītīrtham (to *Śakreśvara*); 19. Vimalāvatītīrtham; 20. Nirmalāvatītīrtham, fol. 5b; 21. Vāyuvatītīrtham (to *Kūṭeśvara*); 22. Yogakuṇḍatīrtham (to *Yogeśvara Śiva*); 23. Maṇitīrtham (to *Maṇicūḍeśvara*); 24. Prayāgatīrtham (to *Bāṇeśvara*); 25. Pīṭhikātīrtham (to *Icchāvalokeśvara*), fol. 6a; 26. Trivikramatīrtham (to *Vāmaneśvara*); 27. Svarṇatīrtham (to *Suvarṇeśvara;* at the confluence of Svarṇanadī and V.); 28. Brahmatīrtham (to *Śmaśāneśvara*); 29. Kshatriyatīrtham (to *Khaḍgeśvara*); 30. Rājeśvarītīrtham; 31. Umāpatitīrtham (west of the *liṅga* of that name); 32. Vishṇutīrtham (to *Vaishṇaveśvara Śiva*), fol. 6b; 33. Jayamaṅgalātīrtham (to *Maṅgaleśvara*); 34. Ākāśabhairavatīrtham; 35. Śrīvatsalātīrtham; 36. Koshodakatīrtham (to *Kosheśvara Śiva*); 37. Saubhāgyadaṃ tīrtham (to *Saubhāgyeśvara*); 38. Kuveratīrtham, fol. 7a; 39. Gaurītīrtham (near a *Gaurīmūrti*).

Colophon: इति श्रीवाग्वतीतीर्थयात्राप्रकाशे षष्ठ्युत्तरशततमाध्यायोक्ततीर्थप्रकाशः प्रथमः ॥ १ ॥

II. अथैकषष्ट्युत्तरशततमाध्यायोक्तानि महोदकमहीतीर्थादीनि । तत्र मृगेश्वरस्य पूर्वभागे मृगोदकतीर्थम् । मृगेश्वरो देवः ॥ नेमुनिरुवाच । ने इत्येकाक्षरमत्रिपुत्रस्य सिद्धर्षेर्नाम । अत एव नया(?) नेनाम्ना मुनिना पालितो नेपाल इति देशनाम ।

मृगोदके महातीर्थे कार्त्तिकस्याष्टमीतिथौ ।
स्नायते विधिवद्भक्त्या मुच्यते पशुजन्मभिः ॥
कृष्णाष्टम्यां ततस्तस्यां रुद्रात्मा स्नायते यदि ।
यो व्याप्य कार्त्तिकं मासं तस्य पुण्यफलं शृणु ॥ ॰

40. Mṛigodakatīrtham; 41. Kharvarikātīrtham (to *Jyotirīśvara Mahādeva;* east of Āryātīrtha, where there are two *liṅgas*), fol. 7b; 42. Śrīmad-Āryātīrtham (*mahāpuṇyam; tad eva triveṇīsaṃgamaṃ nāma tīrtham*); 43. Nārāyaṇatīrtham, fol. 8a; 44. Pāvanikātīrtham (to *Siddheśvara*); 45. Agastyatīrtham (east of an *Agastyamūrti, paścimaparvatamadhye*); 46.

DR.RUPNATHJI( DR.RUPAK NATH )

Nīlakaṇṭhatīrtham, fol. 8*b*; 47. Vāsukitīrtham (to *Nāgeśvara*); 48. Gomukhatīrtham (to *Gopatīśvara Śiva*); 49. Bhṛigupatanatīrtham (*uccaśilādhastāt*; to *Rudrāgāreśvara*); 50. Devaghāṭatīrtham (to *Trailokyeśvara*); 51. Brahmasahasratīrtham (east of Brahmaśilā); 52. Vishṇusahasratīrtham (*antaragirimadhye*), fol. 9*a*; 53. Rudrasahasratīrtham (to *Deveśvara Śiva; pūrve vṛishabhaḥ paścime liṅgas tanmadhye*); 54. Sūryabhāgātīrtham (to *Arkeśvara Śiva*; east of river, west of *sūryacandra-pratime*); 55. Candrabhāgātīrtham (to *Someśvara Śiva*); 56. Manaḥkāmanātīrtham, fol. 9*b*; 57. Jihvālolatīrtham (to *Parvateśvara*); 58. Anantatīrtham, or Gaurītīrtham (to *Kirāṭeśvara*); 59. Bālaśmaśānatīrtham (*bālaśmaśānāgatanadīsaṃgame*; to *Bāleśvara*); 60. Bhairavatīrtham (near Bhairavakuṇḍa); 61. Jaleśvaratīrtham (to *Jaleśvara Śiva*); 62. Vināyakatīrtham, fol. 10*a*; 63. Paśugaṇatīrtham (to *Ekapādeśvara Śiva*; *mṛigasthalīpūrvabhāgāgatanadīsaṃgame*); 64. Śleshmāntakatīrtham (to *Sarveśvara*); 65. Tāmracūḍatīrtham (to *Tāmreśvara*); 66. Uttaravāhinītīrtham (to *Hareśvara*); 67. Cailagaṅgātīrtham; 68. Hatyāmocanatīrtham (to *Kīleśvara; gokarṇavanadakshiṇabhāgāgatanadīsaṃgame*), fol. 10*b*; 69. Kailāsatīrtham; 70. Himavattīrtham (to *Himeśvara*); 71. Vishṇupadatīrtham; 72. Bhṛigupātatīrtham (to *Cakreśvara; girikandare*), fol. 11*a*; 73. Candratīrtham; 74. Sūryatīrtham (to *Ādityeśvara*); 75. Gokarṇeśvaratīrtham; 76. Uttaragayātīrtham; 77. Gadādharatīrtham; 78. Pitāmahatīrtham; 79. Candrabhāgātīrtham (to *Candreśvara*; at confluence of C. and V.), fol. 11*b*; 80. Nāradatīrtham (at confluence of Sūryabhāgā and V.); 81. Saptarshitīrtham (to *Ṛishīśvara Śiva*); 82. Kapotagiritīrtham (to *Khecareśvara*); 38. Kāntibhairavatīrtham (*uttaravāhinyām*); 84. Śvetavārāhatīrtham (to *Vārāheśa; parvatopatyakāyām*); 85. Bhairavakuṇḍatīrtham (*vāgvatīpātād adhastād atisthūlaśilāntare*); 86. Vāgmatīpatanatīrtham (to *Śṛigāleśvara*); 87. Sundarikātīrtham (to *Sundarīśvara*), fol. 12*a*; 88. Vimalāmbutīrtham; 89. Kāmadhenutīrtham; 90. Apsarogaṇatīrtham (to *Gandharveśvara*); 91. Agastyatīrtham (*svacchāmbuvāhinī-vāgvatī-saṃgame*); 92. Brahmasarasvatītīrtham, fol. 12*b*. To these, treated of in the *Himavatkhaṇḍa*, are added (as the effects of the pilgrimage): 93. *Maṇicūḍaparvate yogakuṇḍe mantrasnānādi*; 94. *Yogadhārātīrthe snānam*; 95. *Tāriṇīpūjādi*; 96. *Nemunipūjā*; 97. *Garuḍanārāyaṇadarśanam*; 98. *Guhyeśīdarśanam*; 99. *Śrīmat-Paśupatidarśanam.*

It ends:

श्रीमत्कौशिकवंशजः सुकृतवाञ्छ्रीरामभद्रः पिता
माता श्रीजनकात्मजा च तनयं प्रासूत दत्ताभिधम् ।
तेन श्रीकविनायकेन रचितस्तीर्थप्रकाशो मया
तत्रागाच्चरमः प्रकाश इह यः स्कंदोक्तवाक्यात्मकः॥१००॥

इति श्रीगौरीदत्तपण्डितसंगृहीतवाग्वतीतीर्थयात्राप्रकाशः पूर्णः ॥

[B. H. HODGSON.]

3698.

**2682.** Foll. 252; size 9 in. by 4⅝ in.; fair, modern Devanāgarī writing, on coarse country paper; 11 or 12 lines in a page.

*Hemakūṭakhaṇḍa*, in 52 *adhyāyas*, containing descriptions of, and legends connected with, the Hemakūṭa mountain on the river Tuṅgabhadrā, a locality sacred to *Virūpāksha Śiva*; and professing to form the '*madhyamabhāga*' of the *Bharadvājasaṃhitā*, which, in the colophons, claims to form part of (or to be) an '*ādimahāpurāṇa*.'

Wilson, Mack. Coll., i., 77 (2nd ed., p. 138), calls it *Pampāmāhātmya*, forming part of the *Hemakūṭakhaṇḍa* of the *Skandapurāṇa*. Though *Skanda* is, indeed, one of the principal inter-

DR RUPNATHJI( DR RUPAK NATH )

locutors in the work, there is no allusion in this MS. to any connection with the *Skanda-purāṇa*; and the *Bharadvājasaṃhitā* of which it forms a part may possibly be a local *Purāṇa*, if, indeed, it is not the work of that title mentioned as one of the divisions of the *Pāñcarātrāgama*.

It begins (somewhat corrected): ऋषय ऊचुः ॥

सूत सूत महाप्राज्ञ स्वात्मज्ञानवतां वर ।
त्वद्वाक्यामृतनिष्यंदैः सर्वे संजीविता वयं ॥ १ ॥
नानाविधानि देवस्य विरूपाक्षस्य शृखतां ।
चरितानि त्वदुक्तानि चरितार्थो मतिर्हि नः ॥ २ ॥
संत्यन्ये ऽपि महाप्राज्ञ संतः सप्तर्षयो मताः ।
महादेवं विरूपाक्षं दृष्टवंतो हि ईदृशाः ॥ ३ ॥
तेषां योगस्तपस्तेषां तेषां यागादिकाः क्रियाः ।
ये तु शृखंतु(°ति) ते वाक्यं शिवमाहात्म्यसिद्धिदं ॥ ४ ॥
सुधानिष्पं(!) सुराणां हि सारात्साररतरं तव ।
सूक्तं श्रुत्वा वयं सूत स्वात्मानंदमयाः स्थिताः ॥५॥ °६॥
यदुक्तं लग्नमस्माकमनायासेन तन्मनः ।
ते सत्यमुनयः पश्चात्किमकुर्वत तद्वद ॥ ९ ॥
सूत उवाच ॥
साधु साधु मुनिश्रेष्ठाः गरिष्ठः प्रश्न एष वः ।
वाक्यं शृणुत सर्वेषां कल्याणफलदां कथां ॥ १० ॥
एकचित्ता यदि वरं श्रोतारः श्रुतिसंमताः ।
वक्तुः सफलतां याति वाणी तैः सत्यशोभिनी ॥ ११ ॥
सनत्कुमार एवार्थमिदमर्थविदां वरः ।
पप्रच्छ स्कंदमानम्य परं कौतूहलान्वितः ॥ १२ ॥
सनत्कुमार उवाच ॥
स्कंद तत्त्वार्थसद्भाव प्रभावपरमोदय ।
भगवन्भव्यचित्तानां दिव्याश्चर्यप्रकाशिकं ॥ १३ ॥
सप्तर्षिध्याननिर्व्यूढं विरूपाक्षस्य वैभवं ।
देवस्य तत्तदाकर्ण्य मम प्रोल्लसितं मनः ॥ १४ ॥
उपर्येपि च किं वृत्तं तेषामासीन्महात्मनां ।
साध्वी ते बुद्धिरुत्पन्ना भूयस्त्वदनुबंधिनी ॥ १५ ॥
स्कंद उवाच * ॥
सनत्कुमार वक्ष्यामि शृणु सर्वोत्तराशय ॥ १६ ॥

एवं हिमवतः प्रांते क्षेत्रे भद्रशिलाह्वये ।
सप्तर्षयो महाभागाः श्रद्धाभक्तिसमन्विताः ॥ १७ ॥
एवं प्रत्यक्षितात्मेशाः सर्वे संयमिनां वराः ।
आत्मानुरूपैः संकल्पैरासन्तुत जिताशयाः ॥ १८ ॥ ° २० ॥
स्नात्वा भद्रशिलातीर्थे सर्वे ते प्रयताशयाः ।
सद्यो दृष्टं समातप्यं यतिभिर्ध्येयमीश्वरं(?) ॥ २१ ॥
कृतध्यानाः कृतजपाः कृतस्तोत्रा हुताग्नयः ।
भरद्वाजं पुरस्कृत्य प्रापुर्भद्रशिलां तु ते ॥ २२ ॥
नमो भद्रशिले तुभ्यं त्वत्प्रसादादमी वयं ।
आभ्यामेव हि चक्षुर्भ्यां दृष्टवंतो महेश्वरं ॥ २३ ॥ °

The geographical position of the Hemakūṭa is thus defined (fol. 31*a*, *adhy*. 9, v. 22 seqq.):

एष किष्किंधनामा हि दृश्यते धरणीधरः ।
अस्यैव हृदयस्तेयान्[1] हेमकूटो महाद्रिराट् ॥
मध्ये किष्किंधशैलस्य महतो ऽस्य महानयं ।
दृश्यते हेमकूटो यः परितः पंचयोजनः ॥
अत्र द्वाराणि चत्वारि मुख्यान्याहुर्मनीषिणः ।
उपद्वाराणि चत्वारि येषु सिध्यंति सत्क्रियाः ॥

The four gates (each furnished with a *liṅga* after which they are called) lie in the direction of the four quarters from the sacred *Brahma-kuṇḍa*:—the Eastern one, called Kinnareśvara, guarded by the elephant-faced *Bhairava Ghar-gharin* (*asitāṅga*, fol. 34*a*), is said to belong to the Kinnaras;—the Southern one, called Jāmba-vateśvara (from *Jāmbavat*, son of *Brahman*, who there praised *Śiva* on his first visit), guarded by the club-armed *Bhairava Caṇḍa* (fol. 35*b*), to the Siddhas, who there worship *Vighneśa* (*Gaṇeśa*) as '*Vīra*';—the Western one, on the Somagiri, called Someśvara, guarded by the *Bhairava Unmatta*, and sacred to *Soma*, where the devout adherents, on *Vaiśākha* full-moon, bathe in the Somakuṇḍa (or Somatīrtha) and worship *Someśa*;—the Northern one, called Maṇibhadreśvara, guarded by the *Bhairava*

* The MS. has these two words after the next half-*śloka*; and, from v. 9 onwards, it has the numbers at the end of the preceding half-verse.

[1] ? *r*. हृदयस्थेयान्.

DR.RUPNATHJI( DR.RUPAK NATH )

*Bhīshaṇa* (enveloped in a blue coat of mail, *kañcuka*), assigned to the *Yakshas* (*Guhyakas*), *Gandharvas, Vidyādharas*, and *Munis*. The four minor gates (beginning from S.E.) are called resp.: Draupadī-kshetram, sacred to *Devī Mahāmāyā*; Śaṅkareśvara, sacred to *Kālī-vyāghravāhinī*; Mahākāleśvara, sacred to *Mahākālī*; and Devaghāteśvara, sacred to *Mahābhairavī Durgā*; and are guarded by the *Bhairavas Ruru, Krodha, Kapālin*, and *Saṃhāra* respectively.

For a general view of the contents we subjoin the indications given in the colophons: 1. *saptarshibhir hemakūṭadarśanam*; 2. *kshetrapraveśaḥ*; 3. *devamaṇḍapapraveśaḥ*; 4. *saptarshibhir virūpākshapūjāvarṇanam*; 5. *saptarshistavanam*; [6, 7. the seven *Rishis* (*Bharadvāja, Jamadagni, Viśvāmitra, Atri, Gautama, Kaśyapa, Vasishṭha*) obtain *Śiva's* favour, and settle near the lake Paumpā (Pampā, fol. 25*b*)—named after *Paumpāmbā Devī*, fol. 147*b* seqq.—to worship the *liṅga*; 8. *Vishṇuvṛiddha*, of the race of *Bharadvāja*, calls on the latter to relate the story of the *Hemakūṭa-kshetra* and the *māhātmya* of *Virūpāksha*, and is supported by the other *Rishis*—here (foll. 28*a*, 29*a*) enumerated as *Jamadagni, Kaśyapa, Bhṛigu, Gautama* (*Atri*, fol. 29*a*), *Kauśika, Vasishṭha*;] 9. [Beginning of description of Hemakūṭakshetra, with its gates, on entering through the eastern one of which, *Śiva* was praised by the Kinnaras] *kinnareśvarastavaḥ*; 10. [The eastern gate is by *Śiva's* favour assigned to the Kinnaras, who worship the *Kinnaraśilā* near it;] 11. [Description of southern gate] *jāmbavatīśvaramahimavarṇanam*; 12. *somagirikathanam*; 13. *uttaradvārapraśaṃsāyām bṛihaspatidevatāsambhāshaṇam*; 14. *vidyādharāgnivivādaḥ*; 15. *māṇibhadreśvaramāhātmyadevatāvarapraśaṃsā*; 16. [Beginning of description of the four lesser gates] *āgneyanairṛityopadvārapraśaṃsā*; 17. *vāyavyaiśānopadvārapraśaṃsā*; 18. *śivāditīrthapraśaṃsā*; 19. *shaṇmukhatīrthakathanam*; 20. *avāntaratīrthakathanam*; 21. *nīleśvarādiyoganṛisiṃhaparyantadevakathanam*; 22. *mahākālādiśaktitrayapadanyāsakathanam*; 23. *skandamāhātmyakathanam*; 24. *śvetāśvatthakathanam*; 25. *somanātham ārabhya rāmatīrthaparyantaṃ devatākathanam*; 26. *śaṅkhatīrthaprabhṛitisikatāvighneśvarāntaṃ tīrthadevatākathanam*; 27. *brahmeśvarādimataṅgāśramakathanam*; 28. *mataṅgāvatārakathanam*; 29. *kāmadāhaḥ*; 30. *vibhūtimāhātmyam*; 31, 32. *rāmopākhyānam*; 33. *dundubhivadhaḥ*; 34. *bālipaumpākathanam*; 35. *vatsaramāsapakshapūjā*; 36–50. *hariścandropākhyānam*; 51. *pāpavināśanāśvamedhatīrthavarṇanam*; 52. *brahmatīrthādināgatīrthaparyantapraśaṃsā*.

The copyist of this MS., as those of many others of the Mackenzie Collection, was evidently not very familiar with the Devanāgarī orthography. Certain peculiarities, such as that of writing '*yeka*' for '*eka*,' and the interchange of media and tenuis, make it probable that he was of Telugu origin.

It ends:

एतानि तीर्थानि तथोदितानि
सरिद्वराकूलविभावितानि ।
संक्षिप्तमात्रेण विशुद्धबुद्धे
माहात्म्यमेतेषु सरामहीयः(? सरोम०) ॥ ३८ ॥

इत्यादिमहापुराणे भरद्वाजसंहितायां हेमकूटखंडे मध्यमभागे ब्रह्मतीर्थादिनागतीर्थपर्यंतप्रशंसं नाम द्विपंचाशो ऽध्यायः ॥ ५२ ॥ श्रीपौंपाविरूपाक्षेश्वरार्पणमस्तु ॥

This dedication has apparently caused the work to be called *Paumpāmāhātmya*, as inscribed on the first page both in Devanāgarī and in English (*Pumpa Mahateyem*), and subsequently repeated in Wilson's Mack. Coll.

[MACKENZIE COLLECTION.]

DR RUPNATHJI( DR RUPAK NATH )

*b. Miscellaneous Paurāṇik Tracts.*

3699.

**2551.** Foll. 56; size 12¾ in. by 6½ in.; fairly well written in Devanāgarī; twelve lines in a page.

*Indraprastha-māhātmya*, in 18 *adhyāyas*; a legendary account of Indraprastha and its surroundings;—(also called, or) forming part of the *Saubharisaṃhitā*, being narrated to *Yudhishṭhira* by the sage *Saubhari*.

It begins: अथ निगमबोधमाहात्म्यं (with इंद्रप्रस्थ written over) लिख्यते ॥

श्रीसूत उवाच ॥

धर्मपुत्रो धर्मकथां शुश्रूषुः सौभरेः शुभां ।
शौनकाश्रममभ्येत्य नत्वा तमिति पृष्टवान् ॥

युधिष्ठिर उवाच ॥

ब्रह्मन् मार्त्तंडतनयातीरतीर्थेषु यच्छुभं ।
तीर्थं तद्वद वैकुंठजन्मभूमिपरात्परं ॥

सौभरिरुवाच ॥

एकदा तु मुनिश्रेष्ठौ दिवि नारदपर्वतौ ।
गच्छंतौ खांडववनं पश्यतः स्म मनोहरं ॥
तत्रावतीर्णौ नभस उपविष्टौ तटे शुभे ।
कालिंद्याः क्षणविश्रांतौ स्नातुं विविशतुर्जले ॥
शिविरौशीनरो राजा मृगयां तौ चरन्वने ।
दृष्ट्वा तन्निर्गमापेक्षी न्यषसाद सरित्तटे ॥
तौ मुनी विधिवत्स्नात्वा परिधायांबराणि च ।
वंदितौ शिरसा राज्ञा तेनोपविशता तटे ॥
तत्रालोक्य सुवर्णस्य शिविर्यूपान् सहस्रशः ।
नारदं गर्वरहितं पर्वतं च जगाद सः ॥

शिविरुवाच ॥

कथ्यतां मुनिशार्दूलौ कस्येमा यागदृष्टयः ।
केनात्र विहिता यज्ञाः सुरेणाथ नरेण वा ॥
मुक्त्वा काश्यादितीर्थानि यज्ञैरीजे ऽत्र कः पुमान् ।
को विशेषो ऽत्र तीर्थेभ्यस्तेभ्यो विज्ञानसन्निधिं ॥ ०

I. *Indrayajñavidhānam* ends fol. 3; II. *Kirātasiṃhavaikunṭhaprāptiḥ*, fol. 7; III., fol. 10; IV., fol. 12; V. *Dilīpacaritam*, fol. 14*b*; VI. *Vaiśya(sya) vaikunṭhārohaṇam*, fol. 19; VII., fol. 20*b*; VIII. *Dvārikāvarṇanam*, fol. 22*b*; IX., fol. 27; X. *Mukundopākhyānam*, fol. 31; XI., fol. 34*b*; XII., fol. 40*b*; XIII. *Madhuvanamāhātmyavarṇanam*, fol. 42; XIV. *Vadarikāśramavarṇanam*, fol. 45*b*; XV. *Haridvāramahimāvarṇanam*, fol. 47; XVI. *Pushkaramāhātmyavarṇanam*, fol. 50*b*; XVII. *Prayāgavarṇanam*, fol. 54.

It ends:

इंद्रप्रस्थगता यो यत्कालिंद्या स्नानतः फलं ।
तत्फलं तत्र कुंडे तु जायते नात्र संशयः ॥

इति श्री[सौभरिसंहितायां elsewhere]इंद्रप्रस्थमाहात्म्ये काशीगोकर्णशिविकातीर्थसप्तकभीमकुंठवर्णनो नामाष्टादशो ऽध्यायः ॥ १८ ॥ संवत् १८५१ मासोत्तममासे श्रावणमासे कृष्णपक्षे शुभतिथौ दशमायां(°म्यां) वुधवासरे लिषतम् मिश्रकृष्णदासद्वनीरामस्यात्मजस्य गुरुभीमसेनपठनार्थं ॥

For another MS. of this work see Rāj. Mitra, Notices, iv., p. 75.

[MACKENZIE COLLECTION.]

3700.

**1087.** Foll. 72; size 13 in. by 5½ in.; good, modern Bengālī handwriting; seven lines in a page.

*Kāmarūpanibandha* (*Harigaurīsaṃvāda*), an account of the Kāmarūpa country, and the local dynasties supposed to have reigned there—with occasional glances at neighbouring districts, such as Gauḍa, Mathurā, Avantī, Ḍillī or Hastināpura—communicated, in form of prophecies, by *Śiva* to *Pārvatī*.

It begins: देव्युवाच ॥

भगवन् सर्वधर्मज्ञ चन्द्राहिकृतभूषण ।
विप्रक्षत्रविशां धर्माः शूद्रस्य कथितास्त्वया ॥
निर्णीतं लक्षणं तेषां यथानुक्रमयोगतः ।
ब्रह्मचर्ये तथा गार्हे(!) वानप्रस्थाश्रमे ऽपि च ॥

DR. RUPNATHJI( DR. RUPAKNATH )

धर्मस्ते शकलो देव भिक्षुकाश्रम ईरितः ।
स्त्रियो धर्मा बालधर्मा ये चान्ये त्वनुपङ्गिणः ।
वर्णसंकरधर्माश्च म्लेच्छधर्माः समीरिताः ॥
सूर्यविप्रस्य माहात्म्ये चन्द्रभोजद्विजस्य(!) च ।
नाक्षत्रगणकादीनां लक्षणसमुदीरणं ॥
विशेषतः क्षत्रियाणां देवतेजोऽंशिनामपि ।
पुनरेव समुद्दिष्टं भूभृतां लक्षणं पृथक् ॥
इदानीं श्रोतुकामास्मि कलौ कः कोऽत्र पालकः ।
भविता भारते वर्षे सपादपृष्ठलक्षके(?) ॥
त्वदीया तव भक्ताहं भार्यास्मि चन्द्रशेखर ।
यदि योग्यास्मि ते चित्ते प्रेयसी प्राणवल्लभ ॥
पुराप्युरीकृतं देव रहस्यमपि वल्लभे ।
वदिष्यामीति देवेशी(°श) तन्मे कथय शङ्कर ॥
ईश्वर उवाच ॥
कथयिष्यामि देवेशि गोप्यातिगोप्यमुत्तमं ।
गन्तास्त्वो निर्जनस्थानमित्युक्तान्तरधीयत ॥
विचार्य भारतं वर्षं निर्जनस्थानलिप्सया ।
पीठरत्नं कामरूपं सिद्धक्षेत्रमलोकयत् ॥
कापालभस्मनिचयं पिण्डीकृत्य करेण तत् ।
इन्द्राचलपुरो मध्ये जले ब्रह्मभुवो ऽक्षिपत् ॥
भस्माचल इति ख्यातः सिद्धानां सिद्धिसाधकः ।
द्वापरे समनुप्राप्ते तृतीययुगपर्यये ॥ °

The only chapters numbered are *adhyāyas* 1–6, 24, 25; *paṭalas* 25(!)–28.

*Haragaurīsaṃvāde* (thus generally) *rājanirṇaye haragaurīsamāgamaḥ*, fol. 2*b*; *rājanirṇaye saṃkhyāniyamaḥ*, fol. 4*b*; *devīpīṭhanirṇayaḥ*, fol. 5*b*; *cakravartiniyamaḥ*, fol. 6*b*; *nṛipacakravartiniyamaḥ*, fol. 7*b*; *rājacarite narakānvayanirṇayaḥ* (6th *adhy.*), fol. 9*b*; *catushpṛishṭhātmakakāmarūpanṛipatinirṇayaḥ*, fol. 11*a*; *indravaṃśānujaḥ*, fol. 13*b*; *indravaṃśaprathamānvayaḥ*, fol. 15*a*; *indravaṃśāntaram*, fol. 17*a*; *kāmarūpanṛipanirṇayaḥ*, fol. 18*a*; *punar-aindrapraveśaḥ*, fol. 18*b*; *guror aṃśaḥ*, fol. 21*a*; *śukrāṃśaḥ*, fol. 21*b*; *kujāṃśaḥ*, fol. 22*b*; *budhāṃśaḥ*, fol. 23*a*; *kāmarūpanirṇayaḥ*, foll. 27*b*, 30*b*; *utkalanirṇayaḥ*, fol. 31*b*; *gauḍanirṇayaḥ*, fol. 32*b*; *mathurānirṇayaḥ*, fol. 33*b*; *avantīdeśanirṇayaḥ*, fol. 34*b*; *kāmarūpanirṇaye* (24th *adhy.*), fol. 36*a*; do. (25th *adhy.*), fol. 37*a*; *pīṭhanirṇayaḥ*, fol. 37*b*; (war between *Saumāras* and *Turushkas*, etc., 25th *paṭala* !), fol. 39*b*; (26th *p.*), fol. 45*a*; (*Kāmarūpanirṇaye*, 27th *p.*), fol. 41*b*; (28th *p.*), fol. 48*b*; followed by more dynastic accounts mingled with legends (such as that of the *Apsaras Śyāmā*, who, being cursed by *Nārada* and loved by *Indra*, becomes the fore-mother of a race of kings, the *Kālajaṅghas*). In this section, which has no further colophon, there is a good deal of mystic play on the magic effect of certain letters in the king's names. The *Brahmayāmala* is referred to once (fol. 67*b*, l. 5).

The MS. ends abruptly at the foot of fol. 72*a*: देव्युवाच ॥
कथय त्वं महाबाहो सकाले वृपवासरात्(!) ।
धनदस्य प्रसादेन जनितो येन सर्वतः ॥
शङ्कर उवाच ॥
नवाक्षे ग्रहणाकारे कार्त्तिकस्य परे यदि(?) ।
श्रीकामरूपाद्ध(?°र्धे) राजा उकारादिर्भविष्यति ॥

For another incomplete MS. of the work see Rāj. Mitra, Notices, i., p. 177, where it is classed as a *Tantra*.

None of the colophons give the above title, but on fol. 72*b* Colebrooke's Paṇḍits have inscribed the title (as, indeed, it is also given by Rāj. M.) as *Kāmarūpīyanibandha*. For the subjects treated, cf. also *Kālikāpurāṇa* (no. 3339), ch. 79 seqq. [H. T. Colebrooke.]

## 3701.

**670.** Foll. 78; size 10¾ in. by 5¼ in.; good, recent Devanāgarī writing; eleven lines in a page.

*Kāśīprakāśa*, a digest of passages (chiefly *paurāṇik*) regarding the city of Benares, its religious merits and holy places, etc., com-



DR.RUPNATHJI( DR.RUPAK NATH )

piled—at the request of *Sarvabhaṭṭa*, *guru* to *Kṛishṇa Nāyaka* of Madhurā—by *Nanda paṇḍita*, surnamed *Vināyaka paṇḍita*, son of *Rāma paṇḍita*.

The MS. is very incorrect. It begins (somewhat corrected):

अंबायाः कुचमुपनीय वक्त्रबिंबे
 जिघ्रंतं सुहितकरंबपुष्करेण ।
चूडांकं पितुरुपदंशलिप्सयेव
 प्रेम्णा तं कमपि शिशुं वयं भजामः ॥ १ ॥

करे कलितकंदुकः कपटकेलिकौतूहलाद्
 दृगंचलमुदंचयन्कुचयुगे कुरंगीदृशः ।
प्रहर्तुमतिचातुरीविहितवंचनः कंचन
 प्रियं समवलोकयन्नवतु देवकीनंदनः ॥ २ ॥

कोऽपि द्राविडनीवृदस्ति जगतीमूर्धा समृद्धाननो
 लाटा यस्य ललाटतां दधति ते यत्कुंतलाः कुंतलाः ।
चोला यस्य निचोलतां दधति यः कर्णाटकर्णाटकस्
 तुंडास्तुडमिवावभांति सततं यत्कौशिकाः कौशिकाः ॥ ३ ॥

तत्रास्ति कापि मधुरा मधुराकृतिः सा
 यस्याः पुरो ऽस्ति [नगरी] न गरीयसीह ।
यामद्य पुण्यकलिका कलिकालभीता
 कृष्णेन दत्तसमया समयाभ्युपैति ॥ ४ ॥

सर्वत्रापि समेक्षणो ऽमृतधरः कंवे(कंठे)द्विजिह्वान् निजाद्
 देशादप्यपसारयत्यनुदिनं पुण्यानि कामान्वहून् ।
मूर्ध्ना यः शतशो दधौ द्विजपतीन्गौरी यदीया दिशः
 कीर्तिर्धावति सोऽत्र कोऽपि समभूच्छ्रीविश्वनाथनृपः ॥ ५ ॥

नित्यं सत्यानुरक्तः सततमनुगतो यो बलेनानुगृह्णन्
 गोपात्कोपानलस्य प्रशमनविधिनानंदपुष्टः सदैव ।
आश्लिष्टो यः सुदाम्ना बहुषु सहचरेषूद्भवं वर्धयिष्यन्
 कृष्णस्तदात्मजो ऽभूज्जगति कुवलयापीडनिष्पीडनाय
सह्यमसह्यं कुरुते रिपुभिः सुकृदां मृधे[1] स मृधेषु । [॥ ६ ॥
असुतत्रस्तस्य[2] सुतो ऽभूच्छ्रीमान्वीरनायको[3] नृपतिः ॥ ७ ॥

तस्य कांतिजितपंचसायकः
 संपदा विजितनाकनायकः ।
यस्य सर्वं इह कीर्तिगायकस्
 तत्सुतो जयति कृष्णनायकः ॥ ८ ॥

यदकृत मधुरायां शर्मनर्माणि[4] कृष्णः
 प्रथमजनुषि तेषां दर्शनेनांतरस्याः(?) ।
अनुसरति [स]पत्नीमत्सरेणानुतापं
 समुदितमपनेतुं(?) किंतु भूयो ऽवतीर्य ॥ ९ ॥

स्फुरत्कनकसंकुलं प्रचुरचारुसिंहासनं
 चलद्रुचिरचामरं विकसितोज्ज्वलच्छत्रकं ।
न शून्यमपि मंदिरं विसदृशं रिपूणामभूद्
 यदेष महिमाद्भुतो जयति कृष्णभूमीपतेः ॥ १० ॥

उपनीय धनौघमर्थिताल्लं
 प्रथमं लिंपति यत्तु चंदनेन ।
तदवैमि तदक्षराणि दुष्टा-
 न्यपसार्या ननु ते ऽत्र योग्यतावं(?°तापं) ॥ ११ ॥

नीलकंठस्य नीलश्वेत्कंठो न स्यादुमा तदा ।
विशेषमभिजानीयात्तद्यशोराशितः कथं ॥ १२ ॥

तस्य कोऽपि विबुधो ऽस्ति बुधो
 ऽन्यो यस्य भूमिवलये ◡–◡ छेत् ।
साम्यमत्र सुकृती न कृती
 वा सर्वभट्ट इति यो गुणहृदः ॥ १३ ॥

षड् दर्शनानि श्रुतयश्चतस्रः
 कुलाश्चतुःषष्टिरथामलत्विषः ।
नानावृषा यस्य स कोऽपि शर्वः
 श्रीसर्वभट्टो ऽस्य गुरुर्विभाति ॥ १४ ॥

धर्माननेकानचिरद्युतीन्स
 कृत्वापि संतोषमवाप नांतः ।
विश्वोपकाराय यशोनिदानं
 काशीप्रकाशं हि विधातुमैच्छत् ॥ १५ ॥

समर्थो ऽपि स्वयं सर्वशास्त्राणां तत्त्वनिर्णये ।
न्ययोजयत्तथाप्यत्र तत्प्रीत्या नंदपंडितं ॥ १६ ॥

श्रीसर्वभट्टसंदिष्टः कुरुते नंदपंडितः ।
काशीप्रकाशं विदुषां संतोषाय यथामति ॥ १७ ॥

ननु वस्तुस्वरूपसद्भावे तद्विशेषनिर्णयाय प्रेक्षावता प्रवृत्तिरुचिता स एव नु काश्याः कलौ दुर्लभ इति नेयं प्रतिज्ञा घटते श्रीमतां प्रमाणाभावात् । °

अथ याननिर्णयः fol. 12*b*; अथ यात्रायां नियमाः fol. 13*a*; अथ तीर्थयात्राविधिः fol. 15*a*; अथ काश्यां प्रथमदिनयात्राविधिः fol. 26*a*, etc.

---

[1] ? *r.* सुकृतां मुदे.

[2] ? *r.* अमृताब्धेस्तस्य (ocean of charity).

[3] ? °भूच्छ्रीमान्वीरप्पनायको MS.

[4] पदकृतमधुरायां शर्म्यनर्माणि MS.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends:

व्यर्थं [वर्त]नमेतयोरुभयथेत्यस्मान्निवृत्तं मया
यच्छीलं सहजं सदा सदसतोस्तत्को ऽन्यथात्वं नयेत् ।
कस्य प्रार्थनया पुनाति सकलं दुष्टं जनं जाह्नवी
कस्य व्यर्थनया निहंति सुकृतं सा कर्मनाशापि वा ॥

इति श्रीधर्माधिकारिरामपंडितात्मजविनायकपंडितापरनामधेयनंदपंडितविरचितः काशीप्रकाशः संपूर्णः ॥

[H. T. Colebrooke.]

## 3702.

**2522.** Foll. 78; size $10\frac{1}{4}$ in. by $5\frac{3}{4}$ in.; large, clear Devanāgarī writing; eleven lines in a page.

*Kāśīrahasyaprakāśa*, a description of Benares, its holy places and mystic powers; in five chapters (*praśnanirṇaya*), composed—by order of *Kānadāsa* (son of *Rāghavadāsa*, *divan* at Vijāpura)—at Rājanagara, by *Bhaṭṭa Nārāyaṇa*, surnamed *Bālabopa*, son of *Bhaṭṭa Rāma*, grandson of *Bhaṭṭa Nārāyaṇa*, and disciple of *Bāpādeva*.

It begins:

या धीर्वेदशिखोद्भवा परपदप्राप्त्यै प्रसिद्धा नृणाम्
अत्यायाससमुद्भवेह परतो वास्यै भवेत् कस्यचित् ।
यस्यां त्वीशकृतोपदेशजनितब्रह्मात्मधीस्तत्पदं
धत्ते जंतुमिहैव सा शिवपुरी काशी सदा काशते ॥ १ ॥
योगाशक्ततपोविरक्तसुकृतानासक्तभक्तेतरान्
कामक्रोधमदादिसक्तमनसो मग्नान् भवाब्धौ कलौ ।
तान्सर्वान् कृपयोद्दिधीर्षुरविमुक्ते यः सदास्ते सुरैः
सार्कं विष्णुमुखैः शिवः स भवतु श्रेयस्करो ऽहर्निशं ॥ २ ॥
श्रीमद्गुर्जरदेशपालसचिवः प्राग्वाटवंशोत्तमात्
प्रादुर्भूय गणेशराव इति हि ख्यातिं गतो भूतले ।
हस्त्यश्वादिसमस्तवैभवयुतः श्रीकृष्णदासाभिधः
पुत्रस्तस्य च धार्मिकः समभवत् सत्सुत्यसर्वाग्रणीः ॥ ३ ॥
श्रीमद्राघवदास इत्यभिधया ख्यातिं गतः सार्थया
तत्पुत्रो हि विजापुराधिपतितः प्राप्ताधिकारोत्तमः ।
सत्कीर्तिर्द्विजदेवसेवनरतो यो ऽन्योपकृत्यै प्रभुस्
तज्ज्ञो गुर्जरदेशभूषणमणिः श्रीकानदासाभिधः ॥ ४ ॥
सद्विद्वज्जनवल्लभो ऽतिचतुरः सद्बुद्धिरत्नाकरो
यो याच्ञाधिकदो हि राजनगरे वर्वर्ति सर्वोपरि ।
धर्माद्यर्थचतुष्टयेऽतिनिपुणो दिल्लीपतेः संमतम्
तत्प्रश्नानवलंब्य सर्वहितकृत् काश्या रहस्यं ब्रुवे ॥ ५ ॥

इह खलु सकलश्रुतिस्मृतिपुराणेषु प्राणोत्क्रमणकालीनजंतुमात्रस्य श्रीविश्वेश्वरोपदेशजन्यब्रह्मात्मैक्यज्ञानप्रयोजकतया परमपुरुषार्थैकप्रापकत्वेन प्रसिद्धमपि श्रीकाशीक्षेत्रमहिमानं धर्मार्थकाममोक्षाणां श्रद्धा परमकारणं । पुंसामश्रद्दधानानां न धर्मो नापि तत्फलमिति महाभारतोक्तेरन्वयव्यतिरेकाभ्यां चतुर्विधपुरुषार्थप्राप्तिनिदानभूतया । सर्वधर्मफलं सम्यक् काश्यां यत् श्रद्धत्ते (? श्रद्धया) मन इति ब्रह्मवैवर्तोक्तेरनेकजन्मार्जितपुण्यपुंजपरिपाकोदयसंजातया संतः सेव्यास्तन्मुखात् काशिकायाः श्रोतव्यास्तद्गुणाः सिद्धिरूपाः ॥ ६

I. *śrīmatkānadāsīya-kāśīsvarūpavishaya-* ends fol. 12*b*; II. *śrīmatkānadāsīya-kāśīkshetrabhedavishaya-*, fol. 18*b*; III. *śrīmatkānadāsīya-muktibhedavishaya-*, fol. 55; IV. *śrīmatkānadāsīya-muktyadhikārivishaya-*, fol. 73*b*. V. ends:

स्वरूपं किं काश्याः कतिविधमथो तत्र कतिधा
विमुक्तिः सा नृणामुत नगतिरश्वामपि भवेत् ।
विमुक्तौ सिद्धायां गमनविधिपूर्वो निवसने
विधिः कस्तस्मिंस्तद्भवति नयनो भैरवभयं ॥ १ ॥

इति प्रश्नरत्नानि मुक्ताः सुयुक्तीः
समादाय काशीगुणैर्गुंफिता स्रक् ।
इयं कानदासात् गुरूणां प्रसादात्
दधत्ता गले को लभेन्नातिसौख्यं ॥ २ ॥

श्रीनारायणभट्टसूनुरभवत् श्रीभट्टरामाभिधो
विश्वामित्रकुलस्तदीयतनुजः पैतामहीयाभिधः ।
बापूदेवगुरोः पदाब्जनिरतः काशीपुरीमाश्रितश्
चक्रे ग्रंथमिमं हि राजनगरे श्रीकानदासाज्ञया ॥ ३ ॥

इति श्रीमत्पूर्वोत्तरमीमांसाद्वैतसाम्राज्यधुरंधरबापूदेवगुरुचरणारविंदसेवापरायणबालबोपनामक [° बालबोपाभिध elsewhere] भट्टनारायणकृते श्रीकाशीरहस्यप्रकाशे श्रीमत्कानदासीयकाशीविषयपंचप्रश्नीनिर्णयः समाप्तः ॥ संवत् १७५८ वर्षे माघमासे सिते पक्षे चतुर्दशी उत्तरपूर्णमाशी शनीवासरे स्वस्थिते राजनग्रे राजपुरवास्तव्यं मालवीश्रीगौडज्ञातीयपंडागंगारामः ॥

For a *Kāśīrahasya* (or *Kāśīmāhātmyakhaṇḍa*), assigned to the *Brahmavaivartapurāṇa*, see Burnell (Tanjore MSS., p. 189). [Gaikawar.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 3703.

**1639 a.** Foll. 118 (of which foll. 2 and 6 are wanting, and fol. 1 supplied by a modern hand); size 10¼ in. by 4¼ in.; fair Devanāgarī writing of 1621 A.D.; eleven lines in a page.

*Gaṅgāmāhātmya*, a compilation of passages regarding the sacred river from different *Purāṇas* and the epics.

The extracts are arranged in the following order: *Anuśāsanaparvan* and *Āraṇyaparvan* of the *Mahābhārata*, foll. 7*a*, 14*a*; *Brahmapurāṇa*, fol. 17*a*; *Vishṇupurāṇa*, fol. 17*b*; *Matsyapurāṇa*, fol. 27*a*; *Kūrmapurāṇa*, fol. 29*b*; *Revakhaṇḍa* of the *Skandapurāṇa*, fol. 44*b*; *Liṅgapurāṇa*, fol. 45*a*; *Vāmanapurāṇa*, fol. 49*b*; *Varāhapurāṇa*, fol. 52*b*; *Vishṇudharmottara*, fol. 58*b*; *Brahmāṇḍapurāṇa*, fol. 66*b*; *Bālakāṇḍa* of the *Rāmāyaṇa*, fol. 70*b*; *Nāradīya*, fol. 71*b*; *Kāmikasaṃhitā*(!), fol. 83*b*; and *Bhavishyapurāṇa*, fol. 118*b*.

It begins (as supplied by the modern hand):

शैलवृत्त उवाच ।
के देशाः के जनपदाः के ग्रमाः(!) के च पर्वताः ।
प्रकृष्टापुण्यतः काश्च हेया नद्यस्तदुच्यतां ॥
सिद्ध उवाच ।
ते देशास्ते जनपदास्ते ग्रमास्ते च पर्वताः ।
येषां भागीरथी गंगा मध्ये याति सरिद्वरा ॥ ०

Fol. 1*a* has the title inscribed on it: सकलपुराणोक्तसंग्रहगंगामाहात्म्य सं ३२०० भग्नं पत्र २. ६.

It ends with the colophon of the last set of extracts: इति भविष्यपुराणे गंगामाहात्म्यं समाप्तं ॥ संवत् १६७८ आश्विन सुदि अष्टम्यां लिखितं ॥

The later ownership of *Upādhyāya Sadāśiva* is recorded by another hand in the following words: भटरामचंद्रेण पौराणिकेत्युपाधिनामधारकेण औदीच्यज्ञातीयेन (औ०) उपाध्याय सदाशिवाय दत्तमिदं ग्रंथ श्रीकृष्णप्रीत्यै ॥ संवत् १७२८ ॥ ०

[H. T. COLEBROOKE.]

## 3704.

**2688 b.** Foll. 42; size 9½ in. by 5¾ in.; fair, modern Devanāgarī writing; eleven lines in a page.

*Citrakūṭamāhātmya* — also called *Rāmarahasya* — a treatise, in 16 *adhyāyas*, in commendation of pilgrimages to the holy places in the Bundelkand country, hallowed by *Rāma's* stay during his exile.

The work purports to be revealed by *Atri* to king *Bharata*, and then again by *Bhuśuṇḍi* to *Śāṇḍilya*, or by *Agastya* to *Sutīkshṇa*; and claims to belong to the *Ādirāmāyaṇa*, and to have been composed by *Vālmīki* himself.

It begins:

यतः सर्वाणि भूतानि प्रतिभांति स्थितानि च ।
यत्रैवोपशमं यांति तस्मै सत्यात्मने नमः ॥ १ ॥
ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टा दर्शनदृश्यभूः ।
कर्ता हेतुः क्रिया यस्मात्तस्मै ज्ञानात्मने नमः ॥ २ ॥
स्फुरंतु(°ति) शीकरा यस्मादानंदस्यांबरे [ऽ]वनौ ।
सर्वेषां जीवनं तस्मै ब्रह्मानंदात्मने नमः ॥ ३ ॥
चरितं रघुनाथस्य शतकोटिप्रविस्तरं ।
एकैकमक्षरं पुंसां महापातकनाशनं ॥ ४ ॥
नमस्तस्मै मुनीशाय श्रीयुताय तपस्विने ।
सर्वज्ञानाधिवासाय वाल्मीकाय नमो नमः ॥ ५ ॥
शांडिल्य उवाच ॥ (Gorr., *Rām.*, I., 3.)
श्रुतं त्वत्तः कृपासिंधो जगदुत्पत्तिकारणं ।
अधुना श्रोतुमिच्छामि विस्तरेण कथामिमां ॥ ६ ॥
तीर्थानि देवसद्मानि वनान्यायतनानि च ।
माहात्म्यं श्रोतुमिच्छामि रहस्यं श्रुतिसंमितं ॥ ७ ॥
श्रुतं च परमैश्वर्यं श्रीरामस्य गिरेः प्रभो ।
सीतायाश्च तथा देव्या महदैश्वर्यमद्भुतं ॥ ८ ॥
श्रोतुमिच्छाम्यहं तात तीर्थानि विविधानि च ।
रहस्यं रघुनाथस्य सर्वेषां च प्रियंकरं ॥ ९ ॥
चित्रकूटगिरौ रम्ये मंदाकिनीतटे शुभे ।
ऋषीणामाश्रमपदे सदा तिष्ठति सानुजः ॥ १० ॥
मंडलं परमं शुभ्रं निर्मितमृषिणा पुरा ।
त्रीणि योजनसंख्यानि चतुर्णां दिशिमुत्तमं(!) ॥ ११ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

माहात्म्यं श्रोतुमिच्छामि तीर्थानि विविधानि च ।
एतन्मे[ऽ]संशयं तात तदनुज्ञातुमर्हसि ॥ १२ ॥

भुशुंडिरुवाच ॥

रहस्यं मे परोत्कृष्टं दुर्लभं मुनिदेवयोः ।
तदापि ते वदिष्यामि साधवे स्निग्धचेतसे ॥ १३ ॥

Regarding the geographical position of the localities described in it, we gather the following information: Citrakūṭa, identified with Hemakūṭa (foll. 3*a*, l. 11; 8*a*, l. 7), is situated on the banks of the river Mandākinī—a tributary of the Payoshṇī (fol. 41*b*, l. 3)—west of Prayāga (fol. 3*b*, l. 1), seven *yojanas* long, in the midst of eight rivers (fol. 40)—Sarasvatī and Payoshṇī in the east, Kāverī and Virajā in the south, Kauśikā and Candrabhāgā in the west, and Sarayū and Yamunā in the north. Veṅkaṭādri lies south-west, Pāñcajanyagiri west, of Citrakūṭa (foll. 34*b*, 35*a*). Of the other *tīrthas*, rivers and hills in this circle the principal ones are: Vālañjara (foll. 6*a*, l. 10; 33*b*, l. 10), Mānasatīrtha (foll. 6*b*, l. 5; 7*a*, l. 1; 35*a*, l. 5), Mandaraparvata, north of the Daṇḍaka forest (fol. 14*b*, l. 3), Gāyatrī nadī (fol. 20*b*, l. 1), Brahmakuṇḍa, the source of the Payoshṇī (foll. 20*a*, l. 9; 22*b*), Aṅganātīrtha (fol. 28*b*, l. 8), Brahmatīrtha (fol. 29*a*, l. 5), Saṃkarshaṇatīrtha (fol. 29*b*, l. 1), Sītākuṇḍa (foll. 29*b*, l. 7; 31*a*, l. 10), Badarikātīrtha (fol. 31*a*, l. 2), Daṇḍakatīrtha (fol. 31*a*, l. 10), Karkoṭakatīrtha (foll. 31*b*, l. 1; 36*a*, l. 2), Rāmatīrtha (fol. 31*b*, l. 2), Sūryakuṇḍa (fol. 31*b*, l. 4), Guptagodāvarī (foll. 31*b*, l. 7; 32*a*, l. 1 *inf.*), Riṇamocanatīrtha (foll. 32*b*, l. 7; 36*a*, l. 1), Kapila-tīrtha and parvata (fol. 33*b*, l. 6), Maṇikūṭa (fol. 34*b*, l. 2), Brahmāṇḍabhedakatīrtha, two *yojanas* east of Citrakūṭa (fol. 35*a*, l. 9), Daridramocanatīrtha (fol. 36*a*, l. 4), Gṛidhrakaparvata (fol. 37*a*, l. 1), Vālmīker āśrama (fol. 40*b*, l. 2), Sutīkshṇāśrama (fol. 40*b*, l. 4), Agastyāśrama (fol. 40*b*, l. 5), Sahyācala (fol. 40*b*, l. 6), Viśvāmitrasya sthānam, on the confluence of Kālindī and Sarayū (fol. 41*a*, l. 4).

On fol. 42*a*, l. 1, the work designates itself as *Rāmarahasya*; on fol. 4*b*, l. 6, as *Rahasyaṃ rāmasītayoḥ*.

It ends:

चैत्रे विशदपंचम्यां तदादिविधिपूर्वकं ।
मेघे पुणि संप्राप्ते तीर्थयात्रां करोति यः ॥ ६८ ॥
सर्वपापविशुद्धात्मा रामधाममवाप्नुयात् ।
यत्ते मनसि वर्तते यत्पृष्टो ऽहं वदामि ते ॥ ६९ ॥

इत्यार्षे श्रीमदादिरामायणे वाल्मीकविरचिते शतसंहितायां श्रीचित्रकूटमाहात्म्ये द्वितीयांशे भुशुंडितीर्थयात्रावर्णनं नाम मोक्षोपाख्यानगुह्यतीर्थवर्णनं नाम षोडशो ऽध्यायः ॥ १६ ॥

[Mackenzie Collection.]

## 3705, 3706.

**392, 393.** Foll. 1–219, 220–439; size 16¼ in. by 5¼ in.; well written in the Bengali character, by different hands, in 1810 A.D.; nine lines in a page.

*Citratīrthakathāvalī*, a work on sacred places of pilgrimage; compiled (in 1799 A.D.) for Colebrooke, chiefly from *Purāṇas*, by *Citrapati Śarman.*

It begins:

अमृतेनोदरस्थेन भ्रियन्ते(भ्रि० MS.) सर्वदेवताः ।
कण्ठस्थितविषेणापि यो जीवति स पातु नः ॥ १ ॥

ओं नमो गणेशाय ॥ श्रिगङ्गादेव्यै नमः ॥

गङ्गा ऽयोध्यादितीर्थानि विचिन्त्य दुरितक्षये ।
तन्यते चित्रपतिना चित्रतीर्थकथावली ॥ १ ॥
पुराणोपपुराणानि धर्मशास्त्राणि वा पुनः ।
आकलय्य निबन्धांश्च तीर्थमन्वेषिणां मुदे ॥ २ ॥
प्रसङ्गादन्यतीर्थस्य प्रसिद्धविषयस्य च ।
पुराणादीतिहासस्य कथात्र समुदाहृता ॥ ३ ॥
गङ्गायाश्चाप्ययोध्याया मथुराया व्रजस्य च ।
मायाया द्वारिकायाश्च काश्याश्चैवाथवा पुनः ।
अवन्तिकायाः काञ्च्याश्च माहात्म्यं सरितामिह ॥ ४ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

श्रीमतः साहवेन्द्रस्य कोलब्रूकस्य धीमतः ।
आज्ञया विस्तृतामेतां कृपया पश्यत बुधाः ॥ ५ ॥
अथात्र प्रथमं तीर्थयात्राविधिर्लिख्यते । मार्कण्डेयपुराणे । ०

It ends with 13 *ślokas,* in which the author informs us that he was the third of five sons of *Nandīpati* and *Mānavatī*—the others being *Ratnapati* (father of *Dharmanātha,* etc.), *Lakshmīpati* (who taught the author), *Sanātha* and *Medhākāra*—that his father had a younger brother *Kṛishṇapati* (whose sons were *Guṇapati, Khelapati* and *Śaṅkara*), and that his (paternal) grandfather was *Madhusūdana,* the son of *Maithila Rāmacandra,* of Dhamahāgrāma in the district of Dharmapura.

Colophon: इति श्रीमन्नन्दीपतितनूजमहोपाध्यायश्रीमल्लक्ष्मीपतिशर्मानुजमहोपाध्यायश्रीमच्चित्रपतिशर्मविरचिता चित्रतीर्थकथा समाप्ता ॥

[H. T. COLEBROOKE.]

## 3707.

**3112.** Foll. 112; 8vo, size 9 in. by 5¾ in.; thick, recent Devanāgarī writing; 22 lines in a page.

*Jālandhara-māhātmya,* the legendary history of the Jālandhara district (*kshetra*), named after the *Daitya Jalandhara.*

It consists of some 2450 *ślokas* (written in half-*śloka* lines), and shows no division into chapters.

It begins (slightly corrected):

अलिकुलसेवितगंडो दिविषद्गणवंदितचरणसरोजः ।
जयति हिमाद्रितनयाभूः प्रत्यूहनाशनो गणपः ॥ १ ॥
वज्रेश्वरी जगद्रूपा सर्वमंगलदायिका ।
करोतु सर्वकालं मे मंगलानि शिवप्रिया ॥ २ ॥
श्रीनिवासगुरोरंघ्रियुगलं मुक्तिमंदिरम् ।
नत्वा त्वघविनाशाय वच्मि किंचिद्यथाश्रुतं ॥ ३ ॥
वज्रेश्वरी जयंती च रम्या ज्वालामुखी शिवा ।
अंबिका च जगद्वंद्या जालंधरकृतालया ॥ ४ ॥

चतस्रः संति या देव्यास्ताः संतु दक्षिणा मयि ।
एकदा सर्वशिष्टानां वरिष्टानां शिरोमणेः ॥ ५ ॥
वशिष्ठस्यांतिके पृष्टं व्यासेन परमर्षिणा ।
मुनिवर्य महाभाग कस्मिन्क्षेत्रे मयाधुना ॥ ६ ॥
स्थितोपास्या महामाया मायामोहनिवर्तिका ।
यावत्सम्यक्प्रकारेण न मया मृडगेहिनी ॥ ७ ॥
उपास्यते महाक्षेत्रे तावन्न मम भारती ।
आह्लादयति चेतांसि नृणामवनिमंडले ॥ ८ ॥
यत्तस्याः पादुकाधारा सुकृता सेवना तथा ।
श्रेष्ठतां नयति क्षिप्रं नरं सापि निरंतरम् ॥ ९ ॥
तस्यैव सफला नास्ति जनिः सर्वांगसुंदरि(!) ।
यावन्मनो न वै सम्यक्प्रकारेण प्रजायते ॥ १० ॥
कुरुपांडवयोर्युद्धवर्णनं फलवर्जितम् ।
जीवनं मन्यते स्वस्य तस्मात्साधय मे हितं ॥ ११ ॥
एतच्छ्रुत्वा तु वचनं व्यासस्यामिततेजसः ।
उवाच वचनं शीघ्रं वशिष्ठो मुनिसत्तमः ॥ १२ ॥
व्यास गत्वा त्वया शीघ्रं क्षेत्रे जालंधराभिधे ।
मृडस्य वनिता भव्या पुरश्चरणसाधनात् ॥ १३ ॥
तोषणीया यथा शक्तिः सा प्रसन्ना भविष्यति ।
तस्यां संतोषितायां तु त्वत्तो ऽन्यो न भविष्यति ॥ १४ ॥
कुरुपांडवयोर्युद्धवर्णनं स्वर्गसाधिकम् ।
सम्यक्काव्यस्य करणात्स्थिरा कीर्तिर्धरातले ॥ १५ ॥
प्रतिष्ठाति(०ष्ठति) नृणां भव्या तया स्वर्गः प्रजायते ।
एवमाप्य निदेशं तु वशिष्ठस्य महात्मनः ॥ १६ ॥
व्यासेन तस्य निकटे कथितं प्रीतिपूर्वकम् ।
मुनिवर्य महाभाग क्षेत्रं जालंधराभिधं ॥ १७ ॥
कुत्रास्ति यस्य नाम्ना वै गीयते तत्तु क्षेत्रकं ।
स चक्रो वै स्थितः पूर्वं तन्ममाख्याहि सत्वरं ॥ १८ ॥
एवं वाक्यं प्रपौत्रस्य श्रुत्वा तेन तदंतिके ।
कथितं तु समासेन वाक्यं तत्समये स्वयं ॥ १९ ॥
विपाशापरपारं तु समारभ्य विशिष्टकं ।
हिमाचलावधि स्वस्तिक्षेत्रं तत्सर्वसंमतं ॥ २० ॥
जालंधराभिधं सर्वे(? सर्व)सिद्धीनां निलयं सदा ।
एकदा नारदं दृष्ट्वा ब्रह्मणा वेदमूर्तिना ॥ २१ ॥
संतोषेण तु वै हासो विहित[ः] शोकनाशकः ।
तत्कालं तस्य नयनादानंदरभते(? ०से) जलं ॥ २२ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

पतितं धरणीपृष्ठे तस्माज्जातस्तु बालकः ।
स बालो ब्रह्मणा स्वस्य क्रोडे संविहितः स्वयं ॥ २३ ॥
तेन बालेन रभसा कूर्चो वै द्रुहिणस्य तु ।
हस्तेन संभृतं(°तः) कामं दंभोली(°लि)कर्कशेन तु ॥२४॥
तत्कालं ब्रह्मणा बालः कालकल्पस्तु(?) नाकिनां ।
संप्रक्षिप्तस्तु जलधौ तिमिनक्रझषाकुले ।
समुद्रेण तु सर्वेषां रक्षकेण स रक्षितः ॥ २५ ॥
महांतो न विहिंसंति सर्वदा शरणागतम् ।
शिवीनां मांसदानेन कपोतः किं न रक्षितः ॥ २६ ॥
मादृशैर्यदि नो रक्ष्या नितरां शरणागताः ।
तर्हि हीनैः कथं स्थेयमवनौ शरणार्थिभिः ॥ २७ ॥
शरणागतसंत्राणं कुरुते यो ऽपि(*r.* न) शक्तितः ।
तस्य पुण्यं समग्रं तु क्षयं संयाति सत्वरं ॥ २८ ॥ °

*Samudra* then adopts *Jalandhara* as his son, who becomes chief of the *Daityas*, and, by worshipping *Śiva's* consort, attains to great power over the gods; but, on their entreaties, he is ultimately abandoned by the goddess and slain (fol. 32*b*), etc.

The MS. is very incorrect. The last portion of the work is taken up with tedious commendations of various sacred places along the north, such as Haridvāra, Dvāravatī (Dvārakā), Prayāga, Kāśī, etc.

It ends:

न स्नाता येन यमुना न दृष्टा मथुरा पुरी ।
नार्चितो माधवो येन किं कृतं तेन जन्मना ॥
वाणी यस्यास्ति मथुरा मथुरायां तु संस्थितिः ।
उपास्यो माधवो यस्य तस्य मुक्तिः करे स्थिता ॥
माधवो नार्चितो येन न स्थिता मथुरा पुरी ।
मानसं न जितं येन तस्य जन्म निरर्थकम् ॥
मधुरं वचनं यस्य माधवो यस्य देवता ।
मथुरायां स्थितिर्यस्य स देवानतिरिच्यते[1] ॥
मथुरां प्राप्य ते पूजा[2] माधवस्य न भक्तितः ।
ते मर्त्या धर्मजातीषु(!) प्रभवंति पदे पदे ॥
मथुरां प्राप्य ये मूढा न कुर्वंति मनोजयं ।
जीवंत एव ते धूर्ता ज्ञातव्या राक्षसाधमाः ॥
मनो नियमितं यैस्तु ते यांतु मथुरां पुरीं ।
स्वभावचलचित्तास्तु मायांतु मथुरां पुरीं ।
मनोमथनसामर्थ्यमस्ति येषां तु ते मुखं ॥
इति श्रीजालंधरमाहात्म्यं संपूर्णम् ॥

[General Sir A. Cunningham.]

## 3708.

**920 c.** Foll. 31; size 12¼ in. by 6 in.; good, modern Devanāgarī writing; eleven lines in a page.

*Nāmamāhātmyastotra*, a compilation of passages from the *Purāṇas* and *Tantras* inculcating the all-important obligation of constantly pronouncing the name of *Kṛishṇa*, as an essential element of faith (see Wilson, Works, i., 161).

It begins with a short introduction:

यन्नामकीर्तनादेव सद्यः पापक्षयो भवेत् ।
तमहं संस्मरामीशं शिवं कृष्णं विमुक्तये ॥ १ ॥

ननु नामकीर्तनात्सद्यःपापक्षयप्रतिपादकमंत्रार्थवादेतिहास-पुराणोपपुराणसंहितागमादीनां कर्मानुष्ठानादिपुराणानां स्वार्थे ऽपि प्रामाण्यं नास्तीति चेन्मानांतरसंवादिविसंवादिवाक्यानाम-ग्निर्हिमस्य भेषजं °

It ends: संस्कारो ऽपि किमतिशयाधानेन मलापकरणेन वा तत्रातिशयाधानं पूर्णत्वेनैव निराकृतं ॥ मलापाकरणं वारयति निरंजन इति निर्मलः ॥ २३ ॥

[H. T. Colebrooke.]

## 3709.

**3221.** Foll. 180; size 9¾ in. by 5¼ in.; thick, modern Devanāgarī writing; eight lines in a page.

*Nīlamata(-Purāṇa)*, a legendary account of Kaśmīr, and its sacred places on the river Vitastā; forming one of the chief sources of the Rājataraṅgiṇī. [A.]

[1] The MS. reads देवान्नातिरिच्यते ।

[2] ? यैः पूजा; or perhaps येषां पूजा (or ये पूजां, viz. कुर्वंति).

DR.RUPNATHJI( DR.RUPAK NATH )

It begins (cf. *Rājatar.*, i., 25 seq.):

यत्सत्याः समभूद्विहारसरसो कल्पान्मनून्षट् ततो
मारीचेन सुरत्रयीकलनया निर्मथ्य दैत्यं बलात् ।
कश्मीरा इति मण्डलं विरचितं वैवस्वते ऽस्मिन्मनौ
केडास्योर्धितमात्मना (?) भगवता यत्यावेतीतीङ्क्रया ॥ १ ॥
श्रीनिवासं हरिं देवं वरदं परमेश्वरम् ।
त्रैलोक्यनाथं गोविन्दं प्रणम्याक्षरमव्ययम् ॥ २ ॥
परिक्षिद्वंशभृच्छ्रीमान्नृपतिर्जनमेजयः ।
पप्रच्छ शिष्यं व्यासस्य वैशम्पायनमन्तिकात् ॥ ३ ॥
जनमेजय उवाच ॥
महाभारतसंग्रामे नानादेश्या नराधिपाः ।
महाशूराः समायाताः पितॄणां मे महात्मनाम् ॥ ४ ॥
कथं काश्मीरिको राजा नायातस्तत्र कीर्तय ।
पाण्डवैर्धार्तराष्ट्रैश्च न वृतः स कथं नृपः ॥ ५ ॥
कश्मीरामण्डलं चैव प्रधानं जगति स्थितम् ।
कथं नासौ समाहूतस्तत्र पाण्डवकौरवैः ॥ ६ ॥ °

See Aufrecht, Cat. Bodl., no. 818; G. Bühler, Report of Tour in Kaśmir, p. 38 seq.; app., p. x; Indian Antiq., xviii., p. 184; R. G. Bhandarkar, Report for 1883-4, p. 44, where the real title of the work is stated to be 'the *Kaśmīra-māhātmya* according to *Nīlamata* (? *Nīla*).'

It ends (fol. 157):

इत्येवमुक्तं जनमेजयस्य व्यासस्य शिष्येण महाव्रतेन ।
संक्षेपतो ग्रन्थबहुत्वभीत्या समग्रशास्त्रै खलु सूचितं यत् ॥
सर्वत्र नैतद्युपयोगमेति ततो न वोचे भगवान्महात्मा ।
अतीव हृद्ये बहुविस्तरे ऽपि जनप्रिये भारतपूर्णचन्द्रे ॥
इति नीलमते वितस्तामाहात्म्यम् समाप्तं चेदं नीलमतं नाम पुराणम् ° ॥

The work is likewise called a *Purāṇa* in the *Rājataraṅgiṇī* (cf. Bühler, Ind. Ant., xix., p. 410); and accordingly the leaves of the volume are marked नी° पु° throughout.

Then follow two supplements, the first of which (foll. 6) contains some account of Nīla and matters relating to the *Purāṇa*, including chronological computations, drawn from the *Rājataraṅgiṇī*.

This portion begins: महाकविकल्हणकृतौ राजतरङ्गिण्यां ॥ आद्येन चन्द्रदेवेन° ययुरिति (*Rājat.* i. 184–6) ॥ अत्रेयं व्यवस्था संक्षिप्य प्रदर्श्यते ॥ कल्पादारभ्य यण्मनुपर्यन्तं कश्मीराः सतीसरोऽभूत् ॥ यत्र कश्यपपुत्रा नागा अमृताहरणवेलायां बलप्रदर्शनप्रसन्नीभूतेन शक्रेण तवेमे भक्ष्या भविष्यन्ति°

The second supplement (foll. 17) consists of a list of contents.

[PRINCE FREDERICK OF SCHLESWIG-HOLSTEIN.]

## 3710.

**3018.** Foll. 103; size 10 in. by 8¾ in.; thick, modern Devanāgarī writing; twelve lines in a page.

*Nīlamata.* [B.]

The MS., which is rather incorrect, was written by the same hand as MS. 3016 (no. 3722), and, like it, bound after the fashion peculiar to Arabic MSS., having probably formed part of some Muhammadan library in the Punjab.

The different names given to the Vitastā on foll. 18*a* and 36*a* are Viśokī (Viśokā), Trikoṭi, Candravatī and Āharshapathā (cf. Āhārapatha in MS. 3016). This MS. omits the first verse of MS. A. [ ? ]

## 3711.

**2568.** Foll. 31; size 14 in. by 6 in.; fair Devanāgarī writing of the latter part of last century; 11 or 12 lines in a page.

*Nīlādrimahodaya,* also called (or, perhaps, forming a section of the) *Purushottamakshetra-māhātmya,* an account of the sacred places of the Purushottamakshetra, in 32 *adhyāyas.*

The first *adhyāya* runs as follows:

गणेशविश्वासविधिं जनयन् स्नानमंडपे ।
बिभ्रद्गजाननं पायात्त्वां स रामो जगत्पतिः ॥
नारायणं नमस्कृत्य ° ॥
एकदा नैमिषारण्ये पुण्ये सर्वसुखप्रदे ।
नानातीर्थसमायुक्ते नानागुल्ममनोरमे ॥

DR.RUPNATHJI(DR.RUPAK NATH)

फलपुष्पाढ्यवृक्षाणां निकरैः परिमंजुले(?पर°)।
तापसाश्रमसंकीर्णे ख्याते परमपावने ॥
एतादृशे वने तस्मिन् शौनकाद्या महर्षयः।
हुंडीभूय(*r.* तूष्णींभूय) समस्तास्ते चक्रुर्गोष्ठीं मनोरमां ॥
समस्ततीर्थराजानां ज्ञानाय जगतीतले।
क्षेत्राणां शिवदानां च जिज्ञासायां त्वरान्विताः ॥
सभायां जायमानायां तत्क्षणे च मुनीश्वरः।
जटामंडनधारी च धृतकौपीनसुंदरः ॥
कृष्णाजिनोत्तरीयेण विराजितवपुर्मुनिः।
सूतस्तत्संसदं प्राप्तः सह शिष्यगणैः सुधीः ॥
तं दृष्ट्वा परमप्रीताः शौनकाद्यास्तपस्विनः।
उत्थाय च नमश्चक्रुः सो ऽपि तान्दंडवद्भुवि।
प्रणामं कृतवांस्तत्र ह्युवास स तदा मुनिः ॥
समासीनं ततो दृष्ट्वा ऋषयस्ते मुनीश्वराः।
ऊचुः प्रांजलयः सर्वे सर्वलोकहिताय वै ॥

ऋषय ऊचुः ॥

भगवन् सर्वधर्मज्ञ सर्वतीर्थादितत्त्ववित्।
अधुना(अतो R.M.)ब्रूहि समस्तानां तीर्थानां शिवमद्भुतं।
क्षेत्राणां च फलं तावत् सूत नः कथय प्रभो ॥
तेषां मध्ये वरं किं वा क्षेत्राणां च मुनीश्वर।
यथातथ्येन च ब्रूहि यतस्त्वं व्यासशासितः ॥
इत्येवं वदतां तेषामृषीणामग्रतस्तदा।
समारभत तद्वक्तुं गुह्यं तैः पृष्टमुत्तमं ॥

सूत उवाच ॥

शृणुध्वं मुनयः सर्वे संयतात्मान एव हि।
क्षेत्राणां तीर्थराशीनां मध्ये श्रीपुरुषोत्तमं ॥
गुह्यं सर्वतमोध्वंसि सर्वपुण्यफलप्रदं।
अस्ति शर्मप्रदं चैव नीलभूधरभूषितं ॥
ऋषिकुल्यां समासाद्य या[व]द्वैतरणी नदी।
तावत्क्षेत्रस्य माहात्म्यं वर्तते मुनिपुंगवाः ॥
समुद्रस्योत्तरे तीरे महानद्याश्च दक्षिणे।
वटमारभ्य तत्क्षेत्रं राजमानं च पावनं ॥
वर्तते च तन्माहात्म्यं समंताद् दशयोजनं।
पदे पदे श्रेष्ठतमं भुक्तिमुक्तिफलप्रदं ॥
श्रीनीलाचलपर्यंतं तत्क्षेत्रं वर्तते तथा।
तत्र गंतुं समर्थास्ते ये वै विगतक्रमषः(°कल्मषाः) ॥
ये वै वैतरणीतीरे स्नात्वा भुक्तिससंयुताः(? °सुसंयुताः)।
गदाक्षेत्रपि(?°त्रेऽपि) तां देवीं विरजां तटवासिनीं ॥

दृष्ट्वा ते मनु(?मुनयो) योग्याश्चैकाम्रवनलोचने।
तत्र चैकाम्रकवने नीलकंठमुनीश्वरः ॥
स्नात्वा विंदुह्रदे(°ह्रदे) रम्ये दृष्ट्वा नः(?तं) शिवमुत्तमं।
ते च मर्त्यास्तथा योग्याः कोणार्कपरिलोकने ॥
सर्वक्षेत्रे पवित्रे ऽस्मिन् चंद्रभा[गा]नदीजले।
स्नात्वा ये सूर्यमत्युग्रं पश्यंति मुनिपुंगवाः ॥
क्षीणपापाश्च ते मर्त्याः क्षेत्रं श्रीपुरुषोत्तमं।
द्रष्टुं समर्थाः शुभदं पावनं धरणीसुराः ॥

इति श्रीपुरुषोत्तममाहात्म्ये नीलाद्रिमहोदये प्रथमो ऽध्यायः ॥

In the colophons of the other chapters the work is simply called *Srīkshetramāhātmya*, except *adhy.* 2, 3, 7, where the title is given as *Śrī-Purushottamamāhātmya*; whilst the designation *Nīlādrimahodaya* only appears again at the end of the work.

For a MS. of what professes to be the same work, assigned to the *Sūtasaṃhitā* of the *Skandapurāṇa*, and beginning in the same way (with the exception of the opening stanza), but consisting of 40 *adhyāyas*, see Rāj. Mitra, Notices, vi., p. 36. The brief analysis of the chapters there given does not, however, correspond to the contents of the present MS.; and, in spite of the same beginning, they may after all be two different works.

The last chapter (somewhat corrected) runs thus: सूत उवाच ॥

ब्रह्महत्यादिपापघ्नं निर्माल्यं जगतीपतेः।
जगन्नाथनैवेद्यं [च] महापातकनाशनं ॥
अक्षणात्फलमाप्नोति कपिलाकोटिदाननं(?)।
चंडालैरपि यत्स्पृष्टं तदन्नं द्विजसत्तमाः।
भोक्तव्यं सहसा विप्रैः पावनं देवदुर्लभं ॥
प्रतिजन्मनि यो भक्तो विष्णोः स्यात्परमात्मनः।
निर्माल्यं भोजने तस्य जायते विमला मतिः ॥
यज्ञास्तपांसि विप्रेंद्रा व्रतानि विविधानि च।
तीर्थानि [चापि] तेनैव कृतानि सुकृतानि च ॥
जगन्नाथस्य नैवेद्यं येन भुक्तं सुपावनं।
बहुना च किमुक्तेन सांप्रतं भूसुरोत्तमाः ॥



DR.RUPNATHJI( DR.RUPAK NATH )

गवां कोटिप्रदानाच्च वाजपेयशतात्तथा ।
अश्वमेधसहस्राद्वै राजसूयशतात्तथा ॥
व्रतोपवासो(?॰सतो) विप्रा यत्फलं जायते भुवि ।
तत्फलं समवाप्नोति जगन्नाथान्नभक्षणात् ॥
एवमुक्तं महेशेन पार्वतीं प्रति भो द्विजाः ।
कुकुरस्य मुखाद्भ्रष्टं तदन्नं दैवतैरपि ॥
तस्मात्तदन्नं सहसा प्राप्तमात्रं समश्नियात्(!) ।
साक्षाद्ब्रह्मस्वरूपो ऽयं जगन्नाथो न संशयः ॥
तस्यावलोकनान्मुक्तिस्तदन्नाशनतो द्विजाः ।
जगन्नाथान्नमेतद्वै शुष्कं कृत्वा तु मुक्तितः ॥
देशांतरे नरो यस्तु भक्षेत् प्रतिदिनं द्विजाः ।
सर्वपापविनिर्मुक्तः स गच्छेत्परमं पदं ॥
यस्यापि पाचिका लक्ष्मीर्भोक्ता च प्रभुरव्ययः ।
तस्मात्तस्य तु माहात्म्यं केन वक्तुं हि शक्यते ॥
ब्रह्मादिदेवनिचयप्रतिसेव्यमाने
नानामनोरथकरे पुरुषोत्तमाख्ये ।
क्षेत्रोत्तमे किल वसन् परमात्मरू[प]:
श्रीदारुरूपजगदीशकृतावतारः ॥
इति क्षेत्रमाहात्म्ये नीलाद्रिमहोदय[:] समाप्तः ॥ ३२ ॥

[MACKENZIE COLLECTION.]

## 3712.

**2161.** Foll. 79; size 11 in. by 3¾ in.; fairly written in Devanāgarī; ten lines in a page.

*Pushkaraprādurbhāva-ṭīkā*, or *Mitāksharā*, a commentary, by *Viśveśvara*, on a (*paurāṇik*) treatise on the nature of God (*Vishṇu*), in 26 *adhyāyas*.

It begins:

नत्वा नारायणं देवं वेदव्यासं मुनीन् गुरून् ।
कुर्वे ऽहं पुष्करप्रादुर्भावटीकां मिताक्षरां ॥

भविष्यन्निरूपणानंतरं पुष्करप्रादुर्भावकथां निरूपयितुकामस्तद्वीजभूतं जनमेजयप्रश्नमवतारयति । प्रभावमिति सार्धद्वयेन । पुष्करे भगवन्नाभिकमले पुरा यथा देवाः सर्षिगणाः उद्भूताः एतद्रूपं निखिलं पद्मनाभस्य योगं साख्याहीत्यन्वयः। कीदृशस्य पद्मनाभस्य। सागराभसि स्वपतः। कीदृशं योगं। प्रभावं प्रभवत्यस्मादिति प्रभावस्तत्प्रभावं सृष्टिकारकमित्यर्थः। ननु महाभारतादावगतकल्पमप्यर्थं कथं पुनः पृच्छसीत्यत आह । एतदिति । तस्य भगवतः कीर्तिं शृण्वतो मे तृप्तिर्नाभिजायते । अतो ऽवगतमेतद्रूपं परमेश्वरस्य योगं कथयेदित्यर्थः । आशंकानिरासपूर्वकं तस्यैवाधेस्योपसंहृतत्वात् न पुनरुक्तिर्दोषः । इत्येकः प्रश्नः ॥ २ ॥ द्वितीयं प्रश्नमाह । कियंतमिति । ॰

It ends:

पुष्कराख्यया देवः पूजितः पुष्करेक्षणः ।
पद्मिनीपत्रवत् कुर्यात् ऋलेपं मां भवे स्थितं ॥

इति श्रीपुष्करटीकायां विश्वेश्वरविरचितायां षड्विंशोध्यायः॥२६॥ श्रीमत्काशीवास्तव्यं उदीच्यज्ञातीयपुरोहितरामात्मजेन देवदत्तेन लिखितं ॥ संवत् १९४४ समये ॥ श्लोकग्रंथ २५६० ॥

[GAIKAWAR.]

## 3713.

**519 a.** Foll. 121; size 9⅝ in. by 3¾ in.; fair, modern Devanāgarī writing; nine lines in a page.

*Brahmavidyāmahodadhi*, or *Bhaktakāmakalpadruma*, a sectarian treatise, of the *Paurāṇik* order, in 26 *adhyāyas*, intended to inculcate faith in *Śiva*.

The work is composed in the form of a dialogue between *Sūta* and the *Ṛishis*; *Śiva* and a disciple being introduced therein as the chief interlocutors on topics of worship.

It begins:

कदाचिन्नैमिषे रम्ये पुण्यारण्ये महर्षयः ।
शौनकाद्याः कृतप्रातर्विधयो दीप्ततेजसः ॥ १ ॥
प्रणिपत्य ततः सूतं प्रार्थयामासुरादरात् ।
त्वन्मुखाच्च पुराणानि श्रुतान्यपि बहूनि च ॥ २ ॥
तथापि न मनः शांतिं लेभे दुर्धरमस्थिरं ।
तनुते संशयव्रातान्वयं तेनातिविह्वलाः ॥ ३ ॥
तस्मादस्मन्मनः शांतं येन वा साधनेन वै ।
भविष्यति च तद् ब्रूहि यदि ते ऽस्मास्वनुग्रहः ॥ ४ ॥
सूत उवाच ॥
महानेष कृतः प्रश्नो युष्माभिर्मुनिसत्तमाः ।
मनःस्थैर्याय बहवो ऽप्युपायाः साधनानि च ॥ ५ ॥
उक्तानि संति तत्रैकः साधुसंगो ह्युपायराट् ।
सत्तुं विना कृतं यद्यत्तच्छ्रमायैव नान्यथा ॥ ६ ॥

DR.RUPNATH(DR.RUPAK NATH)

सङ्गादेव हि साधूनां ज्ञानप्राप्तिर्विनिश्चिता ।
ज्ञानादेव तु कैवल्यमित्येव श्रुतिशासनं ॥ ७ ॥
ऋषय ऊचुः ॥
अस्माभिः श्रुतमेकं यत्पुराणादौ भवन्मुखात् ।
काश्यां तु मरणादेव मुक्तिः स्यात्सर्वदेहिनां ॥ ८ ॥
किमेतद्वद नो नाथ संशयो ऽभून्महानसौ ।
त्वां विना संशयच्छेत्ता ह्यस्माकमस्ति किं भुवि ॥ ९ ॥
तदेव श्रवणं यानं(? श्रावणं पानं) भुक्तं चापि तदेव हि ।
जीवितं हि तदस्माकं त्वन्मुखाद्यद्विनिःसृतं ॥ १० ॥
सूत उवाच ॥
एवमेव पुरा पृष्टः शिवः शिष्येण धीमता ।
तदा प्रश्नोत्तरैस्तस्य संशयानहरद्विभुः ॥ ११ ॥
शृणुध्वं भो महाभागास्तामेवातिशुभां कथां ।
समाहितेन मनसा सावधानतयानघाः ॥ १२ ॥ °

*A.* I. *śivabhuvanacitsvarūpavarṇanam*, 99 vv., ends fol. 7*a*; II. *sudarśanam*, 160 vv. (86–139 of which are wanting), fol. 14*a*; III. *jīvotpattivivaraṇam*, 69 vv., fol. 18*b*; IV. *śrutyāśayavivaraṇam*, 39 vv., fol. 21*a*; V. *gṛihasthāśramatimiratamo'riḥ*, 44 vv., fol. 24*b*; VI. *śrutyāśayavivaraṇe kāminīvishayakarikesarī*, 43 vv, fol. 27*b*; VII. *śruty. mahāmohārṇavaghaṭodbhavaḥ*, 91 vv., fol. 33*b*; VIII. *śruty. purāṇaśravaṇānukathanam*, 55 vv., fol. 37*b*; IX. *yajñavidhvaṃsanadhūrjaṭiḥ*, 60 vv., fol. 41*b*; X. *devārcanacandrikāmārtaṇḍaḥ*, 64 vv., fol. 46*b*; XI. *śruty. vratamṛigakesarī*, 81 vv., fol. 51*b*; XII. *śruty. palitapavanam*, 45 vv., fol. 54*b*; XIII. *śruty. brāhmaṇastavaḥ*, 36 vv., fol. 57*a*; XIV. *śruty. vānaprasthasannyāsādiveshaviḍambaḥ*, 64 vv., fol. 61*a*; XV. *śishyavairāgyāvishkaraṇam*, 54 vv., fol. 64*b*; XVI. *śishyoktikumudinīpūrṇacandrodayaḥ*, 47 vv., fol. 67*b*; XVII. *sadgurumāhātmyānuvarṇanam*, 55 vv., fol. 71*a*; XVIII. *saṃsāratimiratamo'riḥ*, 90 vv., 77*a*; XIX. *aiśasūkshmānuvarṇanam*, 58 vv., fol. 81*a*; XX. *aiśasthūlānuvarṇanam*, 106 vv., fol. 88*a*; XXI. *vairāgyavanavasantaḥ*, 133 vv., fol. 96*b*; XXII. *tattvotpattikāraṇalakshaṇānuvarṇanam*, 104 vv., fol. 103*b*; XXIII. *mokshaniḥśreṇikā*, 89 vv., fol. 109*b*; XXIV. *kaivalyakuñcikākhyam*, 76 vv., fol. 114*b*; XXV. *śishyasvānandānubhavodgārapracaṇḍajhañjhānilaḥ*, 54 vv., fol. 118*a*; XXVI. *jñānavairāgyavījakathanam*, ends: सूत उवाच ॥

सम्यक्पृष्टं मुनिश्रेष्ठा यूयं धन्यतमोत्तमाः ।
साधुपादरजःस्पर्शाद्वो ऽनुस्मृता भवेद्रतिः ॥ ४५ ॥
ज्ञानवैराग्यजिज्ञासां स्वपदे दार्ढ्यदायिनीं ।
परां कृतवतां विप्रास्त्वभवन्मतिरुज्ज्वला(? °भवे°) ॥ ४६ ॥
एवमेव स शिष्यो ऽपि श्रुत्वा सर्वं गुरूदितं ।
मुहुः संप्रणमन्हृष्यल्लुप्यन्निदमुवाच ह ॥ ४७ ॥
पुराणमेकं शिवमद्वितीयं सर्वांतरात्मानमनंतमव्ययं ।
परात्परं सुंदरविग्रहं मुदः कोपि भक्त्या प्रणमेत्समे गुरुः [॥ ४८ ॥

इति श्रीमद्भक्तकामकल्पद्रुमे ब्रह्मविद्यामहोदधौ ज्ञानवैराग्यबीजकथनं नाम षड्विंशतितमो ऽध्यायः । समाप्तश्चेदं ब्रह्मविद्यामहोदधिर्ग्रंथः ॥ [H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3714.

**2638.** Foll. 46; size 10¾ in. by 3¾ in.; fair, modern Devanāgarī writing; 9–11 lines in a page.

*Mathurāsetu*, a compilation—by *Anantadeva*, son of *Āpadeva*—of passages from the *Purāṇas* extolling the sanctity of Mathurā, on the Yamunā, and its neighbourhood, the ancient seat of *Kṛishṇa* worship, and describing the ceremonies to be performed there; interspersed with the compiler's own remarks and comments. It begins:

समस्तब्रह्मांडान्युदरविवरे यस्य सततं
वसंति ध्यायंति स्वहृदि तपसा पंच मुनयः ।
स यस्यां क्रीडायै स्पृहयति वनाद्यन्वितततनौ
मुनीनैषा लोके जयति भवसिंधोर्मधुपुरी ॥ १ ॥

इह खलु सकलवैष्णवजनसमुचितमार्गप्रदर्शनाचार्यधुर्यवरीयप्रभृतीनां परमपुरुषार्थप्रापकतया प्रसिद्धतममपि माथुरमंडलमहिमानं तत्रैव सतां हरिकेशवगोविंदनामानं भगवंतमनन्यशरणतया भजतां तत्र भवतां सतां संतोषजननेन वा सकलतायै प्रदर्शयामः । तत्र तावद्गोपालतापिन्यामुपनिषदि । यथा वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठति° (G. T., II., 29) ॥

The *Vāsudevopanishad* is also referred to once (fol. 36*a*, l. 3), the *Mahābhārata* occasionally.

It ends: इत्यनंतदेवीये ० (मथुरासेतौ) भक्तेरनुभावादि ॥ तस्माद्युक्तमुक्तं प्रेमभक्तेः स्वतः पुरुषार्थत्वादपि तत्प्रार्थनमुचितमिति । अन्येषां भगवत्प्रीत्युपायानां भगवन्नामसंकीर्तनादीनां श्रुत्याद्यनेकमानैर्महिमप्रदर्शनमस्मत्पितामहैर्भक्तिविवेके कृतमस्तीति नेहोच्यते । तथा भगवत्पूजाविधिः सर्वोपक्रमदीपिकाद्युक्तप्रकारको दोलोत्सवादिनानाविधपरिचर्याविधिसहितः सप्रमाणः विस्तरो ऽस्मत्तातचरणसंकल्पोत्थिते भक्तिकल्पतरावेव निरूपितो ऽस्तीति नेह निरूप्यते ।

वासुदेवाभिधब्रह्म जगदिंदुतया स्थितं ।
माथुरे मंडले नित्यं जगत्यानंदकारि नः ॥ १ ॥
आसीद्गोदावरीतीरे ० (p. 442, vv. 13–16) ॥ २–५ ॥
तदीयसूनुर्निजवंशदेवं श्रीकेशवं तोषयितुं चकार ।
अनंतसंज्ञो मथुरामहिम्नः सेतुं सदा कांक्षितपूर्तिहेतुं ॥ ६ ॥
अनुचिततममप्यर्थं ब्रुवती बालस्य गीः स्वतो ऽनुचिता ।
रचयति पित्रोस्तोषं वागेषा स्यात्तथास्तु देहवतां ॥ ७ ॥

इति श्रीमत्सकलशास्त्रार्थतत्त्वविद्वैष्णवसन्मार्गप्रतिपादनैकप्रयोजनगृहीतावतारश्रीमदापदेवसुतानंतदेवेन कृतमथुरासेतुः समाप्तः ॥ [Mackenzie Collection.]

## 3715.

**947**a. Foll. 18; size 12 in. by 4¼ in.; good Devanāgarī writing of 1624 a.d.; 10 or 11 lines in a page.

*Mathurāmāhātmya*(?), a similar compilation of extracts from the *Purāṇas*, celebrating the Mathurā district—near the Madhuvana, where *Hari* slew the *daitya Madhu*.

It begins:

हरिरपि भजमानेभ्यः प्रायो मुक्तिं ददाति ननु भक्तिं ।
विहिततदुन्नयति सत्री(?) मथुरे धन्यां नमामि त्वां ॥
धन्यानां हृदयानंदपदं संगृह्यते मुदा ।
माहात्म्यं मथुरापुर्याः सर्वतीर्थशिरोमणेः ॥

तत्रास्याः पापहारित्वं आदिवाराहे ।
विंशतिर्योजनानां तु माथुरं मम मंडलं ।
यत्र तत्र नरः स्नातो मुच्यते सर्वपातकैः ॥ ०

Most of the qnotations are taken from the *Mathurākhaṇḍa* of the *Skandapurāṇa* and the *Vārāhapurāṇa* (constantly quoted as *Ādivārāha*); the other *Purāṇas* laid under contribution being the *Bhāgavata*, *Vāyu*, *Pādma* (*Nirvāṇakhaṇḍa*, *Pātālakh.*, *Uttarakh.*, *Kārttikamāhātmya* and *Yamunāmāhātmya*), *Brahmāṇḍa*, *Vishṇu*, *Saura* and *Brahmavaivarta*.

It ends: अथ माथुरदेवताः ।

नारायणोऽपर्यायः केशवो मध्यसंस्थितः ।
स्वयंभूः पद्मनाभश्च दीर्घविष्णुर्गतश्रमः ॥
गोविंदो हरिवाराहाविति [माथुर]देवताः ।
मथुरायाश्च माहात्म्यं सवणया(?सवनाया) महाद्भुतं ॥
गोपालोत्तरतापन्यामन्यदप्यस्ति कीर्तनं ।
तीर्थान्युक्तानि भूरीणि पुराणेष्वत्र माथुरे ॥
अमुना यमुनासख्यमथुराय मधुद्विषं(!) ।
माहात्म्यसंग्रहेणाद्य मुदमापद्यतामपि ॥

For the genuine *Mathurāmāhātmya*, forming part of the *Vārāhapurāṇa*, see Aufrecht, Cat. Bodl., nos. 107-8. [H. T. Colebrooke.]

## 3716.

**29**a. Foll. 59; size 9½ in. by 4½ in.; fair Devanāgarī writing of 1797 a.d.; eight lines in a page.

*Mahāpurushavidyā*, also called *Jagannāthamāhātmya* (or *Purushottamamāhātmya*), in nine *adhyāyas*, containing speculations on the nature of *Mahāpurusha-Vishṇu*, and descriptions of the sacred places of Purushottamakshetra (Purī).

It begins:

वंदे ऽहं परमानंदं नीलाचलपतिं प्रभुं ।
संसारांभोधिमग्नानामुद्धारणपरायणं ॥ १ ॥

शौनक उवाच ॥

सूत सूत महाभाग वेदतत्त्वार्थकोविद ।
व्यासशिष्य महाबुद्धे यत्पृच्छामि तदुच्यतां ॥ २ ॥
कस्माज्जातमिदं विश्वं कस्मिंश्च लयमेष्यति ।
कुत्र तिष्ठति कः कर्ता विश्वस्यास्य वदस्व मां ॥ ३ ॥

DR RUPNATH(DR RUPAK NATH)

संसारांभोधिमग्नानां कोद्धर्ता(!) स्मृतिमात्रतः ।
ब्रह्मादीनां परेशानां कः प्रभुस्तं वदस्व मां ॥ ४ ॥
सूत उवाच ॥
आदिमध्यांतरहितः सच्चिदानंदरूपवान् ।
सर्वदेहांतसारार्थो हरिरित्यभिधीयते ॥ ५ ॥
तस्मा[ज्जा]तमिदं विश्वं तस्मिंश्च लयमेष्यति ।
तस्मिंस्तिष्ठति सोद्धर्ता(!) स्मरणात्सर्वदेहिनां ॥ ६ ॥
ब्रह्मादीनां परेशानां प्रभुः स परमेश्वरः ।
नानारूपैः स विश्वेशो याति सर्वान् चराचरान् ॥ ७ ॥
शौनक उवाच ॥
ब्रूहि रूपाणि सर्वज्ञ विष्णोः सर्वमयस्य मे ।
धृत्वा यानि जगन्नाथो याति विश्वमिदं सदा ॥ ८ ॥ °

It ends: सूत उवाच ॥

इत्युक्त्वा भगवांस्तस्मै त्वत्प्रसादं(स्वप्र°) सुदुर्लभं ।
ददौ विनयनम्राय कृपया परया मुने ॥
लब्ध्वा प्रसादं स मुनिर्जीवन्मुक्तो बभूव ह ।
उवास सुचिरं कालं गायंस्तस्य यशो ऽमलं ॥
एतत्सर्वं मयाख्यातं तुभ्यं शुश्रूषवे मुदा ।
मयापि नारदादेव विशालां(°लायां) श्रुतं मुने ॥

The colophons of the first eight chapters run: इति महापुरुषविद्यायां° ऽध्यायः ॥ whilst the last is: इति महापुरुषविद्यायां जगन्नाथमाहात्म्ये नवमो ऽध्यायः ॥ The leaves are marked ज° म°.

See Rāj. Mitra, Notices, ii., pp. 231, 232, where the colophon runs thus: इति श्रीमहापुरुषविद्यायां विष्णुरहस्ये क्षेत्रकाण्डे श्रीपुरुषोत्तममाहात्म्ये प्रसादवैभवं नाम नवमो ऽध्यायः ॥

Cf. Rāj. Mitra, Orissa, p. 100.

[H. T. Colebrooke.]

## 3717.

1177d. Foll. 36; size 13 in. by 4¾ in.; clear, modern Bengālī handwriting; eight lines in a page.

*Mukticintāmaṇi*, a compilation of *paurāṇik* and other passages bearing on *Vaishṇava* worship and observances, especially on pilgrimages to Purushottamakshetra (Purī).

It is arranged in three chapters: I. *Kshetrakāṇḍa* (ending fol. 19*a*); II. *Darśanakāṇḍa* (fol. 29*a*); III. *Prasādakāṇḍa*.

It begins: नारायणं नमस्कृत्य ° ॥

नीलाद्रौ तन्नदर्थिभ्यो दातुमर्थचतुष्टयं ।
अदृश्यो नेत्रपदवीं यातो यस्तं हरिं नुमः ॥ १ ॥
मायामोहानलज्वालादग्धज्ञानाङ्कुरं नरं ।
यो ऽनेकधा मोचयते कृपालुं तमहं भजे ॥ २ ॥
नानागमस्मृतिपुराणमहाब्धिमध्याद्
उद्धृत्य बुद्धिमथनेन हरेः प्रसादात् ।
वाक्यानि यानि विलिखामि विमुक्तये ऽहं
सन्तस्तदर्थमनिशं परिशीलयन्तु ॥ ३ ॥
विनाप्यष्टाङ्गयोगेन विनाप्यनशनादिना ।
मुक्तिचिन्तामणिस्त्वेष मोक्षदः सर्वदेहिनां ॥ ४ ॥

तत्र श्रीजगन्नाथदर्शनकीर्तननिर्माल्यभक्षणान्यनारङ्गबहिरङ्गभावेन मोक्षसाधनानि तत्रादौ तावन्मोक्षस्य परंपरया साधनीभूतक्षेत्रे ब्रह्मपुराणादिवचनानि प्रमाणमाह । अत्र क्षेत्रकाण्डः । तत्र प्रथमं दारुब्रह्मावतारप्रमाणं । तद्यथा पद्मपुराणे । °

It ends:

तत्र विष्णुभक्तिप्रसङ्गे इन्द्रद्युम्नं प्रति नारद उवाच ॥
प्रयागतीर्थप्रमुखतीर्थानि च तपांसि च ।
अश्वमेधक्रतुवरो दानानि सुमहान्ति च ॥
व्रतोपवासनियमाः सहस्राब्दार्जिता अपि ।
समूह एषामेकत्र गुणितः कोटिकोटिभिः ।
विष्णुभक्तेः सहस्रांशसमो ऽसौ न हि कीर्तितः ॥

इति मुक्तिचिन्तामणौ प्रसादकाण्डः ॥ श्रीभैरवचन्द्रदेवशर्मणो लिपिरियं ॥

[H. T. Colebrooke.]

## 3718.

1066. Foll. 53; size 5¾ in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

*Mukticintāmaṇi*, a similar compilation — perhaps by the same author — of *paurāṇik* passages distributed under three headings: I. *Śrījagannāthasthitiprakaraṇa* (ending fol. 9*b*); II. *Kshetramāhātmyaprakaraṇa* (fol. 26*b*); III. *Jagannāthadarśanaphalaprakaraṇa* (?).

DR.RUPNATHJI( DR.RUPAK NATH )

It begins with the same four introductory verses as the last treatise, preceded, however, by four verses containing an enumeration of the *Purāṇas* (in the *Bhāgavata* and *Vishṇu-purāṇa* order); and with an additional half-*śloka* inserted between v. 1 and 2 in MS. 1177*d*. The verses are followed by the same prose introduction (तत्र ॰ प्रमाणमाह ।), followed by तत्र ब्रह्मपुराणे ।

It ends:

नानापुराणगदितं भवसागरमोचनं ।
मुक्तिचिंतामणिं श्रुत्वा जयते मुक्तिभाजनं ॥ ९९ ॥

इति श्रीनानागमस्मृतिपुराणोक्तमुक्तिचिंतामणिग्रंथः समाप्तः ॥

[H. T. Colebrooke.]

## 3719.

**1259a.** Foll. 43; size $8\frac{1}{4}$ in. by $3\frac{3}{8}$ in.; neat Devanāgarī writing of about 1700 A.D.; 7 or 8 lines in a page.

*Yāgīśvaramāhātmya*, an account of the *liṅga* Yāgīśvara—famed for the wonderful help it afforded to *Kuśa*, the son of *Rāma*, in reconquering his paternal dominion, from which he had been expelled—by *Lakshmīpati* (son of *Viśvarūpa*, and grandson of *Jayadeva*), a *paṇḍit* in the service of *Jñānacandra*, Mahārāja of Kūrmacalendra.

The author, relating the story of *Kuśa* to his elder brother *Vīreśvara*, begins thus:

त्यक्ता यागीश्वरक्षेत्रमहमत्रागतो ऽस्मि वै ।
गतिः का वा मम भ्रातः संभविष्यति तद्वद ॥
एवमाकर्ण्य वचनं वीरेश्वरगुरोर्मुखात् ।
लक्ष्मीपतिर्यथाज्ञानं यागीश्वरहरस्य तु ॥
माहात्म्यं कथयामास सर्वपापप्रणाशनं ।
शरय्वा दक्षिणे भागे यदस्ति दारुकाननं ॥
तत्र यागीश्वरक्षेत्रमिदं यत्परमेशितुः ।
तत्सामान्यं न मंतव्यं नृभिः पातकनाशकं ॥
कुशेन रामपुत्रेण ह्यत्रागत्य तु पातकं ।
निखिलं नाशितं स्वस्य वशिष्ठस्याज्ञया द्रुतं ॥
निजरामस्य क्षेत्रस्य स्वल्पता केन भूतले ।
वक्तव्या जानता किंचित्संसारभयभीरुणा ॥
कुशेन भूतले लीनां जानकीं वीक्ष्य मानसे ।
रामस्य हनने बुद्धिस्तत्काले विहिता स्थिता ॥
तत्पापवशतो रामे स्वर्गते सति राजभिः ।
कुशो विनिर्जितः शीघ्रं बलिभिः कुशशत्रुभिः ॥
नृपैर्विमर्दितां वीक्ष्य राजधानीं स्वकां कुशः ।
दुःखसागरसंपन्नो वशिष्ठस्यांतिके जगौ ॥ ॰

On the locality of the *liṅga* we read, fol. 6*a*:

यावद्यागीश्वरो देवो दारुकाननसंस्थितः ।
जटागंगातीरसंस्थो दृश्यते न त्वया प्रभो ॥
तावत्पितृहननोद्भूतपातकोपशमो न हि ।
जायते किल भूमीश तस्माद्यागीश्वरं व्रज ॥

The name of the *liṅga* (=Yāgeśvara) finds its explanation in the following passage (fol. 29*a*):

ब्रह्माणमागतं वीक्ष्य बृहस्पतिपुरोगमाः ।
ऋषयस्तु मरीच्याद्या आगताः शिवतत्पराः ॥
तैर्ब्रह्मा बोधितः सम्यग्यज्ञार्थं यज्ञकोविदैः ।
ब्रह्मणा शिवतुष्ट्यर्थं यागः संविहितो महान् ॥
यैः शिवस्य धरायां तु लिंगं संपातितं स्थितं ।
ऋषिभिस्तैश्च पापस्य शांत्यर्थं शिवतुष्टये ॥
शिवस्तोमाभिधो यागः कृतः सौख्यप्रदायकः ।
तस्मिन्विहिते तेषामंधत्वमगमत्क्षयं ॥
प्रादुर्भूतं शिवस्यापि लिंगं देहैकदेशकं ।
तदारभ्य इदं क्षेत्रं यागेश्वरतया भुवि ॥
कथ्यते येन यागो ऽत्र क्रियते तस्य चातुलं ।
फलं संजायते यागः सर्वैरत्र विधीयते ॥

It ends:

अतः परं महेशानं नीलग्रीवं त्रिलोचनं ।
प्रणिपत्य गृहे याहि पालयस्व यथासुखं ॥
एवमुक्त्वा महाभागो दशकंधरनाशकः ।
यागीश्वरहरं नत्वा गतश्चादर्शनं हरिः ॥
कुशो ऽपि भक्तिभावेन नत्वा यागीश्वरं हरं ।
संभाजयित्वा तत्रत्यान्विप्रान् स्वनगरीं प्रति ।
गतो हर्षान्वितः शत्रुभयदो मित्रहर्षदः ॥
विजित्य निखिलांस्तत्र सामंतान्समरांगणे ।
पालयामास स्वं राज्यं मृतानाममृतप्रदं ॥

DR.RUPNATHJI( DR.RUPAK NATH )

इदानीं पथ्यसमयो वर्तते भवतां गुरोः ।
भवद्भिर्भुज्यतां पथ्यं कथा प्रातर्भविष्यति ॥

विश्वविख्यातभूदेवजयदेवात्मजो महान् ।
विश्वरूपः स्मृतो लोके चत्वारस्तत्सुताः स्मृताः ॥

तेषामाद्यः श्रीनिवासो नाम तुल्यगुणैर्युतः ।
वीरेश्वरो द्वितीयस्तु विद्याविनयविक्रमी ।
विद्याललामसंपन्नो विद्यापतिरभूत्परः ॥

लक्ष्मीपतिश्चतुर्थस्तु तस्य या लिपिमालिका ।
विदुषां चित्तकमले भ्रमरीवास्तु सादृशं(? तादृशी) ॥

इति श्रीकूर्माचलेंद्रमहाराजश्रीज्ञानचंद्राश्रितश्रीलक्ष्मीपति-पंडितविरचितं यागीश्वरमाहात्म्यं संपूर्णं ॥

[H. T. Colebrooke.]

## 3720.

2512. Foll. 64; size $10\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; neat Devanāgarī writing of about 1450 A.D.; eighteen lines in a page.

*Rāmanāmamāhātmya*, a compilation of passages illustrative of *Vaishṇava* duties and doctrines, by *Acyutāśrama*; accompanied by the author's own notes and explanations.

It begins:

चिद्बोधं चिद्गुणं चैकं चिद्रूपं त्वखिलं जगत् ।
कवीनां भाति यज्ज्ञानात्तं विष्णुं नौमि चित्सुखं ॥ १ ॥

मायया यो विचित्राभस्तथाहंममता नृणां ।
सद्यो नश्यंति पापौघा नमस्तस्मै चिदात्मने ॥ २ ॥

यस्य स्मरणमात्रेण न मोहो नैव दुर्गतिः ।
न रोगो नैव दुःखानि तमनंतं नमाम्यहं ॥ ३ ॥

यस्य स्मरणमात्रेण जन्मसंसारबंधनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ४ ॥

त्रितनुर्नटवद्यस्तु सृष्टिस्थितिलयेषु च ।
गुणैर्भवति कार्येषु स प्रसीदतु मे हरिः ॥ ५ ॥

नारायणो जगद्व्यापी यदि वेदादिसंमतः ।
सत्येन तेन निर्विघ्ना विष्णुभक्तिर्ममास्तु वै ॥ ६ ॥

पूर्वं मन्वाद्यष्टादशस्मृतिषु मन्वादिभिः श्रीविष्णुनाम जाप्यं पापकृतां प्रायश्चित्तं स्मृतं । तत्र विष्णुराह । °

But, in reality, *Paramānanda's* commentary only reaches as far as IV. 94 (fol. 243*a*), after which what here passes under his name is really the commentary of *Mahādeva Bhaṭṭācārya*, as even a cursory comparison with MS. 381 (no. 3838) shows. In the margin, at the beginning of the comment on each verse, the commentary is throughout marked *Paramānandīyā*, except at the beginning of the comment on I., where, in the margin, the author is called *Rādhākṛishṇacakravartin*, whilst, at the end of the comment on that verse, the (first part of this) name has been corrected into *Paramānanda*(*-kṛitā vyākhyā*).

IV. *Subodhā*, by *Bharatasena*, son of *vaidya Gaurāṅgamallika.*

It begins:

नत्वा शङ्करजातं वैद्याद्गौराङ्गमल्लिकाज्जातः ।
श्रीभरतस्तनुते ऽमूं नैषधटीकां सुबोधाख्यां ॥

महाकविः श्रीहर्षो नैषधीयचरितं नाम महाकाव्यं चिकीर्षुः° वस्तुनिर्देशरूपं महाकाव्यलक्षणं प्रणयन्नाह । निपीयेत्यादि । °

It ends: एवमष्टादशभिर्नलभैमीविलासावच्छिन्नश्चतुर्थः परिच्छेदः ॥ इति हरिहरखानवंशसंभवगौराङ्गमल्लिकात्मजश्रीभरतसेनकृतायां नैषधीयटीकायां द्वाविंशति[तम]: सर्गः ॥

[H. T. COLEBROOKE.]

## 3832.

**1955.** Foll. 131 (counted 130, no. 82 being double); size 10 in. by 4½ in.; good Jaina writing of about 1600 A.D.; 21–24 lines in a page.

*Naishadhīyacarita, sargas* I.–X.; with a concise commentary, called *Naishadhadīpikā*, by *Narahari*, son of *Svayambhū* (held in reverence by some king in the Telinga country) and *Nālamā*, and the pupil of *Vidyāraṇya Yogin.*

It begins:

पारं प्रबंधांबुनिधेः प्रयातुं
यत्नः किल स्यादपराश्रयाय ।
हेलाविनिर्धूतसमस्तविघ्नं
हेरंबमालंबनमाश्रये ऽहं ॥ १ ॥

त्वदनुग्रहलेशमात्रलोभाद्
इयमुच्छृंखलगामिनी मनीषा ।
अपकर्षति मामगम्यभूमौ
वरदा मे भव शारदे नमस्ते ॥ २ ॥

अज्ञानतिमिरपाटनपटीयसीं शुभगुणोदयोल्लसितां ।
नीराजनाय करवै प्रदीपिकां काव्यसम्राजः ॥ ३ ॥

न मम मतिविलासो वासनाभ्यासजन्यो
विविधबहुनिबंधस्कंधसंवाहनं वा ।
तरलयति मनो मे केवलं नैषधीयं
चरितमखिललोकश्लोकनीयं कवेश्च ॥ ४ ॥

समुत्सहे गूढरसार्थसारं
विगाहितुं काव्यमिदं जडो ऽपि ।
अजातदंता अपि खंडगोलं
कुतूहलादाकलयंति बालाः ॥ ५ ॥

असंनिधावन्यनिबंधनानां
कदापि कुर्यादपकारमेतत् ।
तरंगिणीनां तरणेरभावे
तुंबीफलेनापि तरंति पूरं ॥ ६ ॥ ° ८ ॥

प्रमादाशक्त्यादेरिह महति गंभीरगहने
सतामप्यर्थानां क्वचिदपि निबंधो ऽपि न भवेत् ।
अथाप्यस्मादेतन्न खलु मम दोषाय निखिलं
समुच्चेतुं शक्तः क इव जलधौ रत्ननिचयं ॥ ९ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

विषमे काव्यहेमाद्रौ स्खलतो मे पदे पदे ।
विबुधाः करुणाः साराः संतु संतो ऽवलंबनं ॥ १० ॥

I. ends fol. 21*b*; II., fol. 32*b*; III., fol. 45*b*; IV., fol. 59*b*; V., fol. 73*a*; VI., fol. 83*a*; VII., fol. 92*b*; VIII., fol. 102*b*; IX., fol. 128*a*; X., fol. 130*b*.

It ends: व्यरंसीत् व्याङ्परिभ्यो रम इति परस्मैपदं । शेषं व्याख्यातचरं ॥ ० इति नैषधदीपिकायां दशमः सर्गः ॥ ० ॥

यं प्रासूत त्रिलिंगक्षितिपतिसततताराधितांह्रिः स्वयंभूः
पातिव्रत्यैकसीमा सुकविनरहरिं नालमा यं च माता ।
यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां
स्वैरं नीराजितो ऽभूदतिललितपदो दिग्मितो सर्ग एषः ॥

For a MS. of the complete work see Rāj. Mitra, Notices, iv., p. 101.

[DR. JOHN TAYLOR.]

## 3833–3835.

**960, 961, 962.** Foll. 324, 335, and 359; size 9¾ in. by 4 in.; fair Devanāgarī writing of 1797–98 A.D.; 8–12 lines in a page.

*Naishadhīyaprakāśa*, by *Nārāyaṇa*, son of *Narasiṃha Paṇḍita Vedarkar*, without the text. [B.] Rather incorrect.

For MS. A see nos. 3830, 3831.

The MS. is made up from copies in two or three different hands, and each canto is paged separately:—

Vol. I.: *sargas* I.–VIII., foll. 69, 44, 52, 38, 43 (counted 44, no. 18 being double), 26, 30, 22. *Sarga* IV. is dated Saṃvat 1854.

Vol. II.: *sargas* IX.–XVI., foll. 47, 27, 40, 47, 39, 43, 40, 52. *Sarga* IX. is dated Saṃvat 1835.

Vol. III.: *sargas* XVII.–XXII., foll. 91, 60, 40, 48, 68 (counted 66, no. 53 occurring thrice), and 52. The commentary on canto XVII. is by *Śesharāmacandra*; see above, p. 1437*a*.

[H. T. COLEBROOKE.]

## 3836.

**2534a.** Foll. 49 (missing fol. 2) & 30 (missing fol. 4); size 10½ in. by 4½ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

*Naishadhīyacarita, sargas* I. and II., with *Nārāyaṇa's Prakāśa*. [C.]

Fol. 1 is badly injured on the right-hand side.

[GAIKAWAR.]

## 3837.

**227.** Foll. 237; size 15 in. by 4¾ in.; good, modern Bengālī handwriting; 8–10 lines in a page.

*Bharatasena's Subodhā* on the *Pūrva-Naishadha* (*sargas* I.–XI.), without the text.

The MS. was copied by three different hands: *sargas* I. and II., ending on foll. 37*a* and 56*b*, by one hand; *sargas* III. and IV., ending on foll. 90*b* and 120*b*, by another; and *sargas* V.–XI., ending on foll. 132*b*, 142*a*, 159*b*, 175*a*, 198*b*, 204*b*, and 237*a*, by *Bholānātha Śarman*.

[H. T. COLEBROOKE.]

## 3838.

**381.** Foll. 112; size 16 in. by 5¼ in.; good, modern Bengālī handwriting; nine lines in a page.

*Naishadhīyaṭīkā*, a commentary on the first part (*sargas* I.–XI.) of *Harsha's* poem, by *mahāmahopādhyāya Mahādeva-śarman bhaṭṭāchārya*.

It begins:

श्रीरामचरणौ नत्वा महादेवाख्यशर्मणा ।
नैषधीयप्रबन्धो ऽस्मिन्नतिसंक्षिप्य लिख्यते ॥
तत्र द्वाविंशतिः सर्गाः श्रीहर्षकविना कृताः ।
नलभैम्यभिधाप्राप्तशिवदुर्गागुणैः प्रियाः ॥
तत्रादौ भीमजारूपश्रवणाद्विरहीमियात् (० मयात्) ।
गत्वा वनं सरस्तीरे धृत्वा हंसं नलो ऽत्यजत् ॥



DR.RUPNATHJI(DR.RUPAK NATH)

द्वाविंशत्यवतारसर्गविलसच्छोभश्चतुर्वर्गदः
श्रीहर्षान्वयभृत्परिष्कृततनुर्वाख्यातिसंस्कारया ।
तत्तद्वादिमतान्वितो नलगुणप्रेष्ठो विदीमोदया
नानालंकृतिमान् विभातु हृदये विष्णुः प्रबन्धो ऽप्ययं ॥
तत्रादौ महाकाव्याङ्गभूतं वस्तुनिर्देशमाह ।
निपीयेति °

I. ends fol. 16*a*; II., fol. 25*b*; III., fol. 35*b*; IV., fol. 44*a*; V., fol. 53*a*; VI., fol. 61*b*; VII., fol. 71*a*; VIII., fol. 77*b*; IX., fol. 89*a*; X., fol. 100*b*; XI., fol. 112*a*.

It ends (without colophon): शृङ्गार एवामृतं तस्य चन्द्रे यथा चन्द्रो ऽमृताश्रयः तथायमपि शृङ्गाररसाश्रय इत्यर्थः ॥

The colophons of the other cantos give the author's full name and title. On the last page Colebrooke's Paṇḍit calls him *Mahādeva Vidyāvāgīśa*. [H. T. COLEBROOKE.]

## 3839.

**1284.** Foll. 107 (counted 117, nos. 40–49 being passed over); size 13 in. by 4¾ in.; modern Bengālī handwriting; seven lines in a page.

*Naishadhaṭīkā*, or *Manohāriṇī*, a commentary, by *Śrīvatsa*, son of *Narahari* and *Lakshmī*. A fragment extending from the beginning to IV. 55. Rather incorrect.

It was perhaps copied from a MS. the first leaf of which was wanting.

It begins: निपीय । स नलो नाम राजा आसीत् वृत्तः किंभूतः सितच्छन्नितं श्वेतातपत्रीकृतं कीर्तिमण्डलं येन स निजराज्यस्य एकच्छत्र एव °

The three cantos end with the following verse-colophons:—

I. श्रीवत्सं यमजीजनत् शुलिगाख्याघ्यः(!) सतामग्रणीर्
धीमान् श्रीनरसिंह इत्यवहितो(!) लक्ष्मीश्च लक्ष्मीरिव ।
तेनेयं रचिता नलीयचरि[ते] टीका मनोहारिणी
या तस्या अयमादिमो विशिलितः(!) सर्गो निसर्गोज्ज्वलः ॥

II. यमजनयन्नरसिंहो नरसिंहगर्द्दीमान्(?) ।
तत्कृतटीकाग्रन्थे द्वैतीयीको ऽगमत्सर्गः ॥

III. अजीजनद्यं नरसिंहशर्मा
ख्याता सतां संसदिसद्गणेये ।
टीका कृता तस्य नलीयवृत्ते
काव्ये तृतीयो गत एष सर्गः ॥

It breaks off abruptly, at the end of the last leaf, at the beginning of IV. 55: शशाङ्कलङ्क । तं भूत- [H. T. COLEBROOKE.]

## 3840.

**715.** Foll. 50; size 16 in. by 6 in.; careless, modern Devanāgarī writing; 8 or 9 lines in a page.

Fragment of a commentary on the *Naishadhacarita* (viz. on XXII. 38–150), being, in the main, a more or less literal reproduction of *Nārāyaṇa's* comments. Rather incorrect.

It ends: संयोगिना वाभिषेकं करोति तर्कः । शार्दूलविक्रीडितं छंदः ॥ समाप्तो ऽयं द्वाविंशतिसर्गः ॥ श्रीहर्षमिति । अर्थं पूर्ववत् ॥ °

[H. T. COLEBROOKE.]

## 3841.

**1462.** Foll. 50; size 8½ in. by 4½ in.; excellent Devanāgarī writing of 1620 A.D.; 11 or 12 lines in a page.

*Rāghavapāṇḍavīya*, an heroic poem, in 13 cantos, relating in the same words the double story of the *Rāghavas* and *Pāṇḍavas*; composed by *Kavirāja Paṇḍita*, under the patronage of King *Vīra Kāmadeva* of *Jayantīpura*, of the *Kādamba* race.

See Colebrooke, Misc. Ess., II. 98 (2nd ed., II. 89); Oxf. Cat., p. 121*a*.

Date of MS.: संवत् १६७७ समये पौषशुक्ला ८ भृगुयुता लि ° श्रीधरजगन्नाथ उपाध्यायसुतु ॥

[H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAKNATH )

## 3842.

**974.** Foll. 173 (fol. 134 of which is missing); size 14 in. by 6½ in.; indifferent Devanāgarī writing of 1710 A.D.; number of lines varying.

*Rāghavapāṇḍavīya*, with a commentary, called *Rāghavapāṇḍavīya-Prakāśa*, composed by *Śaśidhara* for King *Amarasiṃha*, son of *Rudrasiṃha*.

The commentary begins:

वैकुण्ठः किंस्विदेष द्विजपतिककुदो नाकपालो कपर्दी
प्रालोलाहीनमानाकलिततनुधनं भूतिमान् किं पिनाकी।
किं वा पीताम्बरो न प्रमथपरिवृढः श्यामकण्ठो ऽपि भाक्तैर्
इत्थं पायादपायादविदितविभवो माधवो माधुवो[1] वः॥१॥
हेरम्बमम्बाकरकुड्मलाग्रसंतानतापाकृतरोषदोषं।
पाण्मातुराकृष्टचलद्विलासमनोदकंदुकं नुमः॥ २॥
आसीदा सोमसिंधोरवनितलचलत्कीर्तितीव्रप्रतापो
भूमीपो रुद्रसिंहः समितिपरिपृतो[2] दुःखदद्दण्डधारी।
दायी रत्नान्यनर्घाण्यवरतसुहृदां वैष्णवानां वरिष्ठः
सप्ताकूपारपारगमविमलयशोराजहंसः प्रभावी॥ ३॥
सूनुस्तस्य महादयो ऽमरमहीपालो नृपालाग्रणीर्
आदृत्याग्र्यगुणं गुरुं गुरुमताभिज्ञं गुरावामरं(!)।
शांतोदः परचित्रकं(?) शशिधरं(०रः) सोमाकृतां कोविदं
काव्ये राघवपांडवीयचरिते टीकां विधत्ते सुधीः॥ ४॥
तत्रादौ कविराजो ग्रंथसमाप्त्यर्थं देवतानमस्काररूपं मंगलं कुर्वन्नाह। स्वाधिष्ठानेति०

Fol. 1 has been supplied by a more modern hand. Foll. 2 and 3, being somewhat damaged, have been repaired, and a modern hand has added marginal and interlineary glosses. The missing leaf (134) contained x. 31–34.

This commentary (without the introduction) has been printed, along with the text of the poem, in the *Kāvyamālā* (1896).

The colophon runs as follows: इति समस्तप्रक्रियाविराजमानरिपुराजकंसनारायणश्रीनारायणचरणपरायणमहाराजाधिराजाधिराजश्रीमदमरसिंहकारिते(०श्रीमदनसिंहकारिते fol. 26*a*) महाश्रीशशिधरकृते राघवपांडवीयप्रकाशे त्रयोदशः सर्गः॥ संवत् १७६७ मिति वैशाखवदि तिजो वारमंगरके लीषा मुकाम पयारसी पोथी गोसाई लाल मुकुंदजोग्य हय श्रष भवाणीदास कास्य वासी महला पाटिम पुरा॥

Cf. Weber, Berl. Cat., no. 531.

[H. T. Colebrooke.]

1 ? *read* मापुरो or ०वः साधवो.

2 ० परिप्रतो MS.

## 3843.

**465.** Foll: 73; size 12 in. by 4⅝ in.; careless, modern Devanāgarī writing; 13–15 lines in a page.

*Rāghavapāṇḍavīyaṭīkā Sāracandrikā*, by *Lakshmaṇa Paṇḍita*, son of *Śrīdatta* (or *Gojādatta*) *Sūri*, and disciple of *Uttamaśloka Tīrtha*.

The work has been printed in the *Grantharatnamālā* (Bombay, 1889).

The MS., which is rather incorrect, begins (slightly corrected):

पाणिनये गौतमये जैमिनये ऽनंतबादरायणये।
सर्वेस्वं निजमेकं सद्विद्यातीर्थमुत्तमश्लोकम्॥ १॥
भारद्वाजन्नानिवंशावतंसः
श्रीमद्गोजादत्तसूरिप्रसूतः[3]।
हृष्टो विद्वल्लक्ष्मणस्य[4] प्रयासो
विघ्नेशस्य प्रीतये शश्वदस्तु॥ २॥
गुरुपादावनुस्मृत्य श्रीरामायणभारते[5]।
आवश्यकपदान्येव विवरीतुं यतामहे॥ ३॥
निरस्तानर्थमद्वैतमखंडानंदमिच्छता।
आत्मा द्रष्टव्य इत्यादिरस्ति वेदांतडिंडिमः॥ ४॥
सर्वोपाधिविनिर्मुक्तिं सच्चिदानंदमद्वयं।
सं विज्ञातुमनीशस्य सुगुणोपासना गतिः॥ ५॥

3 ० प्रसूतः *Granthar.*, whilst in repeating the verse at the end, it reads श्रीमद्गोजादत्तसूरिप्रसूतः। '*gojā*' is evidently meant here as a synonym of '*śrī*.'

4 विद्यालक्ष्मणस्य *Gr.*

5 परमात्मानमानम्य श्रीनारायणभारते। *Granthar.*



DR.RUPNATHJI( DR.RUPAK NATH )

साधर्त्यंतविमूढानामशक्येति(?) दयालवः ।
कवयः कृष्णरामादिवर्णनैरुद्धरंत्यमून् ॥ ६ ॥
विष्णुरेवेदमखिलमिति यद्यपि निश्चितं ।
तथापि नैतन्मंदानां मतिमारोहति द्रुतं ॥ ७ ॥
सर्ववेदैकसारस्य प्रणवस्याग्न्युपासनं ।
संसारतरणोपायं कोऽपि नोमिति(!) मन्यते ॥ ८ ॥
श्रुतिस्मृतिपुराणादिप्रसिद्धमहिमोर्जिता ।
काश्यामवस्थितिः कस्याप्यभाग्यस्य न दृश्यते ॥ ९ ॥
अतः परमसिद्धान्तमाद्यपद्यैः प्रदर्शयन् ।
रामधर्मात्मजव्याजं प्रस्तौति कविरीश्वरं ॥ १०[1] ॥

स्वाधि° ॥ अधिष्ठीयत इत्यधिष्ठानं°

It ends:

[आवश्यकश्लेषपदाशयैकविवक्षयानु]क्षणकांक्षणीयम्[2] ।
श्रीलक्ष्मणो राघवपांडवीयं व्याचष्ट विस्पष्टगभीरभावं ॥ १ ॥
उत्तमश्लोकपादाब्जरजोनिर्मृष्टचेतसः ।
दत्तसूरिसुतस्यैषा कृतिरस्तु सतां मुदे ॥ २ ॥
प्रमादतिमिरच्छन्नश्लेषाशयविशोधनीं ।
उपादद्ध्वमपाकृत्य मत्सरं सारचंद्रिकां ॥ ३[3] ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणपरमहंसपरिव्राजकाचार्यश्रीमदुत्तमश्लोकतीर्थमहामुनिकृपाकटाक्षैकवीक्षितब्रह्म - ज्ञानिवंशावतंसश्रीदत्तसूरिसुतलक्ष्मणपंडितविरचिता राघवपांडवीयटीका सारचंद्रिका समाप्ता ॥

[H. T. COLEBROOKE.]

## 3844.

**1177 a.** Foll. 50; size 13¼ in. by 6 in.; good, modern Bengālī handwriting; eight lines in a page.

*Rāghavapāṇḍavīya-Sāramañjarī*, a succinct commentary on *Kavirāja's* poem, by an unknown author. Incomplete.

It begins: प्रारिप्सितप्रतिबन्धकीभूतप्रत्यूहव्यूहविघाताय शिष्टाचारपरिप्राप्तदेवतानमस्कारात्मकमङ्गलमाचरन् शिष्यशिक्षार्थं ग्रन्थादौ तन्निबध्नन्नाह स्वाधिष्ठानेत्यदिना स्वस्याधिष्ठानं यत्र तच्च तत् अम्बुजं चेति श्रीविष्णुनाभिकमलवर्तित्वात् तस्य रजःपुञ्जेन पिञ्जरा मूर्तिर्यस्य तस्मै । इच्छाधीनं जगत्सृष्टिकर्म यस्य एवंभूताय ब्रह्मणे विधात्रे नमः । एतेन स्वाधिष्ठानाख्यपद्मान्तर्वर्ति सर्वान्तर्यामि स्वकीयेच्छा शक्तिद्वारकजगत्कर्तृपरमात्मनमस्कारो ध्वनितः । विघ्नबाहुल्यशङ्कया मङ्गलान्तराण्यपि कुर्वन्नाह । तत्र समुचितत्वात् ब्रह्मशक्तित्वाच्च सरस्वतीमुपन्यस्याह । पुनातु वेत्यादि । °

The only reference that has been met with in the commentary is one to the *Ratnakosha*, fol. 35*a* (महेला महिलात[:] स्यात्).

It breaks off abruptly, at the end of fol. 50*b*, after the comment on XII. 9 (नियैतीषु°), with the *pratīka* ॥ अरि(!) ॥

[H. T. COLEBROOKE.]

## 3845.

**898 c.** Foll. 58; folio, size 15 in. by 10½ in.; clear, modern Bengālī handwriting; 16–24 lines in a page.

*Rāghavapāṇḍavīya - Sthūlatātparyārtha*, an abstract of *Kavirāja's* poem.

The odd pages contain the story of the *Rāmāyaṇa*, the even pages that of the *Mahābhārata*.

English notes have been added by Colebrooke in the margins of the first three leaves.

[H. T. COLEBROOKE.]

## 3846.

**2466.** Foll. 283; size 10 in. by 4⅝ in.; fairly written, in Devanāgarī, by two different hands, in 1532 A.D.; twelve lines in a page.

*Bālabhārata*, an heroic poem, epitomising the story of the *Mahābhārata*, in artificial style and metres, by *Amaracandra*, pupil of *Jinadatta Sūri* of the *Vāyaḍagaccha*.

---

[1] Instead of vv. 4–10, the *Gr.* has the single verse:

अबोधध्वान्तसंपन्नश्लेषाशयविशुद्धये ।
इयं सद्भिरुपादेया सततं सारचन्द्रिका ॥ ४ ॥

[2] ?°विवक्षया तु क्षणमक्षिणीयम् *Granthar.*; whilst the MS. omits the first part of the half-verse.

[3] After this verse the *Granthar.* repeats the second introductory verse.

DR.RUPNATH(DR.RUPAK NATH)

It is, like its prototype, divided into 19 *parvans;* and each of these again consists of one or more *sargas,* the total number of which amounts to 43. At the end of each *parvan* a verse is added by the author, computing—by the number of corresponding *anushṭubh* verses—the extent of the section.

It begins:

सतां परब्रह्म विलोक्य मार्गम्(° विलोकमार्गम्)
  अपंकिलं दूरितकंटकं यः ।
श्रीभारतं ब्रह्म ततान शाब्दं
  स श्रेयसे सत्यवतीसुतो ऽस्तु ॥ °

The work has been published in the *Paṇḍit,* vols. iv.–vi. (Benares, 1869–71), and in the *Kāvyamālā* (Bombay, 1894). A translation, in modern Greek, was published at Athens (1847)—from a MS. in his own possession—by D. Galanos; with an elaborate introduction by Tybaldos, who endeavours to identify the author with the lexicographer *Amarasiṃha.*

It ends with the *praśastisarga,* the last 10 verses of which (somewhat defective in the *Paṇḍit*) run as follows:

इति सुकृतनिधानध्याननिर्धारितायुर्-
  भुवमिव दिवमात्मध्यानपूतां स चक्रे ।
जनमनसि स जीवन्नेव रेजे तु तन्न्-
  मतिविफलिततादृग्दुष्टयोगिप्रयोगः ॥ ३६ ॥

अमीभिस्त्रिभिरेव श्रीजिनदत्तादिनामभिः ।
सूरयो भूरयो ऽभूवंस्तत्प्रभावास्तदन्वये ॥ ३७ ॥

एकः प्रौढविवेकविभ्रमलतापुष्पेषुजित्
  तेषु श्रीजिनदत्तसूरिरुदयद्भूरिप्रभावो ऽभवत् ।
तादृग्विस्तृतहृन्निपीतनभसो यस्योचितं दिद्युते
  धीरोऽंभोधरसिंधुसिंधुरजयी व्याख्यासु शब्दो गुणः॥३८॥

श्रीविवेकविलासाद्यैर्यत्प्रबंधैः सहस्रशः ।
हतमोहतमो ऽकारि करैरिव रवेर्जगत् ॥ ३९ ॥

आयुष्यं कणयंति जंतुषु पयःसारः पयोधेः पुनः
  पीयूषं पृथिवीज़ुषामनिमिषीभावाय संभाव्यते ।
विद्यः श्रीजिनदत्तसूरिवचनं सारः सुधानामपि
  व्यक्तं मुक्तिमपि प्रयच्छति सतां यत्प्रीतमुत्प्रीतिकृत्॥ ४०॥

श्रीजीवदेवसूरीणां त एव परमाणवः ।
जग्मुर्येदंगतां भेजे तद्गुणैस्तद्विधेव यः(?) ॥ ४१ ॥

श्रीवायटस्थाननिवासिनस्ते
  संभूय भूयस्तरहर्षभाजः ।
कदाचिदागत्य निवेशवेश्म
  जगुर्द्विजास्तं मुनिचक्रशक्रं ॥ ४२ ॥

मरुद्दातास्माकं भुवनजयिनौ तस्य तनयौ
  तयोः संगो यस्यामजनि हनुमद्भीमभटयोः ।
तथा संक्षेप्यासौ पृथुरपि महाभारतकथा
  यथा स्वल्पाभिः स्यान्निषिभिरतिथिः कर्णपथयोः ॥४३॥

आज्ञापितस्तदिह कर्मणि सूरिभिस्तैः
  ख्यातः क्षितावमरचंद्र इति स्वशिष्यः ।
श्रीबालभारतमिति प्रततान काव्यं
  वीरांकमेतदतिनिश्वरमात्मनोऽंगं ॥ ४४ ॥

शस्ते प्रशस्तिसर्गे ऽत्र रंगत्कविगुरुक्रमे ।
निश्चितं स्पष्टतां नीता नवाशीतिरनुष्टुभां ॥ ४५ ॥

चतुश्चत्वारिंशत्सर्गैरासन्ननुष्टुभां ।
षट्सहस्री नवशती पंचाशद्बालभारते ॥ ४६ ॥

इति श्रीजिनदत्तसूरिशिष्यपंडितश्रीमदमरचंद्रविरचिते बाल-भारतनाम्नि महाकाव्ये वीरांके चतुश्चत्वारिंशः प्रशस्तिसर्गः ॥ समाप्तं चेदं बालभारतं नाम महाकाव्यं ॥ सकलग्रंथसंख्या ६९५० ॥

निधिवसुशरचंद्रैः संमिते ऽब्दे सहोमा
  श्यमलपक्षुपतिथ्यां वासरे चेंदुसूनौ ।
समलिखदलवेशः सत्यविप्रस्य सूनुर्
  हरिमनुजमवाप्य प्राग्विभागे सहायं ॥ १ ॥

सुखावबोधार्थं ॥ स्वस्ति श्रीविक्रमार्कसमयातीतसंवत् १५८९ वर्षे मार्गशिरःशुद्ध १४ बुधे । ° [GAIKAWAR.]

## 3847.

**957 b.** Foll. 13; size $10\frac{1}{4}$ in. by 4 in.; fairly written in Devanāgarī; 11 or 12 lines in a page.

*Gītagaurīśa,* a poem, in 10 cantos, descriptive of *Gaurī's* affection and admiration for *Śiva,* by *Bhānudatta kavicakravartin.*

It is composed in the *śārdūlavikrīḍita* metre, interspersed with groups of (generally eight) verses to be sung to different tunes.

DR.RUPNATHJI( DR.RUPAK NATH )

Since the extracts here given were made, the work has been printed, under the title '*Gītagaurīpatikāvya*,' in the *Grantharatnamālā* (Bombay, 1887-88).

It begins:

संध्यानृत्यविधौ भुजंगमपतेर्गीतामृतं शृखतः
प्रत्यक्षिस्खलितप्रमोदसलिलस्तोमे तनौ सर्पति ।
मौलेरुत्पथगा किमु त्रिपथगा जातेति शंकाजुषो
देवस्य त्रिपुरांतकस्य चकितं व्यालोकितं पातु नः ॥ १ ॥

भानोर्गीतं सुधास्फीतं शंभोर्डमरुडिंडिमः ।
विदुषां रसना रंगभूमिर्भारति नृत्यतां ॥ २ ॥

संतश्चारिणि शैत्यकारिणि सुधाधाराचमत्कारिणि
श्वांताकर्षिणि हव्यवर्षिणि नटत्रक्षत्रविद्योतिनि ।
मायाकच्छपपृष्ठरोहिणि सुधाधीशद्रुमद्रोहिणि
क्रीडाकल्पितवेषधारिणि पुरारातौ मनो मंडितु[1] ॥ ३ ॥

मालवरागेण गीयते ।

भ्रमसि जगति सकले प्रतिलवमविशेषं
शमयितुमिव जनखेदमशेषं
पुरहर धृतसमीरशरीर[2] जय भुवनाधिपते ॥ १ ॥

प्रवहसि मधुमथनं नवनीरदललितं
मरकतमणिमिव वक्षसि तुलितं
पुरहर धृतहिमवररूप[3] जय भुवनाधिपते ॥ २ ॥

क्षीरसिंधुलहरीरुचिरं रुचिवरजालं (रुचिजालं *Gr.*)
परमधाम किमु वहसि विशालं
पुरहर धृतहिमकररूप जय० ॥ ३ ॥

घनघनतिमिरचय(घनतिमिरचयं *Gr.*) चिरमपगतशंकं
हरसि लग्नमिव जगतीपंकं
पुरहर धृतदिनकररूप जय० ॥ ४ ॥

कलयसि देवकुलं हविषा सानंदं
घन इव पयसा चातकवृंदं
पुरहर धृतयजमानशरीर जय० ॥ ५ ॥

वहसि ग्रहनिवहं परिहृतसंतापं
करुणतरो ऽपि(०तरोरिव *Gr.*) कुसुमकलापं
पुरहर धृतगगनाकार जय० ॥ ६ ॥

कपटकोलदशने रचयसि सविलासं
कुंददामगतमधुकरभासं
पुरहर धृतधरणीकाय जय० ॥ ७ ॥

वहसि शिखानिचयं हिमनिकरहरं (हिमसंघातहरं *Gr.*)
प्रेमतरोरिव शाखानिकरं (शाखानिचयं *Gr.*)
पुरहर धृतहुतवहदेह जय० ॥ ८ ॥

भानुदत्तरचितं शशिशेखरगीतं
भवतु श्रवणयुगलपुटपीतं
पुरहर धृतवसुमितरूप(०मितशरीर *Gr.*) जय०॥९॥

के वा केलिकलाकलापकुशलाः क्रीडंति नो कामिनः
कांता कापि कदापि क्वापि शिरसा केनापि किं धार्यते ।
गंगां मूर्ध्नि दधासि नापि वहसि व्रीडां न धत्से भयं(कथं *Gr.*)
किं वा वाच्यमिदं निगद्य गिरिजा कुंजांतरं निर्ययौ॥४॥०

The tunes which occur are: *asatirī* (fol. 8*b*), *āsāvarī* (foll. 3*b*, 10*b*), *karṇāṭa* (fol. 10*a*), *kinaṭa* (fol. 10*a*), *kedāra* (foll. 8*b*, 9*a*), *gurjarī* (foll. 4*b*, 7*b*), *gauḍī* (foll. 6*b*, 8*b*), *deva-gāndhāra* (fol. 11*b*), *deśāṅkha* (fol. 9*b*), *dharāśrī* (foll. 4*a*, 12*a*), *bhūpāla* (fol. 7*a*), *bhairavī* (fol. 10*a*), *mālava* (fol. 1*b*), *rāmagrī* (foll. 3*a*, 8*a*, 9*b*), *varāḍī* (foll. 5*a*, 5*b*, 6*a*, 6*b*, 8*b*), *vasanta* (foll. 2*a*, 5*a*), *sāmeri* (foll. 9*b*, 11*a*), *sāraṅga* (fol. 9*b*).

A characteristic feature of these songs is the occurrence of the poet's name in the last verse of each. Dancing is referred to several times.

It ends:

अर्धे वक्षसि शैलराजदुहिता वक्षोरुहि[4] स्फूर्जितः
संवीक्ष्य प्रतिबिंबमिंदुसुभगे भागे निजे वक्षसं(०सि) ।
स्वस्यापि स्तनमंडलांतरधिया[5] व्यालोलमालोकयन्
देवो दैन्यमपाकरोतु गिरिजादेहार्धहारी[6] हरः ॥ ९६ ॥

भवानी वर्तते यावदंगलग्ना[7] पुरद्विषः ।
विद्वत्कांतस्थिता[8] तावद्भानोर्वाणी विराजतां ॥ ९७ ॥

---

[1] मज्जतु *Gr.*, ? मंदतु.  [2] पुरहरकृतमारुतवेष *Gr.*
[3] कृतजलधिशरीर *Gr.* (कृत० throughout).

[4] ० दुहितुर्वक्षोरुहः *Gr.*  [5] स्तनमण्डलाङ्कुरधिया *Gr.*
[6] ० धारी *Gr.*  [7] नर्तनैर्यावं० *Gr.*
[8] विद्वत्कण्ठगता *Gr.*

DR.RUPNATHJI( DR.RUPAK NATH )

इति श्रीभानुदत्तविरचिते श्रीगीतगौरीशे महाकाव्ये पतौ[1] नाम दशमः सर्गः ॥ १० ॥

> सखं मा स्पृश मा स्पृश प्रियविधेः पश्यात्मजं प्रेक्षकं
> दूते साक्षिणमीक्षणेन दिशतोरन्योन्यदीयं मुहुः ।
> ईषद्वक्रितपाशपातयुगदे पश्य द्विदायोच्छ्रिता
> गौरीशंकरयोः परस्परजयोत्कर्षोक्रियः पातु नः ॥ ९८ ॥
> वीक्षाक्षं स्पृश भूतनाथ गिरिजे तत्किं किमाह(°त्य) स्वयं
> प्रेक्षस्वापविधे(?) सुतं स्थितमनुं पृच्छाथवा तत्पुनः ।
> इत्थं पाशकचक्रपातयुगदे पश्य द्विदायोन्विता(?)
> गौरीशंकरयोः परस्परजयोत्कर्षोक्रियः पातु नः ॥ ९९ ॥

शके १६४८ पराभवसंवत्सरे ज्येष्ठमासे कृष्णपक्षे अमवास्या मंदवासरे तद्दिने समाप्तः ॥

> देवश्रीपतिपुत्राय आपदेवाय धीमते ।
> वाजीना[2] लिखितो गीतगौरीशो ऽयं निवेदितः ॥

[H. T. COLEBROOKE.]

## 3848.

**2548.** Foll. 108; size 13¾ in. by 5¼ in.; good Devanāgarī writing of 1696 A.D.; nine lines in a page.

*Śrīkaṇṭhacarita,* a poem, in 25 cantos (*sarga*), celebrating *Śiva*'s victory over tho *Asura Tripura;* composed—about 1140 A.D., according to Professor Bühler—by *Kavirāja Rājānaka Maṅkha* (or *Maṅkhaka*), a Kaśmīr poet, son of *Viśvāvarta* (colophons and comm.; *Viśvavarta,* III. 35), and grandson of *Manmatha* (यः प्रवरपुरभूमौ प्रसिद्धिमगमत् comm., III. 31).

It begins:

> जीयात् कृतानंगपतंगदाहः खट्वांगिनो नेत्रशिखिप्रदीपः ।
> यस्यांतिके शुभ्रदशानिवेशश्रियं किरीटेंदुकराः श्रयंते ॥ १ ॥
> तनोतु भूतिं दहतादघानि स शूलिनो लोचनपावको वः ।
> धूमानभिज्ञो ऽपि रतेरजस्रमश्रुस्रुतेर्यो ऽजनि सूत्रधारः ॥ २ ॥

---

[1] ? इति श्रीभानुदत्तकविविरचिते गीतगौरीपतौ काव्ये दशमः सर्गः ॥ *Gr.*, omitting the two additional verses of our MS.

[2] *r.* वाजिना.

It ends: इत्युदीरसधर्म°॥१५२॥ पितुर्विधाय्रस्य°॥१५३॥ कठिनपदस्तन° ॥ १५४ ॥ अभिनयरसमुद्री° कविता मंमस्य मदिरेव ॥ १५५ ॥ इति राजानविश्वावर्त्तकसूनोर्महाकविवरराजानमंखकस्य(श्रीराजानकविश्ववर्त *Kāvy.*) कृतौ श्री[कंठचरिते broken] महाकाव्ये पंचविंशः सर्गः ॥

The colophon of the third canto runs thus: इति राजानविश्वावर्त्तसूनोः श्रीकाश्मीरचरितंत्रपतेर्महाकविराजराजानकश्रीमंखकस्य कृतौ श्रीकंठचरिते° ॥

Foll. 68–107 are more or less injured on the right-hand side, whilst the last leaf has a piece wanting on the left side.

See G. Bühler, Detailed Report, pp. 50–52; and ib., Extracts, p. c.

[GAIKAWAR.]

## 3849.

**2033.** Foll. 176; size 14½ in. by 5¼ in.; very good Devanāgarī writing of about 1600 A.D.; eleven lines in a page.

*Śrīkaṇṭhacaritavivṛiti,* a commentary on *Maṅkha's* poem, by *Jonarāja,* son of *Bhaṭṭa Nonarāja,* and grandson of *Laularāja.* A good manuscript.

Text and commentary have been published in the *Kāvyamālā,* vol. i. (Bombay, 1887).

It begins:

> उदेति यस्यां प्रकटीभवन्त्यां
> तिरोहितायां गलतीव विश्वम् ।
> रविप्रभेवास्तु तमो हरन्ती
> दृशः प्रबोधाय सरस्वती वः ॥ १ ॥
> श्रीलौलराजसुतपण्डितभट्टनोन-
> राजात्मजः सहृदयैर्विहिताभ्यनुज्ञः ।
> काव्ये पुरारिचरिते कुरुते ऽभियोगं
> वाच्यार्थमात्रविवृतिं प्रति जोनराजः ॥ २ ॥
> शेषार्थयोरिह विवक्षितबालबोध(विहस्तित° *K.*)-
> श्रद्धाप्रतीतिररक्षिस्पृहुताशतुल्या ।
> कष्टेन यस्य सुचिरादुपतिष्ठते ऽत्रं
> मांसस्पृहा भवति तस्य हि हासहेतुः ॥ ३ ॥ °

DR RUPNATHJI( DR RUPAK NATH )

It ends:

श्रीकण्ठकाव्यविवृतिं विरचय्य जोन-
राजः सतो नमति सन्नमतिप्रतिष्ठः[1]।
हेलात्र(°स्तु *K.*) वस्तदपि यत्नमकार्षमस्या
दीपो बिलांध्यहरणान्नरणेः समः किम्॥
कुर्वन्तु तत्स्खलितयोजनमत्र सन्तः
श्रीकण्ठभक्तिरभसात्खलदर्शनाच्च।
सेतुं खनन्ति सलिलानि हि रन्ध्रलाभात्
तन्मार्गमुज्झति जनोऽथ चिराय खातम्॥

This last verse is omitted in the edition.

इति श्रीकण्ठचरितकाव्यस्य पण्डितलौलपुत्रपण्डितनोनराजपुत्रश्रीजोनराजकृता विवृतिः समाप्ता॥ [GAIKAWAR.]

## 3850.

**1148 c.** Foll. 19; size 9 in. by 4 in.; good Devanāgarī writing of 1719 A.D.; eight lines in a page.

*Śambhuvilāsa*, a devotional poem in honour of *Śiva*, in three cantos, by *Viśvanātha*, surnamed *Rāṇaḍa* (?), of the *Cittapāvana* family.

It begins:

श्रीषड्क्तेन समन्वितं प्रथमतो नत्वा गुरुं बुद्धिदं
विघ्नध्वंसपारायणं च हृदये ध्यात्वा गणाधीश्वरं।
नानालंकृतिजातिरीतिमहितं श्रीविश्वनाथः कविः
काव्यं शंभुविलासनाम कुरुते संख्यावतां प्रीतये॥ १॥
यल्लाभाद्द्वितता नृणां सुकुलता धार्म्यं धनं धन्यता
गोमातंगरथाश्च वेश्मवसुधावासांसि भूषास्तथा।
जायंते विधिविष्णुशंभुभवने या रूपभेदैः स्थिता
सा काव्ये सुषमां करोतु महतीं लक्ष्मीर्मदीये स्थिरां॥ २॥
तीर्थैः श्रीमणिकर्णिकाप्रभृतिभिः संसेविता मंदिरैः
कैलाद्रिसमैः सदाशिवयुतैरानंदकृत्पश्यतां।
एतस्यां भुवि सर्वदा विजयते सा राजधानी विभोः
काशी काशितचित्सुखा गिरिपतेर्ब्रह्मादिदेवप्रभोः॥ ३॥
यस्या विष्णुपुरी तथेंद्रनगरी धातुश्च पूः सुंदरी
हीना ब्रह्मसुखैकमुख्यवसतेर्गंगातटालंकृतेः।
किंचित्क्षोणिगतापि या सुषमया सर्वोपरिष्टान्मता
मध्ये सप्तपुरां समुद्रकमणीतुल्योत्तमत्वात्स्थिता॥ ४॥
मध्यस्थांश्चतुरो विधाय निगमान्यप्रच्छतुस्तान्हरि-
ब्रह्माणौ वदतावयोरिह हि को ब्रह्मेत्यथो तैः शिव[2]।
उक्ते सत्यतिनिंदतः[3] श्रुतिशिवांश्छेत्तुं शिरो वेधसो
यस्यांसोऽजनि भालतो गिरिपतेः कालादिको भैरवः॥५॥
यो बाल्ये हरिकेशकाननमटन्निर्भीर्भियां वर्धनं
धूलिभिर्विरचय्य लिंगमवनौ वन्यैश्च पुष्पादिभिः।
संपूज्याप शिवप्रसादनमसौ श्रीदंडपाणिः स्वयं
यस्यां तिष्ठति पापिनश्च कुरुते क्षेत्रात्पवित्राद्बहिः॥ ६॥
कस्मिंश्चित्समये प्रकल्प्य हृदये वाराणसीं तामिमां
तत्रावाह्य परात्परं मणिगृहे श्रीयुक्तविश्वेश्वरं।
ध्यात्वा मानसपूजनं च विधिवत्कृत्वा कविर्ब्राह्मणः
श्लोकान्विश्वगुरोः पुरोऽपठदिमान्श्रीविश्वनाथो निजान्॥ ७॥
एकस्मै सुचिरं स्थिता ये सदने सार्धं गुरोः श्रीपतिर्[4]
लाजान्संप्रतिगृह्य राज्यमददात्तस्मै सुदाम्ने हरिः।
मालूरार्कदलेन शंकर जनास्त्वां मोहयंति क्षणात्
त्वं तेषामखिलार्थमर्पयसि नो जानासि तुभ्यं नमः॥ ८॥ °

Canto I. consists of 40, II. of 80, III. of 14 stanzas. It ends:

भुक्त्वा वैषयिकं सुखं कविरसौ स जातबोधस्ततो
दृश्यं स्थावरजंगमात्क(°त्मक)मिदं ज्ञात्वा प्रपंचं मृषा।
सर्वानंदगृहं परात्परतरं श्रीराजराजेश्वरी-
रूपं ब्रह्म हृदि स्मरन् शिव[व]ने काश्यां स्थितिं निर्ममे॥१४॥

इति श्रीचित्तपावनजातीयरानडोपनामककविश्रीविश्वनाथकृते श्रीशंभुविलासशेपनामचाव्ये [°विलासाख्ये काव्ये I. II.] तृतीयसर्गः॥

At the end of canto II. the date occurs: संवत् १७७६ माघसुदित्रयोदशी भौमवासरे लि°॥ उद्धवजी नागेश॥ [H. T. COLEBROOKE.]

## 3851.

**1491 b.** Foll. 19; size 15¾ in. by 5¼ in.; indifferent, modern Bengālī handwriting; eight lines in a page.

*Rahasyāmṛita*, a poem, by an unknown author, in 12 *sargas*, describing the life and adventures of *Pārvatī* in the mountains, and leading up to her marriage with *Śaṅkara*.

---

[1] यत्नमतिप्रतिष्ठः with (?) *K.*

[2] °वे or वः.

[3] ?°भिनंदतः.

[4] ? श्रीपतेर्.

DR.RUPNATHJI(DR.RUPAK NATH)

I. (31 vv.):

या शर्वादिसुपर्वदुर्वचमहाध्यानाध्वदूरे स्थिता
सर्वाभीप्सितकल्पवल्लिरतुला दुर्वारदुःखापहा ।
चूडोल्लासितशर्वरीमणिकणाखर्वाप्यखर्वा महा-
गर्वा पर्वतसार्वभौमतनया भूयान्महाभूतये ॥

अभयापि भयातिशोभना त्रिपुरापि त्रिपुरान्तकप्रिया ।
अगजापि गजाननप्रभूर्जगतां कल्पलतास्तु भूतये ॥

प्रजापतिं दक्षमुपेत्य रूपं
धात्री विधात्री भुवनत्रयस्य ।
गिरौ प्रजज्ञे स्थितये प्रजानां
शुभे क्षणे विघ्नमहाक्षणेन ॥

दक्षाननोदीरितनाथनिन्दा
हुताशतन्मन्युहुताशनाभ्यां ।
संतापितात्मेव गृहे ऽवतारं
चकार नीहारमहीधरस्य ॥

मेनाङ्कमेलाङ्कपरार्धशोभा
मेनाङ्कमौलेर्महिषी विशाला ।
मेनाङ्ककोटीशतजित्वराभा
निनाय रूपेण विनायकाम्बा ॥

सुलोचयन्ती मधुरं नदन्ती
विधुं तुदन्ती(? नु°) वदनाब्जकान्त्या ।
भृशं हसन्ती नगराजभार्याम्
आनन्दयामास जगत्प्रसूतिः ॥

धन्यौ धरित्रीधरदम्पती तौ
सुदुर्लभं यन्मुनिमानसानां ।
मूलप्रकृत्यां तनयेति मत्या(मत्वा)
चुचुम्बतुस्तच्चरणाम्बुजातं ॥

उद्वीक्षणोल्लासितनिर्निमेष-
नेत्राब्जतारा वसुधावतारा ।
स्वां मूर्तिमन्यां नभसीव तारां
दृष्ट्वा प्रमत्तेव जहास हृष्टा ॥

पादाङ्गुलिच्छिन्नगुणप्रलम्बि-
प्रालम्बमुक्ताः प्रचुराश्च मुक्ताः ।
भान्ति स्म तस्याश्चरणाविमुक्ता
मुक्ताफलानां फलमेतदेव ॥

सृक्कद्वयीनिःसृतलोलनाला
संपातसंपादितचारुशोभा ।
तदोपमां याति सुधा सुधारा-
द्वयी सुधांशोर्यदि पार्श्वयोः स्यात् ॥ °

II. (47 vv.):

निरीक्ष्य तत्रातिमनोहराणि
पुष्पाणि पुष्पायुधनाशकस्य ।
स्मृत्वा विसन्नाति(? विषणा हि) मुहुर्मुमोह
संशान्त्यमाना नितरां सखीभ्यां ॥

कुमारमाता सुकुमारमूर्तिः कौमारमासाद्य मनोज्ञवेशा ।
समुल्लसच्चामरचारुकेशा खं द्योतयामास मुखेन्दुभासा ॥

III. (22 vv.):

अथेशसंदर्शनहर्षपूर्णो
हिमाचलश्चिन्तयति स्म मौलौ ।
सुविस्मितः शान्तमनास्तदानीं
किमेतदत्यद्भुतमीक्ष्यहन्त(!) ॥

पूरार्जितान्युग्रतपांसि नूनं यैरम्बिका मद्भुवने ऽवतीर्णा ।
तैरेव मे लोचनगोचरत्वं त्रिलोचनस्याङ्घ्रियुगं जगाम ॥

IV. (25 vv.):

शिवा तपोत्काद्भुतभक्तियुक्ता
मुक्तानताकारदृगम्बुधारा ।
अभुग्नरोमाञ्चसुतुङ्गिताङ्गी
ननाम शुभ्रांशुकलाकिरीटं ॥

V. (51 vv.):

अथ वीक्ष्य निरीक्षणी हतं
पतितं भूमितले कलेवरं ।
दयितस्य समाकुला सती
विललापातिरतिर्विचित्रधा(?) ॥

VI. (26 vv.):

माता च तत्रागतया च पित्रा
सखीजनैश्चाप्यनुरुध्यमाना ।
न जातु सैच्छद्भवनानि गन्तुं
तपोविधानैकमना बभूव ॥

VII. (36 vv.):

अपि हिमागहिमागमदारुणे
ऽपि दधदम्बरमम्बरमुत्तरं ।
निभृतमेकपटाकपटातिगं
परिततापगतापघरामणि ॥

VIII. (25 vv.):

अथ मधुव्रतगीतिमधुश्रवः
सुमधुरो मधुमास उपागतः ।
अतिकृशां तपसा समुदीक्ष्य किं
मरसमर्चयितुं क्षितिभृत्सुतां ॥

DR.RUPNATHJI( DR.RUPAK NATH )

IX. (24 vv.):

अथ समागतवान् भगवाञ्छिवः
स्फुरदुरुद्युतिदीप्ततराकृतिः ।
स्मितसुखो (°मुखो) ऽम्बरतो ऽवनिमण्डलं
दिवसनाथ इवाशु सनाथयन् ॥

X. (43 vv.):

पुनर्निमील्येक्षणयुग्ममाकुलो
विनिःश्वसन्नाह पुनर्महामुनिः ।
गिरीन्द्रजे दृष्टमिदं चराचरं
न ते वरं युक्तमहं विलोकये ॥

XI. (14 vv.):

इति ब्रुवाणे विबुधप्रधाने भक्त्यातिनम्रा हिमशैलपुत्री ।
प्रणम्य तं ब्राह्मणवर्यवेशं सगद्गदं प्राह सबाष्पनेत्रा ॥

XII. (31 vv.):

अथ दृष्ट्वा महाभाक्तां महीतलगतां प्रभुः ।
महीधरमहेन्द्रस्य तनयां मूर्छितामिव ॥
त्यक्त्वा धरामराकारं निजाकारं प्रकाशयन् ।
विरराज शिरोराजद्विजराजकलोज्ज्वलः ॥

It ends:

इति स्तुवत्यां पार्वत्यामतीव प्रेममन्थरे ।
महेश्वरे महान्नाद आसील्लोकत्रयान्तरे ॥
ततो दैवतगन्धर्वविद्याधरमहोरगाः ।
किन्नरा राक्षसा यक्षाः सिद्धाः साध्याश्च चारणाः ॥
उर्वश्याद्या नाकवेश्याश्चित्रवल्गीतनिःस्वनैः ।
आश्चर्याणि स्म कुर्वन्ति महामाङ्गलिकानि च ॥
तूर्यशृङ्गमृदङ्गानां भेरीणां भूरिनिःस्वनैः ।
इतरेषां च वाद्यानां तुमुलैर्व्योमनम्बरं ॥
वृन्दारकर्षिब्रह्मर्षिब्रह्मघोषैः (? वृन्दराजर्षि°) समन्ततः ।
संततं ब्रह्मलोकान्तमशेषभुवनान्तरं ॥
प्रणतामुपगूह्य बाहुभिर्मुखचन्द्रं परिमार्जयन् प्रभुः ।
गिरिजामिदमाह शङ्करस्तव दासो ऽस्मि तपोबलोत्तर[:]॥
अथेश्वरः प्राह नगेन्द्रपुत्रीं
स्वयंवरं (°रे) मां वृणु पक्ष्मलाक्षि ।
साह प्रणम्याञ्जलिबद्धपाणिर्
दद्यात्पिता मामिति मे ऽभिलाषः ॥

इति रहस्यामृते महाकाव्ये द्वादशः सर्गः ॥

[H. T. Colebrooke.]

## 3852.

**90.** Foll. 55; size 10¼ in. by 3¼ in.; fair Devanāgarī writing of 1722 A.D. (?); ten lines in a page.

*Bhikshāṭana-kāvya*, a poem, by *Utprekshā-Vallabha*, of a partly devotional, partly erotic character, depicting the feelings and conduct of female worshippers on meeting *Śiva* going about as a religious mendicant, and after being separated from him. It begins:

श्रीगोपालाचार्याय नमः ॥ श्रीवाग्देव्यै नमः ॥
कल्याणमावहतु वः शिवयोस्तदेकं
गात्रं यदीयमसितच्छविकंठमूलं ।
वामेतरे ऽपि कुरुते [ऽ]सितभासिभागे
प्रारब्धशैलतनयापरिरंभशंकां ॥ १ ॥
सद्यस्तुषारगिरिजौषधसेवयैव
यः स्वोपभुक्तगरलं शमयांचकार ।
अन्यैरशक्यशमनाज्जननामयाद्वः
पायादपायनिलयादयमादिवैद्यः ॥ २ ॥
नित्यं करोतु भगवान्स करींद्रवक्त्रः
प्रारभ्यमाणशुभकर्मविघातलोपं ।
दोषानुषंगरहितः स शिवो ऽपि यस्य
भृंगेषु गंडतलचुंबिषु साभ्यसूयः ॥ ३ ॥
काश्यं क्षिणोतु भवतां परमेश्वरस्य
भिक्षाटनं तदनु संहितदेहिशब्दं ।
यन्मानिनामपि विधेर्विपरीतभावे
याञ्चोक्तिदैन्यसहमेव मनश्चकार ॥ ४ ॥
वाल्मीकिरस्तु विजयी प्रथमः कवीनां
तस्यानुसारसरलः स च कालिदासः ।
अन्ये भवंतु जयिनः कवयो ऽथ मा (? ऽप्यमी) वा
येषां कृतः कृतिषु नैव मयावगाहः ॥ ५ ॥
कामं खलास्तिलकयंतु चिराय भूमीं
यत्संभवो बहुमतः सुजनेषु हेतुः ।
घोरेषु घर्मादिव दिवसेष्वतिलंघितेषु
छायाद्रुमान्मृगयते न हि को ऽपि मर्त्यः ॥ ६ ॥ °१०॥
भूत्वा चिरेण गलिताः कति नाम संतः
पृथ्वीश्वराश्च कति नाम तथेतरे ऽपि ।
अद्यापि कीर्तिवपुषा कवयः पृथिव्यां
जीवंति तेषु विहितस्तुतयो ऽथ वा तैः ॥ ११ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ताः सूक्तयः कविजनस्य दुरुक्तयो ऽन्याः
कर्णागतासु विदुषां नयनं न यासु ।
श्रोत्रं कृतार्थमभवन्न तयाहमस्मी-
त्यानंदबाष्पनिपतो रुदति क्षणेन ॥ १२ ॥
संत्येव सूक्तिरसिका बहवो मनुष्याः
स्वर्गौकसो न वसुधारसनिर्वृताश्च ।
तौ दुर्लभौ कविवचःस्खलितस्य सोढा
मर्त्येषु सागरगरस्य च यः सुरेषु ॥ १३ ॥ ० १५ ॥
नापेक्षते महदपि प्रथमानदोषं
निर्दोषमल्पमपि निंदति(?०भिनंदति) वस्तु लोकः ।
मूर्ध्ना बिभर्ति कृशमप्यनिशं सुधांशुम्
ईशः कलंकरहितं न तु पूर्णचंद्रं ॥ १६ ॥
वृत्तं वसंततिलकं विषयः शिवस्य
भिक्षाटनं कविरहो शिवभक्तदासः ।
शृंगार एव हि रसस्तदिह प्रबंधे
श्रद्धा न कस्य यदि सूक्तिविनोदशीलः ॥१७॥ ०२०॥
वाणैः शिवार्चनविधौ मम बाणबाणं
कादंबरीकृतिचमत्कृतिमप्युदारां ।
उत्प्रेक्षया जगति वल्लभकीर्तिमस्मिन्
भिक्षाटने तिलकयंतु कवींद्रचंद्राः ॥ २१ ॥

इत्युत्प्रेक्षावल्लभस्य कृतौ भिक्षाटने महाकाव्ये मुखपद्धतिः प्रथमा ॥

भिक्षाटनेन पुरुहूतपुरांगनानाम्
आकस्मिकोत्सवविधायिनि चंद्रमौलौ ।
तासामनंगशरजर्जरमानसानां
नानाविधानि चरितानि वयं वदामः ॥ १ ॥
रथ्यागतस्य गिरिशस्य विलोकनाय
निर्गंतुकाममनसो वनिता गृहेभ्यः ।
नैजाभिरूप्यगुणदर्शितपौनरुक्त्यम्
आचार इत्यभिमतं परिकर्म चक्रुः ॥ २ ॥ ०

The work, composed throughout in the *vasantatilaka* metre, consists of 42 sections, viz.: 1. *mukhapaddhati* (21 verses); 2. *maṇḍanapaddhati* (26 vv.); 3. *maṇḍananishedhap.* (19 vv.); 4. *nirgamanap.* (18 vv.); 5. *sambhramap.* (15 vv.); 6. *nirgamanoktip.* (20 vv.); 7. *lajjāpanayanap.* (15 vv.); 8. *śivadarśanap.* (22 vv.); 9. *śivāṅgavarṇanap.* (18 vv.); 10. *vilāsap.* (19 vv.); 11. *vilāsoktipratyuktip.* (20 vv.); 12. *bhikshāpradānap.* (31 vv.); 13. *uktipratyuktip.* (19 vv.); 14. *pāravaśyap.* (22 vv.); 15. *pāravaśyoktip.* (20 vv.); 16. *īśvaropālambhap.* (16 vv.); 17. *praśnoktip.* (13 vv.); 18. *śivānusaraṇap.* (17 vv.); 19. *śikshāp.* (16 vv.); 20. *vanitāvīthīcaraṇap.* (17 vv.); 21. *śivacaritopālambhap.* (17 vv.); 22. *gṛihapraveśap.* (20 vv.); 23. *bandhuvacanap.* (18 vv.); 24. *anurāgap.* (16 vv.); 25. *śikshopālambhap.* (18 vv.); 26. *virahāvasthāp.* (17 vv.); 27. *matibhedap.* (10 vv.); 28. *udyānap.* (19 vv.); 29. *udyānoktip.* (14 vv.); 30. *śiśiropacārap.* (13 vv.); 31. *sakhyupālambhap.* (12 vv.); 32. *gaurīpradoshacaritap.* (24 vv.); 33. *pradoshoktip.* (22 vv.); 34. *candrodayacaritap.* (17 vv.); 35. *candrodayoktip.* (20 vv.); 36. *dūtīpreshaṇap.* (22 vv.); 37. *dūtīvacanap.* (26 vv.); 38. *rajanīyāpanap.* (22 vv.); 39. *janīyāpanoktip.* (15 vv.); 40. *nidrāp.* (15 vv.); 41. *svapnoktip.* (22 vv.); 42. *gaurīsambhogasaubhāgyavarṇanap.* (18 vv.). It ends:

सा राजते जगति शैलसुता वधूनां
या जायते हरगलग्रहणोत्सवेषु ।
आनंदनिर्भयतया मुकुलीकृताक्षी
मोहं गतेव गरलस्य महोष्मणेव ॥ १७ ॥
तन्नं तयैव हि तपो गिरिराजपुत्र्या
यस्या विहारमये[न] परमेश्वरेण ।
हस्तग्रहो न मनसैव कृतः कृतो ऽभूद्
अस्माधिपो(?) रणमुखाचरावलंबः ॥ १८ ॥

इति श्रीमहाकविशिरोरत्नोत्प्रेक्षावल्लभकृतौ भिक्षाटने महाकाव्ये गौरीसंभोगसौभाग्यवर्णनपद्धतिर्द्विचत्वारिंशत्तमी ॥ भिक्षाटनं काव्यं समाप्तमिति ॥

वैकुंठाधिपबाहुवेदरसभूनिश्चि[ह]वर्षे बुधे
मार्गे शुक्लदले महेश्वरतिथौ माहेश्वरो ऽलीलिखत् ।
गौपालिर्गुणपालिशालिभवनं भिक्षाटनं कौतु[कात्]
काव्यं काव्यविदां सुखाय सुधियां श्रीरामकृष्णः कृती ॥
गोपालाचार्यचरणावरणं करवामहे ।
याभ्यां प्रसक्तियुक्ताभ्यां भुवनं भासते ऽखिलं ॥ ०

For a fragment of this work, see Weber, Berl. Cat., no. 594. [H. T. COLEBROOKE.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 3853.

**1177 g.** Foll. 20 (the 1st of which is wanting); size 13½ in. by 4½ in.; fair, modern Bengālī handwriting; eight lines in a page.

*Haravilāsa (-ākhyāna)*, a poem, in 8 *sargas*, on the marriage of *Hara-Śiva* and *Pārvatī*; by *Kaviśekhara* (? son of the physician *Yaśaścandra*).

The MS. begins in the middle of a verse:

पि चेतसा मतुरः प्रचलितुं पताकया ॥
सर्वतो निरवकाशमन्वये(?°ये) गच्छतां दिविषदां रथावली।
नेमिपिष्टमतनिष्ट दिङ्मुखे मेघजालमतिजर्जरं रजः ॥

II. begins:

ततः प्रभाते प्रतिपन्नरागा
व्यलोकि पूर्वापि जनैरपूर्वा ।
अनुत्थिते भास्वति नाकनद्याः
सरोजिनीव प्रथमं प्रबद्धा (प्रबुद्धा) ॥

III. ज्वलनोलुपतत्नु(?) भानुमान्
इति पूर्वं समशायि दूरतः ।
सविधोपगतो हिमाद्रिणा
धृतवीणो निरणायि नारदः ॥

IV. सेनयान्वितमथाप स हर्म्यं
साधिदैवतमिवाधिकरम्यं ।
आततोन्नमवितानमजस्रं
स्वागतामरपुरं त्रिसहस्रं ॥

V. अथ हरं हरितांपतियोषितः
स्नपयितुं वरदं वरणायुयुः ।
क्वणितकाञ्चनकाञ्चिमनोहरं
हरपुरं प्रतिशिञ्जितनूपुरं ॥

VI. अनन्तरं ताः सकलाः सुरस्त्रियस्
त्रपावतीं हैमवतीं सविस्मयं ।
विलोकयन्तीरभिवीक्ष्य सस्मितं
वचो बभाषे सरसं सरस्वती ॥

VII. ततः कान्ततमः पान्थजनाश्रितजनाश्रयः ।
सर्वतः शान्तसंतापो दिनान्तः समपद्यत ॥

VIII. अथाग्रतस्तस्य गजेषु संस्थिता
ध्वयोर्द्वयोरन्तरगाः पताकयोः ।
विचित्रविस्तीर्णकुथेषु डिण्डिमान्
अवादयन्कुन्तलतुण्डताडवैः ॥

It ends:

जगत्त्रयीसुन्दरमेकमासनं
मिथो निबद्धाचलमास्थितं तदा ।
पुरो ऽङ्गनानां मिथुनं प्रदीपकैर्
हिमाद्रिजाया निरराज यन्मुहुः ॥

वरांगनोराजनया तयोर्द्वयं
प्रदीपकैः कल्पितमाद्रिजायया ।
समुन्नमय्यानमितैर्मुहुर्मुहुः
पुरः पुरो नर्तितपाणिपल्लवं ॥

इति कृतबहुमङ्गलं विवाह्य
प्रमथपतिं धरणीधरेन्द्रकन्यां ।
प्रतिययुरमरस्त्रियः समस्तास्
त्रिदशगणाश्च यथायथं गृहेषु ॥

येन श्रीकविशेखरेण विदिताद्विद्यासु वैद्यान्वये
संजज्ञे जगतीप्रकाशकयशश्चन्द्राद्यशश्चन्द्रतः ।
तस्यायं कृतिनः कृतौ हरिविलासाख्याननव्ये महा-
काव्ये भर्गविवाहवर्णनविधौ सर्गो जगामाष्टमः ॥

इति हरविलासाख्यकाव्यं समाप्तं ॥

The last verse occurs, *mutatis mutandis*, at the end of each canto.

[H. T. Colebrooke.]

## 3854.

**2531 b.** Foll. 9; size 10¼ in. by 4½ in.; well written in the Jaina type of Devanāgarī; thirteen lines in a page.

*Khaṇḍapraśasti*, a poem in honour of *Vishṇu's* ten incarnations. [A.]

The text, as well as the order of verses, differs greatly in different versions. Editions have been published in the Paṇḍit, vols. v., vi. (129 verses; Benares, 1870-71); and at Bombay (1860; 183 verses).

It begins: 1. उत्फुल्लामल ° (Paṇḍ., 52; Bo., 64). 2. ये मज्जंति (53; 67). 3. श्रीराम (54; 67). 4. राम त्वत्तरुण ° (55; 68). 5. कीर्तिश्रीरघुवंशरत्ने (56; 69). 6. कीर्तिश्रीरघुवंशदीपे (57; 70). 7.

DR.RUPNATHJI( DR.RUPAK NATH )

गंगो(य)त्पसिता ° (61; 74). 8. सत्तुक्षो ° (64; 77). 9. चिंता गंभीर ° (75; 79). 10. संग्रामांगण ° (66; 82); etc.

This version has 135 stanzas, the last three being: 133. भ्राम्यन्मंदरकंदरोदरपरिव्यावृत्तिभिर्वारिधे: °. 134. रेतोरक्तमयान्यमूनि ° (P., 128; B., 180). 135. प्रेंखद्वाजितरंगम् ° (P., 129; B., 181).

Colophon: इति खंडप्रशस्ते महाकाव्यानि ॥ ° संवत् १६४१ संवत्सरे लेखि ॥

Cf. Aufrecht, Cat. Bodl.; the first three verses of which MS. occur as 55, 56, 44 in MS. A; as 39, 40, 27 in MS. B; as 10, 12, 13 in MS. C; as 4, 5, 6 in ed. Bomb.; and as 2*b*, 3, 4 in *P*. [GAIKAWAR.]

## 3855.

**2531c.** Foll. 6, the last but one of which is wanting; size 10 in. by 4¼ in.; well written, in the Jaina type of Devanāgarī, c. 1500 A.D.; 16 or 17 lines in a page.

*Khaṇḍapraśasti.* [B.]

Stanzas 1–6 as above. 7. सव्दैर्वारिनिधिप्रवार° (P., 58; B., 71). 8. शत्रुघ्न ° (59; 72). 9. स्थाणु: कूर्मो ° (60; 73). 10. गंगोयत्प° (61; 74); etc. The last three as above.

The missing leaf contained stanzas 92–115.

Colophon: इति खंडप्रशस्तिकवित्वानि ॥ [GAIKAWAR.]

## 3856.

**1996.** Foll. 30; size 8¾ in. by 4 in.; fair, modern Devanāgarī writing, on coarse paper; eight lines in a page.

*Khaṇḍapraśasti*, here ascribed to *Hanumat*. [C.]

It begins: 1. कृतक्रोधे (P., 1; B., 1). 2. सर्वैर्मंगल्यनादैर ° (P. ? B. ?). 3. लक्ष्म्याधारांतचारी (P. ? B. ?). 4. सर्वा(सूक्ष्म marg.)सर्वांगयष्टि: (P. ? B. ?). 5. सुग्रीवे व्ययजीवे (P. ? B. ?). 6. तन्वन्यो ऽन्यत्यतन्वा (P. ? B. ?). 7. मध्ये कर्णौ विलीने (P. ? B. ?). 8. हिंसं रक्षोबलं (P. ? B. ?). 9. पद्मां पद्माधिवासां (P. ? B. ?). 10. चंद्रादित्योरुनेत्र: (P., 2*b*; B., 4).

It ends: 172. प्रेंखद्वाजितरंगं (P., 129; B., 181). 173. आरुह्यार्श्वं च पुंभं (P. ? B., 182). 174. प्रस्यातो मथुरापुरि (P. ? B., 183).

Colophon: इति श्रीमद्धनुमद्विरचिता खंडप्रशस्ति: समाप्ता ॥ [DR. JOHN TAYLOR.]

## 3857.

**180.** Foll. 84; size 13 in. by 4¾ in.; fair Devanāgarī writing of 1807 A.D.; nine lines in a page.

*Mādhavānanda*, a poem on *Kṛishṇa-Vishṇu*, in 12 (?) cantos, by *Nanda Paṇḍita*, son of *Rāma Paṇḍita*.

It begins:

लक्ष्मीशृंगारपूरत्रिपुरहरपुरीवासिभक्तानुराग-
प्रोद्यद्विंदुभक्त्या हितविमलतपोराशिभिर्निर्गुणस्य ।
त्रैगुण्येनैव पद्मापरिणयनकृते चित्रचक्षुर्गिरा यत्
ग्राह्यं प्राकाशिरूपं तदिह भवतु वो भूतये माधवस्य ॥ १ ॥

स्वसारूप्यं तुष्टो वितरसि हरे त्वं स्वभजनात्
तदेतद्धित्वाहं सकलमपि याचे लघुपदं ।
स्वजिह्वासारूप्यं वितररसनायां मम यत:
प्रबंधत्वत्केलिं भवति खलु सामर्थ्यमतुलं ॥ २ ॥

शृंगारभक्तिप्रमुनासुरसिंधुयोगे
काव्ये ऽवगाहनमहो सुधियो विधाय ।
श्रीबिंदुमाधवविनोदपुमर्थसार्थे-
सिद्धा प्रयागफलमत्र समाप्नुवंति ॥ ३ ॥

दूरीकरोति दुरितानि गिरा नराणां
नामानुकीर्तिसमुदारमुदा यदीयं ।
प्रत्यंगमस्य महिमानमुपाश्रयंतीं
किं पावयिष्यति हरिर्न गिरं मदीयां ॥ ४ ॥

अस्ति प्रशस्तैर्विभवै: समस्तै:
समस्तभूमंडलमंडनं सा ।
वाराणसी नाम पुरी पुरारेर्
मुदे मुरारेरपि या दिवो ऽपि(?स्ति) ॥ ५ ॥ °

DR.RUPNATHJI( DR.RUPAK NATH)

I. *bhagavatprādurbhāva*, 86 (? 90) verses, ends fol. 6*b*; II. *surasamudrasaṃvāda*, 126 vv., fol. 15*a*; III. *harigurusamāgamana*, 85 vv. (numbered 1–40, 4–48), fol. 22*a*; IV. *śrīvarṇanam*, 124 vv., fol. 30*a*; V. *śrīvirahavarṇanam*, 120 vv., fol. 40*b*; VI. *dūtābhigamavarṇanam*, 81 vv., fol. 45*a*; VII. *dvāravatīpraveśavarṇanam*, 94 vv., fol. 50*a*; VIII. *śrīvivāhavarṇanam*, 79 vv., fol. 55*b*; IX. *bhojanavarṇanam*, 102 vv., fol. 63*a*; X. *svapurapratyāgama*, 100 vv., fol. 68*b*; XI. *śrīsuratavarṇanam*, 95 vv., fol. 73*b*; XII. *mādhavāhnikavarṇanam*, 120 vv., fol. 83*b*. Cantos VII.–XII. are numbered 5–10.

It ends:

प्रातर्दंतक्षतेनाधरविकृतिधरश्छिन्नगात्रो नखांकैर्
जृंभारंभाभिरामो नयनविवशतां वर्णयन् जागरेण ।
किंचिच्छेषांगरामो निधुवनविजयेनाभिनंदन् रतीशं
लक्ष्मीसंभोगतृप्तो वितरतु भगवान्माधवो मंगलानि ॥११९॥

वेलावारितमंडलाखिलमहीधर्माधिकाराग्रणीर्
विख्यातो भुवि रामपंडित इति प्रत्यक्षवाचस्पतिः ।
तत्सूनोरिह नंदपंडितकवेः काव्ये कृतौ माधवा-
नंदे श्रीपरिणीतिकेऽत्र दशमः(!) सर्गोऽगमत्पूर्णतां ॥१२०॥

इति श्रीधर्माधिकारिकुलतिलकश्रीमन्महीपतिपंडितान्वयप्रसूतश्रीरामपंडितात्मजनंदपंडितकृतौ माधवानंदे महाकाव्ये माधवाह्निकवर्णनो नाम दशमः सर्गः ॥

[H. T. COLEBROOKE.]

## 3858.

**2420 a.** Foll. 27 (numbered 29; nos. 4 and 5 being passed over); size 8¼ in. by 4 in.; fair Devanāgarī writing of 1701 A.D.; 9–12 lines in a page.

*Harivilāsa mahākāvya*, a poem, in 5 *sargas*, on the life of *Krishṇa* from his childhood to his slaying the demon *Kaṃsa*; composed, by *Lolimbarāja kavicakravartin*, for king *Harihara*, son of *Sūryapaṇḍita*.

It begins:

रचयति सहसा यच्चित्रमेतत्प्रपंचं
प्रशमयति च तद्वत्केनचित्कौतुकेन ।
अविदितमपरैस्तच्चंडमुंडादिनाना-
दनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥

Printed in the *Paṇḍit*, vol. ii., pp. 79–86.

It ends:

नानागुणैरवनिमंडलमंडनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं
लोलिंबराजकविना कविनायकेन ॥ ५५ ॥
काव्यं हरिविलासाख्यं ये पठिष्यंति केचन ।
तेभ्यः श्रीहरिरत्रैव द्रव्यं दास्यति दैन्यहन् ॥ ५६ ॥

In the odition neither this verse is given, nor another added in the margin, and likewise counted 56:

श्रीमान्कामरसो [ऽ]भव[द्] द्विजकुलालंकारचूडामणिर्
गंगानिर्मलमौनभार्गवकुले तस्माद्रसो(? °दसौ) पंडितः ।
अस्य(? आसीत्तस्य) सुतः सुरत्नसुकृतं चिह्नांबिकायां ततो
लेभे श्रीहरिनामरत्नमवनीमध्ये तदास्तां चिरं ॥ ५६ ॥

इति श्रीमत्सूर्यपंडितकुलालंकारहरिहरमहाराजाधिराजोद्योजितलोलिंबराजविरचिते हरिविलासे महाकाव्ये कंसवधो नाम पंचमः सर्गः समाप्तः ॥ संवत् १७५८ वर्षे फाल्गुनवदि १४ सोमे स्तंभतीर्थवासिना देवकृष्णसुतनंदरामेण लिखितं परोपकाराय शिवरामस्यार्थे च भूयात्° लि° राजनगरस्थितेन ॥

[GAIKAWAR.]

## 3859.

**702 a.** Foll. 30; size 9½ in. by 4 in.; clear Devanāgarī writing of 1635 A.D.; ten lines in a page.

*Pārijātaharaṇa-vivaraṇa*, an anonymous commentary on the *Pārijātaharaṇa*, a poem in 3 *āśvāsa*, by *Nārāyaṇa Paṇḍita*, son of *Trivikramācārya*.

The subject of the poem is the well-known incident of *Krishṇa's* seizing the *Pārijāta* tree in *Indra's* paradise and carrying it off to Vaikuṇṭha.

DR.RUPNATHJI( DR.RUPAK NATH )

It begins:

श्रीमन्नारायणप्रज्ञं नत्वा व्याख्यां करोम्यहम् ।
श्रीपारिजातहरणकाव्यराजस्य लेशतः ॥

वंद इति ॥ अहं तं पुरुषोत्तमं वंद इत्यन्वयः। अनंतं निरवधिकं धाम तेजो दधतं। त्रीणि धामानि मंदिराणि अनंतासनश्वेतद्वीपवैकुंठाख्यानि यस्येति त्रिधामानं। युतवसुधामानं तं युताः धरणीरमा नागेंद्रा येनेति। यो ऽमान्मानरहितः माङ् माने। दैत्यानामसुराणां युधा युद्धेनांतं नाशं व्यधाच्चकार ॥ १ ॥ गौरिति ॥ °

Tho second leaf of a MS. of tho original text (marked पारि॰ हर॰), containing I. 7–18, has been inserted between foll. 1 and 2 of this MS.

Verses 7 and 8 of the text and commentary run thus:

अथ नानाभोगानां
पदे यदुपुरे ऽवसद्धनाभोगानां ।
लसति घनानाभो गानां (*r.* घनाभो गानान्)
नाके द्वेष्टेव पद्मनाभो ऽगानां ॥ ७ ॥

पद्मनाभः श्रीकृष्णो घनाभो मेघवर्णः यदुपुरे यादवनगरे द्वारकाख्ये नानाभोगानां चंदनकस्तूरिकाकुंकुमादीनां घनाभोगानां(ध°) घनानां(ध°) द्रव्याणामाभोगः परिपूर्णता येषु तेषां पदे स्थाने गानाद्गीताल्लसति विराजति अवसदुवास। इत्थंभूतलक्षणे नाके स्वर्गे। अगानां पर्वतानां द्वेष्टा शत्रुरिंद्र इव ॥ ७ ॥

देवनिकायानामभ्यर्थनया
यो ऽजनि स्वकाया(°यो) नाम।
गौः स्थिरकायानामथाप्त्यै
यस्यारुजो ऽधिकाया नाम ॥ ८ ॥

यो देवनिकायानां सुरनिकाराणां स्वकायः गौः अरिभ्यो ऽभय वै(!) इति वचनात् स्थिरकायानां दृढशरीराणामभ्यर्थनया प्रार्थनेनाजनि अवततार। नाम यस्य नामापि अधिकायाः महत्या अरुजो योगादितरस्याः सुखावस्थितेराप्त्यै प्राप्त्यै(? आ°) स्यात् ॥ ८ ॥

It ends:

निजे इति। सुनंदनंदनंदकः सुनंदो नंदश्चैतौ द्वौ गोपौ तौ नंदयति सुखयतीति ° ॥ ७१ ॥

पारिजातहरणाख्यकाव्यराट्
पारिजातमवलंब्य नूतना ।
राजते विवरणाख्यसल्लता-
लालितासु पदपल्लवे श्रिया ॥ १ ॥

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमाचार्यसुतनारायणपंडितविरचितस्य पारिजातहरणाख्यकाव्यस्य विवरणे तृतीय आश्वासः ॥

शाके नगेषुशरचन्द्रमिते नभस्ये
मासे सिते दल उमेशतिथौ कुजाहे ।
चिंतामणिर्बुधवरो व्यलिखद्विधिज्ञः
श्रीपारिजातहरणाभिधकाव्यटीकाम् ॥

श्रीमद्गोविन्दज्योतिर्विन्ननुजस्य चिन्तामणेः पुस्तकमेतत् ॥ ग्रंथसंख्या ७०० ॥

[H. T. Colebrooke.]

## 3860.

**2229.** Foll. 32 (of which fol. 31 is lost); size 9¼ in. by 5¼ in.; good Devanāgarī writing of about 1750 A.D.; nino lines in a page.

*Gītagovinda*, a lyric-dramatic poem, in 12 *sargas*, by *Jayadeva*, son of *Bhojadeva* and *Vāmadevī*.[1]

Published by Ch. Lassen (with Latin transl., Bonn, 1837), and frequently in India.

Translated into English (in part or whole) by Sir W. Jones, As. Res., iii., p. 8 seqq.; Sir E. Arnold, Col. Ouvry, etc.

Occasional glosses, mainly taken from *Nārāyaṇa Paṇḍita's* commentary, have been added in the margin.

[R. Johnson.]

## 3861.

**2238d.** Foll. 43 (of which fol. 40 is lost); size 5¼ in. by 4 in.; good, clear Devanāgarī writing (of the Jaina type) of about 1600 A.D.; nine lines in a page.

*Gītagovinda.* Cod. B in Lasson's Proleg. Gitagov., p. xii.

[Gaikawar.]

[1] Thus also Calc. ed., whilst Haeberlin and Jībānanda make the name *Rāmādevī*.

DR.RUPNATHJI( DR.RUPAK NATH )

### 3862.

**2789.** Foll. 51; size 9 in. by 11 in.; excellent, large Devanāgarī writing; nine lines in a page.

*Gītagovinda.*

The MS. was copied by *Lālā Mahtāb Rāy.*

[Coll. of Fort William.]

### 3863.

**2806.** Foll. 27; 4to, size 9 in. by 7 in.; the same writing as last MS.; fifteen lines in a page.

The same work. [Sir Charles Wilkins.]

### 3864.

**2933.** Foll. 89; size 11¾ in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

The same work. The MS. was perhaps written in Kaśmīr. [ ? ]

### 3865.

**2314 c.** Foll. 4; size 11¾ in. by 4¼ in.; modern Bengālī handwriting; eleven lines in a page.

Fragment of the *Gītagovinda*, terminating at *sarga* II., verse 11. [R. Johnson.]

### 3866.

**994 a.** Foll. 42; size 13¼ in. by 4¼ in.; good Bengālī writing of 1720 A.D.; 7–13 lines in a page.

*Gītagovinda*, with a commentary called *Bālabodhinī*—ascribed (though not in this MS.) to *Caitanyadāsa*, or (? as he is also called) *Pūjāri Gosvāmin*—written round the text. [A.]

The commentary is described (from Sir W. Jones's MS.) by Lassen, Proleg. Gītag., p. xii. It has since been repeatedly printed in India.

It begins in this MS.:

श्रीलकृष्णकृपासीधुकणोन्मत्तेन[1] केनचित् ।
टीका संगृह्यते गीतगोविन्दस्य समासतः ॥
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥

अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः ।
विवृतिर्न कृता सा तु ज्ञेया ग्रन्थान्तरे बुधैः ॥
वक्तव्यो[2] बालबोधिन्यां शब्दार्थः शब्दवेदिभिः ।
भावार्थदीपिकायां च भावो भावार्थलोलुपैः ॥

The author does not again mention the *Bhāvārthadīpikā*, composed by himself(?); nor does he seem to refer to any other authorities except *Viśva* (VII. 21; XI. 3, 25) and *Hārāvalī* (XI. 20).

It ends:

यद्वत्स्वबालमुग्धोक्तौ पित्रा प्रीतिरवाप्यते ।
तद्वत् श्रीकृष्णचैतन्यः प्रीयतामत्र जल्पितैः[3] ॥

To which ed. Calc., 1873 (not 1881), adds the verse[4]:

गोविन्दपादसेवायाः प्रभावादुदिता स्वयं ।
चैतन्यदासतो बालबोधिनी स्यात्सतां मुदे ॥

In some editions, on the other hand, the work is ascribed to *Pūjāri Gosvāmin*; in the one consulted (Calc. 1881) this being, however, done only on the title-page, not in the colophons.

The copyist's name is *Siddheśvara Śarman.*

[H. T. Colebrooke.]

---

[1] श्रीचैतन्य० B; eds. [2] बोद्धव्यो v. l. eds.
[3] ०ते v. l. eds.
[4] The lithographed Agra edition of 1870 reads:
श्रीगोविंदपादसेवाप्रभावादुदितां स्वयं ।
चैतन्यदासेन वालवोधनी स्यात्सतां मुदे ॥

DR.RUPNATHJI( DR.RUPAK NATH )

## 3867.

**1184 h.** Foll. 35; size 13¼ in. by 4¾ in.; modern Bengālī handwriting; six lines in a page.

*Bālabodhinī.* A fragment reaching as far as *sarga* VII., verse 25.

Notes, in Bengālī and Devanāgarī writing on the fly-leaf, make it the work of *Pūjāri.*

[H. T. COLEBROOKE.]

## 3868.

**2672.** Foll. 100; size 11 in. by 5 in.; fairly good Devanāgarī writing of 1771 A.D.; 8–13 lines in a page.

*Gītagovinda,* with a commentary, entitled *Rasamañjarī,* by *Śaṅkara Miśra,* son of *Dineśvara Miśra.*

The commentary was composed by order of *Śālinātha,* who stood in some relation or other (? as *Divan*) to *Hariśaṅkara* of Kāśivāra, a descendant of *Krishṇa Miśra,* author of the *Prabodhacandrodaya.*

The commentary begins:

पूर्वं प्रस्थितमुत्सुकेन मनसा तस्याः पदांभोरुहं
पश्चादेकमगान्निकुंजपदवीं शंकाशतैर्मत्परं ।
प्राप्ते चाथ तदीयकर्णविवरं कंसारिवंशो(°शी) रवे[:]
प्रस्थातुं पथि राधिकाचरणयोर्जीवोऽहंपूर्विका ॥ १ ॥

जागर्ति स्मरवैरिपत्तनमधि क्षोणीशिरोभूषणं
देशः श्रीकशिवार इत्यभिहितः स्फीतो गुणैरुज्ज्वलैः ।
वंशस्तत्र चकास्ति गोतममुनेर्विख्यातकीर्तिप्रजो
यत्र ब्रह्मविदाविरास सुकृती श्रीकृष्णमिश्रः कृती ॥२॥

श्रीकृष्णमिश्रः कतमेन वर्ण्यतां
तपोभिराविष्कृतवान्य ईश्वरं ।
व्यनक्ति यच्छास्त्रकवित्वकौशलं
प्रबोधचंद्रोदयनाम नाटकं ॥ ३ ॥

तस्यैवास कुले सतेजसुकृती संतोष्य ढिल्लीपतिं
यो दुष्टानयमार्ज्यराज्यमकृत श्रीकाशिवारे चिरं ।
येनोन्मार्गगतान्विनेतुममलब्रह्मण्यभाजोऽप्यलं
धात्री वृत्तिरसिञ्चि(?)भार्गवकृपद्रोणादिपृथ्वी ततः॥४॥

अक्रूरोद्धवदयितो दानवदमनप्रियो नित्यं ।
तस्मादपरः कमलापतिरिव कमलापतिर्जातः ॥ ५ ॥

जातः श्रीहरसिंहदेवसुकृती तस्यात्मजो यो यशः
कुन्देन्दुप्रतिमं ततान नपनः(?) शश्वत्प्रजापालनैः ।
ससामन्तगुणोपवर्णनविधौ(? सत्सा°) यत्पौरुषं सन्नतं
ढिल्लीशः स्वयमेव संसदि निजे सश्लाघ्यमाख्यातवान्
*Līlāśuka's* *Kṛishṇakarṇāmṛita*, *śataka* I., consisting of 112 verses. [D.]

[H. T. COLEBROOKE.]

## 3904.

**1293.** Foll. 108; size $12\frac{3}{4}$ in. by 5 in.; fair, modern Devanāgarī writing; nine lines in a page.

*Karṇāmṛitavyākhyā*, also called *Suvarṇacashaka*, a commentary on the *Kṛishṇakarṇāmṛita*, by *Pāpa Yallaya Sūri*, son of *Tirumalla Bhaṭṭopādhyāya* and *Koṇḍamāmbā*; with the text of *Līlāśuka's* poem between the commentary.

The three *śatakas*, consisting of 111, 110 and 106 stanzas resp., have separate paginations; mistakes occurring in *śat.* II., where no. 36 is passed over and the last leaf is misplaced at the end of the whole work; and in *śat.* III., where nos. 28–37 are passed over without any omission.

It begins:

श्रीरामं सीतया साकं मुकुंदं मौलिशेखरं ।
यज्वानं वाजपेयेन यज्ञेशं प्रणतो ऽस्म्यहं ॥ १ ॥
येषां संदर्शनेनैव षट्शास्त्रवशगो भवेत् ।
यतींद्रान्वासुदेवेन्द्रान्नमामो ऽभीष्टसिद्धये ॥ २ ॥
वसुमत्यन्वये जातपापयल्लयसूरिणा ।
कर्णामृतस्य व्याख्यानं क्रियते कृतिनां मुदे ॥ ३ ॥
मंत्रशास्त्रे महाभाष्ये मणिमीमांसयोः सदा ।
मतिर्यस्य भवेत्तेन मंतव्या कृतिरीदृशी ॥ ४ ॥ ० ५ ॥
षट्टिभट्टादिभिः प्राप्य यशसे प्रार्थनानि मे ।
किंतु कृष्णस्मृतिर्नित्यं भवत्विति मतिर्मम ॥ ६ ॥
अर्थांतरपरिस्फूर्तिर्यत्र क्वापि भवेद्यदि ।
भाट्टाप्रभाकरौ(!) दृष्ट्वा परितुष्यंतु ते जनाः ॥ ७ ॥
अज्ञानाद्यत्र कुत्रापि विपरीतार्थवर्णनं ।
कृतं चेच्छाद्यतां तत्तद्विद्वद्भिर्वीतमत्सरैः ॥ ८ ॥ ०

अत्र ग्रंथकर्ता ग्रंथं चिकीर्षुः आदौ गुरून् महीकरोति । चिंतामणिरिति । ० चिंतामणिर्नाम मंत्रविशेषो यच्चिंतनवशात्कृतार्थो ऽभूत्कविः । स जयति सर्वोत्कर्षेण वर्तत इत्यर्थः । न तु गुरुं प्रकाशयेद्धीमान्न तु मंत्रं प्रकाशयेदित्यादिना मंत्रो न प्रकाश्यत इति चेन्न तच्चिंतामणिमंत्रचिंतनफल इत्यादिना श्रीहर्षेण प्रकाशितत्वात् । स्मृतिस्तु साध्यमंत्रविषया न तु सिद्धमंत्रविषयेति ज्ञेयं। यद्वा चिंतामणिरिति कश्चिद्योगी यत्संनिधाने कविना योगाभ्यासः कृतः । यद्वा चिंतामणिरिति सोमगिरेर्विशेषणं । तस्मिन्पक्षे चिंतामणिवदभीष्टप्रदाता सोमगिरिर्नाम काचिद्वारवनितेति वा । यद्वा । उक्तविशेषणविशिष्टः सोमगिरिर्नाम महावाक्योपदेष्टा गिरिसंप्रदायप्रवर्तकः । मे मम गुरुर्जयति । शिक्षागुरुरंतर्यामित्वेन शिक्षकः शिखिनः मयूरस्य पिच्छं बर्हं मौलौ शिरसि यस्य स तथोक्तः । भगवान् षड्गुणैश्वर्यसंपन्नः श्रीकृष्ण इत्यर्थः । सो ऽपि जयति । ०

It ends: या प्रीति०॥१०६॥ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायतिरुमलभट्टपुत्रेण कोदंडमांबा (कोंतमांबा I.; कोंडमांबा II.) गर्भशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां कर्णामृतव्याख्यायां सुवर्णचषकसमाख्यायां तृतीयो ऽध्यायः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

There is much uncertainty about the Sanskrit spelling of these apparently Tamil names; the father's name appearing in the colophons as तिरुमल, the mother's as कोंतमांबा, कोदंडमांबा and कोंडमांबा, and the author's name as पययल्लय, पापयल्लय and पापयल्लय.

[H. T. COLEBROOKE.]

## 3905.

**2577.** Foll. 46; 4to, size 10 in. by 8½ in.; modern Telugu writing; 31–33 lines in a page. Foll. 12*b* and 14*b* have been left blank.

*Līlāśuka's Kṛishṇakarṇāmṛita*, with *Pāpa Yallaya Sūri's* commentary. *Adhyāya* (or *śataka*) II. and III., of 110 and 106 stanzas resp.

The commentary begins:

लोकप्रसिद्धकोदंडबाणान् त्यक्त्वैव धनुः ।
पुष्पास्त्राण्यपि वेणवादीन्नमो रामाय गृह्णते ॥

पूर्वशतकांते तु यद्वैभवमेव मदीयं ज्ञानकरणं गोचरयन्निवुक्तं तद्वैभवं येन येन प्रकारेण प्रतीतं तेन तेन प्रकारेणाह । अभिनवेत्यादिना । °

*Adhy.* III. beg. fol. 24:

व्याख्यामुत्फलसत्स्वानि पंकजं पार्थसारथिं ।
भजे ऽहं परमानंदमनं (? °मेनं) पद्मालयापतिं ॥

(Text:) अस्ति स्वस्त्ययनं ° ॥ १ ॥

It ends: इति श्रीपदवाक्यप्रमाणपारावारपारीणवसुमतीतिरुमलभट्टोपाध्यायपुत्रेण कोंडमांबागर्भशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां [कर्णामृतव्याख्यायां *adhy.* II.] सुवर्णचषकसमाख्यायां तृतियो ऽध्यायः ॥

[MACKENZIE COLLECTION.]

## 3906.

**823 d.** Foll. 38; size 12¾ in. by 4½ in.; fairly good, modern Bengālī handwriting; eleven lines in a page.

*Sāraṅgaraṅgadā*, a commentary, by *Kṛishṇadāsa*, pupil of *Rūpa Gosvāmin*, on the first *śataka* of the *Kṛishṇakarṇāmṛita*.

It begins:

कृपासुधासरिद्यस्य विश्वमाप्लावयन्त्यपि ।
नीचगैव (निचलैव N.) सदा भाति तं श्रीचैतन्यमाश्रये ॥१॥
वमन्तो कृष्णमाधुर्यकेलिसौन्दर्यसंपदं ।
कैश्चिन्न भावना सम्यग् ज्ञेया लीलाशुकस्य गीः ॥ २ ॥
मन्दो ऽपि कश्चित् श्रीरूपपादाम्भोजमधून्मदः ।
कृष्णकर्णामृतव्याख्यां विवृणोति यथामति ॥ ३ ॥
स्पष्टे चाष्टदशोऽक्षर्ये निर्बन्धं परिमुञ्चता ।
निगूढो ऽन्तर्देशोऽक्षर्थो व्याख्येयः साग्रहं (? सांप्रतं) मया ॥४॥
मदास्यमरु[त्]संचारखिन्नांगा गोकुलोन्मुखीं ।
सन्तः पुष्यन्तीमां स्निग्धा कर्णिकासारसंनिधौ ॥ ५ ॥
सद्गङ्गभावगन्धर्वगान्धर्वभवलम्पटैः ।
सारङ्गैः शोध्यतामेषा टीका सारङ्गरङ्गदा ॥ ६ ॥

अथ दाक्षिणात्यः कृष्णवेण्वापश्चिमतीरवासी पण्डितकवीन्द्रः श्रीबिल्वमङ्गलनामा कश्चिद् ब्राह्मणः किलासीत् । स च पूर्वदुर्वासनाप्रेरितस्तत्पूर्वतीरनिवासिन्यां कस्यांचिच्चिन्तामणिनाम्न्यां वेश्यायामतीवासक्तो बभूव । स कदाचित् प्रवृद्धतमिस्रायां जीमूतमन्द्रगर्जितजातहृच्छयो ऽन्ध इवागणितप्रत्यूहचयः स्वगृहान्निर्गत्य तां नदीं हस्ताभ्यां सवालघनेनोत्तीर्य (*r.* शवा°) कीलितकपाटं तदावासद्वारमाससाद । तत्रापि तत्र वै (*r.* तत्राप्य-) श्रुतफुत्कारशत इतस्ततो भ्रमन् भित्तिगर्तेऽर्धप्रविष्टकृष्णभुजङ्गपुच्छमालम्ब्य भित्तिमुल्लङ्घ्य प्रणालिकामध्ये निपतन्मूर्छितो बभूव । ° (cf. Oxf. MS., no. 231[1]) सार्वलौकिकी प्रसिद्धिरिति ॥ अथवा सर्वोन्मत्तः स्वालयात् श्रीवृन्दावनाय प्रस्थानं कुर्वन्नेव श्रीलीलाशुकः स्वगुरोः स्वगुरुत्वेनैव स्वेष्टदेवतस्य च संकीर्तनरूपं मङ्गलमाचरति स्म । ° गुर्विष्टदेवस्मरणं तद्यथा चिन्तामणिरित्यादि । सोमगिरिस्तन्नामा मे मम गुरुः जयति सर्वोत्कर्षेण वर्तते । कीदृक् । चिन्तामणिः स्वाश्रयमात्रेणाभीष्टपूर्वकत्वात् चिन्तामणित्वं सर्वसेविता चास्य । किं वा जयति तं प्रति प्रणतो ऽस्मीत्यर्थः । ° । तथा मे ममेष्टदैवतं भगवांश्च जयति । को ऽयं भगवानित्यत्राह । शिखिपिच्छमौलिः °

It ends:

जयती सुरता पङ्क्तेर्मम मन्दमतेर्गती (!) ।
मत्सर्वस्वपदाम्भोजौ राधामदनमोहनौ ॥ १ ॥

---

[1] Of *variæ lectiones* of our MS. may be mentioned: च्च: सर्वं twice for स्वसर्वं; रासकुञ्जादिलीला° (!) for राजकुंजादि°; and कृष्णलीलादिवर्णनमयग्रन्थाश्चकार for श्रीकृष्णलीलादिवर्णनग्रंथांश्चकार ।



DR RUPNATHJI( DR RUPAK NATH )

जयति मधुरराधाकृष्णलीला° २ ॥

अचक्षुषो पथि मे ऽन्धस्य स्खलत्पादगतेर्मुहुः ।
स्वकृपायष्टिदानेन सन्तः सन्त्ववलम्बनं ॥ ३ ॥
श्रीरूपचरणाम्भोजालिकृष्णदासेन निर्मिता ।
कृष्णकर्णामृतस्यैषा टीका सारङ्गरङ्गदा ॥ ४ ॥

Though the author's name is not mentioned in the Oxford MS., this is doubtless the commentary referred to by Wilson, Sel. Works, i., p. 168. Whether it extended beyond the first *śataka* seems doubtful, seeing that the other MSS. of which particulars are given correspond to ours. Cf. Notices, 2nd ser., i., p. 71 (beginning, like the Oxf. MS., with an additional verse: यद्भावभावितधियो ऽय वाचां°).

[H. T. Colebrooke.]

## 3907.

**564.** Foll. 64 (the first of which was lost and replaced by two leaves); size 12½ in. by 6 in.; fair Devanāgarī writing of about 1780 A.D.; 9–15 lines in a page.

*Sumaṅgalastotra*, by *Bilvamaṅgala*; with a (partial) commentary, called *Bhaktavallabhā*, by *Bhaṭṭa Vanamālin*.

The work is of essentially the same character as the same author's *Krishṇakarṇāmṛita*, with which it has indeed much of its matter in common, and with which it seems actually identified by the commentator. But, besides containing a good deal of new matter, it is arranged in a totally different way, so as virtually to constitute a different work.

The text begins:

चिंतामणिर्जयति सोमगिरिर्गुरुर्मे° ॥ १ ॥

मातर्नातः परमनुचितं यत्खलानां पुरस्ताद्
अस्ताशंकं जठरपिठरीपूर्तये नर्तितासि[1] ।
तत्क्षंतव्यं सहजसरले वत्सले वाणि कुर्यां
प्रायश्चित्तं गुणगणनयोगोपवेषस्य विष्णोः ॥ २ ॥

[1] See the comment on p. 1475*a*.

यो लोकभारोद्धरणाय चक्री
चक्रे ऽवतारं वसुदेवगेहे ।
गोपीजनानंदकरो मुकुंदः
पायात्स वो यादवराजसिंहः ॥ ३ ॥

आबबंध मुकुटं कुटुंबिनी
तत्र मूर्धनि मुकुंदजन्मनि ।
यत्र रंगचितपुष्पपल्लवैर्
बल्लवीभिरपि पर्यधीयत ॥ ४ ॥

उपासतां ब्रह्मविदः पुराणाः
सनातनं ब्रह्म निरुद्धचित्ताः ।
वयं यशोदासुतबालकेलि-
कथासुधासिंधुषु मज्जयामः ॥ ५ ॥

विहाय पीयूषरसं मुनीश्वरा
ममांघ्रिराजीवरसं पिबंति किम् ।
इति स्वपादांबुजपानकौतुकी
स गोपबालः श्रियमातनोतु नः ॥ ६ ॥

The work, consisting of 383 stanzas, shows the following topics: *iti kaumāram* (after v. 69), *kaiśorakeliḥ* (v. 233), *tāruṇyam* (v. 240), *iti kaviprasādaḥ, samāptaṃ gokulacaritāmṛitam* (v. 271), *mathurācaritam* (v. 286), *dvārakācaritaṃ samāptaṃ krishṇacaritāmṛitam* (v. 306), *śrīnārāyaṇastutiḥ* (v. 331), *śivastutiḥ* (v. 336), *hariharastutiḥ* (v. 338), *nṛisiṃhastutiḥ* (v. 342), *rāmacaritāmṛitam* (v. 355).

It ends:

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सो ऽयं नो विदधातु वांछितफलं श्रीदेवकीनंदनः ॥ ३८० ॥
इति समाप्तं स्तोत्रम् ॥

अमीभिरष्टाभिरभिष्टुतः स्तवैः
शतेन देवः शतपत्रलोचनः ।
किशोरवेषे न कृपाम्बुदः स्वयं
विराजमानो हृदि मे विराजताम् ॥ ३८१ ॥

श्रीवासुदेवकृतभक्तिरतिप्रसिद्धो
योगीश्वरो विदिततत्त्वमतिः प्रशांतः ।
मुक्त्यै पदं भुवि चिकाय परं पवित्रं
द्वारावतीं ननु जगाम नमन् हरिं सः ॥ ३८२ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

हस्तौ सुयोज्य हरिभक्तिरतश्चकार
 स्तोत्रं वरं हरिविलोकनकाङ्क्षयासौ ।
श्रीबिल्वमंगल इदं पठतो जनस्य
 प्रीतो हरिर्दिशति भक्तिमतिप्रगल्भाम् ॥ ३८३ ॥

इति श्रीबिल्वमंगलकृतं सुमंगलाख्यं स्तोत्रं समाप्तं ॥

The four verses quoted in the *Bhaktirasāmṛitasindhu*, above fol. 813*b*, as extracted from *Bilvamaṅgala* and *Bilvamaṅgalastotra* (and not found in the author's *Kṛishṇakarṇāmṛita*, cf. p. 1471*b*) occur here as vv. 305 (fol. 61*b*), 271 (fol. 60*a*), 189 (fol. 54*a*) and 245 (fol. 59*a*) resp.

Of the first 25 verses of this work the following occur also in the *Kṛishṇakarṇāmṛita*: 1 (=*K.* I. 1), 2 (II. 4), 5 (II. 55), 8 (III. 65), 13 (II. 54), 17 (II. 76), 21 (II. 69), 23 (II. 98), 24 (II. 82), 25 (II. 15); whilst of the last 25, not a single verse appears there; and of the last five verses commented upon, only the last two are found there (199 = III. 29, 200 = III. 80).

*Bilvamaṅgala's Kṛishṇastotra* (109 verses), printed at Calcutta (1817), represents a third work or version, which again has much in common with the present work, e.g. *S.* 2 (= *K.* 109), 5 (5), 11 (1), 12 (69), 13 (87), 14 (88), 201 (102).

The Commentary begins:

श्रीमद्गिरिवराधीशं वृंदारण्यपुरंदरं ।
कृष्णचंद्रं प्रपद्ये ऽहं भक्तानुग्रहकातरं ॥ १ ॥
नंदव्रजे यामरता नान्यत्रामरता समा ।
यत्र प्रातर्दिवा सायं नक्तं व्यक्तं परं महः ॥ २ ॥
कृष्णकर्णामृतस्यैषा टीका श्रीभक्तवल्लभा ।
भूनिर्ज्जरेण भट्टेन क्रियते वनमालिना ॥ ३ ॥

अथाखिलगोपनितंबिनीनिकरावलंबि रासविहारि श्रीकृष्णभावाविष्टः परमभागवतो लीलाशुकः श्रीकृष्णकर्णामृताख्यं स्तोत्ररत्नं चिकीर्षुः शिखिपिच्छमौल्यं(°ल्यलं)कृतश्रीकृष्णचंद्रेष्टदेवतानुस्मरणरूपं मंगलमाचरति चिंतामणिरिति॥ भगवान् जयति सर्वोत्कर्षेण वर्तते भगवान् श्रीकृष्ण एव।° कीदृशः। चिंतामणिः चिंतानां चिंत्यमानानां बाल्यादिकिशोरलीलानां भक्तेषु मणिरिव प्रकाशकः।° पुनः कीदृशः। सोमगिरिः सोमस्यामृत[स्य] गिरिः पर्वत इ[ति] बहुप्रकारास्वाद्यपरमानंदनिर्झररममयः। अथवा। उमया सह सोमः श्रीमहेशस्तस्य गिरिः पूज्य इति °। पुनः कीदृशः। मे मम गुरुः। ° ॥ १ ॥ मातरिति ° ॥ हे मातर्वाग्देवि अतः परमन्यदनुचितं नास्ति। ° खलानां श्रीकृष्णानुरागरहितानां पुरस्तादग्रे न्यस्ताशंकं। दूरीकृतये हि पारलौकिकभयं यथा तथा वृथा त्वं नर्तितासि। नर्तनं श्रीभगवदग्रे तद्भक्तानां वा समुचितमिति भावः। ° ॥ २ ॥

The commentary ends (fol. 56*b*) with the explanation of verse 200:

गोपीनामभिमतगीतहर्षवर्षाद्
 आपीनस्तनभरनिर्भरोपगूहं (°गूढं) ।
केलीनामयतु रसैरुपास्य मानं
 कालिंदीपुलिनचरं परं महो नः ॥ २०० ॥

गोपीनां सर्वतः पीनैः पुष्टैः स्तनभरैर्भारैर्निर्भरं गाढं उपगूढं आलिंगितं हेतुमाह। अभिमतः स्वस्याभीष्टो यो गीतवर्षः मधुरगानामृतवर्षस्य हर्ष आनंदस्तस्मात् तत्श्रवणादित्यर्थः ॥ २०० ॥

[H. T. COLEBROOKE.]

## 3908.

2420 b. Foll. 34; size 8½ in. by 4 in.; fairly good Devanāgarī writing of 1494 A.D.; eleven lines in a page; foll. 1–3, 6, 10–12 supplied by a more recent hand.

*Vishṇubhaktikalpalatā*, a poem in eight *stavakas*, consisting of meditations and devotional effusions on the names and qualities of *Vishṇu*; by *Purushottama*, son of *Vishṇu* and *Mānī*.

The poem has been published in the *Kāvyamālā* (no. 31, Bomb. 1892). It begins:

अतिसुदृढमगातां हर्षमंगैकभावाद्
 अधिकतममुमेशौ यं तथात्मैकयोगात् ।
तदधिकमिव यातौ यं सुतं वीक्षमाणौ
 सफलयतु स देवो वः क्रतुं वक्रतुंडः ॥ १ ॥
स्फटिकमणिमयाश्च ° ॥ २ ॥
हृदयजलजजाग्रज्ज्योतिर् ° ॥ ३ ॥
अधिजगति जनानामेक एवास्त्युपायो
 विषमतमभवाब्धिं तूर्णमेतं तरीतुं ।
श्रवणमननपूर्वं विष्णुपादारविंद-
 स्मरणमिति तदेतत् प्रोच्यते भक्तिलोभात् ॥ ४ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

विमलयतु मनो मे दूषितं दोषसंघैर्
अहरहरिह रम्या रामचंद्रस्य भक्तिः ।
सगरतनयभूतिभ्रंषितं भूमिभागं
सुरसरिदिव दोषप्लोषविख्यातशक्तिः ॥ ५ ॥

I. contains 39 verses; II., 51; III., 41; IV., 41; V., 38; VI., 39; VII., 36; VIII., 40.

It ends:

मच्चेतोवृत्तिलक्ष्मीरहसि विहसिते हृत्सरोजे सुजाग्रद्-
विष्वक्सेनप्रसंगोत्सवमवगणितोपायसर्वांतराया ।
संप्राप्य प्रेमपाथोनिधिलहरिपरिव्याकुलाश्लिष्टवाढं
स्वामिव्याभिश्रभावं समलभत सुखे यत्र वाचां विरामः॥४०॥

इति श्रीविष्णुभक्तिप्रबंधे कल्पलताख्ये कविश्रीपुरुषोत्तमकृतौ चित्तप्रबोधो नामाष्टमः स्तवकः॥ समाप्तोयं विष्णुभक्तिकल्पलताख्यः । संवत् १५५१ वर्षे चैत्रे शुदि १० गुरौ दामोदरेण लिलिखे ॥

मानी माता पिता विष्णुर्यस्याख्या पुरुषोत्तमः ।
विष्णुभक्तिलतां चक्रे सतां चक्रे कृतांजलिः ॥

[GAIKAWAR.]

## 3909.

**2468a.** Foll. 66; size 10 in. by 6¼ in.; good, clear Devanāgarī writing of 1791 A.D.; fifteen lines in a page.

*Vishṇubhaktikalpalatā,* with a commentary (*vivaraṇa*), called *Kalpalatāprakāśa,* composed by *Mahīdhara* (or *Mah[ī]dāsa,* as he is also called) in 1597 A.D. It begins:

नृहरिं गिरिजां गिरं गणेशं
गुरुपादाब्जयुगं शिवं प्रणम्य ।
हरिभक्तिलताभिधेयकाव्ये
विवृतिं वच्मि यथामतीशतुष्ट्यै ॥

तत्र स्वाभीष्टदेवतावर्णनरूपं विष्णुभक्तिकल्पलताख्यं काव्यं चिकीर्षुः प्रारिप्सितग्रंथनिर्विघ्नसमाप्त्यै सदाचारपरिपालनाय पुरुषोत्तमः कविराट् विघ्नेशस्मरणलक्षणमाशीरूपं काव्यमुखं वदति । आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्युक्तेः ॥

अतिसुदृढमगातां ० ॥ १ ॥

उमेशौ भवानीशंकरौ संगैकभावाद्देहैक्यादतिसुदृढं निबिडं हर्षं संतोषमगातां यं वीक्षमाणौ विलोकयंतौ तदधिकमिवात्मैवात्यहर्षाधिकं(!) हर्षं यातौ प्राप्तौ स व[क्र]तुंडोऽयमिति। प्रापतुः। तथा आ[त्मै]क्ययोगादात्मनोरैक्यादधिकतममत्यधिकं हर्षमगातां। तथा यं सुतं गणेशं पुत्रं शो(स or स गणेशो) देवो वो युष्माकं क्रतुं संकल्पं सफलयतु सफलं करोतु मनोरथसिद्धिं करोत्वित्यर्थः। मालिनीवृत्तं ॥ १ ॥

It ends: इदानीं ग्रंथांते मातृपितृनामकथनपूर्वकं स्वनाम ।

माना (मानी) माता पिता विष्णुर्यस्याख्या पुरुषोत्तमः ।
विष्णुभक्तिलतां चक्रे सतां चक्रे कृतांजलिः ॥ ४१ ॥

निगमयति मातेति । यस्य माता मानीनाम्नी पिता विष्णुनामा। यस्याख्या नाम पुरुषोत्तमः स इमां विष्णुभक्तिकल्पलतां चक्रे कृतवान्। कीदृशः। सतां साधूनां चक्रे समूहे कृतोंजलिर्येन साधु[न]मस्क्रुदित्यर्थः ॥ ४१ ॥

इति श्रीविष्णुभक्तिकल्पलताविवरणे चित्तप्रबोधनामाष्टमः स्तवकः ॥ ० संवत् १८४८ वर्षे ज्येष्ठमासे शुक्लपक्षे १ प्रतिपदि शुक्रवासरे लिखितं भट्टकाशीदासहरीहराणी लिखावीतं से-(? l. सी)तावेणीरामसुतकुबेरजीदं पुस्तकं ॥

[GAIKAWAR.]

## 3910.

**1500.** Foll. 76; size 11¾ in. by 5 in.; fair Devanāgarī writing of about 1650 A.D.; 8–12 lines in a page.

The same works.

Colophon: इति श्रीविष्णुभक्तिकल्पलताविवरणे चित्तप्रबोधो नामाष्टमः स्तवकः ॥ समाप्ता विवृतिः ॥

श्रुतिबाणरसेंदुमानवर्षे
नभसि स्कंददिने सिते ऽर्कवारे ।
महिदा[स]बुधो गिरीशपुर्यां
कृतवान् कल्पलताप्रकाशमेतं ॥ ०

Cf. Weber, Berlin Cat., no. 542.

[H. T. COLEBROOKE.]

## 3911.

**2079d.** Foll. 13; size 8½ in. by 4 in.; fair Devanāgarī writing of about 1600 A.D.; 9–12 lines in a page.

*Vṛindāvanakāvya,* a descriptive poem, composed—by *Māna* (*Mānāṅka*), son of *Ugrasena*—

DR.RUPNATHJI( DR.RUPAK NATH )

in 52 (of which 1–48 *āryāgīti*) verses characterised by alliterative (or agnominative) rhyme, in form of a dialogue held between *Rāma* and *Krishṇa* in the Vṛindāvana wood; with a commentary by *Rāmarshi.*

The text and commentary begin:

वरदाय नमो हरये पतति जनो यं स्मरन्नपि न मोहरये।
बहुशश्चक्रंद हता मनसि दितिर्येन दैत्यचक्रं दहता ॥ १ ॥

तस्मै वरदाय हरये नमः। तस्मै कस्मै। यं हरिं स्मरन् चिंतयन्नपि जनो लोकः मोहरये न पतति। अज्ञानवेगे न भ्रस्यति। पुनस्तस्मै कस्मै। येन हरिणा दैत्यचक्रं राक्षसवृंदं दहता घ्नता बहुशोऽनेकवारं मनसि हता हृदि ताडिता दितिर्हिरण्यकशिपुमाता चक्रंद रुरोद ॥ १ ॥

स्वमिव भुजं गवि शेषं
व्युपधाय स्वपिति यो भुजंगविशेषं।
नवपल्लवसमकरया
श्रियोर्मिपंक्त्या च सेवितः समकरया ॥ २ ॥

पुनस्तस्मै। कस्मै। यो हरिः श्रीकृष्णः गवि जले समुद्रोदके स्वपिति शेते। किं कृत्वा। भुजंगविशेषं सर्पोत्कृष्टं शेषं शेषाख्यं नागं व्युपधाय उपधानीकृत्य। कमिव। स्वं निजं भुजं बाहुमिव। यथान्यः स्वं भुजमुपधानीकृत्य शेते इति निर्भयत्वे दृष्टांतः। किंभूतः नवपल्लवसमकरया। नूतनकिशलयतुल्यपाण्या श्रिया लक्ष्म्या सेवितः। पुनः किं। ऊर्मिपंक्त्या कल्लोलश्रेण्या च सेवितः। किंभूतया। समकरया। मकरैर्मीनैः सह वर्तमाना समकरा तया। बाणे चापि (? r. वाचि) पशौ भूमौ दिशि रश्मौ जले ऽक्षिणि। स्वर्गे मातरि वज्रे ऽशनौ मुखे सत्त्वे च गोध्वनिरिति नानार्थे ॥ २ ॥

येन च बलिरसुरो[ऽ]धः
क्षितेरध स्थापितः सुरैरसुरोधः।
पृथुकः सन्निभवदनम्
चिक्षेप यः सरोजसन्निभवदनः ॥ ३ ॥

पुनस्तस्मै। कस्मै। येन हरिणा बलिः असुरो दैत्यः क्षितेर्भूमेः अधस्तले स्थापितो रक्षितः। किंभूतः। सुरैर्देवैः असुरोधः सुखेन न रोद्धुं शक्यः। यो हरिः पृथुकः बालः सन् अनः शकटं चिक्षेप प्रेरयामास। किंवत्। इभवत् गजवत्। किंभूतः। सरोजसन्निभवदनः पद्मतुल्यमुखः। पृथुकः शावकः शिशुः। करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियां। बलिर्दानवपुंगवे। सर्वत्राप्यमरः। एवं श्लोकत्रयेण श्रीकृष्णं नत्वा श्रीबलभद्रं स्तौति ॥ ३ ॥ °

The author of the poem speaks of his father as a ruler of men in the regions of the Vindhya and Ṛikshavat (vv. 7, 8), and a poet in the same style of poetry (*varṇakavi*) as himself (vv. 9, 12):

यो भोक्तेव सुधाया वर्णकविः शासिता च वसुधायाः।
यस्य परामुदधीनां तटेषु कीर्तिं प्रचक्षते मुदधीनां ॥ ९ ॥

यः कः। स उग्रसेनः वसुधाया भूमेः शासिता च पालक इव। सुधाया अमृतस्य भोक्तेव देव इव। किंभूतः। वर्णकविः प्रत्यक्षरप्रकल्पितार्थपदकविः। यस्योग्रसेनस्योदधीनां समुद्राणां तटेषु तीरेषु पराम् उत्कृष्टां कीर्तिं प्रचक्षते कथयंति बुधाः। किंभूतां कीर्तिं। मुदधीनां मुदां हर्षस्याधीनामायातां। आनंदकारिणीमित्यर्थः। सुधाल्हादे भुवि द्रव्ये सुधा विद्युत्सुधामृतं। सुधा हि भोजनं ज्ञेयं सुधा धात्री सुधा विषं ॥ ९ ॥ ° ११ ॥

यस्येयमकार्येभ्यश्
च्युतेन तनयेन रचितयमकार्येभ्यः।
दत्ता वाक् स्वा कृतिनां
मानाकेन हरिसंश्रया स्वाकृतिना ॥ १२ ॥

यस्योग्रसेनस्य मानाकेन माननाम्ना तनयेन पुत्रेण स्वा वाक् काव्यरूपा वाक् आर्येभ्यो विद्वद्भ्यो दत्ता समर्पिता। किंभूतेन। स्वाकृतिना सुशोभना आकृतिराकारो देहो यस्य तेन। पुनः किं। कृतिना कुशलेन। किंभूता वाक्। हरिसंश्रया श्रीकृष्णकथाश्रिता। पुनः किं। रचितयमका गुंफितयमका। पुनरावर्तमानं पदं यमकं। पुनः किं। अकार्येभ्यः पापकर्मभ्यः च्युतेन निवृत्तेन। इयं वक्ष्यमाणेति योज्यं। कृती कुशल इत्यपि ॥ १२ ॥

The text of the poem (in 51 verses) is given in Hæberlin's Anthology, pp. 453–462. The additional verse contained in this MS. is:

दिगसावर्यमदयिता याम्या ध्रुवमयमृतुश्च वयं मदयिता।
यदियमुग्रतमेषु प्राप्ता जलदेषु रविमुदग्रतमेषु ॥ ४३ ॥

The last four verses are composed in a longer *mātrāvṛitta* (22 × 4).

The commentary ends: दशनैर्दंतैः सह लाजानां धानानां छायां शोभां बिभ्रद्धारयन्। हसन्नित्यर्थः। ° लोचनं नयनं नेत्रं। लीला विलासक्रिययोः। सर्वत्राप्यमरः ॥

पदाबोधेन खिन्नानां विदां चेतःप्रसत्तये।
रामर्षिरकरोद् व्याख्यां यथामति कवेर्गिरां ॥

इति श्रीवृंदावनकाव्यस्य रामर्षिणा विरचिता टीका समाप्ता॥

[GAIKAWAR.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3912.

**1819.** Foll. 16; size 12½ in. by 4 in.; fair Devanāgarī writing on European paper (water-mark 1808); 7–11 lines in a page.

*Rāmakṛishṇakāvya*, or *Rāmakṛishṇaviloma-kāvya*, an artificial poem, by the astronomer and poet *Sūrya Paṇḍita*, son of *Sugaṇaka Jñānādhirāja*, in 36 verses, praising in alternate half-verses *Rāma* and *Kṛishṇa*, and giving the same text whether read forward or backward;—with the author's own commentary.

The Text begins:

तं भूसुतामुक्तिमुदारहासं वंदे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतं ॥ १ ॥

The Commentary begins:

श्रीमन्मंगलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्म मनोमयं सुगणकज्ञानाधिराजात्मजः ।
यद्ग्रंथाध्ययनैर्विनेयनिवहो ऽप्याचार्यचर्यामगात्
सो ऽहं सूर्यकविर्विलोमरचनाकाव्यं करोमि स्फुटं ॥ १ ॥
छंदःपूरणमुत्क्रमविधौ साकांक्षता तत्पदैः
प्रारंभाच्चरितक्रमो ऽपि सुतरामेतत् त्रयं दुर्गमं ।
एवं सत्यपि मन्मतिः कियदपि प्रागल्भ्यमालंबते
तत्सर्वं गुणिनः क्षमंतु यदहो यूयं प्रमाणाः स्वयं ॥ २ ॥ ० ३ ॥
भागीरथी रामकथा मनोज्ञा कालिंदिका कृष्णकथातिरम्या ।
सरस्वती सूर्यकवेस्तृतीया स्यात् प्रयोगे ऽत्र मतिः कवीनां ॥ ४ ॥
समाक्षरार्धो विषमाक्षरार्धो द्वेधा भवेच्चित्रकवित्वसीमा ।
समानभिन्नार्थतया द्विधाद्यो भिन्नाक्षरार्धो च भवेद्वितीया ॥ ५ ॥

As in Hæberlin's Anthology, p. 468, the two final verses of the commentary are counted continuously with the text; the last being:

एवं विलोमाक्षरकाव्यकर्तुर्भूयासमायासमवेक्ष्य तज्ज्ञाः ।
जानंत्विमां चित्रकवित्वसीमां दैवज्ञसूर्याभिधसंप्रदिष्टां ॥ ३८ ॥

इति श्रीदैवज्ञकविसूर्यपंडितविरचिते रामकृष्णाख्यकाव्ये समाप्तिं गते शुभं स्यात् ॥

For text and commentary see now *Kāvyamālā* (1895); also Aufrecht, Cat. Bodl., no. 240; Raj. Mitra, Notices, i., p. 42.

[Dr. John Taylor.]

## 3913.

**1185d.** Foll. 22; size 13¼ in. by 5 in.; clear, modern Devanāgarī writing; seven lines in a page.

*Saṃkashṭanāśanastotra*, a poem in praise of *Rāma-Kṛishṇa*, in 141 verses, composed, in 1762 A.D., by *Gaṅgādhara Mahāḍakara*, son of *Sadāśiva*, and grandson of *Vīreśvara*.

The metre varies between *śārdūlavikrīḍita*, *vasantatilaka* and *mālinī*. The *stotra* is preceded by a brief prose introduction, beginning:

इह खलु श्रीमद्भगवन्नारायणत्रिगुणमायापरमशक्तिपरिकल्पितविचित्रलोकजालसारभूतायां हरिहरादिसुरमुनिमुमुक्षुपरमहंससमाश्रितायां — — श्रीविश्वनाथराजधान्यां — — श्रीमन्महाडकरोपनामकश्रोत्रियवीरेश्वराग्निहोत्रिसूनुसदाशिवसूरिसूनुसाधुजनकिंकरगंगाधरेश्वरपूजकगंगाधरो नाम कवीनानुचरो(!)— — चंपकवनमधितिष्ठामि । ० ॥

The *stotra* begins fol. 2*b*:

राम छिंद्धि कुकाममाशु भगवन् येनास्मि दुःखी सदा
नत्वा त्वां शरणं गतो ऽस्मि सततं शूरं दयालुं परं ।
सामर्थ्यं तव नास्ति चेद्वनचरं चापं च मौनं भज
दीनत्राणपरायणो ऽहमिति तं गर्वं वृथा मा कृथाः ॥ १ ॥

It ends:

अद्वैतसौख्यगुरुपूतपदारविंदं
चित्ते निधाय परमादरतो विमुक्त्यै ।
गंगाधरेण कविना कविदेवरामम्
एवं विनुत्य सुखतः कृतकृत्यतास्मि ॥ १४२ ॥
संकष्टनाशनमिदं स्तोत्रं नवरसान्वितं ।
कृत्वा गंगाधरः काश्यां भुक्तिमुक्तिप्रदायकं ॥ १४३ ॥
ग्रहभूवसुभूमाने वत्सरे विजयाभिधे ।
माघे शनौ पौर्णमास्यां रामांघ्रियुगले न्यधां ॥ १४४ ॥
तेन प्रीणातु भगवान् श्रीरामः परमेश्वरः ।
पठतां शृण्वतां चैतत्सर्वदुःखहरो ऽस्तु मे ॥ १४५ ॥

इति श्रीमन्महाडकरोपनामकवीरेश्वराग्निहोत्रिसूरिसूनुसदाशिवसूरिसूनुभगवद्भक्तकिंकरगंगाधरसूरिणा विरचितं संकष्टनाशनस्तोत्रं संपूर्णं ॥

[H. T. Colebrooke.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 3914.

**1185 c.** Foll. 2; the same size and writing.

*Rāmāṅgasmṛitimālā,* a poem of 13 *vasanta-tilaka* verses in praise of *Rāma,* composed, in 1763 A.D., by *Gaṅgādhara Mahāḍakara.*

It begins:

प्रातः स्मरामि रघुनाथपदारविंदं
 विंदंति यत्क्रतुशतैरपि नो मुनींद्राः ।
तत्प्रेमगम्यमभयं भयहारि रम्यं
 रम्यध्वजादिभवदं शिवदं नमामि ॥ १ ॥

It ends:

विश्वनाथपुरे रम्ये विश्वनाथगृहे शुभे ।
खयुग्मवसुभूमाने वत्सरे जयनामके ॥ १४ ॥
वैशाखकृष्णद्वादश्यां रवौ गंगाधरः कविः ।
रामांगस्मृतिमालां च प्रार्पयद्रामपादयोः ॥ १५ ॥

इति श्रीमन्महाडकरोपनामकभगवद्भक्तकिंकरगंगाधरविरचिता रामांगस्मृतिमाला समाप्ता ॥

[H. T. Colebrooke.]

## 3915.

**1138.** Foll. 106; size 8¾ in. by 4 in.; good Devanāgarī writing of 1625 A.D.; seven lines in a page.

*Rāghavollāsa-kāvya,* a poem—in 12 cantos, the first three of which are wanting—on the early life of *Rāma,* his winning of *Janaka's* daughter, and the recognition of his divine nature; composed, at Benares, for *Pratāpa-sāha-nṛipati,* by *Advaitārāma,* or *Advaita Yati,* pupil of *Rāmakṛishṇāśrama.* The poem is mainly composed in the *indravajrā* metre, occasionally varied by other metres.

The first leaf (IV., vv. 1–4) has been supplied (rather incorrectly) by a modern hand, and the pagination of the other leaves has been changed from 57–162 to 3–106.

Each canto begins with the verse:

जयंति रघुनाथस्य पदपंकजपांसवः ।
मूको ऽपि वावदूको ऽयमद्वैतो यदुपाश्रयात् ॥ १ ॥

Canto IV. then proceeds:

पुत्रेण यद्यप्यपि ते सुमित्रे
 विधीयते रच[ण]मुत्थणस्य(!) ।
तथापि चिंता हृदये त्वनंता
 कांताननस्येति करोम्यहं किं ॥ २ ॥ °

IV., 168 verses, ends fol. 19*b*; V., 98 vv., fol. 29*b*; VI., 49 vv., fol. 34*b*; VII., 82 vv., fol. 42*b*; VIII., 173 vv., fol. 61*b*; IX., 76 vv., fol. 69*a*; X., 49 vv., fol. 73*a*; XI., 113 vv., fol. 85*b*; XII., 172 verses.

The story of the poem comes to an end with XII., v. 98:

संचिंतयंती रघुनाथमेवमखंडमेषा रघुनाथमाता ।
जगत्समस्तं रघुनाथरूपमपश्यदत्रास्ति न चित्रलेशः ॥ ९८ ॥

after which the poet proceeds:

कल्याणि कुलमेतच्छंदसा नास्य भावं
 भवजलनिधिनावं यत्पदं संवदंति ।
अगणितगुणपारा यस्य सारातमेते
 न हि विदुरपि देवा राममेवाश्रयामः ॥ ९९ ॥

प्रतापसाहार्पितगौरवेण येनाप्यमानि त्रिदिवस्त्रिणाभः ।
मुरारिणा तेन समस्तमेतत्संन्यस्य काश्यामितमात्मरूपं ॥ १०० ॥

येनाकारि विचारिमानसमनोहारो कथासागरो
 ग्रंथो ऽग्रंथिमतेः प्रतापनृपतेरादेशतः पूर्वतः ।
काव्यानामपि च त्रयं गुणमयं श्रीरामनामाश्रयं
 काश्यामद्य जयत्य(? ० त्यु) यस्य निलयः सो ऽद्वैतनामा यतिः [॥ १ ॥
 अस्तुत ह्रयमानो(?) ऽपि कथासागरसंज्ञकः ।
 कृतो ग्रंथस्तथानेन रचिता भक्तिचंद्रिका ॥ २ ॥

अद्वैत एवं गुरुणास्य नाम कृतं कृपातः करुणामयेन ।
यत्पादकासारजनिप्रसादसंज्ञातशक्तिः कुरुते स्म काव्यं ॥ ३ ॥
न द्वैतमद्वैतयतौ विभाति यच्चेतसा प्रेमरसाकुलो ऽसौ ।
सदा मुदा श्रीगुरुपादपद्मं सद्म श्रियो ध्यानपदं करोति ॥ ४ ॥

The remaining verses breathe a fervid devotion to *Rāma.* It ends:

अमरत्वं फलं दृष्टं दिष्ट्या रामस्मृतेस्तव ।
एतत्तु कुरुते काश्यां परं चिंताभरं मम ॥ ७१ ॥

वाराणस्यां शिवस्थाने मानसाख्ये सरोवरे ।
अद्वैतेन कृतं काव्यं सीताकांतनियोगतः ॥ ७२ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

इति श्रीराघवोल्लासे महाकाव्ये परमहंसपरिव्राजकाचार्यवर्यदिगंबरश्रीरामकृष्णाश्रमशिष्याद्वैत(० द्वैताराम other cols.)-विरचिते द्वादशः सर्गः समाप्तः ॥ संवत् १६८२ ॥ समये फाल्गुनवदी अष्टमीवारत्भूमदीने(!) ग्रंथसंख्या २२७५ लिषीतं मानसाहिकारेस्य ॥ [H. T. Colebrooke.]

## 3916.

**2721a.** Foll. 26; small 4to, size 6½ in. by 8½ in.; thick, modern Devanāgarī writing; fourteen lines in a page.

*Rāmagītagovinda*, a weak imitation of *Jayadeva's Gītagovinda*, treating, in mixed metres and tunes, of the fortunes of *Rāma* and *Sītā*, and (wrongly) ascribed to the same author as the *Gītagovinda*.[1]

It begins:

श्यामं सहासवदनं सरसीरुहाक्षं
केयूरकुण्डलकिरीटविराजमानं ।
कामाभिराममुरुमौक्तिकदामदीप्रं
पीताम्बरं किमपि धाम विचिंतयामः ॥ १ ॥
संसारसागरतरीकृतनामधेयं
ध्येयं समाधिरसिकैर्मुनिभिः सदैव ।
दैवं विनापि ददतं श्रियमानतेभ्यो
वंदे विभुं रघुपतिं करुणैकसिंधुं ॥ २ ॥
वाल्मीकिनाद्यकविना शतकोटिसंख्यं
रामायणं विरचितं शशिमौलिना च ।
काकोनवायुतनयेन[2] कप्यापरेण
किंचित्करोति जयदेवकविश्चरित्रं ॥ ३ ॥

छंदः प्रहर्षिणी(!) तृतीयम् । विकल्पालंकारश्च ।
यदि रामपदाम्बुजे रतिर्
यदि वा काव्यकलासु कौतुकम् ।
पठनीयमिदं तदोजसा
रुचिरं श्रीजयदेवनिर्मितं ॥ ४ ॥

मालवरागे रूपकताले ।
स्मृतिवेदानुद्धारक जननतारकपे(?०कय or कष्ट)
शंखशमन सुरवंद्य जय जय राम हरे
भुपदमन(? मधु०) मदाखण्डल शेखरधृतमण्डलय
संततजगदाधार जय जय राम हरे ॥
हेमनयनसंहारण खलदारणय
भुवनानन्द मुकुन्द जय राम हरे
कनककशिपुतनुधर्षण घनकर्षणय
धृतजगतीधरभार जय जय राम हरे ॥
चरणसलिलकृतपावन वटुवावनए(? यदुपा०)
करकोदण्डकुटार जय जय राम हरे
मिहिरासुजनसंभावन जितरावणय
रघुकुलमलदिनेश जय जय राम हरे ॥
मुरधारादूरविनाशक रिपुशारकए
सिंधुनिकटसंचार जय जय राम हरे
श्रीजयदेवविधायक युतुशायकशायकए(? युतसा०)
कुरु कुशलं प्रणतेषु जय जय राम हरे ॥ १ ॥

श्लोक वसंततिलका ।
भूभारभंजन भवाब्धिवरिष्ठपोत
मां पाहि कांतकरुणाकर दीनबंधो ।
श्रीरामचंद्र रघुपुंगव रावणारे
राजाधिराज रघुनंदन राघवेश ॥ ५ ॥

श्लोको ऽनुष्टुप्छन्दः ।
दानवाभिभवक्रान्ता देवा ब्रह्मपुरोगमाः ।
गत्वा क्षीरनिधेस्तीरं तुष्टुवुः कमलापतिम् ॥ ६ ॥

It ends: वसंततिलका ।
श्रीमद्विदेहनृपदेशकृताधिवासो
निःशेषभूमिपतिमण्डलमाननीयः ।
एतच्चकार वत वीररसप्रधानं
काव्यं कविप्रकरमौलिविभूषणं सत् ॥ ४ ॥

श्लोको ऽनुष्टुप्छन्दः ।
श्रीमद्रामायणक्षीरसागरान्मन्दरोपमः ।
जयदेवो रामगीतगोविंदरत्नमाकरोत् ॥ ५ ॥

इति श्रीमद्रामगीतगोविन्दे महाकाव्ये सकलकविकुलमुकुटमणिश्रीजयदेवकृतौ रामराज्याभिषेको नाम षष्ठः सर्गः ॥

The MS. bears traces of having been transcribed from another in the Telugu character.

[Mackenzie Collection.]

[1] See Garcin de Tassy, Chrestomathie hindie et hindouie, p. 47, where, in the *Bhaktamāl*, the Rājā of Nīlācala is stated to have tried unsuccessfully to pass off a *Gītagovinda* of his own for that of *Jayadeva*. Cf. R. Pischel, die Hofdichter des Lakṣmaṇasena, p. 23.

[2] ? काकेन वायु०, or perhaps कापेय०, the *Hanumannāṭaka* being apparently alluded to.

DR.RUPNATHJI(DR.RUPAK NATH)

## 3917.

**978.** Foll. 118 (numbered 117, no. 27 being double); size 14¾ in. by 5¾ in.; fair Devanāgarī writing of about 1750 A.D.; thirteen lines in a page.

*Rāmarahasya*, or *Rāmacarita*, a poem in 16 chapters (*krīḍopakaraṇa*) on the story of the *Rāmāyaṇa*, by *Mohana-svāmin*.

It begins:

प्रणम्य देशिकं कृष्णं जगन्मोहनविग्रहं ।
पावनं रामचरितं कीर्तयामि यथामति ॥ १ ॥

वंदे श्रीराघवेंद्रं रविकुलतिलकं मानुजं सीतया च
भ्राजंतं रत्नपीठे कनकमणिमये मंडपे देववृक्षे ।
दीव्यत्सुग्रीवमुख्यैर्नृपवरसचिवैः सेव्यमानं सुरेशैर्
वंद्यं राजीवनेत्रं कनकनिभपटं श्यामलं शार्ङ्गपाणिं ॥ २ ॥

यस्यांशेनावतीर्णा विधिभव ऋषयः सप्रजेशाः सुरेशा
यद्दृष्ट्या ध्वंतसर्गाः स्थितिरपि जगतां नैकशः संभवंति ।
स्रष्टुः स्तुत्यर्थयुक्तः कपटनरवपुर्नैकवाक्क्लृप्तसंस्थः
सो ऽयं श्रीरामचंद्रो जयति [दिश]तु नः श्रीयुतो वाग्वि-
[भूतिं ॥ ३ ॥

क्ष्मार्कवंशचरितः पयोब्धिवान् यत्कृणापतिभ्रमंदमंदरः(!) ।
क्ष्मातिमंदविषयातुरः पुमान् यः समुन्नयति वांछितुं सुमः ॥ ४ ॥

यदुक्तं हृत्स्थितेनैतत्कीर्तयाम्यार्यदर्शनात् ।
षाट्पदीं वृत्तिमास्थाय सादिमध्यावसानतः ॥ ५ ॥

श्रीरामचरितं पुण्यं नैव साध्यं यतो लभेत् ।
मृडेन द्व्यक्षरं प्राप्तं शतकोटिप्रविस्तरात् ॥ ६ ॥ °

I., *sūryavaṃśavarṇanam* (123 vv.); II., *purayajñāvirbhāvavarṇanam* (163 vv.); III., *rāmajanmavālacaritayajñarakshaṇam* (149 vv.); IV., *śrījānakīsvayaṃvaravarṇanam* (162 vv.); V., *bhārgavaparābhavapurapraveśa-sītārāmavilāsaḥ* (160 vv.); VI., *ayodhyākāṇḍaprastāve* (306 vv.); VII., do. (234 vv.); VIII., *āraṇyakāṇḍaprastāve* (348 vv.); IX., *kishkindhākāṇḍaprastāve* (363 vv.); X., *sundarakāṇḍaprastāve* (248 vv.); XI., *yuddhakāṇḍaprastāve* (334 vv.); XII., do. *kumbhakarṇendrajidvadhavarṇanam* (207 vv.); XIII., do. *rāvaṇavadhaḥ* (246 vv.); XIV., *rāmaprabhāvaayodhyāpraveśavarṇanam* (385 vv.); XV., *uttarakāṇḍaprastāve śrīrāghavarājyadharmakarmavarṇanam* (206 vv.); XVI., *rāmacandrasvapadārohaṇam*.

In the course of the poem some verses have been incorporated from other works, *e.g.* the *Brahmāṇḍa*, foll. 61*b*, 62*a*-*b*; *Bhāgavata*, fol. 65*a*; *Pādmya*, fol. 65*a*; and the *Nāṭaka*, foll. 56*a*, 61*b*, 62*a*, 69*a*, etc.—two of which verses have been identified in the *Mahānāṭaka* (Calc. 1840).

It ends:

तच्छ्रुत्वेति मनोः प्रसूतिरखिलं साद्यंतभक्तिप्रदं
तत्राप्यार्यवशाद्धृदेव गुरुणा यद्यत्समासादितं ।
एतद्रामरहस्यरामचरितं संक्षेपतः कीर्तितं
वाहस्याह्निसहस्रपूर्णरसनः शेषो ऽपि नैव क्षमः ॥ १९४ ॥

मायांगपातमभिवंद्य समस्तभावैः
सर्वान्सुरेंद्रनिकरानिदमेव याचे ।
मंदस्मितार्द्रमधुमोहनरामचंद्रे
इक्ष्वाकुपुण्यनिचये मम भक्तिरस्तु ॥ १९५ ॥

इति श्रीश्रीमद्रामरहस्ये महाकाव्ये श्रीमन्मोहनस्वामिविरचिते श्रीरामचरिते श्रीरामचंद्रस्वपदारोहणं नाम षोडशं क्रीडोपकरणं समाप्तं ॥ १६ ॥

[H. T. COLEBROOKE.]

## 3918.

**586 c.** Foll. 40; size 10¾ in. by 4¼ in.; fair Devanāgarī writing of about 1750 A.D.; 11–13 lines in a page.

*Sītārāmavihāra*, a poem on the marriage of *Rāma* and *Sītā*, in 12 *sargas*, by *Lakshmaṇa Somayājin* (*Organṭi Lakshmaṇādhvarin*), son of *Śaṅkara Somayājin*, and grandson of *Lakshmaṇa Somayājin*, of the *Organṭi* family.

It begins:

अस्ति प्रशस्ताखिललोकभूषाविभूषितद्वादशयोजनैषा ।
विशुद्धभावैर्विनिविष्टमध्या विराजमाना विबुधैरयोध्या ॥ १ ॥
भवत्ययोध्यारिजनैरयोध्या कल्याणराध्या कलुषैरबाध्या ।
पुरीसमानीयपुरंदरस्य भूमौ विधात्रा विनिवेशितेव ॥ २ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

मेधा मनुं संविनिवेश्य काव्ये बोधाय मेधारहितांतराणां ।
आदावयोध्यास्तुतिपूर्वमत्र श्रीरामचंद्रस्य विहारमीडे ॥ ३ ॥
अहं महासाहसिको ऽस्मि नूनं यतस्त्वयोध्यापुरवर्णनेच्छुः ।
कथं विना साहसमत्र लोके भद्राणि पश्यंत्यथवा कवींद्राः॥४॥
व्यास्यं न वेदान्न चतुर्मुखो ऽहं न वा गुरुर्नैव फणाभृदीशः ।
कथं त्वयोध्यापुरवर्णनाय दक्षो भविष्यामि दरं विनैव ॥ ५ ॥
तथापि लक्ष्मीशकृपाकटाक्षवीक्षानुलब्धां मतिमादधानः ।
विचित्रवृत्तस्य विचित्रवृत्तैः पुरस्य शोभामनुवर्णयिष्ये॥६॥०

I. (fol. 4*b*) *ayodhyāpuravarṇanam*, 60 vv.; II. (fol. 8*a*) *varshartuvarṇanam*, 65 vv.; III. (fol. 10*b*) *śaradvarṇanam*, 51 vv.; IV. (fol. 14*a*) *śāntakanyāvivāha*, 56 vv.; V. (fol. 17*b*) *vārāṇasīvarṇanam*, 69 vv.; VI. (fol. 20*b*) *vindumādhavasākshātkāra*, 53 vv.; VII. (fol. 24*a*) *rāmakṛitaviśvāmitrayāgoddharaṇam*, 69 vv.; VIII. (fol. 27*b*) *sītāvarṇanam*, 50 vv.; IX. (fol. 31*b*) *sītārāmavivāha*, 77 vv.; X. (fol. 34*a*) *sītārāmodyānavihāra*, 50 vv.; XI. (fol. 37*b*) (*manojapūjāyām*) *pushpavacaya*, 67 vv.; XII. (fol. 40*b*) *yauvarājyābhisheka*, 52 vv. It ends:

तदा दशरथो विप्रान् वस्त्राभरणदक्षिणाः ।
संपूज्य तेभ्यो दत्त्वा च कृतार्थो ऽस्मीत्यमन्यत ॥ ४७ ॥
तत्रासौ यौवराज्यं दशरथनृपतिर्ज्येष्ठपुत्राय दत्त्वा
सीतारामाय मंत्रिद्विजवरधुरि तन्मस्तके न्यस्तभारः ।
पत्नीभिः सेव्यमानः स्वसुतपरिजनैः सर्वदाराध्यमानो
भुंजानो भोगवर्गान् सुरपतिरिव स स्वर्गसौख्यं प्रपेदे ॥ ४८॥
रघुपतिरधिगत्य यौवराज्यं दशरथराजसुखाय सार्वभौमः ।
स जनकतनयाप्तसर्वकामो जगदवनं विदधज्जगाम वृद्धिं॥४९॥

ओगंट्यन्वयसिंधुवर्धनविधुर्नित्यान्नदानव्रत-
ख्यातो लक्ष्मणसोमयाजिविबुधो ऽभूद्विश्रुतो भूतले ।
आसीच्छंकरसोमयाजिसुकृती तस्यात्मजस्तत्सुत-
श्रीमल्लक्ष्मणसोमयाजिकविना काव्यं त्विदं निर्मितं ॥ ५० ॥
स्वप्ने साक्षात्कृतो यः प्रथममुपदिशन् दक्षिणामूर्तिमंत्रं
पश्चादाज्ञापयच्च स्वमहिमकलितं पंजरं यः पठेति ।
तस्येशस्य प्रसादाद्विमलमतिरयं लक्ष्मणाध्वर्युदारं
सीतारामस्य हारं व्यरचयदतुलं काव्यमेतद्विहारं ॥ ५१ ॥
ओगंटिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे द्वादशवर्गो ऽगमन्महाकाव्ये ॥ ५२ ॥

इति श्रीओगंटिशंकरसोमयाजितनूजलक्ष्मणसोमयाजिकृतौ सीतारामविहारे महाकाव्ये यौवराज्याभिषेको नाम द्वादशः सर्गः॥

[H. T. Colebrooke.]

## 3919.

**54 b.** Foll. 156; size 10½ in. by 5 in.; fairly written, by the same hand as the preceding MSS.; 11–13 lines in a page.

*Sītārāmavihāra*; with a commentary, called *Candrikā*, by *Vaidyanātha Sūri*, son of *Rāmacandra* (*Rāmabhaṭṭa*, *Rāmabudha*), and grandson of *Viṭṭhala*, of the *Tatsat* family.

The commentary begins:

ईशविष्णुकमलासनमुख्यैर्दैवतैरपि समीहितसिद्ध्यै ।
वंदितो गजमुखः सुखहेतुः संमुखो भवतु कार्यमुखे नः ॥ १ ॥
ओगंटिवंशविख्यातलक्ष्मणाध्वरिनिर्मितं ।
सीतारामविहाराख्यं काव्यं व्याकरवाण्यहं ॥ २ ॥
तत्सद्विट्ठलसंभवोद्भटगुणश्रीरामचंद्रात्मजे-
नोन्नीतामिह वैद्यनाथकृतिना विद्वन्मनोरंजिका ।
सीतारामविहारभावकुमुदप्रोल्लासिका चंद्रिका
काव्यज्ञाः परिशीलयंतु सकलालंकारपारंगमाः ॥ ३ ॥

It ends: स्वप्न इति । ० पश्चादुपदेशानंतरं स्वमहिम्ना कलितं युक्तं पंजराख्यं स्तोत्रं पठेत्याज्ञापयच्च० सीतायुतस्य रामस्य संबंधिनं अतुलं निरुपमं हारमिव हारं एतस्य रामस्य विहारः क्रीडा यत्र तन्नामकं काव्यं व्यरचयत् रचितवान् हारमिति रूपकालंकारेण श्रीरामचंद्रार्पणीकरणं सूच्यते ॥

ओगंटिवंशवर्धन० ॥ ५२ ॥ इति श्रीओगंटिशंकर० ५२ ॥
श्रीमल्लक्ष्मणसोमयाजिकविना स्वच्छे निजे मानसे
सीतारामविहारकाव्यकुमुदं जातं यदाविष्कृतं ।
तत्सद्रामबुधात्मजेन कृतिना श्रीवैद्यनाथेन तत्-
प्रोल्लासाय विनिर्मिता सुखयतु स्वांतं सतां चंद्रिका॥१॥
भवेद्यदत्र स्खलितं पदार्थसमासवाक्यार्थविवेचनायां ।
संशोध्यमेतत्कृतिभिः प्रसिद्धं यतश्च्युतः संस्खलनं जनस्य॥२॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञधर्मशास्त्रधुरीणतत्सद्रामभट्टात्मजवैद्यनाथसूरिविरचितायां श्रीसीतारामविहाराख्यकाव्यटीकायां चंद्रिकाख्यायां द्वादशसर्गकिरणः संपूर्णः ॥

[H. T. Colebrooke.]

DR.RUPNATHJI( DR.RUPAKNATH )

## 3920.

**890a.** Foll. 66 (and an additional leaf between 18 and 19); size 10 in. by 4¾ in.; legibly written in Devanāgarī in 1755 A.D.; fifteen lines in a page.

*Rāmaliṅgāmṛita*, a poem in 18 *sargas*, composed, at Benares, in Śaka 1530 (1608 A.D.), by *Advaita*, son of *vaidika Bāyabhaṭṭa*, and grandson of *Kṛishṇa*; and completed (? by the writer of the MS.) in Śaka 1677 (A.D. 1755).

It gives the popular version of the story of *Rāma's* expedition to Laṅkā in form of a dialogue between two *gopikās* of Gokula, one of whom claims descent from *Raghu* himself, and therefore a eertain traditional knowledge of *Rāma's* lifo and deeds.

I., *Upodghātavarṇanam* (64 vv.), begins:

आश्चर्यं शुगु(शृणु) सागरे जलचरो दृष्टो मया क्रीडता
तस्यांगे घननीलसुंदरतनुस्तस्योदरे पंकजं ।
तत्रैको भ्रमरश्चतुर्मुखभवैर्वेदैः क्रतूनां क्रियां
ब्रूते ब्रह्मपरं गुरुं प्रतिवदन् ढुंढीश्वरः पातु नः ॥ १ ॥

तत्स्वरूपं प्रकारांतरेण वर्णयति ।

हरिहरविधिरूपः सच्चिदानंदरूपो
हयगजनकुलाश्यो(° स्यो) विघ्ननाशो गणेशः ।
सुरससुगमकाव्ये रामलिंगाभिधाने
मम हृदयसरोजं सद्विकासं करोतु ॥ २ ॥

तद्रूपेण सरस्वतीं स्तौति । ° – – ॥ ६ ॥

श्रोतॄन्प्रार्थयति ।

ब्रह्मानंदपयोनिधौ समभवच्छ्रीरामलिंगामृतं
तत्पानं क्रियतां यथारुचि बुधास्तत्तत्फलं दास्यति ।
मुक्तानां परमार्थतां विषयिणां चित्तस्य संजीवनं
कामींद्रस्य विरागतां जनयतीत्येवं विचित्रं महत् ॥ ७ ॥

इदममृतं सर्वैः सर्वदा पेयं न हेयं ।

श्रीरामलिंगामृतसिंधुसंभवं
श्रीरामरूपं विमलं मनोहरं ।
तत्पादनिष्ठैर्विमलेन चेतसा
पेयं न हेयं भवदुःखनाशनं ॥ ८ ॥

स्वाज्ञानं प्रकटयति ।

यो रामो हृदये स्थितो मम जडां वाचं समाप्रेरय[न्]
शुद्धाशुद्धविचारणेन रहितं भक्त्या मया कीर्त्यते ।
तद्भक्तैर्न तथा हि निश्चयविषये निंद्यं हि रामस्य यत्
श्रोतव्यं सकलं भवद्भिरधुना पुण्यं हरेः कीर्तनं ॥ ९ ॥

किमर्थं शुद्धं न कृतं ।

नो वैयाकरणं न शास्त्रपठनं वेदाः पुराणानि नो
सत्संगो ऽपि न सेवितश्च सकलं तीर्थाटनं नो कृतं ।
ग्राम्याणां च कथारसेन बहुशः कालक्षयो वै कृतम्
तत्सर्वं मम सह्यतां विधिवशात्काश्यां मया स्थीयते ॥ १० ॥

दुर्लभमिदं श्राव्यं ।

पुराणसारसत्काव्यं रामलिंगानुवर्णनं ।
सद्भिः कर्णपुटैः पेयं यदन्येनैव वर्णितं ॥ ११ ॥

एतच्छ्रवणफलमाह ।

विभक्तिप्रत्ययादूहान् नानार्थप्रतिपादकात् ।
बुद्धिर्भवति मूढानां यद्ग्रंथस्यावलोकनात् ॥ १२ ॥

अपूर्ववर्णनमाह ।

काचिद्गोकुलगोपिका गृहगता तक्रार्थमुद्योगिनी
तां दृष्ट्वा गृहनायिका वदति भो मातः कुतस्ते गतिः ।
कार्यं कुत्र पुरं पिताथ जननी भ्रातास्वसंज्ञो जनः
कुत्रास्ते सखि वर्णयस्व सकलं प्रीत्या मया पृच्छ्यते ॥ १३ ॥

का च ।

यावन्मे दधिमंथनं सखि भवेत्तावद्गृहादेहि वा
तिष्ठ त्वं गृहमागतासि सुभगे तक्रं मया दीयते ।
नानागोदधिमंथनेन करयोः क्लेशादिकं जायते
तच्छांत्यै वद सावधानमनसा त्वद्गेहयात्रादिकं ॥ १४ ॥

अर्थिन्याह ।

मातस्ते वचनं सुखस्य जनकं सम्यग् मया वै श्रुतं
नो गच्छामि गृहं तु मद्गृहपतिः प्रातर्महाभारतं ।
मध्ये भागवतं तथैव निशि वा श्रीरामजन्मादिकं
नित्यं संश्रवणं करोति सह वा कालो मया नीयते ॥ १५ ॥

यत्पृष्टं सखि तत्सर्वं वर्ण्यते स्वस्थचेतसा ।
मया त्वयापि तच्छ्राव्यं सर्वं स्वानंदलब्धये ॥ १६ ॥ ° २४ ॥

अथ कथारंभः ।

एकस्मिन्समये हरिः कमलया युक्तः शुभे मंचके
सुप्तस्तत्समये भृगुर्मुनिगणैस्साकं ययौ दर्शनं ।
कर्तुं द्वारि गतो जयश्च विजयस्ताभ्यां निषेधः कृतो
मायातेति मुनीश्वराः प्रति गृहं यांतु प्रभुर्निद्रितः ॥ २५ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ते कोपादशपन्नुभौ ह भजतं योनिं महाराक्षसीं
ताभ्यां ते प्रणता: कृपार्द्रहृदया बुद्ध्या च तैस्तोषितौ ।
तच्छापाज्जलधौ त्रिकूटनगरे पौलस्त्यगेहोद्भवौ
जातौ देवगणाञ्जनान्विविधवशात्संपीडयंतौ स्थितौ॥२६॥०

II., *Rāmabālalīlāvarṇanam* (70 vv.), begins:

तत्रार्थिनो संक्षेपेणाह ।
विष्णु: पङ्क्तिरथेन पुण्यनिचयै: संप्रार्थितो भूतले
कौशल्याजठरात्स्वकीयविभवै: प्रादुर्बभूवात्मज: ।
चिक्रीडे लघुचापबाणनिहतास्तेन प्रचंडा मृगास्
तत्पुत्रस्य विलोकनेन सफलं मेने स्वकीयं कुलं ॥ १ ॥
तेन गोपी ।
कौशल्याजठराद्राम: कथं जातश्चिदात्मक: ।
कथं धृतानि नामानि तस्य राज्ञेति वर्णय ॥ २ ॥ ०

III., *rāvaṇaparābhava* (64 vv.); IV., *sītāsvayaṃvaravarṇanam* (103 vv.); V., *ayodhyākāṇḍe rāmāraṇyagamanavarṇanam* (63 vv.); VI., do. (81 vv.); VII., *setukāṇḍe rāmavibhīshaṇadarśanavarṇanam* (63 vv.); VIII., *yuddhakāṇḍe* (61 vv.); IX., *mahārāvaṇavadha* (45 vv.); X., *rāmarāvaṇayuddhe śivaliṅgavarṇanam* (83 vv.); XI., *sundarakāṇḍe rāvaṇavadhavarṇanam* (81 vv.); XII., *śrīrāmarājyābhishekavarṇanam* (75 vv.); XIII., *śrījānakīrāmakrīḍāhnikavarṇanam* (52 vv.); XIV., (*rāmasya vālmīkyāśramagamanam*, 38 vv.); XV., *kumbhagarbhavadhavarṇanam* (34 vv.); XVI., *śrīraṅgavarṇanam* (41 vv.); XVII., *śrīrāmasya svasvarūpavarṇanam* (80 vv.); XVIII., *khilam* (90 vv.), begins:

गोपी ।
अयि जननि रमेशे निर्गते स्वस्वरूपं
सकलविबुधवंद्ये मर्त्यलोकात्प्रसिद्धं ।
इति सदसि मया यत्संश्रुतं त्वन्मुखाज्जाद्
वद रघुवरकीर्तिं यामि तद्रूपमूर्तिं॥

It ends: ग्रंथकर्तृनाम ० ।

फेनासंगमगौतमीशुभतटे मार्जारतीर्थे द्विज:
श्रीकृष्णात्मजवायभट्टतनुजो ह्यद्वैतसंज्ञो [s]नघ: ।
आस्ते तेन सुसंधितं हरिबलाश्रीरामलिंगामृतं
काश्यां मुक्तिदमंडपे हरितिथौ विद्वत्सभासंनिधौ॥७८॥

ग्रंथाहुर्वरितं रघूत्तमपतेर्यत्कीर्तिचंद्रादिकं
तत्सर्वं लिखितं मया हरिबलाश्रीरामलिंगाभिधं ।
सर्गे ऽष्टादशसंज्ञिते मुनिगणैर्भक्त्या श्रुतं चेत्तदा
श्रीरामानुभवं करोति सहसा नो संशयो निश्चितं॥७९॥
अनेन प्रीयतां देवो हयग्रीव: श्रिय: पति: ।
वेदव्याख्याननिरतो मद्वंशप्रतिपालक: ॥ ८० ॥ ० ८६ ॥
अयं न दृष्ट: कथित: श्रुतो वा ग्रंथो धरित्र्यां बहुशास्त्रविद्भि: ।
तैर्न श्रुतं व्यासकृतं पुराणं रामायणं भारतमादिकाव्यं ॥ ८७ ॥
वृक्षरूपं वर्णयति ।
अद्वैतद्विजहृत्सरोजनिलये वागीशबीजोद्भव:
सर्गस्कंधपदप्रबंधरचनाशाखान्वितस्तापहा ।
भक्त्युद्यत्सुगंधपुष्पबहुल: श्रीरामलिंगामृतो
ह्यानंदफलप्रदो विजयते काव्येषु कल्पद्रुम: ॥ ८८ ॥
शकमाह ।
शाके सप्तसु सप्तषोडशयुते शुक्ले च संवत्सरे
शुक्ले पुष्ययुते चतुर्दशतिथौ माघे च काशीस्थले ।
श्रीवागीशकृपावशाद्विरचित: श्रीरामलिंगामृतो
ग्रंथो ऽयं सकलो विवृद्धिमगमद्ब्रह्मस्वरूपप्रद: ॥ ८९ ॥
देशस्थमाह ।
शाके खानलपंचभूपरिमिते संवत्सरे कीलके
हेमंतोर्जुमरीचिवासरहविर्भुग्दृक्षपूर्णातिथौ (!) ।
सारं भुक्तिविमुक्तिदं त्रिजगति श्रीरामलिंगामृतं
काश्यां वैदिकवायभट्टतनुजो ह्यद्वैतनामापिबत् ॥ ९० ॥
इति श्रीरामलिंगामृतकाव्ये खिले ऽष्टादश: सर्ग: ॥

The MS. was probably copied from a Telugu one. [H. T. Colebrooke.]

## 3921.

**1184 b.** Foll. 53; size 13½ in. by 5¼ in.; good, modern Bengālī handwriting; eight lines in a page.

*Rāmacarita*, a poem—by *Kāśīnātha Śarman*—in 13 *sargas*, composed in different metres, describing the life of *Rāma* from his birth to his elevation to heaven.

I., *rāmotpatti* (31 vv.), begins:

यद्वास्वदन्वयनयं नयनाभिरामं
श्यामं समानगुणया मिलदम्बुजाक्ष्या ।
तद्विश्वधाम करुणामयमादिधाम
श्रीरामरामरमणीयमुपाश्रयामि ॥ १ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

यद्रावणादिरजनीचरभारखिन्ना
 तुष्टाव दैवतमिला सह पद्मजेन ।
तत्क्षीरसागरशयालुदयालुभक्ते
 ऽयोध्यापुरे समुदितं सततं भजामि ॥ २ ॥
वैभाण्डकीयहवनोत्थचरो रणादिर्
 आविर्बभूव भगवांश्चतुरंशगामी ।
मन्ये [ऽ]जनन्दनतपश्चयबद्धमूर्तिः
 को ऽपि प्रभावचतुरः पुरुषार्थ एषः ॥ ३ ॥
रामासु तासु महितासु[1] हरिर्विरेजे
 याभिर्नृपो दशरथः कृतपाणिपीडः ।
अंशेन कोशलसुतां प्रथमेन मध्यां
 मध्येन भागयुगलेन चरन्सुमित्रां ॥ ४ ॥
मेषं गते दिनकरे ऽदितिगे निशेशे
 सूच्चेषु(?) पञ्चसु खगेषु तिथौ नवम्यां ।
कौशल्ययाजनि विभावसुवंशदीपो
 रामो भुवेव जगदर्च्यनिगूढरत्नं ॥ ५ ॥

II., *grihamaitrīkaraṇam* (36 vv.):

अथैकदा दैवविदा निवेदिते
 सूर्यग्रहे भाविनि मेदिनीपतिः ।
शुद्धान्तपुत्रादिवृतः सुराङ्गना-
 श्रितामचारीद् द्युनदीं विगाहितुं ॥

III., *pinākabhaṅga* (86 vv.):

अथ(? अथो) सभायां सरलक्रियावान्सुबाहुबाहुश्रितयज्ञचन्द्रः ।
रामागमाधीनविधिप्रसिद्ध्यै गाधेस्तनूजः क्षितिपं प्रपेदे ॥

IV., *sītāpariṇaya* (69 vv.):

सुलक्षणाक्रान्तमनाः स भूपतिर्
 विदेहवंशाम्बुजपद्मिनीपतिः ।
साधेयनदष्टो(?) जलकीमौलि(? °कोशमौलिः)
 प्रतिसापयामास(? प्रस्था°) नृपाय सारं ॥

V., *rāmabalapraveśa* (73 vv.):

प्रादुरास महसामथ राशिः सैन्यवर्त्मनि पुरो[ऽ]नवगाह्यः ।
लोचनद्युतिहरः करजालैर्घसमध्यग इवोष्णमयूखः ॥

VI., *sītāharaṇam* (54 vv.):

अत्रिस्तमागतमवेक्ष्य महेन्द्रकल्पं
 रामं चकार कुशलप्रणयानुयोगं ।
रामो ऽपि तूर्णमपतच्चरणे मुनेस्तां
 सीतानमत् सुकृतमूर्तिमिवानुसूयां ॥

VII., *sītānveshaṇam* (73 vv.):

दुर्निमित्तमथ वीक्ष्य राघवः काञ्चनैणमवहत्य लक्ष्मणं ।
सोऽनुवृत्य पुरतो गतक्षणं वर्त्मनि श्रितमुपाल्ल कुत्सयन् ॥

VIII., *rāvaṇavadha* (85 vv.):

अथ वानरसैन्येन महता कम्पयन्महीं ।
जगाम जलधेस्तीरं दक्षिणं रघुनन्दनः ॥

IX., *sītāsamuddharaṇam* (47 vv.):

अथ भूमितले रजःश्रितं पतितं वीक्ष्य पतिं मयात्मजा ।
विललाप चिरं कुचाम्बुजे स्नपयन्ती नयनाम्बुभिर्भृशं ॥

X., *rāmābhisheka* (58 vv.):

यानेन तेनाथ स पुष्पकेण
 सपुष्पकेणाभिनभःस्थलेन ।
विलोकयन्नङ्कगतां मृगाक्षीं
 समिद्धुरं(?) वारिधिमुत्ततार ॥

XI., *rāmapramoda* (69 vv.):

अथ समस्तजगज्जनमोहनं नवघनाभतनुं रघुनन्दनं ।
धरणिजानुजमारुतिसेवितं समभजन्मुनयः प्रतिनन्दितं ॥

XII., *sītāntardhānam* (74 vv.):

अथ प्रियां दोहदमेदुरश्रियं
 वीक्ष्य प्रभातक्षणदाकरश्रियं ।
कुचाग्रचुञ्चिस्फुटकालिमद्युती
 स्तनौ दधानां मुदमाप राघवः ॥

XIII., *svargārohaṇam* (46 vv.):

राघवो ऽथ हयमेधशतेन राजपेयमुखयज्ञशतेन ।
कोशलामधि वसिष्ठनिदिष्टो यज्ञपूरुषमयष्ट मुखेन ॥

It ends:

श्रोत्रवर्त्मभाजि रामनाम्नि पापिनामपि
 श्रेयसे परं पदं भवेदिति ध्रुवं [स्मृतं] ।
पातभाजि(?) नाकिविग्रहं विनिन्द्य देवता
 रामभक्तिमोहिरे मनुष्यविग्रहेऽश्वरं ॥ ४५ ॥
यो ऽयोध्यां सकलां कृपाकमलया वैकुण्ठमानीतवान्
 यः सेतुं जलधौ यशोध्वजमिवातस्तार तीर्थध्वजं ।
यन्नाम्नः समुपैति भीरधिभयं प्रीतः प्रभुः सानुजः
 श्रीरामः सह सीतया कमलया वैकुण्ठगः पातु वः ॥ ४६ ॥

श्रीरामचरिते महाकाव्ये रामस्वर्गारोहणो नाम त्रयोदशः सर्गः ॥ इति श्रीकाशीनाथशर्मविनिर्मितं श्रीरामचरितं नाम महाकाव्यं समाप्तं ॥

[H. T. Colebrooke.]

---

[1] महिलासु पाठद्वयं marg. gloss.

DR.RUPNATHJI( DR.RUPAK NATH )

## 3922.

**54 a.** Foll. 84; size 10½ in. by 4¾ in.; fair Devanāgarī writing of 1669 A.D.; eight lines in a page.

*Udārarāghava*, a poem on the early history of *Rāma*, by *Kavimalla Mallācārya*, son of (*Śākalya*) *Mādhava Sudhī*. [A.]

The two MSS. contain nine *sargas*, treating of *Rāma's* youth, his marriage with *Sītā*, and his banishment and sojourn on mount Citrakūṭa.

It begins:

अस्ति प्रशस्तः प्रकृतेः परस्ताद्
आद्यः पुमान्केवलचित्स्वरूपः ।
स्वानंदपूर्णः सदसत्प्रपंच-
बाह्यांतरव्याप्तबहुप्रकारः ॥ १ ॥
अनंतशक्तिं तमनंतकोटि-
ब्रह्मांडभांडावृतरोमरंध्रं ।
समाधियोगैरपरोक्षयंतो
भजंति नित्यं हृदि नित्ययुक्ताः ॥ २ ॥
स दृष्टिमात्रक्षुभितात्मनीत (° मीन B)-
मायागुणोत्थैर्महदादितत्त्वैः (° कल्पैः B) ।
प्रारभ्यमंडं समनुप्रविश्य
प्रवर्तयामास भवप्रपंचं ॥ ३ ॥
प्रागात्मसृष्टेः सलिले शयानो
नारायणाख्यः स हिरण्यगर्भः ।
अजस्य नाभावरविंदजन्मा
यस्य स्वयंभूरिति संबभूव ॥ ४ ॥
चतुर्मुखः पंकजविष्टरो ऽसौ
जगत्सिसृक्षुर्जनकोपदेशात् ।
प्रजापतीनां प्रथमं नवानां
मरीचिमादौ मनसा ससर्ज ॥ ५ ॥
मरीचितः कश्यपनामधेयो
महर्षिरासीन्महनीयकीर्तिः ।
त्रयोदशासावपि दक्षकन्या
विरिंचिनम्रा विधिनोदवाक्षीत् ॥ ६ ॥
तत्रादितेः कश्यपतः पतंगो
जज्ञे विवस्वान् जगदेकदीपः ।
त्रिलोकवंद्यस्त्रिगुणात्मको ऽसौ
दिवःपृथिव्योस्तिमिरं विभिंत्ते ॥ ७ ॥
प्रकाशयन्नेष दिशो ऽवकाशान्
आकाशमाकाशयति स्वधाम्ना ।
लोकेशलक्ष्मीशमहेशमूर्तिर्
वेदैस्त्रिभिः संचरते विवस्वान् ॥ ८ ॥
वैवस्वतो नाम मनुस्ततो ऽभूद्
धर्मोपदेष्टा धरणीपतीनां ।
महत्ययोध्यानगरे सपुत्रम्
इक्ष्वाकुमुर्वीपतिमभ्यषिंक्त ॥ ९ ॥ °

I., 106 vv. (fol. 10*b*); II., 103 vv. (fol. 22*a*); III., 127 vv. (fol. 34*b*); IV., 122 vv. (fol. 46*a*); V., 120 vv. (fol. 57*a*); VI., 79 vv. (fol. 64*b*); VII., 63 vv. (fol. 70*b*); VIII., 60 vv. (fol. 75*b*); IX., 104 (108) vv.

The poem breaks off with the appearance of the *rākshasī Śūrpamukhā* on the scene; and, considering the extent of other MSS. hitherto known, it seems doubtful whether it ever was carried any further.

This MS. is very incorrect towards the end.

It ends:

श्रुत्वा तत्परिभवमूलं° अनल इवाज्यपूरसिक्तः ॥ १०४ ॥

इति श्रीमत्सुखस्वप्नाकलितरघुनाथदत्तवरप्रसादसहजसारस्वतश्रीशाकल्यपदांकितमाधवसुधीतनयकविमल्लमल्लाचार्यविरचित उदाररराघवे महाकाव्ये नवमः सर्गः ॥ संवत् १७२६ ॥

In Bühler's Cat. of Sansk. MSS. of Gujarāt, etc., ii., p. 116, the author is called *Śākalamalla*. [H. T. COLEBROOKE.]

## 3923.

**1598.** Foll. 57 (five of which, 12–16, are wanting); size 10 in. by 3½ in.; indifferent Devanāgarī writing of about 1650 A.D.; 9–11 lines in a page.

The same work, likewise in 9 cantos. [B.]

This MS. is, on the whole, more correct than MS. A. The lacuna, caused by the loss of five leaves, extends from II. 49 to III. 15.

[H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3924.

**107 c.** Foll. 12 + 14; size 9¾ in. by 4 in.; large, stiff Devanāgarī writing of about 1750 A.D.; seven lines in a page.

*Rāmakautuka*, a poem in four *sargas*, by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa Bhaṭṭa* and *Umā*, and grandson of *Nārāyaṇa Bhaṭṭa*.

The subject of the poem is the praise of *Rāma's* mission generally, without more than passing allusions to his heroic achievements.

It begins:

शुंडानृत्यनिरस्तविघ्ननिवहो मूर्धानमांदोलयन्
सिंदूरारुणगंडमंडितशिरा दूर्वांकपक्षस्रजा ।
नृत्यत्पादविलग्ननूपुरमहा झंकारवैः पूरयन्
रोदस्योर्विवरं प्रसूवृतकरो विघ्नेश्वरः पातु वः ॥ १ ॥
रोचनातिलकोपेतं चलत्कुंडलमंडितं ।
कौशल्यालालितं वंदे श्रीरामाख्यं स्तनंधयं ॥ २ ॥
श्रीरामकृष्णं पितरं तथोमामंबां रघूत्तंसपदं च नत्वा ।
तदात्मजः श्रीकमलाकराख्यः कुतूहलात्कौतुकमातनोति॥
अष्टादशापि दश चाकरवं निबंधान् [३ ॥
नावाप्तमरण्वपि मया जनुषः फलं तु ।
तेनाद्य दुःखनिचयाद्रिपवीन्मुनींद्रैर्
गीतान् रघूत्तमगुणान् कतिचित् प्रवक्ष्ये ॥ ४ ॥
दशास्यादिरक्षोगणत्रस्तदेवैस्
तथा ऋष्यशृंगादिभिः प्रार्थितो यः ।
दशस्यंदनस्योरुवंशे चतुर्धा
कृपाबद्धचित्तो हरिः प्रादुरासीत् ॥ ५ ॥
स्तनं धयन् कोशलराजपुत्र्या
रामो निरुंधन् स्वरुचा प्रदीपान् ।
गोरोचनालंकृतभालपट्टो
नीराज्यमानः प्रियकृत् तदासीत् ॥ ६ ॥
पुरोधसा चाप्यवलेहितश्च
तातेन मध्वाज्यहिरण्ययुक्तं ।
आस्वादयन् स्मेरमुखस्तदासीद्
विश्वस्य कर्ताखिलयज्ञभोक्ता ॥ ७ ॥
प्रासोष्ट केकयसुता भरतं सुमित्रा
श्रीलक्ष्मणं तदनु शत्रुहणं सुतौ द्वौ ।
एकः पुराणपुरुषो ह्यभवच्चतुर्धा
श्रीविष्णुबाहुसदृशाः खलु ते व्यराजन् ॥ ८ ॥ °

With the third canto begins a new pagination; but the end of the third, and the first two verses of the fourth canto are wanting, between foll. 7 and 8 of this second portion.

The MS. is rather incorrect, especially in the latter part.

It ends: °सदास्तु पुष्पोजहिमों(? पुष्पोदधिमें) कमलाकरस्य॥ इति श्रीमन्नारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते रामकौतुके महाकाव्ये चतुर्थः सर्गः ॥

[H. T. COLEBROOKE.]

## 3925.

**772.** Foll. 231; size 10¼ in. by 4¼ in.; fairly written in Devanāgarī A.D. 1748; seven lines in a page. The last leaf has been supplied by a more modern hand.

*Jānakyānanda-bodhana*, or *Jānakībhāgīrathī-saṃvāda*, in 22 cantos (*taraṅga*), composed by *Yati Govinda*, or *Govinda Muni*.

*Sītā*, when rejected by *Rāma*, is visited, in her exile, by *Gaṅgā* in human form, who consoles her and teaches her to renounce earthly thoughts and pleasures, and to know *Rāma* as the divine spirit with whom she will ultimately become one again.

The work reads more like a Paurāṇik treatise than a poem.

It begins:

विश्वनाथं नमस्कृत्य विश्ववंद्यं जगद्गुरुं ।
ज्ञानक्यानंदसंबोधः क्रियते साधुसंमतः ॥ १ ॥
मनसा वचसा बुद्ध्या कायेनेंद्रियवृंदतः ।
यश्चेष्टते परं दृष्टं(r. द्रष्टुं) स साधुः सद्भिरीरितः ॥ २ ॥
स्थिरः सिंधुसमाभासो ह्यंतर्लक्ष्यो(?°ल्यो) ऽतिनिर्वृतः ।
निर्निमेषो ऽतिगंभीरो गुरुः केनोपमीयते ॥ ३ ॥
निपीय कनकं सूतो निष्कंपो वर्तते यथा ।
तथा कनकमापीय वर्तते यः स्थिरे सुखे ॥ ४ ॥
बध्येत गगनं ज्योत्स्ना शोष्येत मरुदात्मना ।
तदा स्तोतुं हि शक्येत गुरुः शिष्येण यत्नतः ॥ ५ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

भुक्तानुसारतस्तृप्त्या यथोद्गारः स्वयं मुखात् ।
जायत्येवं गुरोर्मूर्तेरनुवादो विधीयते ॥ ६ ॥
सिंधुं प्राप्य यथा सिंधुः स्वं रूपं नापि सैंधवं ।
विवेद तद्वच्छिष्यो ऽपि गुरोर्वेत्ति न वा स्वकं ॥ ७ ॥
अज्ञानतिमिरे मग्नो ज्ञानार्को ऽदर्शि येन मे ।
प्रकाशसिंधुतां नीतस्तत्प्रकाशं तथा वदे ॥ ८ ॥
अखंडमंडलं व्योम सावकाशं हि यत्तनौ ।
भासते तमहं वंदे गुरुं गगनतः परं ॥ ९ ॥
नासीन्नास्ति न वा भावि यत्रेदं वियदादिकं ।
चिदानंदसुधासिंधुं वंदे तं शिवविग्रहं ॥ १० ॥ ° २१ ॥
ईदृशीं गुरुतां लब्धो(लब्ध्वा) विश्वनाथाद्गुरोर्मुनिः ।
करोति मननं तस्या हृदि गोविंदनामकः ॥ २२ ॥
भागीरथीगुणैर्नुन्नो जानक्यानंदबोधने ।
तदुक्तिभिस्ततो ग्रंथान्ननोम्यलोक्यनिर्वृतेः ॥ २३ ॥ ° ६१ ॥
अपुनर्भवकालो यो विधात्रा निर्मितो भवेत् ।
तेनेदं पुस्तकं लभ्यं नेतरेण कदाचन ॥ ६२ ॥ ° ६८ ॥
जानक्यानंदसंबोधमालिकां चित्प्रकाशिकां ।
धारयिष्यंति ये कंठे [ऽ]शिवा एव न ते नराः॥६९॥°७०॥
मोक्षाकांक्षी नरो ह्येनं त्यक्त्वान्यत्पुस्तकं श्रयेत् ।
विहाय नवनीतं स पण्याकं(पि°) भक्षते मुधा ॥ ७१ ॥
सरागा ये नराः संति न ते पाठाधिकारिणः ।
ये हंसा मानसारामा विरामायात्र ते मताः॥७२॥°८५॥

इदानीं जानकीभागीरथ्योः संवादं वक्तुं जानकीरामवियोगेन वैराग्याय प्रस्तावकथया जानक्याः शोकवर्णनं क्रियते ॥

पुरा त्रेतायुगे न्यस्ता जानकी जह्नुजातटे ।
लोकापवादभीतेन रामेणामिततेजसा ॥ ८७(!) ॥
सा तदा शोकमोहार्ता चक्रंद कुररी यथा ।
तच्छ्रुत्वा दुःखभारार्ताः सर्वे तत्तीरजा भवन् ॥ ८८ ॥
गतवेगा तदा गंगा वितरंगा स्थिराभवत् ।
निश्चलैर्लोकयामास पंकजैर्लोचनैस्तदा ॥ ८९ ॥ °

I., *bhāvinirdhāra* (267 vv.); II., *citprakāśakadhyānam* (207 vv.); III., *jātivarṇavimarsha* (63 vv.); IV., *gāṅgakojjvala* (147 vv.); V., *naiyāyikaprabodha* (153 vv.); VI., *pañcātītapadam* (215 vv.); VII., *kāraṇatvāvabodhanam* (chiefly prose); VIII., *jagajjanmeśitur nāma* (prose and verse); IX., *manolaya* (83 vv.); X., *bandhamokshakāraṇam* (73 vv.); XI., *ahaṃtotpattināśau* (110 vv.); XII., *rāmodaya* (120 vv.); XIII., *rāmalīlāvilāsa* (137 vv.); XIV., *jānakyai rāmabodhanam* (252 vv.); XV., do. (218 vv.); XVI., do. (112 vv.); XVII., *rāmasya advaitasiddhatā* (85 vv.); XVIII., *daśendriyapadam* (93 vv.); XIX., *svātmapadam* (57 vv.); XX., *shaḍviṃśatipadam* (43 vv.); XXI., *nijānandabodha* (101 vv.); XXII., *layayoga* (74 vv.).

It ends:

एवं ते कथितः सीते समनस्को लयो मया ।
आस्तिके सिद्धिदः सीते नास्तिके निष्प्रयोजनः ॥ ६८ ॥
वारंवारं विमर्शो ऽयं दृढबोधाय कल्पते ।
अतो विमर्शयस्वैवं रामता ते ततो भवेत् ॥ ६९ ॥
इत्थं भागीरथी तत्र जानक्यै प्रतिबोध्य च ।
अंतर्हिता प्रवाहे स्वे विशोकाजनि जानकी ॥ ७० ॥
नमस्कृत्य सुराः सीतां ये च तत्र समागताः ।
भवनानि मुख्या जग्मुर्जानकीं कवये ऽर्पयन् (!) ॥ ७१ ॥
यथा शास्त्रं मया चित्ते जानक्यै जगदीशितुः ।
कृतं तेन सदा रामः प्रसन्नो ऽस्तु गुरुर्मम ॥ ७२ ॥
यदस्मिन्सौष्ठवं भाति तद्गुरोरेव मे न वा ।
यच्च निंद्यं भवेदत्र तन्ममैव गुरोर्न हि ॥ ७३ ॥
इति गोविंदसंगीते जानक्यानंदबोधने ।
लयाख्यो द्वाविंशतिमस्तरंगो रंगदायकः ॥

इति श्रीयतिगोविंदविरचिते जानक्यानंदबोधने जानकीभागीरथीसंवादे गोविंदगीते द्वाविंशति[तम]स्तरंगः । ° संवत् १८०५ वर्षे माघशुदी १३ भौमवासरे °

For an incomplete MS. of this work see Rāj. Mitra, Notices, ii., p. 193 (where the author is called *Śrīpatigovinda*).

[H. T. COLEBROOKE.]

## 3926.

**1925.** Foll. 26; size 10¼ in. by 4½ in.; indifferent Devanāgarī writing of 1770 A.D.; 11 or 12 lines in a page.

*Durghaṭakāvya*, a highly artificial poem, of 86 verses, in praise of various deities, especially *Vishṇu*, with a commentary; by unknown authors.

DR.RUPAK NATH ( DR.RUPNATHJI)

It begins:

लक्ष्मीवन् कृतकूरमू रणदहिन् दुर्धक् क्षमः पापडी-
लाइूढोऽकलघी वडांछन वडी खाजांबुदालि(°ली)रुचिः।
मंडाशाकरखंडनो विविभुना क्षीरावसातुल्य मां
सासुं हालितडिन्निभांगवसनोऽव्याः सेवकं सारवान्॥ १॥

व्याख्या॥ हे लक्ष्मीवन् त्वं मां सेवकं अव्याः रक्ष। कथंभूतस्त्वं। कृतकूः। कृतं कोः पृथिव्याः अवनं रक्षणं येनासौ कृतकूः। पुनः कथंभूतस्त्वं। असूः। सूयते उत्पाद्यते ऽसौ सूः। न सूः असूः। पुनः क° त्वं। रणदहिन्। रणं संग्रामं ददति ते रणदाः शत्रवस्तान् हिनस्ति असौ रणदहिन् शत्रुहा इत्यर्थः। पुनः क° त्वं। दुर्धक्। दुःखं पापं दहतीति दुर्धक्। पुनः क° त्वं। क्षमः। षिमा(?) क्षमास्यास्तीति क्षमः। °। पुनः क° त्वं। पापडी। ° लुञ् छेदने। पापं लुनातीति पापली। पुनः क° त्वं। इलाट्। इलां पृथिवीं अटति प्राप्नोति सः इलाट्। पुरा वामनादिरूपेण बलेः सकाशात्प्राप्तः।° किंभूतस्त्वं। विविभुना ऊढः। वीनां पक्षिणां विभुः गरुडस्तेनोढः। पुनः क° त्वं। अकलघी। अकं दुःखं लघयतीति अकलघी। कथंभूतस्त्वं। अवलांछनः। अवगतं प्राप्तं लांछनं यस्य सः अवलांछनस्तस्य संबोधने हे अवलांछन।° पुनः क° त्वं। वडी। बलस्यास्तीति बली। पुनः कथंभूतस्त्वं। खाजांबुदालिरुचिः। खे आकाशे अजंतीति खाजाः गगनचराः। ते च ते अंबुदाश्च। तेषामालिः(°ली) पंक्तिस्तस्या रुचिर्यस्यासौ। ° पुनः क° त्वं। मंडाशाकरखंडनः(मड्डा° *Kāvyak.*)। मल्लाश्चाणूरादयस्तेषां आशा इच्छा तस्या आकरस्तं खंडयतीति मंडाशाकरखंडनः मल्लेच्छासमूहनाशक इति भावः। क्षीरावस। क्षीरे क्षीरसागरे आसमंताद्भावेन वसतीति तस्य संबुद्धौ हे क्षीरावस। हे अतुल्य। नास्ति तुल्यो येन तस्य संबोधने हे अतुल्य। क° मां। सासुं। असवः प्राणास्तैः सह वर्तमानं। पुनः क° त्वं। अलितडिन्निभांगवसनः। अंगं च वसनं च अंगवसने। अलिश्च तडिच्च अलितडितौ तयोर्निभेव निभा ययोस्ते अलितडिन्निभे अंगवसने यस्यासौ °। पुनः क° त्वं। सारवान्। सारो बलमस्यास्तीति सारवान् पालनसमर्थः॥ १॥

खाटीच्छाशिपलेह पापड वडीर्घारोडभाजी गणो
यद्भक्तो ऽनिमिषो च बाकुलचणा ध्यायंति यां योगिनः।
काला भीलकरालभूखलमहादैत्येंद्रमंथार्थिनी
सा सामूयरसा तवाघहतये स्तात् कर्णमोटी चिरं॥ २॥

व्याख्या। अयमर्थः। सा कर्णमोटी चामुंडा तवाघहतये।° खे वियत्यटती खाटी इच्छया अश्नातीति इच्छाशी। पले आमिषे ईहा स्पृहा यस्येति पलेहः।° पापं लुनाति छिनत्ति। अन्येभ्यो दृश्यत इति डः।° बलमस्यास्तीति बली। तथा ईर्ष्यया रोलं लोलं भजते।°

Verse 6 (see below) runs thus:

यो व्योमाडिनगो ऽहरीडुडुपगोयुग्मः क्रमधो ऽपभीर्
भीमस्वर्यसुको रमारतरसो नाभ्यब्जडासीनकः।
क्षोपचम्बवनम्य यत्सलिलजो पार्थिम्यपो ऽक्षार्पदोर्
आद्यो गद्यसिवाड् अपादमृतदः पायात्स वः कंदभाः॥ ६॥

The last verse, with its commentary, runs thus:

यावत्तोयधरा धराधरधराधारा धरा भूधराः
यावच्चारु सुचारुचारु च मरं(परं) चामीकरं चामरं।
यावद्रावणराममंरामरमणं रामायणं श्रूयते
तावद्भोगविभोग भोगभवनं भोगाय ते नित्यशः॥ ८६॥

अस्यार्थः। भोगेन धनेन विशिष्टो भोगः सुखं यस्य स भोगविभोगः। तस्य संबोधनं।° भोगभवनं शरीरं।° यावत्तोयधरा समुद्रास्तिष्ठंति।° यावद्धराधरधराधारा[स] तिष्ठंति। धरायाः अधरं अधोभागस्तं धरंतीति धराधरधराः शेषादयस्तेषां धारा शेषकूर्मादिपंक्तिरिति वा। यद्वा धराधरधरा ये आधाराः अधिकरणभूताः शेषादय इत्यर्थः। तथा। यावद्धरा पृथिवी तिष्ठति। यावद्भूधराः पर्वतास्तिष्ठंति च। अपरं आमरं अमरसंबंधि चामीकरं सौवर्णं चामरं तिष्ठति।° माहेंद्रराज्योपलक्षणमेतत्। यावन्माहेंद्रराज्यं।° किंविशिष्टं च। सुचारु रमणीयेष्वपि रमणीयं।° प्रथमं चार्विति विशेषणं भवनेन संबध्यते।° रामो ऽभिरामो मनोहरश्चासौ रामश्च रामरामः। रावणश्च रामरामश्च° ताभ्यां रमणं मनोहरं।° किं च रामणरामरामरमणमिति पाठे रामणी रामा जानकी यस्यासौ रामणरामः स चासौ रामश्च रामणरामरामस्तेन रमणमित्यर्थ इति वा॥

इति श्रीदुर्घटाख्यं काव्यं संपूर्णं॥ संवत् १८२७ वर्षे आषाढवदि ५ बुधवासरे॥ इति तत्वं आष्टानगरे॥

Remarks as to various readings, such as the one above (रावण or रामण), would seem to show that text and commentary were composed by different writers.

A *Durghaṭakāvya*, ascribed to *mahākavi Kālidāsa*, and consisting of six verses—only three of which (3, 4 and 5) occur in the present poem (viz. as vv. 6, 2 and 1 resp.)—has been printed in the *Kāvyakalāpa*, i. (Bombay, 1864), pp. 136-7.

[Dr. John Taylor.]



DR.RUPNATHJI(DR.RUPAK NATH)

## 3927.

**2580 b.** Foll. 11 (paged 1–21); size 10½ in. by 8⅜ in.; modern Telugu writing; 23–25 lines in a page.

*Hariharatāratamya(-śatakam)*, a poem on the comparative claim of *Vishṇu* and *Śiva* to represent the Supreme Spirit, by *Rāmeśvara Adhvarasudhāmaṇi*, son of *Śrīkānta;* with a verbal commentary, apparently by the same author. It begins:

अनादिमलसंसाररोगवैद्याय शंभवे ।
नमः शिवाय शांताय ब्रह्मणे लिंगमूर्तये ॥ १ ॥
प्रलयार्णवसंस्थाय प्रलयोत्पत्तिहेतवे ।
नमः शिवाय शांताय ब्रह्मणे लिंगमूर्तये ॥ २ ॥

श्रीगुरुशांताय नमः । इंद्रनीलवृत्तं ॥

वृद्धान् श्रुतिस्मृतिपुराणविशेषभाषान्
निःशंकबुद्धिकुशलान् प्रणिपत्य नित्यं ।
अद्वैतमेकमभजं श्रितभेदबुद्धिं
पृच्छाम्यहं हरिहरस्थिततारतम्यं ॥ १ ॥

श्रिता प्राप्ता । भेदा भिन्ना । बुद्धिः धीमान् । अष्टादशपुराणानां विशेषान् । युक्तायुक्ता विचारवर्धमानान् । भाषान् वक्तॄन् । निःशंकबुद्धिकुशलान् । निःशंका शंकारहिता बुद्धिः । प्रज्ञासु कुशलान् प्रौढान् । वृद्धान् पंडितान् । नित्यं सदा । प्रणिपत्य नमस्कारं कृत्वा । हरिहरस्थिततारतम्यं । हरिहरः शंकरनारायणयोः । स्थितं वर्तमानं । तारतम्यं न्यूनाधिकत्वं । पृच्छामि शृणोमि । एकं मुख्यं । अद्वैतं अभेदज्ञानं । अभजं प्राप्तो ऽस्मि ॥ १ ॥

एकः समुद्रसलिले वटपत्रशायी
त्वन्यः समुद्रशरधिस्त्रिपुरप्रभेदे ।
को वानयोरधिक इत्यनुचिंत्य वृद्धाः
सत्यं वदंतु तमिमं वयमाश्रयामः ॥ २ ॥

एकः विष्णुः । समुद्रसलिले अब्धितोये । वटपत्रशायी न्यग्रोधपत्रे शायी सुप्तवान् । अन्यः शंकरः । त्रिपुरप्रभेदे त्रिपुरसंहारे । समुद्रशरधिः पारावारतूणीरः । अनयोः एनयोः शंकरनारायणयोः । को वा अधिकः को वा शिष्टः । इति इत्थं । वृद्धाः पंडिताः । अनुचिंत्य आलोचयित्वा(!) । सत्यं यथार्थं । वदंतु ब्रुवंतु । तमिमं अमुं वक्ष्यमाणभावार्थं । वयं आश्रयामः प्राप्तास्मः । समुद्रस्य सलिलं समुद्रसलिलं । कस्मिन्समुद्रसलिले । वटस्य पत्र वटपत्रं ॥ २ ॥

The work consists of 114 verses, the last two of which run thus:

अद्वैतमेव भजनीयमतो ऽप्रमेयं
नित्यं निरंजनमनाकृतिनिर्विकल्पं ।
सत्यं परात्परमखंडचिदात्मभावम्
आनंदमच्युतमजं तमिहाश्रयामः ॥ ११३ ॥

वयं अद्वैतमेव द्वैतरहितमेव । ° इह अस्मिन् । आश्रयामः प्राप्नुयाम ॥ ११३ ॥

श्रीकांतनामविबुधेंद्रतनूभवेन
रामेश्वराध्वरसुधामणिना प्रणीतं ।
लोके त्विदं हरिहरस्थिततारतम्यं
युक्तान्वितं हि शतकं सुधियः पठंतु ॥ ११४ ॥

इति श्रीहरिहरतारतम्यशतकं संपूर्णं । सांबशिवार्पणमस्तु ॥

[Mackenzie Collection.]

## 3928.

**2543 e.** Foll. 30; size 10¼ in. by 4¼ in.; unequal Devanāgarī writing of A.D. 1536; ten lines in a page.

*Darpadalana*, a didactic poem, by *Kshemendra*, otherwise called *Vyāsadāsa.*

The work is a diatribe against human pride, which the poet describes as springing from seven principal sources—birth, wealth, learning, beauty, valour, charity, and religious austerity—and which he treats separately in as many chapters, illustrating each with appropriate examples and stories of his own invention.

It begins:

प्रशांताशेषविघ्नाय दर्पसर्पापसर्पणात् ।
नमः शमनिधानाय स्वप्रकाशविकाशिने ॥ १ ॥
संसारव्यतिरेकाय हृतोत्सेकाय चेतसः ।
प्रशमामृतसेकाय विवेकाय नमो नमः ॥ २ ॥
क्षेमेंद्रः सुहृदां प्रीत्या दर्पदोषचिकित्सकः ।
स्वास्थ्याय कुरुते यत्नं मधुरैः सूक्तभेषजैः ॥ ३ ॥
कुलं वित्तं श्रुतं रूपं शौर्यं दानं तपस्तथा ।
प्राधान्येन मनुष्याणां सप्तैते मदहेतवः ॥ ४ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

अहंकाराभिभूतानां भूतानामिव देहिनां ।
हिताय दर्पदलनं क्रियते मोहशांतये ॥ ५ ॥

The poem has been published in the *Kāvyamālā*, Bombay 1890.

It ends :

प्रशांतांतस्तृष्णाविषमपरितापः शमजलैर्
अशेषः संतोषादमृतवरपानेन वपुषा[1] ।
असंगः संभोगैः(°गः *K.*) कमलदलकीलालतुलया
प्रबुद्धे ऽंतश्चित्ते सपदि सुलभं शंकरपदं[2] ॥ ७३ ॥

इति व्यासदासापराख्यक्षेमेंद्रविरचिते दर्पदलने तपोदलनविचारः समाप्तः । समाप्तं चेदं दर्पदलनं ॥ संवत् १५९३ वर्षे ज्येष्ठ सुदि १ गुरुदिने वैद्यवरश्रीभाभाजीसूनुना गदाधरेण वृद्धभ्रातुर्वलिराजस्य तथा पुत्रपौत्रादीनां विलोकनाय लिखितं ॥

[Gaikawar.]

## 3929.

**2079 c.** Foll. 9; size 9½ in. by 4 in.; good Devanāgarī writing of 1651 A.D.; nine lines in a page.

*Ratnakalācaritra*, a dramatic poem of 84 verses (mainly Prākṛit), by *Lolimmarāja*.

It begins :

सुरसवचनगुंफोदाहृताकल्पवृक्षो
विजितकविकदंबो डाकिनीभीतिभेत्ता ।
त्रिदशसदसि वाच्यो दोषिणां दोषहंता
जयति धरणिपीठे लाललोलिम्मराजः ॥ १ ॥

श्रीरत्नकलोवाच ।

यडि घडि मुजपासोंगोष्ठित्या (?) चीकरावों
सकलभुवनभिन्नीतो विचित्रं लिहावो(?) ।
बहु बहु उत कंठाजीउ जाइ लिज्जाणा
क्षण भरि तुम्हि आणा लाललोलिम्मराजः ॥ २ ॥

The interlocutors are *Lolimmarāja*, *Ratnakalā*, a *sakhī*, a *buḍhī*(?), *Daulata* and *Ātmārāma*.

It ends :

लोलिम्मराजरचितैर्विविधैर्विचित्रैर्
वैदग्ध्यवद्भिरिह रत्नकलाचरित्रैः ।
तेषां भवे सुकृतिनामधिकारसंपत्
तेषां सहस्रभगदर्शनतो ऽस्ति मुक्तिः ॥ ८३ ॥

अतिरत्नकलाचरित्रजाले
सकलां हि कविं चामनासिखाले(?) ।
अमृताहुतगोडजाले
पठवां वेपुठिलासि(!) भक्तिभावैः ॥ ८४ ॥

इति श्रीलोलिम्मराजविरचित(!) रत्नकलाचरित्रं समाप्तं ॥° संवत् १७०८ वर्षे श्रावणमासे कृष्णपक्षे द्वादसी भृगुवासरे लपीतं उदीच्यज्ञातीयवृद्धशाषायां रावलकृष्णजीसूतभूधरजीलपीतं स्वयंपठनार्थं परोपकाराय ॥

On the first page of fol. 1 it is called *Lolimmarājakāvyam*. Bühler, Sansk. MSS. in Gujarāt etc., iv., p. 234, makes it a medical work.

[Gaikawar.]

## 3930.

**114 a.** Foll. 37; size 10 in. by 4¼ in.; excellent, modern Devanāgarī writing; eight lines in a page.

*Kalāvilāsa*, a poem in nine cantos, on the arts of roguery, by the Kaśmirian writer *Kshemendra*, surnamed *Vyāsadāsa*, son of *Prakāśendra*, grandson of *Sindhu*, and a pupil of the Śaiva philosopher *Abhinavagupta*.

The author flourished in the second and third quarters of the 11th century; his best-known work being the *Bṛihatkathāmañjarī*.

It begins :

अस्ति विशालं कमलाललितपरिष्वंगमंगलायतनम् ।
श्रीपतिवक्षःस्थलमिव रत्नोज्ज्वलमुज्ज्वलं नगरम् ॥ १ ॥
मणिभूर्बिंबितमुक्ताप्रलंबनिवहेन यत्र शेषाहिः ।
भुवनानि बिभर्ति सदा बहुधात्मानं विभज्यैकः[3] ॥ २ ॥
विप्रोऽभिसारिकाणां भवनगतः[4] स्फाटिकप्रभानिकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुंठाकः ॥ ३ ॥

---

[1] संतोषामृतविसरपानेन वपुषः *K.*
[2] भवारण्ये पुंसां परहितमुदारं खलु तपः ॥ *K.*

[3] विभज्येव ed.   [4] भवनगण ed.

DR.RUPNATHJI( DR.RUPAK NATH )

यत्र त्रिनयननयनज्वलनज्वालावलीशलभवृत्तिः ।
जीवति मानसजन्मा शशिवदनाकान्तिपीयूषैः ॥ ४ ॥
रतिलुलितललितनयनाल्कमलजलववाहिनो[1] मुहुर्यत्र ।
स्वपकेशकुसुमपरिमलवासितदेहा वहंत्यनिलाः ॥ ५ ॥ ° ८ ॥
तत्राभूदभिभूतप्रभूतमायानिकायशतधूर्तैः ।
सकलकलानिलयानां धुर्यः श्रीमूलदेवाख्यः ॥ ९ ॥
नानादिग्देशागतधूर्तैरुपजीव्यमानमतिविभवः ।
स प्राप विपुलसंपदमात्मगुणैश्चक्रवर्तीव ॥ १० ॥
भुक्तोत्तरं सहृदयैरास्थानीसंस्थितं कदाचित्त[2] ।
अभ्येत्य सार्थवाहो दत्तमहार्होपहारमणिचषकः[3] ॥ ११ ॥
प्रणतो हिरण्यगुप्तः सहितः पुत्रेण चंद्रगुप्तेन ।
प्राप्तासनसत्कारः प्रोवाच मुहूर्तविश्रांतः ॥ १२ ॥
अयि परिचयसत्प्रतिभा[4] तव पुरतो मादृशामियं वाणी ।
ग्राम्यांगनेव नगरे न तथा प्रागल्भ्यमायाति ॥ १३ ॥
पिहितबृहस्पतिधिषणो रुचिरः प्रज्ञामरीचिनिचयस्ते ।
तिग्मांशोरिव[5] सहजः प्रोषिततिमिराः करोत्याशाः ॥ १४ ॥
आजन्मार्जितबहुविधमणिमौक्तिककनकपूर्णकोषस्य ।
एको ममैष सूनुः संजातः पश्चिमे वयसि ॥ १५ ॥
मोहस्थानं बाल्यं यौवनमपि मदनमानसोन्मादम् ।
अनिलावलोलनलिनीदलजलचपलाश्च विभवाः ॥ १६ ॥
हारिण्यो हरिणदृशः सततं भोगाब्जमधुकरा धूर्ताः ।
पतिता परंपरैषा दोषाणां मम सुतस्यास्य ॥ १७ ॥ ° २० ॥
इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य ।
तमुवाच मूलदेवः प्रीतिप्रसरप्रसारितौष्ठाग्रः[6] ॥ २१ ॥
आस्तामेष सुतस्ते मम भुवने(भ°) निज इव प्रयत्नपरः ।
शास्यति[7] मयोपदिष्टं शनकैः सकलं कलाहृदयम् ॥ २२ ॥
इति तस्य शासने स स्वसुतं निक्षिप्य तद्गृहे मतिमान् ।
नत्वा तं सार्थपतिः[8] प्रययौ निजमंदिरं मुदितः ॥ २३ ॥

At night *Mūladeva*, by means of amusing stories, instructs his disciples (*Kandali-mukhyān*) in the tricks practised by rogues, harlots, etc.; viz. in canto I., on *dambha* (दंभवर्णनो नाम प्रथमः सर्गः); II., on *lobha*; III., on *kāma*; IV., on *veśyāḥ*; V., on *moha*; VI., on *mada*; VII., on *artha*; VIII., on *hemaharaṇa*; IX., various.

It ends:

एता वंचकमाया विज्ञेया न तु पुनः स्वयं सेव्याः ।
धर्मः कलाकलापे[9] विदुषामयमीप्सितो भूत्यै ॥ ७४ ॥
उक्तेति मूलदेवो विसृज्य शिष्यान् कृतोचिताचारः ।
किरणकलिकाकलापैर्निनाय[10] निजमंदिरे रजनीम् ॥ ७५ ॥

इत्याचार्यक्षेमेंद्रविरचिते कलाविलासकाव्ये नवमः सर्गः[11] ९ ॥ समाप्तं चेदं काव्यम् । संवत् १७२५—either Śaka (A.D. 1803) or of a former MS.—वर्षे आषाढप्रथमकृष्णपक्षत्रयोदशी १३ गुरुवारे लिखितं परमेश्वरीदासमिश्रेण ॥

The text, as published in the *Kāvyamālā* (Bombay 1886), adds a 10th *sarga*, of which the two concluding verses of our MS. form vv. 1 and 41 (the latter being followed by two more verses).

For another MS. see Rāj. Mitra, Notices, i., p. 44, where the author is by mistake called *Kshirendra*, but the colophon runs: इत्याचार्यव्यासदासापरनामधेयक्षेमेन्द्रकृते कलाविलासकाव्ये दशमः(!) सर्गः ॥

Regarding the author see Bühler, Detailed Report, p. 46. [H. T. COLEBROOKE.]

## 3931.

**1184 i.** Foll. 40; size 13 in. by 4⅜ in.; modern Bengālī handwriting (foll. 1–3*a* by a different hand from the rest); eight lines in a page.

*Kīcakavadhakāvya-Tattvaprakāśikā*, a commentary, by *Janārdana Sena*, on *Nītivarman's Kīcakavadha*, a short poem, in five *sargas*, founded on the well-known episode of the *Mahābhārata* (IV. 373–860).

---

1 °ललितललनाक्षमजललववाहिनो ed.
2 कदाचित्तं ed.
3 °मणिकनकः ed.
4 अतिपरिचयप्रतिभा ed.
5 तीक्ष्णा° ed.
6 प्रीतिप्रसरैः प्र° ed.
7 शास्यति ed.
8 नत्वाथ सार्थवाहः ed.
9 धर्म्यः कलाकलापो ed.
10 किरणकलिकाविकासां निनाय ed.
11 Every second *akshara* of this colophon (as of those of the five preceding cantos) is omitted.

DR.RUPNATHJI(DR.RUPAK NATH)

The text of the poem, as here commented upon, seems to begin (cf. Rāj. Mitra, Notices, ii., p. 57):

जितः सुचरितोच्छेदी स्मरो ऽयं दुःसहो मया ।
इतीव देहमकरोदभिन्नं यः सहोमया ॥
बिभर्ति हारमनघं यो भस्मभिरहिं सितं ।
तेजश्च मन्मथशरैरिन्द्रियार्थैरहिंसितं ॥
या त्रिलोकतना मूर्तिरुपायेन जुगोप तां ।
यो ऽवहत् कंसनिधनप्रयुक्तामृजुगोपतां ॥

The Commentary begins:

वन्दामि वृन्दारकवृन्दवन्दिताम्
आनन्दसन्दोहनिदानसेवितां ।
सदासदानन्दविदं चिदक्षरे
विराजमानाममलां सदाशिवां ॥
श्रीजनार्दनसेनेन विदुषां तोषकाशिका ।
क्रियते कीचकवधकाव्यतत्त्वप्रकाशिका ॥

तत्र तावत् कविकुलकुवलयबन्धुसिन्धुसंतोपेन्दुप्रकृतिसुन्दरबोधधर्मो नीतिवर्मा प्रारिप्सितप्रतिबन्धकप्रत्यूहव्यूहविघाताय शिष्टाचारानुमितवेदबोधितदेवतानामकीर्तनरूपं मङ्गलमाचरन् शिष्यशिक्षार्थं ग्रन्थादौ निबध्नन्नाह । जितेति । मया दुःसहो ऽयं स्मरः कामः दुःखेन सह्यते नियम्यत इति एतेनास्य प्रबलता ध्वनिता । एवंभूतो ऽपि जितः पराभवं प्रापितः ॥ ननु तस्यानिष्टकारित्वाभावात् कथं निग्रह इत्यत आह सुचरितेति । शोभनं यच्चरितं शीलं शुभादृष्टं(!) वा तस्योच्छेदी उन्मूलयिता । तथा च ईदृशां दमनमेवोचितमिति भावः । इतीव इतस्मादेव कारणात् । इव उत्प्रेक्षायां । उमया पार्वत्या सह देहं अभिन्नं एकं अर्धनारीश्वरात्मकं अकरोत् । ० ॥ १ ॥ ० यो भस्मभिर्विभूतिभिः सितं शुक्लं अहिं फणिनं हारं बिभर्ति । कीदृशं । अनघं हृद्यं । ० इन्द्रियार्थैर्विषयरूपैः । ० ॥ या त्रिलोकतना स्वर्गमर्त्यपातालरूपा मूर्तिः । तां उपायेन दुष्टदैत्यादिवधादिरूपेण जुगोप रक्षितवान् । ०॥

*Sarga* I. from v. 5 onwards is a panegyric of the king (whose name is not mentioned, but who is said to have ruled as far as Kaliṅga) for whose delectation the poet composed his poem, as is stated in the comment on the last verse (fol. 6*b*): तस्य राज्ञो विनोदाय विलासाय नीतिवर्मणो नीतिवर्मनाम्नः कवेरिदं काव्यं प्रवृत्तं । तस्य विनोदार्थमिदं काव्यं नीतिवर्मकविना विधीयत इत्यर्थः ।

The poem seems to end thus (cf. R. M.):

इति भवतु दशा तवाहितानां
सकलमहीजयभूत वाहितानां ।
वस सुखमुदयादहीयमानः
सकलधराधरणादहीयमानः ॥

On which the commentator remarks: इदानीमभिज्ञातग्रन्थावसाने नीतिवर्मा कविर्निजं राजानमाशास्ते । हे सकलमहीजयभूत समस्तपृथ्वीविजयस्वरूप वाहितानां वाधितानां देशान्तरं प्रापितानां वा । तव अहितानां शत्रूणां इति दशा कुत्सा दिवावस्था(!) भवतु त्वं उदयां च (*r.* उदयाद्) अहीयमान उदयेनाहीनः सन् सुखं यथा स्यात्तथा वस सुखेन तिष्ठेत्यर्थः । किंभूतस्त्वं । सकलधराधरणात् अहीयमानः । योग्यतयाऽहिर्वासुकिः स इवाचरतीत्याथिः(?) वासुकिसदृश इत्यर्थः । तेनापि समस्ता मही ध्रियत इति ॥

इति श्रीजनार्दनसेनकृतायां कीचकवधटीकायां तत्त्वप्रकाशिकाख्यायां प्रथमः सर्गः समाप्तः ॥

[H. T. Colebrooke.]

3932.

2238 a. Foll. 11 (the first of which is wanting); size 7¼ in. by 4½ in.; legibly written in Devanāgarī about 1650 A.D.; 6–14 lines in a page.

*Rākshasakāvya*, in 20 verses, with *ṭīkā*.

The MS. begins with v. 2, and does not mention the author's name at the end. Text and commentary are, however, identical with those printed in Hœfer's Sanskrit-Lesebuch from the Berlin MS. no. 580, where the author is called *Ravideva* of Malayadeśa. The text (beginning: कश्चिद्वनं बहुवनं विचरन् वयस्यो०), without the author's name, is also given in *Jīvānanda Vidyāsāgara's Kāvyasangraha*, p. 572 (21 *ślokas*, the 6th of which is wanting in this MS.).

The text ends:

एतावदुक्तवचनं सुमनाः स उक्त्वा
रन्त्वा दिनं सह तया प्रियया स्वदीनः ।
युक्तं चतुर्भिरनडुद्भिरदीनवाद्भिर्
आरुह्य यानमथ संप्रययौ स्वगेहं ॥ २० ॥

DR.RUPNATHJI( DR.RUPAK NATH )

The comment ends: तैथानमाहूय अथानंतरं पुरुषः स्वगेहं गृहं संप्रययौ संप्रयातवानित्यर्थः । २० ॥

इति श्रीराक्षसकाव्यटीका समाप्ता ॥

On this poem see also Weber's remarks, Journ. Germ. Or. Soc., vi., 399; Ind. Stud., ii., 154. [GAIKAWAR.]

## 3933.

**1964.** Foll. 6; size 6 in. by 4 in.; large, clear Devanāgarī writing of 1795 A.D.; eight lines in a page.

*Aparādhastotra*, a hymn of fourteen stanzas addressed to *Śiva*; attributed to *Śaṅkarācārya*. Not very correct.

It begins:

आदौ कर्मप्रसंगात्कलयति कलुषं मातृकुक्षौ स्थितं मां
तन्मूत्रामेध्यमध्ये कथयति नितरां जाठरो जातवेदः ।
यद्यद्वा तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षंतव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥ १ ॥

Printed (with three additional verses) in Hæberlin's Anthology, p. 496, under the title of *Aparādhabhañjanastotra*, beginning with the verse: शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिणेत्रं ०

The verses common to both are here given in the following order: H. 3, 4, 5, 6, 8, 9, 11, 7, 12, 10, 14, 15, 13, 16.

The copy is dated: स्वस्ति श्रीनृपशालिवाहनशके अद्रिभूसप्तभूमिते राक्षसो वत्सरे चैव अमाभौमेन संयुते नभमासि असितपक्षे रामातिथौ कन्यासूर्ये दक्षिणायने वर्षा ऋतौ सप्तम-नक्षत्रे विंशतियोगे इदं पुस्तकं रामचंद्रेण लेखनीयं जोशीत्युप-नामकः पावसोग्रामवासिनं विश्वेश्वरसंनिधानं ॥

[DR. JOHN TAYLOR.]

## 3934.

**1846 a.** Foll. 5; size $11\frac{7}{8}$ in. by $3\frac{3}{4}$ in.; fair, modern Devanāgarī writing; European paper; 12–14 lines in a page.

*Bhavānīsahasranāmastotra.*

This hymn occurs in the *Rudrayāmala-tantra*. Cf. Th. Aufrecht, Florentine MSS., no. 363.

It begins:

कैलाशशिखरे रम्ये देवदेवं जगद्गुरुं ।
ध्यानोपरतमासीनं प्रसन्नमुखपंकजं ॥ १ ॥
सुरासुरशिरोरत्नरंजितांघ्रियुगं प्रभुं ।
प्रणम्य नंदिको देवो बद्धांजलिरभाषत ॥ २ ॥
नंदिकेश्वर उवाच ॥
देवदेव जगन्नाथ संशयो ऽस्ति महान्मम ।
किंचिदिच्छामि प्रष्टुं त्वां भक्तिवत्सल(!) ॥ ३ ॥
देवतायास्त्वया कस्याः स्तोत्रमेतद्दिवानिशं ।
पठ्यते ऽविरतं नाथ त्वत्तः किमपरः परं(!) ॥ ४ ॥
इति पृष्टस्तदा शंभुर्नंदिकेन जगद्गुरुः ।
प्रोवाच भगवानेको विकसन्नेत्रपंकजः ॥ ५ ॥
ईश्वर उवाच ॥
साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत् ।
स्कंदस्यापि[च] यद्गोप्यं रहस्यं कथयामि तत् ॥ ६ ॥
पुरा कल्पक्षये लोकान् सिसृक्षुर्मूढचेतना ।
गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता ॥ ७ ॥
तस्यामहं समुत्पन्नो सत्त्वैस्तैर्महदादिभिः ।
चेतनेति ततः शक्तिर्मां काप्यालिंग्य तस्थुषी ॥ ८ ॥
हेतुः संकल्पजालस्य मनोऽधिष्ठायिनी शुभा ।
इच्छेति परमा शक्तिरुन्मीलन्नतः परः(?) ॥ ९ ॥
ततो वागिति विख्याता शक्तिः शब्दमयी शुभा ।
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ॥ १० ॥ ० २३ ॥

ओं अस्य श्रीभवानीसहस्रनामस्तोत्रमंत्रस्य श्रीभगवान्महादेव ऋषिराद्या शक्तिर्भगवती देवता अनुष्टुप्छंदः । ओं ह्रीं बीजं क्लीं कीलकं श्रीभवानीप्रीत्यर्थे धर्मार्थकाममोक्षार्थे जपे विनियोगः । अथ ध्यानं ।

अर्धेंदुमौलिममलाममराभिवंद्याम्
अंभोजपाशसृकपूर्णकपालहस्तां ।
रक्तांगरागरसनाभरणां त्रिनेत्रां
ध्याये शिवस्य वनितां मदविह्वलांगीं ॥ १ ॥ ०

It ends:

यो नरो भूतदिवसे ह्यर्कमूलसमाश्रितः ।
जपेदनन्यया बुद्ध्या साधको निर्भयाशयः ॥
तस्य शत्रुगणाः सर्वे गच्छंति यममंदिरं ।
एकरात्रप्रयोगेण सप्ताहाद्रिपुनाशनं ॥

इति श्रीभवानीसहस्रनामस्तोत्रं शुभं भूयात् ॥

[DR. JOHN TAYLOR.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 3935.

**2930.** Foll. 8; size 11¾ in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

[*Rādhākṛishṇastotra*], a rhymed hymn of two *ashṭakas* (each followed by an additional verse), in honour of *Kṛishṇa* and *Rādhikā* resp.

It begins:

अंबुदांजनेंद्रनीलनिंदिकांतिडंबरः
कुंकुमोद्यदर्कविद्युदंशुदीव्यदंबरः ।
श्रीमदंगचर्चितेंदुपीतनाक्तचंदनः
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदनः ॥ १ ॥

गंडतांडवातिपंडितांडजेशकुंडलश्
चंद्रपद्मषंडगर्वखंडनास्यमंडलः ।
बल्लवीषु वर्धितात्मगूढभावबंधनः
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदनः ॥ २ ॥ ० ७ ॥

पुष्पचापिराधिकाभिमर्शलब्धितर्पितः
प्रेमवाम्यरम्यराधिकास्यदृष्टिहर्षितः ।
राधिकोरसीह लेप एष हारिचंदनः
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदनः ॥ ८ ॥

अष्टकेन यस्त्वनेन राधिकासुवल्लभं
संस्तवीति दर्शने ऽपि सिंधुजादिदुर्लभं ।
तं युनक्ति तुष्टचित्त एष घोषकानने
राधिकांगसंगनंदितात्मपादसेवने ॥ ९ ॥

---

कुंकुमाक्तकांचनाब्जगर्वहारिगौरभा
पीतनांचिताब्जगंधकीर्तिनिंदिसौरभा ।
बल्लवेशसूनुसर्ववांछितार्थसाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १० ॥ ०

It ends:

स्वेदकंपकंटकाश्रुगद्गदादिसंचिता
मर्षहर्षवामतादिभावभूषणांचिता ।
कृष्णनेत्रतोषिरत्नमंडनालिदाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १६ ॥

या क्षणार्धकृष्णविप्रयोगसंततोदिता
नेकदन्यचापलादिभाववृंदमोहिता(?) ।
यत्नलब्धकृष्णसंगनिर्गताखिलाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १७ ॥

अष्टकेन यस्त्वनेन नौति कृष्णवल्लभां
दर्शने ऽपि शैलजादियोषिदालिदुर्लभां ।
कृष्णसंगनंदितात्मदास्यसीधुभाजनं
तं करोति नंदितालिसंचया ऽऽशु सा जनम् ॥ १८ ॥

[? J. R. Ballantyne.]

## 3936.

**1846 b.** Foll. 4; size 11½ in. by 3¾ in.; fair, modern Devanāgarī writing; European paper; 11–14 lines in a page.

*Rāmāryā(-śataka)*, a poem of 108 *āryā* verses in praise of *Rāma*, by *Mudgala*.

It begins (cf. Rāj. Mitra, Notices, iv., p. 12):

त्वयि विमुखे मत्प्रमुख्ये सख्ये नान्यस्य जीवामि ।
जीवामितभवदर्पितवसनाशनमात्रजीवना: सर्वे[1] ॥ १ ॥
परितः पश्यसि परितः शृणोषि परितो जगद्विजानासि ।
मां राम किं तदंतर्न शृणोषि न वीक्षसे न वा वेत्सि ॥ २ ॥
जानाति भूपमल्पो नाल्पं जानाति भूप इत्येतत् ।
उचितं सर्वमवित्ते सर्वज्ञे त्वय्यदः कथं श्लाघ्यं ॥ ३ ॥
अर्थिनि विलसति लिप्सा दातरि दित्सा च दूरतो ऽपास्ता ।
आस्तां कृपणकथेयं रमापते राम नोचिता भवति ॥ ४ ॥
अपि रंकमंकनिष्ठः प्रार्थयमानो ऽर्भको लभेतेष्टं ।
कष्टं बत जगदुद्भव भवदंकगतो (ऽपि) लभे न तद्भवतः ॥ ५ ॥
आशापाशनिबद्धं कारागारे कलेवरे निहितं ।
यदि मोचयसि न मां त्वं कुरु तर्हि स्वात्मनैव मे वृत्तिं ॥ ६ ॥ ० ८ ॥
यदि पुनरपराधानां कोटिभिरंतर्विषादमायामि ।
पत्राडितापि बाले रुष्यति[2] किमितीह मानुषी जननी ॥ ९ ॥
अयि वद राघव तथ्यं कोपो ऽयं केन मदपराधेन ।
शपथस्ते दाशरथे दशरथपदयोर्यदन्यथा[3] ब्रूषे ॥ १० ॥

It ends:

आकर्णाकृष्टचापं वर्षंतं बाणवृष्टिमुग्रापं ।
वंदे योगिदुरापं कंचन हुंकारसुंदरं कोपं ॥ १०६ ॥
खंडितहरकोदंडा ब्रह्मांडकरंडमंडनीभूता ।
वैदेहीगलमाला विलसति लीलाविलासवती ॥ १०७ ॥

---

[1] ०सख्येनान्यस्य कस्य जीवामि। जीवामि न भव० Rāj. M.

[2] तत्राडितापि बालेस्तुष्यति next MS.

[3] दाशरथेरथ रथपदक्षोर्यदन्यथा next MS.



DR.RUPNATHJI( DR.RUPAKNATH )

धनुषा रिपुञ्जयतनुषा[1] रुचिरतराकारनिर्जितांबुधरा ।
तरुणारुणनिभचरणा काचन करुणा रुणद्धि मे हृदयं [॥ १०८ ॥
इत्यार्याः समाप्ताः ॥
महामुद्गलभक्तेन रचितार्यानिबंधनं ।
भक्तिप्रेरितचित्तेन विवृतं बुद्धिशुद्धये ॥ १ ॥
भक्तवाग्जातिसुमनान्यादाय कुशलानि मे ।
चिदानंदेन तान्यर्थैरर्पितानि रघूत्तमे ॥ २ ॥
यः पूज्यः सकलामरैः सविधिभिर्ध्यायंति यं योगिनो
येनेदं परिपालितं जगदिदं यस्मै हविर्दीयते ।
यस्मात्स्थाणु चरिष्णु विश्वमभवद्यस्य प्रमातांशको(प्रभा॰)
यस्मिन्सर्वमिदं प्रयाति विलयं तं रामचंद्रं भजे ॥ ३ ॥

The leaves are marked रामार्या॰.

[Dr. John Taylor.]

## 3937.

**2538b.** Foll. 16; size 9½ in. by 4½ in.; good, clear Devanāgarī writing of 1619 A.D.; nine lines in a page.

*Āryāvijñapti*, a hymn to *Rāma* in 209 verses in the *āryā* metre, by *Rāmacandra*, son of *Viśvanātha Sūri*.

It begins, as above: त्वयि विमुखे॰, the first 61 verses being the same, after which it is entirely different.

It ends:

आर्याशतद्वयीयं भक्तिविरक्तिप्रबोधमयी ।
विषयासक्तिविमुक्तैः शक्या मुक्तं जगत्त्रतुं ॥ २०७ ॥
आर्या[: श्री]विश्वनाथस्य नंदनो रघुनंदने ।
रामचंद्रो दधत्प्रेम सांद्रं निर्मितवानिमाः ॥ २०८ ॥
चैत्रे मासे रघुवरपरो रामचंद्रे हि भक्तिं
प्रेमावासो दधदपि मतिं साधुभक्त्यातिगुह्या ।
कष्टेनैयं त्वकृपत इदं काव्यमार्यायुतं हि
भुग्नग्रीवाकटितटभुव(॰वं) वैश्वनाथं न विद्मं ॥ २०९ ॥

इति श्रीविश्वनाथसूरिवरतनयेन रामचंद्रेण विरचितेयमार्याविज्ञप्तिः ॥ संवत् १६७६ वर्षे वैशाखवदि ८ सोमे लिपिकपाठयो ॥

Burnell, Tanjore MSS., p. 163*b*, ascribes the poem to *Viśvanāthasūri*. [Gaikawar.]

[1] Thus both MSS.; ॰जनुषा Rāj. M.

## 3938.

**2346a.** Foll. 15; size 6¼ in. by 9½ in.; modern Devanāgarī writing; twenty lines in a page.

*Sūryaśataka*, a hymn to the Sun, by *Mayūra Bhaṭṭa*.

Printed in Hæberlin's Anthology, pp. 197–216; *Jīvānanda's Kāvyasaṃgraha*, the *Kāvyamālā* (1889), etc. Cf. Cat. Bodl., no. 819.

[Gaikawar.]

## 3939.

**281c.** Foll. 11; size 10¼ in. by 2¾ in.; fair, modern Devanāgarī writing; 8–10 lines in a page.

The same work. [H. T. Colebrooke.]

## 3940.

**1120d.** Foll. 9; size 12 in. by 4½ in.; fair, modern Devanāgarī writing; ten lines in a page.

*Sūryaśataka.* Not very correct.

[H. T. Colebrooke.]

## 3941.

**2095.** Foll. 30 (numbered 28; nos. 2 and 7 being double); European fashion; size 5¼ in. by 9¾ in.; good, clear Devanāgarī writing of 1681 A.D.; 21 lines in a page.

*Sūryastuti*, or *Sūryastotra*, by *Sāmba* (generally spelled *Śāmba*); with a commentary, composed by the same author.

It begins: यस्मात्सर्वः प्रसरतितरां ज्ञातृकर्तृस्वभावो॰ cf. Cat. Bodl., no. 248.

Colophon: संवत् १७३८ फाल्गुनशुदि ८ रवौ अद्येह राजनगरवास्तव्य-आभ्यंतरनागरज्ञातीय-पंचोलीत्यात्याभाइसुत-नरसिंहेन श्रीशांबकृता सभाष्या स्तुतिर्लिखिता ॥

[Gaikawar.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3942.

**2538 c.** Foll. 6; size 10¼ in. by 4¼ in.; good Devanāgarī writing of 1781 A.D.; ten lines in a page.

*Mṛigāṅkaśata*, a hymn to the Moon, in 100 verses, by *Kavikaṅkaṇa*.

It begins:

जेतुं त्रिभुवनमखिलं स्फटिकगणेशं तु शारकरविंबं(? सा°)।
विल्वदलैरर्चितवांस्तदिह कलंकं विशंकंते ॥ १ ॥
शशिनि सुधामयसिंधौ स्वपिति हरिः किल कलंककपटेन।
अविरतमेव यदेतज्जनयो मदनः पुरः सरति ॥ २ ॥
रजनीशरजतभाजनमरकतमृत्युंजयः कलंकमिषात् ।
नभसि नवांभसि निहितः किमु जीवयितुं पतिरत्या(? परि-
[गच्छति) ॥ ३ ॥

It ends:

विधुदधितंडुलपिंडं लांछनबदरीदलं विधिर्वहति ।
अहह चिरादिह सूते कमपि कुमारं स्मरं रजनी ॥ १०० ॥
इति कविकंकणभणितं शतकं तनुतां मृगांकस्य ।
विदुषो रुचिमचिरादिव ककुभामुदयो मृगांकस्य ॥ १०१ ॥

इति कविकंकणभणितं मृगांकशतं समाप्तं ॥ ° पंज्राजजोश्रो च दामोदरजीवत्सुत्रदुर्लभरामज्योपठनार्थं लि° मथुरानाथसंवत् १८३८॥

[GAIKAWAR.]

## 3943.

**586 d.** Foll. 70 (two of which, 12 and 39, are wanting) and a second fol. 20; size 11 in. by 4½ in.; good Devanāgarī writing of 1645 A.D.; ten lines in a page.

*Stavamālā*, a collection of *Vaishṇava* songs and poems in honour of *Kṛishṇa-Caitanya* and *Rādhā*; composed by *Rūpa Gosvāmin*, and collected by *Jīva*.

It begins:

श्रीमदीश्वररूपेण रसामृतकृता कृता ।
स्तवमालानुजीवेन जीवेन समगृह्यत ॥
पूर्वं चैतन्यदेवस्य कृष्णदेवस्य तत्परं ।
श्रीराधायास्ततः कृष्णराधयोर्लिख्यते स्तवः ॥
विरुदाली ततो नानाछंदोभिः केलिसंहतिः ।
ततश्चित्रकवित्वानि ततो गीतावली ततः ॥
ललितायमुनावृष्णिपुरीश्रीहरिभूभृतां ।
वृंदाटवीकृष्णनाम्नोः क्रमेण स्तवपद्धतिः ॥

तत्र श्रीचैतन्यदेवस्य ॥

सदोपास्यः श्रीमान् धृतमनुजकायैः प्रणयितां
वहद्भिर्गीर्वाणैर्गिरिशपरमेष्ठिप्रभृतिभिः ।
स्वभक्तेभ्यः शुद्धां निजभजनमुद्रामुपदिशन्
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदं ॥ १ ॥
सुरेशानां दुर्गं गतिरतिशयेनोपनिषदां
मुनीनां सर्वस्वं प्रणतपटलीनां मधुरिमा ।
विनिर्यासः प्रेम्णो निखिलपशुपालीयुजदृशां
स चैतन्यः किं मे° ॥ २ ॥
स्वरूपं बिभ्राणो जगदतुलमद्वैतदयितः
प्रपन्नश्रीवासो जनितपरमानंदगरिमा ।
हरिर्दीनोद्धारी गजपतिकृपोत्सेकतरलः
स चैतन्यः किं मे° ॥ ३ ॥

*iti śrī-caitanyadevastotrāṇi*, fol. 3a; *śrīmahānandākhyaṃ stotram*, fol. 3b; *līlāmṛitaṃ nāma kṛishṇasya nāmadaśakam*, fol. 4a; *śrīpremendusāgarākhya-śrīkṛishṇa-nāmāshṭottaraśatam*, fol. 6a; *śrīkeśavāshṭakam*, fol. 6b; *kuñjavihāryashṭakam*, fol. 7a; *śrīmukundāshṭakam*, fol. 7b; *kuñjavihāryashṭakam*, fol. 8a; *vrajanavayuvarājāshṭakam*, fol. 9a; *praṇāmapraṇayanastavaḥ*, fol. 9b; *harikusumastavaka*, fol. 10a; *iti mukundamuktāvalī*, fol. 12a; *premasudhāsatrākhyaṃ śrīvṛindāvaneśvarīnāmāshṭottaraśatam*, fol. 15a; *śrīrādhāshṭakam*, fol. 15b; *prārthanāpaddhati*, fol. 16a; *cāṭupushpāñjali*, fol. 17a; *śrīgāndharvāsamprārthanāshṭakam*, fol. 18b; *vrajanavīnadvandvāshṭakam*, fol. 19b; *śrīkārpaṇyapañjikā*, fol. 20b; *ity utkalikāvallarī*, with the date Śaka 1471 (A.D. 1549):

चंद्राश्वभुवने शाके पौषे गोकुलवासिना ।
इयमुत्कलिका पूर्वा वल्लरी निर्मिता मया ॥

*govindavirudāvalī*, foll. 27a–38b; *atha yamalārjunabhañjanam*, fol. 39a; *vṛindāvane vatsacāraṇādi*, fol. 40b; *vatsaharaṇādicaritam*, fol. 41a;



DR.RUPNATHJI( DR.RUPAK NATH )

*tālavanacaritam*, fol. 42*a*; *kāliyadamanam*, fol. 42*b*; *bhāṇḍīrakrīḍanādi*, fol. 43*b*; *varshāśaradvihāracaritam*, fol. 44*a*; *vastraharaṇam*, fol. 44*b*; *yajñapatnīprasāda*, fol. 45*b*; *govardhanadharaṇam*, fol. 46*a*; *nandāharaṇam*, fol. 47*a*; *rāsakrīḍā*, fol. 47*b*; *sudarśanādimocanam*, fol. 49*a*; *gopikāgītam*, ib.; *arishṭavadhādikam*, fol. 49*b*; *raṅgasthalakrīḍā*, fol. 50*b*; *iti kaṃsavadhāntā śrīkrishṇalīlā*, fol. 51*b*; *iti govardhanoddharaṇam*, fol. 53*b*; *rāsakrīḍā*, fol. 55*b*; *iti vilāsamañjarī*, fol. 57*a*; *iti gītāvalī*, fol. 66*a*; *śrīyamunāshṭakam*, fol. 66*b*; *mattamayūrākhyaṃ śrīgovardhanastotram*, fol. 67*b*; *girīndravāsanandanandanāma śrīgovardhanāshṭakam*, fol. 68*b*; *śrīvṛindāvanāshṭakam*, fol. 69*a*; *śrīkrishṇanāmastotram*, fol. 70*a*.

It ends: इति ललिताष्टकं ॥ संवत् १७०२ चैत्रकृष्णपंचम्यां शुभदिने ऽलेपि। श्रीवृंदावने श्रीश्रीगोविंददेवकेखरासे आगे लिखि पूर्णकीयो ॥ ० इह पोथि श्रीरसिकानंद गोसाईजूकी ॥ लेखक सेवक जगजीवनदास ॥

[H. T. Colebrooke.]

## 3944.

**1384c.** Foll. 78; size 13¼ in. by 5 in.; good, modern Bengālī handwriting; six lines in a page.

*Stavamālā.*

At the end, the collection here is somewhat shorter, ending as it does (on fol. 77*a*) with the *mattamayūrākhya-śrīgovardhana(-stotram)*, after which the colophon: इति श्रीमद्रूपगोस्वामिकृता स्तवमाला संपूर्णा ॥

Then follow six stilted verses (श्रीमच्चिन्तामणिमणिगणश्रेष्ठ ०), in which a scribe (*Ayodhyārāma*) states that he copied the work for king *Kīrtipūrṇa* in Śaka 1662 (*netra-shaṭ-shoḍaśair gaṇite śāke*). This date (1740 A.D.) must, however, belong to a former MS., the present one having been written some 50 years later.

[H. T. Colebrooke.]

## 3945.

**2929.** Foll. 4; size 12 in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

*Yamunāshṭaka*, a rhymed hymn to the *Yamunā*, in eight stanzas, extracted from the preceding collection (fol. 66*b*).

It begins: श्रीयमुनायै नमः ॥

भ्रातुरंतकश्य(० स्य) पत्तने विपत्तिहारिणी
प्रेक्षयातिपापिनो ऽपि पापसिंधुतारिणी ।
नीरमाधुरीभिरप्यशेषचित्तबंधिनी
मां पुनातु सर्वदारविंदबंधुनंदिनी ॥ १ ॥
हारिवारिधारयाभिमंडितोरुखांडवा
पुंडरीकमंडलोद्यदंडजालितांडवा ।
स्नानकामपामरोग्रपापसंपदंधिनी (*r.* ० संप्रदग्धिनी)
मां पुनातु सर्वदारविंदबंधुनंदिनी (A, B) ॥ २ ॥

It ends:

चिद्विलासवारिपूरभूर्भुवस्स्वरापिनी
कीर्तितापदुर्मदोरुपापमर्मतापिनी ।
बल्लवेंद्रनंदनांगरागभंगगंधिनी
मां पुनातु सर्वदारविंदबंधुनंदिनी ॥ ८ ॥
तुष्टबुद्धिरष्टकेन निर्मलोर्मिचेष्टितां
त्वामनेन भानुपुत्रि सर्वदेववेष्टितां ।
यः स्तवीति वर्धयस्व सर्वपापमोचने
भक्तिपूरमस्य देवि पुंडरीकलोचने ॥ ९ ॥

इति श्रीयमुनाष्टकम् ॥

Cf. Rāj. Mitra, Notices, ix., p. 60, where the hymn is assigned to *Rūpa* in the colophon.

[? J. R. Ballantyne.]

## 3946.

**2663c.** Foll. 2; size 9 in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

*Abhimanyuvākya*, consisting of 23 verses, apparently a fragment of some poem.

It begins:

अस्ति वीरतनया वरवीरप्रेयसी च कुरुवीरसवित्री ।
विक्रमं युधि तथा विदधीया नो यथा भवति तात विकल्पः* ॥१॥

* This stanza has been identified by Prof. Aufrecht with *Bālabhārata*, *Bhīshmaparvan* I., vv. 17, 18 (Paṇḍit, v., p. 198).

DR.RUPNATHJI( DR.RUPAK NATH )

सूते दीनं ब्राह्मणी याचितारं गौर्वोढारं धावमानं तुरंगी ।
शूद्री दासं पाशुपालं च वैश्या वीरं सूते मद्विधा राजपुत्री ॥२॥
तन्निशम्य वचनं तनयः स्वां मातरं खलु जगाद स वीरः ।
त्वं मातिविधुरं विदधीथा मामकं युधि विलोकय शौर्यं ॥ ३ ॥
त्वं तीक्ष्णशरनुन्नविपक्षप्रेयसीनयनजाश्रुनदीस्ताः ।
सार्थकं च तव वीरसवित्रीशब्दमद्य भुवनेषु विधास्ये ॥ ४ ॥
उक्त्वा चैवं मातरं तां प्रणम्य प्रष्टुं प्रायो ह्युत्तरामार्जुनीयः ।
दृष्ट्वा तस्या रूपलावण्यशोभां चित्रन्यस्तोऽभूत्तदा सोऽभिमन्युः ॥५॥
अनंगकांतासदृशं तदीयं रूपं निरीक्ष्याथ बभाण बाला ।
कृष्णेन दुष्टेन ममांगदोषो महान्ममाग्रे कथितो ह्यलीकः ॥ ६ ॥ ०

It ends:

नार्यो नरेंद्रतनयस्य विलोकनार्थं
कुर्वंत्यनीहगमने ऽपि विलासलीलां ।
काचित्करेण दधती परिधानवस्त्रं
काचित्करादपि न मुंचति कंचुकं च ॥ २२ ॥
योषिन्निजोष्ठनखचुंबनदर्शनाय
आदर्शमेव दधती स्वकरेण चान्या ।
काप्यंगनार्धग्रथितां कबरीं करेण
पीनोन्नतस्तनतटांतरितां दधंती ॥ २३ ॥

इति श्रीअभिमन्युवाक्यं संपूर्णं ॥ ० इदं पुस्तकं नृसिंहभट्टस्य लिखितं ॥

[GAIKAWAR.]

## 3947.

**2593.** Foll. 21; size 11½ in. by 5 in.; fairly written in Devanāgarī, fol. 1 about A.D. 1650, the remainder about A.D. 1750; twelve lines in a page.

*Kavīndra-Kalpadruma*, a collection of *stotras* intended to serve as models of literary composition, by *Kavīndrācārya Sarasvatī*.

It begins:

गुरुं गंगां गणेशं च शिवौ विष्णुदिनेश्वरौ ।
प्रणम्य रम्यतासिंधुर्निबंधो ऽयं निबध्यते ॥ १ ॥
काशीवासी प्रकाशीकृतगुणनिचयः सर्वविद्याविलासी
दासीभूतः स्मरारेर्विषयसुखगुणे भूयुदासीनचेताः ।
गोदातीरे प्रमोदावलिवलिततमे जन्मभाक्पुण्यभूमाव्
ऋग्वेदी वेदवेदी जगति विजयते श्रीकवींद्रो द्विजेंद्रः[1] ॥२॥
अधीत्य वेदवेदांगकाव्यशास्त्राणि सर्वशः ।
ततः स्वीकृत्य मध्यामं ब्रह्माभ्यासं समाश्रितः ॥ ३ ॥
कराम्मोचितौ येन काशीप्रयागौ
महींद्रस्य स श्रीकवींद्रस्तनोति ।
जगत्यत्र कल्पद्रुमं भूसुराणाम्
अभीष्टार्थलाभाय सौभाग्यभाजां ॥ ४ ॥

तत्रादौ गणेशस्तोत्रं ॥

स्वचित्ते ऽपि धत्ते यदीयस्मृतिर्यम्(०स्मृतिं यम्)
तदैवातिविघ्नेशता तस्य पुंसः ।
प्रकामं प्रकामं द्रुतं या विधत्ते
प्रसन्नेभतुंडं समिद्यं(समीड्यं) तमीडे ॥ ५ ॥ ० ८ ॥

इति श्रीसर्वविद्यानिधानकवींद्राचार्यसरस्वतीविरचिते कवींद्रकल्पद्रुमे गणेशस्तोत्रं ॥ अथ गंगास्तोत्रं ॥ ० (66 stanzas), ends fol. 5*a*; यमुनास्तुतिः (1 st.), ib.; चितस्तास्तुतिः (1 st.), ib.; सूर्यस्तोत्रं (6 st.), fol. 5*b*; शिवस्तोत्रं (45 st.), fol. 8*a*; भवानीस्तवः (77 st.), fol. 12*a*; नृसिंहवर्णनं (1 st.), ib.; कृष्णवर्णनं (58 st.), fol. 14*b*; रामचंद्रवर्णनं (11 st.), fol. 15*a*; हनुमत्स्तोत्रं (7 st.), fol. 15*b*; प्रास्ताविकश्लोकदंडकप्रशस्त्यादि (9 st.), fol. 16*a*; शिवरामवर्णनं (2 st.), ib.; ब्रजेंद्रवर्णनं (5 st.), fol. 16*b*; then follow miscellaneous stanzas.

The MS. breaks off abruptly shortly after the commencement of the stanza रुचिरतरवचनरचनसमुच्चरण-

For the same work see Notices, x., p. 162.

[MACKENZIE COLLECTION.]

## 3948–3950.

**2164–2166.** Foll. 1168; size 12 in. by 8 in.; fair Devanāgarī writing of 1789 A.D.; ten lines in a page.

*Kathāsaritsāgara*, a collection of poetic tales in 18 *lambakas*, or 124 *taraṅgas*, composed by *Somadeva*, son of *Rāma*—between 1063 and 1082 A.D., according to Bühler, Ueber das Zeitalter des Kaśmīrischen Dichters Somadeva, p. 16—for the amusement of *Sūryavatī*, the wife of *Ananta*, and grandmother of king *Harshadeva* of Kaśmīr.

[1] यतीन्द्रः Notices.

DR.RUPNATHJI( DR.RUPAK NATH )

The collection (like *Kshemendra's Bṛihatkathāmañjarī*) is based on an older work, written in a popular dialect, the *Bṛihatkathā* of *Guṇāḍhya*.

Editions of the work have been published by H. Brockhaus (books 1–5, in Devanāgarī, with a German translation, chiefly based on the present MS., Leipzig 1839; books 6–18, only in the Roman character, 1862–66); at Calcutta 1883, and Bombay (by *Durgāprasāda* and *Paraba*) 1889. An excellent English translation has been published by C. H. Tawney (Bibl. Ind., 1880–84).

The three volumes are paged continuously (foll. 1–392, 393–792, 793–1168 resp.); the leaves wanting after fol. 60 having been inserted by mistake between foll. 90 and 91.

The colophons of the 18 *lambakas* occur in the following places: I., fol. 45*a*; II., fol. 88*a*; III., fol. 147*b*; IV., fol. 174*a*; V., fol. 216*b*; VI., fol. 295*b*; VII., fol. 383*b*; VIII., fol. 474*b*; IX., fol. 579*a*; X., fol. 709*b*; XI., fol. 717*a*; XII., fol. 1005*b*; XIII., fol. 1018*b*; XIV., fol. 1055*a*; XV., fol. 1073*a*; XVI., fol. 1095*a*; XVII., fol. 1152*a*; XVIII., fol. 1168*b*.

The MS. ends with the first verse (see next MS.) of the genealogical account of the royal house, followed by the date: संवत् १८४६ ॥ विक्रमादित्यराजा ॥ माघकृष्णात्रयोदश्यां इदं पुस्तकं ज्यानसन् (*i.e.* Johnson) साहिबार्थें लिखितम् ॥

[R. JOHNSON.]

## 3951–3953.

**3001–3003.** Foll. 681; size 14¼ in. by 6½ in.; fair Devanāgarī writing of 1762 A.D.; nine lines in a page.

The same work.

Vols. I. and II. have a combined pagination of 408 leaves; whilst vol. III. counts 271 leaves. Fol. 252 of vol. II. and fol. 122 of vol. III. being double, make the sum total 681.

The distribution over the three volumes is as follows:—

Vol. I. contains *lamb.* I. (fol. 30*a*), II. (fol. 59*b*), III. (fol. 103*a*), dated saṃvat 1819, IV. (fol. 124*a*), V. (fol. 155*a*).

Vol. II. contains *lamb.* VI. (fol. 207*a*), VII. (fol. 273*a*), VIII. (fol. 335*a*), IX. (fol. 408*b*).

Vol. III. begins with *taraṅga* 8 of *lamb.* XII., and completes this section on fol. 124*b*. Tho other *lambakas* end at the following places: XIII., fol. 133*a*; XIV., fol. 158*a*; XV., fol. 170*a*; XVI., fol. 184*b*; XVII., fol. 223*b*; XVIII., fol. 271*a*.

Thus the MS. wants *lambakas* X. and XI., and *tar.* 1–7 of *lamb.* XII.

This MS. has at the end the complete genealogical account of 13 verses: श्रीसातवाहनकुलांबुधिपारिजातः संग्रामराज इति भूमिपतिर्बभूव । ०

[DR. JOHN TAYLOR.]

## 3954, 3955.

**419, 1102.** Foll. 325 & 269; size 12¼ in. by 4½ in.; modern Devanāgarī writing; 10 and 11 lines in a page.

*Kathāsaritsāgara*; carelessly written, and bound up out of order.

*Lambaka* I. and the *Vetālapañcaviṃśati* (XII., 8–32) are left out. The rest is distributed in the following order:

Vol. I. contains *lamb.* II. and III. in 73 foll.; IV., 17 foll.; IX., 76 foll.; XIII.–XVIII., in 109 leaves, ending respectively on foll. 7*b*, 25*b*, 34*b*, 47*a*, 75*b*, 109*b*; X., in 50 foll.

Vol. II. contains *lamb.* V. in 27 foll.; VI., 50 foll.; VIII., in 26 and 24 foll., paged separately; VII., 61 foll.; XI., 5 foll.; XII., in 47 and 29 foll., paged separately.

In this MS. also *lambaka* XVIII. ends with the genealogical epilogue.

[H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 3956–3958.

**1880–1882.** Foll. 272, 267, & 258; size 12 in. by 8 in.; good, modern Devanāgarī writing; 13–16 lines in a page.

The same work.

Vol. I. contains *lambakas* I.–VI.; vol. II. continues the text as far as XII. 6; and vol. III. completes it. The pagination is irregular, owing to the MS. being written by different hands, and each having numbered the leaves independently of the others.

This MS. ends likewise with the genealogical account, here beginning: संग्रामलब्धयशशिशुभ्रयशोवितानः संग्रामराज इति °. The second half of v. 8, which, in the other two MSS. giving the epilogue, shows the same two lacunae* as the Bombay edition, is here altogether omitted.

[DR. JOHN TAYLOR.]

## 3959.

**2552.** Foll. 121; size 14 in. by 8 in.; modern Devanāgarī writing; fifteen lines in a page.

A fragment of Somadeva's *Kathāsaritsāgara*, breaking off after *lamb.* VI. 4.

[MACKENZIE COLLECTION.]

---

* The edition makes the second *ardharca* of verse 8 to read thus:

विश्वंभरा .... .... .... न च नापि भृ ....
विश्वं सदा भगवती किल या बिभर्ति ॥

Our two MSS. (3003 and 419) read the portion between the two lacunae thus: रचनापितृ, marking 2 *aksharas* as omitted in the first, and 3 *aksharas* in the second lacuna. This cannot be right, since the metre requires that the number of *aksharas* omitted must be either 1 (◡) and 4 (–◡–◡), or 4 (◡◡◡–) and 1 (◡) respectively. In the former case the last syllable between the two lacunae (भृ or तृ) must be metrically short, in the latter long. In other respects MS. 419 usually has the readings of the edition, whilst the other MSS. have numerous various readings.

## 3960.

**1957.** Foll. 77; size 9¾ in. by 5¼ in.; fair, modern Devanāgarī writing; 11–13 lines in a page.

*Vikramodaya*, a series of tales regarding *Vikramāditya*, incomplete at the beginning and end. The MS. begins with the 7th *sarga*, and ends in the 28th *sarga*, which treats of the legendary birth and life of *Śālivāhana*.

The MS., which is rather incorrect, begins:

रहसि प्रणतां वेश्यां शुकः संबोध्य नामतः ।
अयि वेश्येऽतितुष्टास्मि(!) तवोपरि न संशयः ॥ १ ॥
यस्मतो वृणीष्व त्वमित्युक्ता साब्रवीद्दृशः ।
धनं सुविपुलं देहि जरामपनयस्व मे ॥ २ ॥ ° १६ ॥

इति विक्रमोदये शुकचरित्रे वेश्याप्रक्रियाकथनो नाम सप्तमसर्गः ॥

The 8th *sarga* begins (fol. 2*b*):

विक्रमस्य तु सखा(!) वंदी[1] सोमदत्त इति श्रुतः ।
अन्वेषयंस्तु राजानं देशाद्देशांतरं गतः ॥ १ ॥
शुकरूपधरो राजा यत्र वृक्षे निषण्णवान् ।
तद्वृक्षस्य तले वंदी सो ऽपि दैवान्निषेदिवान् ॥ २ ॥
श्रांतस्तस्मिन्विशश्राम पीत्वा तोयं सुशीतलं ।
अयि क्वासि नृपेंद्र त्वं विक्रमारिक्रमाक्रम ॥ ३ ॥
सीदंति सर्वदा राजन् त्वां विना निखिला प्रजाः ।
वंचितः कुब्जकेनासि दुर्मित्रेणातिपापिना ॥ ४ ॥
कदा जीवयसि प्रीत्या त्वदालोकसमुत्सुकाः !
अहं तु त्वामचक्षाणो न यास्यामि गृहं निजं ॥ ५ ॥
सहिष्ये शीतवातादि गमिष्याम्यथवा वनं ।
एवं लालप्यमानं तं शुको वीक्ष्य दयान्वितः ॥ ६ ॥
आगत्य वंदिनो हस्ते निपसादाविशंकितः ।
वत्स श्रांतो ऽसि नितरां सोमदत्त तवाधुना(!) ॥ ७ ॥
वंचितः कुब्जकेनाहं नातितेनातिपापिना(!) ।
तदारभ्य प्रविष्टो ऽस्मि शुकदेहे वरन्वने ॥ ८ ॥
इत्यादि सर्वमाख्याय पृष्टवांस्तं किमद्भुतं ।
भुवां पर्यटता दृष्टं तन्ममाचक्ष्व सौहृदात् ॥ ९ ॥

---

[1] The MS. spells the word throughout with च.

DR.RUPNATHJI( DR.RUPAK NATH )

ततो दृष्टेनादृष्टः स विक्रमस्तेन वंदिना ।
पाणिना शुकमामृज्य प्राह दृष्टं यदद्भुतं ॥ १० ॥

कस्मिंश्चिन्नगरे दृष्टं तपस्यना(? तपस्यन्न)द्भुतं तपः ।
योषिद्रत्नस्य लाभार्थं धूम्रपानं करोति सः ॥ ११ ॥

अत्यद्भुतमिति प्राहुर्लोका रत्नं हि योषितां ।
विले तिष्ठति सा नारी नारीणामपि मोहिनी ॥ १२ ॥

तद्रूपरचनां दृष्ट्वा सुरूपा अपु(!) योषितः ।
तद्भावं मनसा प्राप्य नरा मुह्यंति किंवद(!) ॥ १३ ॥

इति वंदिवचः श्रुत्वा तत्स्थानं मम दर्शय ।
इत्युक्तः स शुकेनाथ वंदी गंतुं प्रचक्रमे ॥ १४ ॥

वंदिनः शिरसि स्थित्वा शुको मार्गमचिक्रमत् ।
देशाद्देशांतरं गच्छन्विलद्वारमवाप्नवान् ॥ १५ ॥

तत्र गत्वा सोमदत्तं राजाह शुकरूपधृक् ।
कन्याया वरणे कीरदेहो नैवोपयुज्यते ॥ १६ ॥

अतस्त्वदीयं देहि मे दत्त्वा शुकवपुर्विश ।
ततः शंकितचित्तस्तं वंदी नेत्यवदच्छुकं ॥ १७ ॥

शुकस्तं वहुसांत्वेन वाचा सूनृतयाभ्यधात् ।
ततः सांत्वेन राज्ञः स वंदी सुष्ठुमना ह्यभूत् ॥ १८ ॥

तथेत्युक्तो ऽथ तेनासौ शुकस्तं सोमदत्तकं ।
परकायप्रवेशस्य विद्यामुपदिदेश ह ॥ १९ ॥

ततो वंदिशरीरे स प्राविशद्विक्रमो नृपः ।
शुकदेहे तथा वंदी विवेशाथ विलं नृपः(? ततः) ॥ २० ॥

विले प्रविष्टमात्रं तं दृष्ट्वा दास्यो ऽतिभूषिताः ।
प्राहुस्तप्तकटाहे ऽस्मिन्प्रविश्य वहिराव्रजेत् ॥ २१ ॥

भापयेच्च चतुर्वारमिमां योषिद्वरां तु यः ।
तमेवैषा हि वृणुयादन्यथैषा न लभ्यते ॥ २२ ॥

ततो राजास्मरच्छीघ्रं वेतालं तं च दृष्टवान् ।
तदाज्ञयाविशत्तप्तं कटाहं तैलपूरितं ॥ २३ ॥

वेतालस्य प्रसादेन तत्तैलं शैत्यमापतत् ।
राजाविशत्कटाहं तं सुसंस्थो वहिरागमत् ॥ २४ ॥

तदद्भुतमवेक्ष्याथ विदित्वा तं नरोत्तमं ।
आतिथ्येनार्हयामासुः शयनं स समाविशत् ॥ २५ ॥

प्रदीपदीपावलिराजिराजिते
प्रपुष्पपुष्पावलिलंबिदामके ।
सुधूपधूपावलिकर्बुरे वरे
सुधासु[धा]म्नि प्ररुरोह विक्रमः ॥

इति श्रीविक्रमोदये बिलप्रवेशो नामाष्टमसर्गः ॥

9. *sārikoktakathāvarṇanam*, fol. 5*a*; 10. *śukokta-śivadāsaharidāsakathanam*, fol. 13*a*; 11. *sumantumālatīkathā*, fol. 16*a*; 12. *cārucārvaṅgīkathā*, fol. 22*a*; 13. *gopīcandaśukamelanam*, fol. 24*b*; 14. *sapatnīvivādakhaṇḍanam*, fol. 25*b*; 15. *śrīkanyāvadhanyāyakhaṇḍanam*, fol. 27*b*; 16. *ratnanyāyaviveka*, fol. 29*a*; 17. *mādhavāpamānakaraṇam*, fol. 31*a*; 18. *śrīmaheśadambhākhyānam*, fol. 32*b*; 19. *śivaśaṅkarayoḥ sanmārgasthāpanam*, fol. 35*a*; 20. *buddhyādipratipādaketihāsakathanam*, fol. 42*b*; 21. *damanākhyānam*, fol. 47*b*; 22. (?); 23. *gaurījitisamāgama*, fol. 60*a*; 24. *śukathākhyānam*, fol. 64*a*; 25. *mokshopāyakathanam*, fol. 68*a*; 26. *prakīrṇanirūpa*, fol. 70*b*; 27. *Vikramodaye Vikramacaritravarṇanam*, fol. 73*a*; 28 begins:

प्रतिष्ठाने ऽभवत्कश्चिद्ब्राह्मणस्तस्य कन्यका ।
गंगायां नागतीर्थे ऽगात्स्नातुं तावत्तु कन्यकां ॥
तीरस्थामहरन्नागः स्वबिलं तामुपानयत् ।
त्रिदिनं स्थापयित्वात्र तया सुरतमाचरन् ॥ °

It terminates abruptly at the point when *Śālivāhana*, having made himself an army of clay soldiers and breathed life into them, scours the country:

अस्याभ्यक्षादिनं बाणैर्विक्षतांगं तु विक्रमं ।
यावन्नर्मदयाधावत्शालिवाहो महाबलः ॥ प्रविष्ट ॥

There are blank spaces here and there.

[Dr. John Taylor.]

## 3961.

**2799 c.** Foll. 110; size 9½ in. by 4 in.; clear Devanāgarī writing of the latter part of the 17th century (foll. 8 and 9 by a different hand from the rest); 11–14 lines in a page.

*Vīracarita*, an heroic poem in 30 *adhyāyas*, composed, in *anushṭubh ślokas* interspersed with other metres, by *Ananta*.

The poem narrates the events which are supposed to have taken place at Pratishṭhāna-

DR.RUPNATHJI( DR.RUPAK NATH )

pura (Paithan) on the Godāvarī, in connection with *Śālivāhana* (*Śālavāhana*), the conqueror of *Vikramāditya* of Ujjayinī, and his son *Śaktikumāra;* the leading features of the narrative being the heroic achievements of *Śūdrika* (*Śūdraka*), the friend and afterwards co-regent of *Śālivāhana*, and subsequently of his son who, however, becomes jealous of him and tries to disembarrass himself of his influence, but is apparently in the end himself overthrown and dethroned by him; the MS. terminating abruptly (at *adhy*. 30, v. 127) shortly before the final contest between the two armies.

An elaborate German analysis of the work, of which no other MS. is hitherto known, has been published by Dr. H. Jacobi, in Weber's Indische Studien, vol. xiv., pp. 97–160.

The first leaf is badly injured, whilst the second is half torn away.

It begins:

ऋषयो नैमिषारण्ये दीर्घसत्त्रेण द[ीक्षिताः ।
पप्रच्छुः] सूतमासीनं सत्कृतं विनयानताः ॥
त्वत्तः सूत श्रुतं सर्वं कलेर्वृत्तमतः परं ।
भविष्यद्भूपच[रितमुत्कृष्टं] नः प्रकीर्तय ॥ ०

Dr. Jacobi's analysis also includes the text of the 8th *adhyāya*.

The last two leaves have been wrongly inserted between foll. 3 and 4.

[COLL. OF FORT WILLIAM.]

3962.

**1744.** Foll. 44; size $7\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; good, though somewhat quaint Devanāgarī writing of about 1750 A.D.; fifteen lines in a page.

*Bhāratīcamatkāra* (*Prākṛitasaṃskṛitakāvyam*), a series of 18 acrostic poems, by *Ghanaśyāma*, surnamed *Vaśyavacas Sarvajña Sarasvatī*.

I. begins:

हेरंबो मे वितरतु ज्ञानलक्ष्मीकुलोन्नतिं ।
कर्णतालानिला यस्य विघ्नतूलाचलीहराः ॥ १ ॥
वाणी नृत्यतु डिंभस्य मुखनाट्यगृहे मम ।
विद्यातटाकलीलायां वीणा यस्याः प्रचायते ॥ २ ॥
सुखं कृतार्थयति भूलोकं काशीति कापि पूः ।
अविमुक्ताभिधा प्राप्ता त्रयीव परमार्थतां ॥ ३ ॥
देहिनो यत्र तिष्ठंतो भक्तिभिर्लंघयंति नो ।
अधरां भोगिनगरीमुद्धामामरावतीं ॥ ४ ॥
वरायाश्चिंतने यस्याः स्वयं भवति चिंतनं ।
रामेश्वरस्यापि सदा साधुचिंता हि वृद्धिदा ॥ ५ ॥
महातिशयिना यस्याः पारम्येण विलज्जिता ।
पुरी कृष्णस्य संतत्या किं निमग्नाधिसागरं ॥ ६ ॥
हिरण्यगर्भं निंदंती यस्याः सौंदर्यकल्पकं ।
विरक्ता विजनानाम श्रितायोध्या तपस्विनी ॥ ७ ॥
तारवेदध्वनिर्लंका(? ० वेध ०) विभीषणतपोऽर्चिता ।
याति यस्या न सामीप्यं कुत्र कामोचितं फलं ॥ ८ ॥
रजः सरस्वती सत्त्वं जह्नुजा यमुना तमः ।
हरीशयोर्यत्र पादावर्धनारीशभूपदौ(!) ॥ ९ ॥
माया नानार्थविस्तारवासनाबलमेदुरा ।
यस्याः सीमप्रपन्नानां पुरीरूपं प्रपद्यते ॥ १० ॥
विशालाक्षीसखकृपाकांक्षी यस्यां यमः स्वयं ।
कुशलं जन्मिसामान्यं नित्यं साधुवं(? विं)पृच्छति ॥ ११ ॥
तरुकीटद्विजातीनामवसानेषु तारकं ।
समो विषमनेत्रो ऽपि यत्रोपदिशति प्रभुः ॥ १२ ॥
रथभूस्पर्शविरहौ(?) मूलं यस्या विवेचने ।
देवानां भूमिदेवानां मिलितानां च कोटिशः ॥ १३ ॥
मेधावी ननमेतस्मिन् क्षेत्रे निधनमस्तु ते ।
इति यत्राशिषं शंभुदुर्लभां(? शंभुर्दु ०) वक्ति शोभने ॥ १४ ॥
त्रिलासिनीव या भाति कैलासाद्रिपतिस्तनी ।
रवींद्रनयना सिंधुकेशी शिवमनोहरा ॥ १५ ॥
भोगिनीवोल्लसति या वेदाग्निः शास्त्रवालधिः ।
चतुर्वर्गस्तनी सत्यज्ञानशृंगा मखानना ॥ १६ ॥ ० ३२ ॥

The initial syllables of the *ślokas* of this poem make up the verse:

हे वासुदेव महिता रमा वितर मे विभा ।
विहारपरमोदार गोप चारुदरीपते ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तन्महः परमानंदं वंदे निर्विघ्नकारणं ॥१॥

अथास्य प्रबोधचंद्रोदयाभिधेयनाटकस्य प्रवृत्तिप्रयोजनमभिधीयते ब्रह्माज्ञानजनितानादिसंसारसागरनिमग्नानामुन्नितोर्पूणामुपनिबन्धनाटकादिकथास्वादमनसां संसारिणां परमकारुणिकः श्रीकृष्णमिश्रः संसारसमुच्छेदाय नाटकव्याजेन संसारादिरसैरुपसिच्य वेदांतसिद्धांतमंतःकरणेषु दृढयन् नाटकमारब्धवान् । तत्र च यद्यपि तद्विवरणोपायाः पूर्वसूरिनिरूपिता बहव उपलभ्यंते तथाप्यनभ्यस्तकाव्यव्याकरणानामनधीतशास्त्राणामेतद्बोधविरहव्याकुलितचेतसां सचेतसां प्रयोजनायालमिति चिच्चंद्रिकाविवरणं संक्षिपन्नतिसुबोधमारब्धुमुपकल्पतेऽतिशयेन भवानीं भावयन् भवो (भावो or भट्टो) गणेशस्तत्र प्रारिप्सितप्रतिबंधकविघ्नविघातमुद्दिश्य कृतं मंगलं शिष्यशिक्षार्थं ग्रंथादावुपनिबध्नाति । मध्माह्वेति । वयमित्यध्याहारः । महत्तेजः प्रकाशरूपमिति यावत् ०

The colophon of the 3rd act occurs on fol. 59*b* : इति श्रीभावा(!)विश्वनाथदीक्षितसूनुगणेशभट्टविरचितायां प्रबोधचंद्रोदयचिच्चंद्रिकायां तृतीयोंकः ॥

The pagination of the two portions of *Gaṇeśa's Ciccandrikā*, from fol. 57 onwards, has been altered so as to run on with the portions that were supplied.

Old number 196. MS. C of Brockhaus's edition.

For a MS. of the latter (and larger) portion of the *Ciccandrikā*, see Aufrecht, Cat. Bodl., no. 286. [H. T. Colebrooke.]

## 4144.

**1715 b.** Foll. 7; size 9¼ in. by 3¾ in.; legibly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

*Prabodhacandrodayanāṭaka-prākṛitavivṛiti*, a Sanskrit version of the *Prākṛit* passages of *Krishṇamiśra's* play, by *Govinda Jyotirvid*, son of *Nīlakaṇṭha Jyotirvid.*

It begins :

नीलकंठं नमस्कृत्य गोविन्दो दैववद्बुधः ।
प्रबोधप्राकृतानां हि संस्कृतानि वदाम्यहम् ॥ ०

Colophon: इति श्रीमन्नीलकंठज्योतिर्वित्सूनुगोविन्दज्योतिर्विद्विरचिता प्रबोधचंद्रोदयनाटकप्राकृतविवृतिः संपूर्णाभवत् ॥ श्रीगोविन्दज्योतिर्विदा देवोपाध्याय रामकृष्णाय दत्तं पुस्तकमेतत् ॥

Old number 774. Brockhaus's MS. D.

[H. T. Colebrooke.]

## 4145.

**320 b.** Foll. 44; size 11¾ in. by 3¾ in.; clear Devanāgarī writing of 1734 A.D.; eleven lines in a page.

*Mahānāṭaka*, ascribed to *Hanumat*, and hence also called *Hanumannāṭaka* or *Hanūmannāṭaka*. In the recension of *Miśra Dāmodara*.



DR.RUPNATHJI( DR.RUPAK NATH )

arranged in 14 acts. The work, which is entirely composed in Sanskrit, presents a dramatised narrative of the principal events of the *Rāmāyaṇa*.

It begins (cf. Aufrecht, Cat. Bodl., no. 291):

कल्याणानां निधानं कलिमलमथनं जीवनं सज्जनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रामस्थानमेकं कविवरवचसां पावनं पावनानां
वीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥१॥

पातु श्रीस्तनपत्रभंगिमकरीमुद्रांकितोरस्थलो देवः° ॥२॥
यं शैवाः समुपासते° ॥ ३ ॥
जानकी ॥ कमठपृष्ठकठोरमिदं धनुर्° ॥४॥
रामः ॥ आ द्वीपात्परतोऽप्यमी नृपतयः° ॥५॥

This text shows more verses than those commented upon, viz.: I., *śl.* 48; II., *śl.* 33; III., *śl.* 28; IV., *śl.* 19; V., *śl.* 75; VI., *śl.* 45; VII., *śl.* 19; VIII., *śl.* 55; IX., *śl.* 40; X., *śl.* 24; XI., *śl.* 42; XII., *śl.* 19; XIII., *śl.* 36; XIV., *śl.* 105.

Colophon: इति श्रीहनुमद्विरचिते महानाटके रामविजयो नाम चतुर्दशोंकः समाप्तश्चायं ग्रंथः ॥ श्रीशाके १६५६ संवत् १७९१ कार्त्तिकशुक्लसप्तम्यां सौरमानेन कार्त्तिके २१ गते भौमवारे जगन्मणिशर्मणेदं पुस्तकं लिखितं श्रीनगरशुभस्थाने स्वपाठाय ॥ [H. T. COLEBROOKE.]

## 4146.

**2184.** Foll. 98 (and a *śuddhapattra* to fol. 41*a*); size 11¼ in. by 5 in.; large, modern Devanāgarī writing; eight lines in a page.

*Mahānāṭaka,* in the same recension.

It begins: कल्याणानां° (as above) ॥ १ ॥ यं शैवाः समुपासते° ॥२॥ जयति रघुवंशतिलकः कौशल्याहृदयनंदनो रामः । दशवदननिधनकारी दाशरथिः पंडुरीकाक्षः ॥३ (Madhus. 3)॥ तन्नारदः कामचरः कदाचिद्वाग्मी दशग्रीवपुरो जगाद।°४॥ जनकः ॥ आ द्वीपात्°

I., *śl.* 54; II., *śl.* 30; III., *śl.* 23; IV., *śl.* 16; V., *śl.* 59; VI., *śl.* 48; VII., *śl.* 24; VIII., *śl.* 56; IX., *śl.* 40; X., *śl.* 24; XI., *śl.* 43; XII., *śl.* 19; XIII., *śl.* 38; XIV., *śl.* 96.

A loose leaf (10 in. by 4⅝ in.), written by a different hand, lying in the volume contains from within v. 52 to within v. 58 of the 14th act of the same work. [GAIKAWAR.]

## 4147.

**1830.** Foll. 63; size 12½ in. by 4¼ in.; clear, modern Devanāgarī writing (European paper); 9 or 10 lines in a page.

*Hanūmannāṭaka,* in *Miśra Dāmodara's* recension, but somewhat more expanded than in the preceding MSS.

It begins: जयति रघुवंशतिलकः° ॥१॥ कल्याणानां° ॥२॥ पातु श्रीकुचपत्र° ॥ ३ ॥ यं शैवाः° ॥४॥ आसीदुद्भटभूपतिभटप्रोन्माथिविक्रांतिको भूपः° ॥ ५ ॥ तेषामौचरतागुणैश्च जनुषा ज्यायानभूद्राघवो रामः° ॥ ६ ॥ सुंदरस्त्रीकदनप्रमोद° ॥७॥ पूर्णे यज्ञविधौ° ॥८॥ सीता ॥ इदमयुक्तकृतं भवता° ॥९॥ कमठपृष्ठ° ॥१०॥ अनेकशः संति समर्थमल्ला° ॥ ११ ॥ यदि भनक्ति धनू रघुनंदनादपरकोऽपि° ॥१२॥ अद्य पश्य सखि° ॥१३॥ अथ रामः । सीतासंशयमवधार्यात्मशक्तिं ज्ञापयितुं लक्ष्मणमनुवदति । आ द्वीपात्परतो° ॥ १४ ॥

I., *śl.* 68; II., *śl.* 30; III., *śl.* 26; IV. *śl.* 17; V., *śl.* 66; VI., *śl.* 54; VII., *śl.* 22; VIII., *śl.* 63; IX., *śl.* 42; X., *śl.* 24; XI., *śl.* 43; XII., *śl.* 19; XIII., *śl.* 41; XIV., *śl.* 96.

At the end, a leaf containing part of the colophon is wanting.

[DR. JOHN TAYLOR.]

## 4148.

**1982.** Foll. 37; size 8¾ in. by 4¼ in.; no date; 9 or 10 lines in a page.

*Mahānāṭaka,* in the same recension, from the beginning to v. 8 of the 8th act.

It begins in the same way as MS. 320*b*.

[DR. JOHN TAYLOR.]

DR. RUPNATHJI( DR. RUPAK NATH )

## 4149.

**1279.** Foll. 122; size 13¼ in. by 5½ in.; good Devanāgarī writing of about 1800 A.D.; 8–13 lines in a page.

*Mahānāṭaka*, likewise in *Miśra Dāmodara's* recension; accompanied with a commentary, called *Hanumannāṭaka-Dīpikā*, by *Miśra Mohanadāsa*, son of *Kamalāpati*, written above and below the text.

Text and commentary have been printed repeatedly at Bombay (1860, etc.) Cf. Aufrecht, Cat. Bodl., no. 291. [H. T. Colebrooke.]

## 4150.

**237.** Foll. 125; size 12¼ in. by 5¾ in.; fair, modern Bengālī handwriting; 8–15 lines in a page.

*Mahānāṭaka*, in *Madhusūdhana's* recension, in 9 acts, with *Candraśekhara Vidyālaṅkāra's* commentary (*ṭīkā*).

The commentary begins:

नत्वा रामपदाम्भोजद्वन्द्वं भवभयापहं ।
महानाटकटीकां तु कुरुते चन्द्रशेखरः ॥
बालानामन्वयज्ञानकृत एषा वितन्यते ।
नात्रोपहासं कुर्वन्तु तद्धीरा नतिरस्तु मे ॥

कर्तव्ये महानाटकाख्ये ग्रन्थे प्रथमतो दशभिः श्लोकैर्नान्दीं करोति । नान्दीलक्षणमाह यथा । आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रवर्तते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञितेति ॥ नाटके श्लोकत्रयेण श्लोकद्वयेन च प्रायो नान्दी क्रियते । तथा हि । मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी । पादैर्युक्ता द्वादशभिरष्टाभिर्वा पादैस्तथेति (!) ॥ महानाटके तु नायं नियमः । इति बहुभिः श्लोकैर्नान्दीं करोति । विघ्नेशो व इत्यादि ।°

The text of this recension (cf. Aufrecht, Cat. Bodl., no. 295) has been published repeatedly at Calcutta (with an English translation, by Mahārāja Kālikrishṇa Bahādur, 1840); also with *Candraśekhara's* commentary, ib. 1874. [H. T. Colebrooke.]

## 4151.

**1715a.** Foll. 65; size 8¾ in. by 3½ in.; well written, in Devanāgarī, by *Bālo Paṇḍita*, about 1650 A.D.; 9–12 lines in a page.

*Anarghyarāghava*, a drama, in seven acts, by *Murāri*, son of *Vardhamāna* and *Tantumati*.

It begins: निःप्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः°

The MS. contains numerous marginal glosses.

After the final colophon it has two verses, followed by the copyist's signature, viz.:

देवस्यात्मभुवः कमंडलुजलस्रोतांसि° (as commented [upon by *Rucidatta*) ॥ १ ॥

देवीं वाचमुपास्महे तु बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लंघित एव वानरभटैः किंत्वस्य गंभीरताम्
आपातालनिमग्नपीवरतनुर्जानाति मंथाचलः ॥ २ ॥

श्रीशुभानि संतु ॥ बालोपंडितेयमिदं पुस्तकं लिखितं स्वहस्तेन ॥

The play has been edited by Premacandra Tarkavāgīśa (Calc. 1860), and repeatedly since. Cf. Aufrecht, Cat. Bodl., nos. 263 seqq. [H. T. Colebrooke.]

## 4152.

**320a.** Foll. 88; size 11¾ in. by 3¾ in.: fairly written in Devanāgarī, in 1729 A.D., by *Jaganmaṇi Śarman*, at Śrīnagara; eight lines in a page.

*Anarghyarāghava.*

It ends with the first of the above two final *ślokas*, followed by the colophon, and the date (cp. colophon of no. 4145): श्रीशाके १६५१ संवत् १७८६ आश्विनकृष्णद्वितीयायां सौरमानेन भाद्रपद २८ गते शुक्रवासरे जगन्मणिशर्मेदं पुस्तकं स्वपाठायालिखच्छ्रीनगरे ॥ [H. T. Colebrooke.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 4153.

**136.** Foll. 95; size $6\frac{1}{4}$ in. by $9\frac{3}{4}$ in.; fairly written, in Devanāgarī (in European style), in 1797 A.D.; 23 lines in a page.

*Anarghyarāghava.*

At the end it has the first of the above two final *ślokas* added in the margin so as to be inserted before the colophon.

[H. T. Colebrooke.]

## 4154.

**1872.** Foll. 59; size 12 in. by $5\frac{1}{2}$ in.; good, modern Devanāgarī writing (European paper); thirteen lines in a page.

*Anarghyarāghava.* Corrected throughout.

It ends with the first of the above two *ślokas*, followed by the colophon of the last act. [Dr. John Taylor.]

## 4155.

**1005a.** Foll. 55; size $12\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; modern Devanāgarī writing; ten lines in a page.

*Anarghyarāghava,* copied without much care.

At the end it has neither of the above two verses. [H. T. Colebrooke.]

## 4156.

**1874.** Foll. 152; size $12\frac{1}{4}$ in. by 4 in.; good, modern Devanāgarī writing (European paper); eleven lines in a page.

*Anarghyarāghava-ṭīkā,* a commentary on *Murāri's* play, composed—for King *Bhairavendra* (or *Bhairavasiṃhadeva*), son of *Narasiṃha*—by *Rucipati,* of the *Khau-ālavaṃśa,* residing at Vaijolīgrāma.

It begins: दोर्दंडद्वितयेन खंडपरशोः° Cf. Aufrecht, Cat. Bodl., no. 267.

This commentary has been published, along with the text, by Paṇḍit Durgāprasāda and K. P. Paraba (*Kāvyamālā,* v., Bombay 1887).

[Dr. John Taylor.]

## 4157.

**1005b.** Foll. 142; size $12\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; fair Devanāgarī writing of 1795 A.D.; ten lines in a page.

*Anarghyarāghava-ṭīkā,* by *Rucipati.*

Copyist's signature: संवत् १८५२ ॥ then by a different hand: इयं मुरारिटीका गोतमीतीरसमुल्लसद्धर्मपुरीस्था नर्शकुर्तीत्युपनामककोनेरुशास्त्रिणा लिखापिता ॥

[H. T. Colebrooke.]

## 4158.

**937.** Foll. 77; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; good, bold Devanāgarī writing of 1671 A.D.; eight lines in a page.

*Prasannarāghava nāṭaka,* in seven acts, by *Jayadeva* (*Kauṇḍinya*), son of *Mahādeva.*

It begins: चत्वारः प्रथयंतु° See Aufrecht, Cat. Bodl., no. 289.

It has been published in the 'Pandit,' vol. ii. (Ben. 1867; repr., ib. 1868); by Jīvānanda Vidyāsāgara (Calc. 1873); and repeatedly since.

[H. T. Colebrooke.]

## 4159.

**971.** Foll. 42; size $15\frac{1}{2}$ in. by $2\frac{1}{2}$ in.; Bengālī handwriting; five lines in a page.

*Ratnāvalī,* a comedy, in four acts, ascribed to *Śrī-Harshadeva.*

It has been published repeatedly in India;

DR.RUPNATHJI( DR.RUPAK NATH )

and, in Europe, by C. Cappeller, in Böhtlingk's Sanskrit-Chrestomathie, 2nd ed., St. Petersburg 1877, for which edition the two MSS. of this collection were collated.

An English translation of the play was published by H. H. Wilson, in his Hindu Theatre (1827), vol. ii.; a German one by L. Fritze (1878). [H. T. COLEBROOKE.]

## 4160.

**2353e.** Foll. 30; size 10 in. by 4 in.; fairly written, in Devanāgarī, by several hands, in 1751 A.D.; generally 12 lines in a page.

*Ratnāvalī nāṭikā.*

Dated: संवत्सर १८०८ माघसितपक्षस्यकलाचितयमत्तुहि-नांशुमालिन्यां तिथ्यां लिखितेयं रत्नावली स्वात्मसंबंधिपठनाय॥ पुटभेदन संगनाभिधे कृतवासो धिषणोसुदुर्लभः। समलीलिख-दाशु साधुसज्जनगोविंदसुतः सुरत्नतां॥

[GAIKAWAR.]

## 4161.

**468.** Foll. 22; size 12 in. by 4½ in.; fairly good, modern Devanāgarī writing; 12–14 lines in a page.

*Nāgānanda*, a Buddhist drama, in five acts, likewise ascribed to *Śrī-Harshadeva*.

The text has been printed repeatedly in India. An English translation was published by Palmer Boyd, with an introduction by Prof. E. B. Cowell (London 1872); a French one by A. Bergaigne (1879). Cf. F. Cimmino, Sul dramma Nāgānanda (Napoli, 1902).

The date (Saṃvat 1726) given at the end —unless it be a mistake for Śaka 1726—must have been copied from a previous MS., as the present one must have been written early in the 19th century. [H. T. COLEBROOKE.]

## 4162.

**1148b.** Foll. 25; size 9 in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

*Karpūramañjarī saṭṭaka*, a comedy, in four acts (*javanikāntara*), composed, almost entirely in Prākṛit, by *Rājaśekhara* (son of *Durduka* and *Śīlavatī*), *guru* to King *Mahendrapāla* of Kanouj. Very incorrect.

It begins: भद्दं भोदु सरस्सईअ °

It ends: विदू°। भो वअस्स वमिरा दिज्जतु हुअवहे लाजहोमो होनु॥

राजा। तथैव भ्रमणं नाटयति नायिका मलज्ञमयनतमुखी विवाहं निर्वर्त्य सोत्साहं यथार्हमभ्यर्च्य सर्वान्विसर्ज्य चक्रवर्ती भूत्वा तया सह राज्यं चक्रे॥

भैर°। राजानं प्रति। किं ते भूयः प्रियमुपकरोमि।

राजा। नुहयसा राणलद्धारा सा(?)।

राज्ञी। सकलमयगत्य। परिणीदा महाराएण कप्पूरमंज-रिमरि(°जरी) नुम्हाणं चच्चरयामसुइरमहप्पिसं(?)। योगिनं प्रति संस्कृतमाश्रित्य।

स्वामिंस्त्वच्चरणारविंदयशत[:] शृंगारसंजीवना
लब्धा पंचशरप्रिया ननु मया कर्पूरमंजर्येसी।

तल्लाभेन च चक्रवर्तिपदवी लोके समासादिता किं किं नेह करोति हंत महतां संदर्शनं प्राणिषु॥

कप्पू॥ इति निःक्रांताः सर्वे। चतुर्थं जवनिकांतरं थ्रीरस्तु॥

Edited, with a *prākṛitavivṛiti*, by Paṇḍit Vāmanāčārya, in the 'Pandit,' vol. vii. (1872); also separately, and, with *Vāsudeva's Prakāśa*, by Paṇḍit Durgāprasāda and K. P. Paraba (*Kāvyamālā*, iv., 1887).

Cf. Aufrecht, Cat. Bodl., no. 313; Weber, Cat. Berl., nos. 1557–8; Rāj. Mitra, Notices, i., p. 46—where the author is called *Rajanīvallabha* (rather *Rajanīvallabhaśekhara*, which, however, is only the term by which the author himself explains his own name).

[H. T. COLEBROOKE.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 4163.

**3153.** Foll. 31; size 13¾ in. by 4¼ in.; fair, modern Devanāgarī writing; seven lines in a page.

*Karpūramañjarī.*

It ends as in the *Kāvyamālā.*

[Dr. R. Hoernle.]

## 4164.

**699 c.** Foll. 29; size 9½ in. by 4 in.; rather careless, modern Devanāgarī writing; ten lines in a page.

*Viddhaśālabhañjikā nāṭikā*, a comedy, in 4 acts, by *Rājaśekhara.*

It begins: कुलगुरुखलानां केलिदीक्षा प्रदाने°

Cf. Aufrecht, Cat. Bodl., no. 284; H. H. Wilson, Hindu Theatre, ii., p. 354.

Editions of the work have been published by Jīvānanda Vidyāsāgara (Calc. 1883), and, with *Nārāyaṇa's* commentary (Calc. 1873; and, by B. R. Apte, Poona 1886).

[H. T. Colebrooke.]

## 4165.

**602.** Foll. 49; size 9¾ in. by 3 in.; indifferent Devanāgarī writing, of 1514 A.D.; ten lines in a page.

*Mudrārākshasa nāṭaka*, a political play, in 7 acts, by *Viśākhadatta*, or *Viśākhadeva* (as he is here called in the prologue), son of (*mahārājapadabhāk*) *Pṛithu*, and grandson of *Sāmanta Vaṭeśvaradatta.*

It begins: धन्या केयं स्थिता ते शिरसि शशिकला°

Foll. 1–12 show many corrections, executed in a rather slovenly manner.

Copyist's signature: संवत् १५७१ समये चित्रभानुनामसंवत्सर आश्विनशुद्ध अमावास्यायां १५ सोमवासरे लिखितं मुद्राराक्षसं नाम नाटकं कृष्णेन [स्व]पठनार्थं परोपकारार्थं च॥

There are several Indian editions, esp. those by Tārānātha Tarkavācaspati (Calc. 1869); Jīvānanda Vidyāsāgara (ib. 1881); K. T. Telang (Bombay 1884). It has been translated into English, by H. H. Wilson (Hindu Theatre, 1827); into French, by V. Henry (Paris 1888); into German, by L. Fritze (Leipzig 1887); into Italian, by A. Marazzi (Milano 1874).

[H. T. Colebrooke.]

## 4166.

**1238 d.** Foll. 42; size 10¾ in. by 4½ in.; fairly written, in Devanāgarī, about 1750 A.D., by four or five different hands; 11–14 lines in a page.

The same work. [H. T. Colebrooke.]

## 4167.

**1148 a.** Foll. 56; size 9 in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

The same play. [H. T. Colebrooke.]

## 4168.

**1853.** Foll. 45; size 11½ in. by 4 in.; good, modern Devanāgarī writing (European paper); ten lines in a page.

*Mudrārākshasa*, by *Viśākhadatta*, son of *mahārāja* (prologue; *mahārājapadabhāj*, colophon) *Pṛithu.* [Dr. John Taylor.]

## 4169.

**2574 e.** Foll. 15; folio, size 12½ in. by 8½ in.; fair, small, modern Devanāgarī handwriting; about 50 lines in a page.

*Mudrārākshasa*, by *Viśākhadatta.*

It begins: केयं कन्या(!) स्थिता ते शिरसि शशिकला°

[Mackenzie Collection.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 4170.

**827a.** Foll. 109; size 12¼ in. by 5 in.; good, clear, modern Bengālī handwriting; seven lines in a page.

*Mudrādīpikā*, a commentary on the *Mudrārākshasa*, by *Graheśvara*, son of *Siddheśvara*, son of *Rāmaśarman*, son (?) of *Śrīdeva*, son of *Jayāditya*, son of *Śrīvatsa*, son of *Cakrapāṇi*, of *Tīrabhukti*.

The commentator explains the text both from the dramatic-poetic point of view and as a manual of political ethics (*nīti-śāstra*).

It begins: कथ्यते तदा सोत्साहाः शिष्यादयोऽत्र झटिति प्रवर्तन्ते तेन ग्रन्थस्याविच्छेदे विच्छिन्नसंप्रदायेनोपजीवनप्रवाहो भवतीति सर्वमपि संधाय विशाखदत्तः प्रथमत एव तत्सर्वमभिदधाति स्म धन्या केयमिति। विभोर्महादेवस्य शाठ्यं शठस्य भावः वञ्चना तदनुकूलं वचनं वा वो युष्मानव्यात् त्रायतां। अत्र रक्षणे आशिषि लिङि रूपं। वञ्चनापि निष्प्रतियोगिका न भवति। किं च। महतां नीचवञ्चनेऽपि न महत्त्वं। तथा च। स्वसदृशे स्वाधिके वा सा शोभनेति भगवत्येव तत्प्रतियोगित्वं दर्शयितुमर्हति। तदर्धशरीरत्वादिति तामाह देव्या इति देव्या हृत(r. हृते) इत्यनेन प्रकारेण सुरसरितं गङ्गां निह्नोतुं तिरोधातुं गोप्तुं वा इच्छोरिच्छतः। यद्वा देव्या इति पञ्चमी देव्याः इत्यर्थः। यद्यपि भगवान् स्वतन्त्रो निर्दोषश्च तत्त्वतः परस्त्रीविमुखो भगीरथदीर्घतपसा लोकानुग्रहकामाय च भगवतीं शिरसा बभार तथापि तत्त्वतः शुद्धस्यापि परशङ्काविषयाचारस्य तादृशाचरणेऽपि दुराचार इति परेभ्यो गोप्तव्यमिति शिक्षयन्निव भगवत्यामपि संगोपनं दर्शितवानित्याह केयं धन्येति वाक्यवाक्यैकदेशो यमलवः(?)। अतो भगवता वाक्यं प्रश्नमुत्तरं च भगवत[:।] इयं धन्या का तव शिरसि स्थितास्तीत्यध्याहार्यं। इयमपूर्वनारी या भगवतः शिरसि स्थिता ईदृशं सौभाग्यं न कापि धन्या अपि नार्या दृष्टपूर्वं श्रुतपूर्वं वा। अथवा धन्यापदं सोपहासपरं अधन्येत्यर्थः। अस्या अयं दुराचारो यद्भगवतः शिरसि स्थितिः। ईदृशोऽतिक्रमो नार्या अनुचिता भर्तुरेव शिरसि स्थितिः। यद्वा भगवती परमसुभगापि स्वामिनि दुराचारत्वेन शङ्कितेऽपि कार्यमिदमनार्यमिति छलतोऽवगमयति स्म न कण्ठतः। प्रभो दोषांशो द्वारे स्फुटीकर्तव्ये भृत्यस्यानधिकारात्। यद्वा सर्वमेव धनाधीनमिति योषिदपि धनवतीति परमेश्वरेणापि शिरसि ध्रियं इत्युपदेशः। अथवा स्त्रीस्वरूपपर्यायोऽयं धन्याशब्दः। धन्या योषित् प्रलोभिकेति कोषदर्शनात्। भगवतो ऽपीयं संशयाना मयि निश्चितदोषा या मां पृच्छति। तादृशमुत्तरं करवाणि यदुभयथापि अर्थं बोधकमित्याशयेन मुग्धमपि निश्चितमेवोत्तरं कृतं। शशिकलेति। अत्र पदे अर्थद्वयं प्रतीयते। शशिनः कला शशिकलानाम्नीति काचित। अत्र द्वितीयमर्थं पुरस्कृत्य पुनर्भगवती पृच्छति। अस्या एतदेव किंनु नाम। ०

Act I. ends fol. 27*b* इति महोपाध्यायश्रीग्रहेश्वरकृतायां मुद्रादीपिकायां प्रथमोऽङ्कः॥ II., fol. 41*a*; III., fol. 59*b*; IV., fol. 70*b*; V., fol. 87*a*; VI. fol. 99*a*.

It ends:

अशुद्धं शुद्धं वा वचनरचनं हाटकसमं
द्वयोः क्षेपे ग्राही बुधजनमये युक्त इह हि।
अयं शुद्धं कान्तं परमधिकमन्यत्तु भजते
स्वतीव्यत्यागेन प्रकटनमलंकारविधिषु॥

साधूनामप्यसाधोरुचितपदविधौ दक्षतामादधाने(°नो)
नीत्या देव्या भवच्याः(°त्या) परिगतहृदयः सर्वकर्मैकदृश्या।
कारुण्याहृष्टचेता निजहितपरताहानिताप्युज्झितश्रीः(!)
श्रीमान्देवो महेशः प्रभवतु कृतिनामष्टसिद्धेश्वराय॥

देशे श्रीतीरभुक्तौ स [सु]विमलमतिश्चक्रपाणिर्गुणाढ्यः
श्रीवत्सस्तत्सुतोऽभून्नयविनयमयस्तत्र(°स्तन्त्र)विद्यः कवीन्द्रः।
तत्पुत्रः ख्यातकीर्तिः कविवरगणितः श्रीजयादित्यधीरः
श्रीदेवस्तत्सुतोऽभून्नदुचित[त]नयः पण्डितो रामशर्मा॥

सिद्धेश्वरस्तत्तनयोऽप्यतोऽभूद् द्विजेन्द्रवर्गे गणितप्रतिष्ठः।
तत्सूनुरानम्रशिरा गुरुभ्यो ग्रहेश्वरः सन्नयमार्गसेवी॥

तेनेयं रचितोच्चैर्यत्नान्मुद्राख्यनाटके टीका।

इति महोपाध्यायश्रीग्रहेश्वररचितायां सप्तमोऽङ्कः॥ ख्यातः पृथ्व्यां पृथुतरयशा दुर्लभो नाम विप्रः॥

Whilst various readings are mentioned pretty frequently, no other commentator has been found referred to, the only authorities quoted (besides a *Purāṇa* and several *Koshas*) being *Nayalocana* [सन्ध्यादयो गुणा उपायाश्च भेदादयः। अथवा। मन्त्रसंगोपनं दानं चरस्य परिपूरणं। सन्यासमुद्भेदं(!) राज्ञामुपायः परिकीर्तितः॥] fol. 9*b*, and *Nāṭakadarpaṇa* [कञ्चुकीति। अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। धर्मवित् कार्यकुशलः कञ्चुकीत्यभिधीयते॥]

[H. T. COLEBROOKE.]

DR.RUPAK NATH ( DR.RUPAK NATH )

## 4171.

**1835.** Foll. 43; size 12½ in. by 5 in.; clear Devanāgarī writing, on European paper (watermark 1809); eleven lines in a page.

*Veṇīsaṃhāra*, a drama, in six acts, by *Bhaṭṭa Nārāyaṇa*, surnamed *Mṛigarājalakshman* (and *Nirvāṇa-Nārāyaṇa*).

This is the MS. A on which J. Grill's edition (Leipzig 1871) is chiefly based. The work has also been repeatedly printed in India (cf. Grill, introd., p. xxvii.), especially by Tārānātha Tarkavācaspati (3rd ed. 1886), N. B. Godabole (Poona 1895), and K. P. Paraba (Bombay 1898). It has also been translated into English, by S. M. Tagore (Calc. 1880).

[Dr. John Taylor.]

## 4172.

**1316 a.** Foll. 44; size 12½ in. by 4¾ in.; modern Devanāgarī writing; ten lines in a page.

*Veṇīsaṃhāra.*

A very incorrect MS. (old no. 1290) collated by Lenz, whose notes were made use of by Grill for his edition (cf. his introd., p. xxviii., MS. L).

Colophon: मृगराजलक्ष्मनारायणभट्टविरचितं वेणीसंहारं नाम नाटकं समाप्तं ॥

[H. T. Colebrooke.]

## 4173.

**1503 b.** Foll. 30; size 11¾ in. by 4 in.; legibly written, in Devanāgarī, in the latter part of the 18th century; thirteen lines in a page.

*Veṇīsaṃhāra-ṭīkā*, by *Jagaddhara*, son of *Ratnadhara* and *Damayantikā*.

It begins:

कंठस्याहिमणीविभूषिततनूराजज्जटापल्लवो
हृष्यन्मौलिसुधाकरैककुसुमस्तत्पंचशाखश्रयः ।
स्यासामें(? स्याणोमें) फलदस्तु नित्यमधिकं गौरीमुखेंदुद्रवत्-
पीयूषद्रवपानदोहदवशात् कल्पद्रुमत्वं वहन् ॥ १ ॥
गुरूपदेशमासाद्य विभाव्य निपुणं हृदा ।
श्रीजगद्धरधीरेण टिप्पणी क्रियते शुभा ॥ २ ॥

इह तावन्निर्विघ्नं प्रारिप्सितसिद्धिमनुबुध्य कविः स्वेष्टदेवता-कीर्तनरूपमंगलं नांदीमुखेनाह निषिद्धैरिति०

It ends:

यदि भवति मदीयग्रंथमध्ये प्रसादः (प्रमादः)
क्वचिदपि समहिस्ता(? मम हस्तः) शोधनीयो महद्भिः ।
स्खलति गमनकारी प्रायशो नात्र चित्रं
भवति च गुरुहस्तालंबनोऽपि प्रकारः ॥
अमृत यं रत्नधरो गुणीशो नानागुणाढ्या दमयंतिकापि ।
जगद्धरं तस्य कृतौ व्यरंसीत् षष्ठो ऽयमंको वरटिप्पने ऽत्र ॥
इति महामहोपाध्यायधर्माधिकारिश्रीजगद्धरकृतौ वेणीसंहार-टीकायां षष्ठोंकः समाप्तः ॥

For other MSS. of this commentary see Weber, Cat. Berl., no. 554; Aufrecht, Cat. Bodl., no. 309. Cf. also Grill, *Veṇīsaṃhāra*, introd., p. xxxvi.

[H. T. Colebrooke.]

## 4174.

**1605 a.** Foll. 27; size 9½ in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

*Ushārāgodayā nāṭikā*, a drama, in 4 acts, by *Rudracandra Deva*, or *Rudradeva*; founded on the love-story of *Ushā*, daughter of the *daitya Bāṇa*, and *Aniruddha*, grandson of *Kṛishṇa*, as related in *Harivaṃśa*, adhy. 176 seqq. Rather incorrect.

It begins:

प्रणयकलहकोपात्पाटलिम्नि प्रजाते
मुखशशिनि परार्धे पांडुरत्वे च सद्यः ।
प्रकटितनिजदेहद्वंद्वसीमाविभेदं
वपुरय शिवयोस्तद्भूतये तावदास्तां (शश्वदास्तां R.M.) ॥

DR.RUPNATHJI( DR.RUPAK NATH )

नांद्यंते सूत्रधारः । अलमतिप्रसृतेन(०मृतेन) । नेपथ्याभिमुखमवलोक्य । आर्ये इतस्तावत् ॥

उपसृत्य नटी । इयम्हि आणवेदु अज्जउत्तो ॥

सूत्रधारः । आर्ये उषारागोदया नाम नाटिका नाटयितव्यास्ति । तत्त्वरस्व नेपथ्यग्रहणाय यावदेषो ऽहमपि दत्तावधाना अपि सामाजिका इत्यर्थये ॥

नटी । जं अज्जउत्तो आणवेदित्ति निष्क्रान्ता ॥

सूत्रधारः । सर्वतो ऽवलोक्य । भगवद्गुणानुरागादतिनवबंधप्रसंगाच्च परिभावयंत्ववहिताः कृतिमेतां रुद्रदेवस्य ।०

Cf. Rāj. Mitra, Notices, i., p. 64; iii., p. 192 (with analysis).

It ends: नारदः ॥ परस्परराममप्राप्रिया(०प्या) च किमतः परमर्थनीयं । तथापीदमस्तु भरतवाचा ।

पृथ्वी समस्तरसशस्यवती सदास्तु
यंतु क्षयं रिपुगणाः किल सज्जनानां ।
लक्ष्मीविलासमतुलं लभतां हि(०तां हि or ०ताद्धि) लोकः
काव्यप्रबंधरचनाचतुरो जनो ऽस्तु ॥

इति निष्क्रान्ताः सर्वे॥ चतुर्थोऽङ्कः॥ इति श्रीप्रतापनारायणश्रीरुद्रचंद्रदेवविरचिता उषारागोदयनामनाटिका समाप्ता॥०

In the other two MSS. above referred to the author is styled श्रीकूर्मगिरिवरेश्वरश्रीमत्प्रतापचरितारितमोभास्करश्रीमद्रुद्रचन्द्रदेवः ॥

[H. T. Colebrooke.]

## 4175.

**1627c.** Foll. 39; size 8¾ in. by 3¾ in.; legibly written, in Devanāgarī, in 1800 A.D.; 10–12 lines in a page.

*Kaṃsavadha*, a play, in seven acts—on the destruction of *Kaṃsa*, king of Mathurā—composed, by *Śesha Krishṇa*, son of *Nṛisiṃha*, at the instance of *Giridhārin*, surnamed *Govardhanadhārin*, son of (*Akbar's* minister) *Rājan Toḍaramalla*. [A.]

It begins:

प्रारंभः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः
कान्ताकर्षणकर्मकामणविधिः कामाद्वितीयश्रुतिः ।
हुंकारो मदनस्य निर्वृतिवधूमंजीरसिंजाध्वनिः
श्रेयःसंपदमातनोतु भवतः कंसारिवंशीरवः ॥ १ ॥०

सूत्रधारः ॥ आर्ये अयमेव तावदखिलब्रह्मांडमंडपमहानटः (०मंडपउपमहानटः B) । सृष्टिस्थितिप्रलयनाटिकासूत्रधारः । सूत्रात्मा विश्वसाक्षी भगवानिंदुशेखरः । तत्पादपद्मपरिचर्यापर्यायप्राप्तसाम्राज्यधुरंधरो गोवर्धनधारिरामश्च ॥

नटी ॥ को उण एसो गोवद्धणधारीति भणिअइ ॥

सूत्रधारः ॥ तदाकर्णयतां ।०

तस्यास्ति टंडनकुलामलमंडनस्य
श्रीतोडर(A B)क्षितिपतेस्तनयो नयज्ञः ।
नानाकलाकुलगृहं स विदग्धगोष्ठीम्
एको ऽधितिष्ठति गुरुर्गिरिधारिनामा ॥ १३ ॥

तेन चाहं सबहुमानमाहूय समाजेनादिष्टो ऽस्मि । ०

पृथ्वीमंडलमौलिमंडनमणिः श्रीमन्नृसिंहात्मजः
कृत्वा कृष्णकविः कुतूहलवशादस्मासु यत्र्यक्षिपत् ।
नाट्यं कंसवधाभिधानमधुना तस्य प्रयोगोद्यमं
विद्वद्राजसमाजमानसमहानंदाय विद्मामहे ॥ १९ ॥ ०

It ends: अपि च । साहित्यामृत० कृष्णानुगाः ॥ इति निष्क्रांताः सर्वे ॥ सप्तमोंकः ॥

आनंदाभिधवत्सराक्षिनयनाश्वाब्जैः शके संमिते १७२२
वैशाखाभिधमासि शंकरतिथौ धारासुते वासरे ।
नाट्यं कंसवधं समाप्तिमगमत्कृष्णादिदं पंडितैस्
तैलाभःशिथिलप्रबंधनभयाद्रक्ष्यं महायत्नतः ॥

[H. T. Colebrooke.]

## 4176.

**1859.** Foll. 45; size 11⅝ in. by 5½ in.; fair, modern Devanāgarī writing; eleven lines in a page.

*Kaṃsavadha*, by *Krishṇa Paṇḍita*. [B.]

The first few leaves contain marginal glosses such as the following one on the opening *śloka*: सिंजत्येव सिद्धं ध्वनिपदमर्थांतरं संक्रामितवाच्यं मंजुलातिशयं गमयति । ध्वन अव्यक्ते शब्द इति धातोः । निरतिशयानंदः ॥

The Saṃskṛit *chāyā* (not given in MS. A) is here given immediately after each of the (comparatively rare) *Prākṛit* passages.

[Dr. John Taylor.]



DR.RUPNATHJI( DR. RUPAK NATH )

## 4177.

**141b.** Foll. 71; size 14 in. by 4½ in.; good, modern Bengālī handwriting; eight lines in a page.

*Vidagdhamādhava nāṭaka*, a play, in seven acts, illustrative of *Kṛishṇa's* life and amours in *Vṛindāvana*; ascribed to *Rūpagosvāmin*.

The author's name, however, is not mentioned either in this or in the next MS.

It begins: सुधानां चान्द्रीणामपि मधुरिमोन्माददमनो°

Cf. Aufrecht, Cat. Bodl., no. 305; H. H. Wilson, Hindu Theatre, ii., p. 393; Rāj. Mitra, Notices, iv., p. 172 (where the work is ascribed to 'one of the followers of *Caitanya* of Nuddea.'

The work has been published (under *Rūpa's* name), with a commentary (including the Saṃskṛit version of *Prākṛit* passages) and a Bengālī translation, by Rāmanārāyana Vidyāratna, Mūrshidabad (Bahrampur) 1880.

The MS. ends: कृष्णः। स्मित्वा। भगवति तथास्तु। तदेहि गोदोहावसरे मामपेक्ष्य चिन्तयिष्यन्तौ पितरावविलम्बं गोकुलं प्रविश्य नन्दयाम इति निष्क्रान्तः॥ इति निष्क्रान्ताः सर्वे॥

इति गौरीतीर्थविहारो नाम सप्तमोऽङ्कः॥ समाप्तमिदं विदग्धमाधवं नाम नाटकं॥ [H. T. Colebrooke.]

## 4178.

**2353d.** Foll. 78 (of which are wanting foll. 2–6, 73); size 10¼ in. by 4⅝ in.; fairly written, in Devanāgarī, by two or three different hands, about 1650 A.D.; eleven, sometimes ten, lines—the first leaf, apparently somewhat older than the rest, eight lines—in a page.

*Vidagdhamādhava.*

The last two leaves have somewhat suffered from insects.

Fol. 1a has the note: व्यासहरिरामते विभागे।

[Gaikawar.]

## 4179.

**141a.** Foll. 81; size 14 in. by 4½ in.; fairly good Bengālī writing of 1807 A.D.; eight lines in a page.

*Lalitamādhava*, another play, in ten acts, on the same subject, likewise ascribed to *Rūpagosvāmin*, but without his name being mentioned in this MS.

Cf. H. H. Wilson, As. Res., xvi., 120 (Sel. Works, i., p. 167).

It begins:

सुररिपुसुदृशामुरोजकोकान् मुखकमलानि च खेदयन्नखण्डः।
चिरमखिलसुहृच्चकोरनन्दी दिशतु मुकुन्दयशःशशी मुदं वः॥

अपि च।

अंसौ प्रोक्ष्य दिगङ्गनाघनरसैः पत्राङ्कुराणां श्रिया
कुर्वन्मञ्जुलताभरस्य च सदारामावलीमण्डनं।
यः पीने हृदि भानुजामतुलभां चन्द्राकृतिं चोज्ज्वलां
रुन्धानः क्रमते तमत्र मुदिरं कृष्णं नमस्कुर्महे॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। समन्तादवलोक्य। हन्त भोः सन्ततवृन्दाटवीनिकुञ्जवेदिकानिवासदीक्षारसज्ञस्य स्फुरदुद्दण्डपुण्डरीकमण्डलीमण्डितब्रह्मकुण्डतीरोपान्तस्थलीमहाभौमिकस्य भगवतो गोपीश्वरतया प्रसिद्धस्य चन्द्रार्धमौलेः स्वप्नाविर्भूतमादेशमासाद्य दीपावलीकौतुकारम्भे गोवर्धनाराधनाय श्रीराधाकुण्डरोधसि माधवमन्दिरस्य पुरतः संगतानि वैष्णववृन्दानि स्वप्रबन्धेन ललितमाधवनाम्ना नाटकेनाहमुपस्थातुं पर्युत्सुको ऽस्मि॥ तदभीष्टदैवतमभ्यर्थयिष्ये।°

Act i., *sāyamutsava* (fol. 10b); ii., *śaṅkhacūḍavadha* (fol. 18a); iii., *unmattarādhika* (fol. 25b); iv., *rādhābhisāra* (fol. 33b); v., *candrāvalīlābha* (fol. 41a); vi., *lalitopalabdhi* (fol. 49b); vii., *navavṛindāvanasaṃgama* (fol. 56b); viii., *navavṛindāvanavihāra* (fol. 63a); ix., *citradarśana* (fol. 71a); x., *pūrṇamanoratha* (fol. 81a).

It ends: इति निष्क्रान्ताः सर्वे॥ पूर्णमनोरथो नाम दशमो ऽङ्कः॥

नाटके समुचितामपीश्वरः स्वैरमप्रकटयन्नुदात्ततां।
अत्र मन्मथमनोहरो हरिर्लीलया ललितभावमाययौ॥

DR.RUPNATHJI( DR.RUPAK NATH )

समाप्तमिदं ललितमाधवाख्यं नाटकमिति ॥
पूर्णं कलाचतुःषष्ट्या लक्षणैर्भूषणैरपि ।
भजन्तु श्रुतगान्धर्वं(orig. श्रित°) धीरा ललितमाधवं ॥

The text of this play was published by the same editor, with notes and a Bengālī translation, at Murshidābād, in 1880.

[H. T. Colebrooke.]

## 4180.

**1668b.** Foll. 32; size 9¼ in. by 4¼ in.; fair, modern Devanāgarī writing; ten lines in a page.

*Kumāravijaya,* a drama, in 5 acts, on mythological events leading up to the victory of *Kumāra* over the *daitya Tāraka*; composed by a Marātha poet whose full name seems to be *Caundājī Pant Ghanaśyāma*, son of *Mahādeva* and *Kāśī*, grandson of *Caundājī Bālājī*, brother of *Īśa* and *Śākambharī.*

It begins:

नद्या हरन्हरकपर्दजुषोऽम्बुजानि
हृद्यानि मातरि सह प्रमथैर्हसंतीं ।
हृद्याचकास्तु शिशुकेलिधरः स को ऽपि
विद्यावलीकुतुकनाटकसूत्रधारः ॥ १ ॥
किं च । मूको यत्कृपया पयोजलनिधिस्थूलोर्मिगर्वोन्नतीं[1]
सर्वस्वासहनामुपैति सरसां सर्वंकषां साहितीं ।
अर्थांभोजभवो यया जयति सा दुर्गा विधत्तां सदा
भूमीमंडनपंडितेंद्ररसनारंगस्थले तांडवं ॥ २ ॥
अपि च । नीलारक्तशिरोरुहं शशधरस्रोतस्विनीशेखरं
ताटंकोरगराजकुंडलधरं कालाष्टकुंडाकृति ।
लीलाकंकणशंखचूडवलयव्यालीढहस्ताम्बुजं
कौशेयद्विपचर्मधारि किमपि द्वंद्वं हृदि स्पंदतां ॥ ३ ॥
नांद्यंते सूत्रधारः। नेपथ्याभिमुखमवलोक्य। मारिषेतस्तावत्॥
प्रविश्य पारिपार्श्वकः। भाव अ अम्हि (इअम्हि) ॥
सू° । मारिष परिषदा सादरमाहूय नियुक्तो ऽस्मि ॥
पा° । कह विअ ॥
सू° । सभाजनसभाजनसमुचितं किमपि रूपकं निरूपयतामिति ॥
पा° । अ॰पि तारिसं किं पि ॥
सू° । अस्ति नाम कुमारविजयाभिधानं नाटकं ॥
पा° । को णु त॰स कई ॥
सू° । श्रूयतां समसनतो निवेदयामि ।
यस्येशो ऽग्रभवः पिता किल महादेवः स काशीप्रभूः
मातुः श्रेयसि सुंदरी प्रियतमा शाकंभरी च स्वसा ।
सम्राडोक्तिलिपिप्रभुर्गुणनिधिश्चौंडाजिबालाजिसत्-
पौत्रो ऽयं विभुरष्टविंशतिमितश्चौंडाजिपंतः कविः ॥ ४ ॥
सू° । मारिष यावद्को ऽप्यहं नालमेव तस्य गुणगणं वर्णयितुं
तथापि किंचिदेव वर्णयामि । श्रूयतां ॥
पा° । अवहिदो म्हि ॥
सू° । स्वच्छंदप्रवहत्पयःस्फटीकल्लोलहल्लोहला-
हंकारोत्कटुक्रियाकरमहावाग्गुंफकूलंकषः ।
द्वैतध्वांतदिवाकरः किल महाराष्ट्रैकचूडामणिः
संतोषाय कुतूहलाय च घनश्यामो विनेनीयते ॥ ६ ॥
ससंभ्रममाकाशे । आर्याः किं ब्रूथ । सम्यगाह भवान् विनेनीयत इति । यदेष एव प्राकृते च निरर्गलं प्रगल्भते । अन्ये तु कवयः प्रकृतश्लोकरचनस्थले ।
प्रायः संस्कृतमाश्रित्यैतुका धन्या भवंत्यहो ॥ ७(!) ॥
इति विचिंत्य । आर्या राजशेखरश्च प्रगल्भते । पुनः किं ब्रूथ । स खलु संस्कृतप्राकृतमात्रकविरयं तु सर्वभाषाकविरिति । सशिरःकंपं । आर्यपादा एव तरतमभावपरीक्षणविचक्षणाः । मारिषं प्रति । उक्तं च तेन कविना प्रबंधप्रारंभसमये ।
यन्नेतृत्वविधौ पुराणकवयः शक्ता न नित्या गिरो
यं ब्रह्म प्रथयंति शंकरपदं देवो य एवार्हति ।
यन्नामाप्यमृतार्पणैकरसिकं तं नाटकेकावली-
मध्ये नायकयाम्यहं तदिह को धन्यो मदन्यो जनः ॥ ८(!) ॥ °
सू° । सखेदं चिंतां नाटयित्वा सानंदं । अलमिह महता विचारेण ।
क्रमेण परिणेष्यामि पुत्रिकां मित्रवर्मणः ।
गिरीशो सार्वभौमस्य कन्यकामिव शंकरः ॥ ९(!) ॥
नेप° । हा देवि कथं त्रैलोक्यजनन्यास्तवापि तादृशी दशा संवृत्ता ॥
सू° । आकर्ण्य । कष्टं भोः कष्टं पितुरवज्ञया वितानाग्नौ पतितां सतीदेवीं विज्ञाय दूयमानमानसस्य भृंगिरिटेर्भि-भिक्षामादाय मम भ्राता कनीयानित एवाभिवर्तते तदनंतरकरणीयाय गच्छावः ॥ इति निष्क्रांतौ ॥
प्रस्तावना ॥

[1] Read °गर्वोन्नतिं



DR. RUPNATHJI( DR. RUPAK NATH )

ततः प्रविशति भृंगिरिटिः ॥ हा देवीत्यादि पुर्वोक्तं पठन् पुरतो ऽवलोक्य । अये माणिभद्रः समायाति ॥

ततः प्रविशति माणिभद्रः ।

मा॰। उपसृत्य । सखे किं खिद्यमान इव दृश्यसे ॥

भृंगि॰। किं न विदितं देवीगतं वृत्तं ॥

माणि॰। सभयं । सखे कथय२ किं तत् ॥

भृंगि॰। निःश्वस्य नखाग्रैर्बाष्पकणान्विकिरन् । हंत निवेदयामि मंदभाग्यः । श्रूयतां ॥

मा॰। अवहितोऽस्मि ॥

भृंगि॰। दक्षप्रजापतिना महासत्रमारब्धं द्रष्टुं व्रजामीति देवी ननाथ नाथं ॥

मा॰। हुं ततः२ ॥

भृं॰। ततो न मामाहूतवानाहूतसकलदेवतोऽपि ते पिता तन्मा गाः परिभावयितुमात्मानमिति बहुधाभिदधौ देवः ॥

मा॰। ततः२ ॥

भृं॰। तत्क्षणं पितृसुखमजानतो भवतो ननु सदृशं खलु गमननिषेधनमिति विषीदंतीं गच्छ गच्छेति रुषाभाषत ॥

मा॰। अहो देव्याः पितरि गरीयसी भक्तिः । ततः२ ॥

भृं॰। ततश्च तत्र गत एव मखपदे किमाहूतेव सत्वरमागतासीति पित्रा विप्रकृता नाथवाक्यं च विचिंतयंती देवी सशोकं तस्मिन्नेव कुंडे ।

मा॰। अलमलमतः परमभिधानेन । देवेन विदित्वा किं कृतं ॥

भृं॰। शोकांधेन देवेन कपर्दमधः संताड्य निर्मितो वीरभद्रो मखपदं च प्रेषितः ॥

मा॰। सभयं । यद्वीरभद्र एव गतस्तत्प्रलयकाल एव समुपस्थित इति मन्ये । सखे क्व नु खलु प्रस्थितो ऽसि ॥

भृं॰। शोकभारलघूकरणाय देवसंनिधिं परिहृत्य त्वामेव विचेतुमागतः ॥

मा॰। विलोक्य । अये देव इत एवाभिवर्तते । य एषः

शैलादिकंठविनिवेशितवामबाहुश्
चंडीशपाणिनिहितेतरबाहुदंडः ।
बाणेन वेत्रकलितेन निवेदिताध्वा
संलक्ष्यते प्रतिकलं दयनीयवेषः ॥ ८ ॥

तदेहि विविक्तस्थलं गच्छावः । इति निष्क्रांतौ ॥

शुद्धविष्कंभः ॥ ततः प्रविशति यथानिर्दिष्टः परमेश्वरः ।

पर॰। सविमर्शं ।

मा गच्छेति पुरा मया निगदिते रोषाकुलाभूत्प्रिया
निर्याहीति समीरिते प्रणयतः साकूतमालोकयत् ।
आस्तामेतदिदं विचित्रमपटुः कर्तुं क्षितौ या पदं
बाला सैव सखीश्च वाहनमनाकांक्ष्याशु यन्निर्ययौ ॥९॥

क्षणं स्थित्वा ।

धिगिंद्रं धिग्विष्णुं धिगपि धनदं धिक् छतधृतिं
पतंत्यां यत्रस्यां शिखिनि भृशमौदास्यमभजन् ।
तदास्तां मद्रूपस्त्रिपुरदहनैर्वर्धितबलो
मयासौ सप्तार्चिः कथमिव सतीं तां निरदहत् ॥१०॥॰

In consequcnce of *Śiva's* resentment and withdrawal from active interest in celestial affairs, caused by thc loss of his beloved wife, the power of tho *Daityas* increases and threatens to ovcrwhelm the rulc of the gods, whcn an oracle uttered by *Bṛihaspati* holds out hopes of the final victory of the gods in the event of a girl being born to *Himavat* from *Menā*. A daughter, *Gaurī*, accordingly makes her appearance in heaven, and attracts *Parameśvara's* attention. Mutual love leads to matrimonial alliance, from which *Kumāra* springs, who, in conscquence of his heroic achievements, is cventually proclaimed leader of the heavenly armies.

It ends: देवः । सोल्लासं । देवि किमतः परमपि प्रियमस्ति । तथापीदमस्तु भरतवाक्यं ।

आपद्मासनमापतंगमखिलाः सत्त्वा लभंतां सुखं
विद्वांसो ऽपि भवंतु सत्कविगिरां गुंफे गुणग्राहिणः ।
बाडव्यं भुवि जायतामपि सदा षट्कर्मनिष्ठारतं
साधूनामधिमानसारणिपरं ज्योतिः परिस्पंदतां ॥ १५ ॥

इति निष्क्रांताः सर्वे ॥ पंचमोंकः ॥ संपूर्णमिदं कुमारविजयाभिधानं नाटकं ॥

[H. T. COLEBROOKE.]

## 4181.

**584 d.** Foll. 14; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; excellent Devanāgarī writing of about 1500 A.D.; nine lines in a page.

*Bhojasaccarita*, or *Bhojarājasaccarita*, an encomiastic play, in two acts, composed, entirely in Sanskrit, by *Vedāntavāgīśa Bhaṭṭācārya*, pupil of *Nārāyaṇa munīndra* of Benares.

DR.RUPNATHJI( DR.RUPAK NATH )

*Bhojarāja*, in praise of whose virtues the work was composed, is described as the ruler of Vṛindāvatī, a locality including Vārāṇasī (fol. 9*a*), Haridvāra or Muktidvāra, the former abode of *Vedaghosha ṛishi* (fol. 11*a*,*b*), and Mathurā (fol. 12*b*). He was the son of *Sūrijana* (also called *Sūrajana*, *Surajana*), who reigned before him, and his first wife *Kamalā*; and his claim to distinction rests on his piety as a *Vaishṇava*, and various other virtues, which are declaimed by two sets of interlocutors in each act.

It begins :

श्रीमच्चक्रधरः सतां सुरतरुर्जीयादयं सर्वदा
सौभाग्यावधि भूमिदेवतिलको गोपालव्यासात्मभूः ।
संख्यावत्प्रथितो [ऽ]सतां मदहरः संतापहारी नृणां
श्रीमद्भोजमहीपतेरुदयदो धर्मो वपुष्मानिव ॥ १ ॥
यद्वाण्याममलं जनस्य सुखदं पीयूषमास्ते प्रियं
यद्भाले रुचिरा शुभाक्षरततिर्धात्रा विचित्रा कृता ।
यत्पाणौ कमले द्विजार्पणजलैरार्द्रे सति श्रीमति
याच्याकृद्भ्रमरावली मदवती सोऽयं कृती चक्रभृत् ॥ २ ॥

नांद्यंते सूत्रधारः ॥ अलमतिविस्तरेण । इदानीं खलु चतुर्दश-भुवनाधीशेन सकलफलदायिना निसर्गसुंदरेण सर्वांतर्यामिणा श्रीमता श्रीकृष्णेन लीलाविग्रहधारिणेति प्रेरितोऽस्मि ॥ यन्नावत् सूरिजननंदनस्य धर्मात्मनो भोजस्य वृंदावत्यधीशस्य राज्ञः सच्चरितं सभ्येषु सच्चरितेषु सम्यगभिनीय प्रदर्शयति ॥ आशासु नयनमुन्मील्य सहर्षं । अहो परमचतुरा अस्मदभिनयं वीक्षितुं निर्मत्सराः सभ्याः संप्राप्ता एव ॥

प्रविश्य नटः ॥ अत्रागतानां सभ्यानां कः स्वार्थः । अस्मन्महिम-वृद्धिरेव । तथा हि ।

महिमानं परस्यैव कर्तुमिच्छंत आदृताः ।
निर्मत्सराः शुभाचाराः सभ्या यांति सभांगणं ॥

सूत्रधारः । अलमतिविस्तरेण । विवक्षितमेव कथ्यतां ॥

नटः सोत्साहं ॥ इदमेव विवक्षितं यदावाभ्यां सभ्यानुरंजनं कर्तव्यं तत् केन सांत्वनेनेति ॥

सूत्रधारः । कच्चिन्न जानासि किं । शृणु । इदानीं वेदांतवागीशभट्टाचार्येण निबंधो रचितोऽस्ति ॥

नटः । स किं साधनं ॥

सूत्रधारः । कः संशयः ॥

नटः सहर्षं ॥ कच्चिन्नाम किंनामायं निबंधः ॥

सूत्रधारः । श्रीमद्भोजसच्चरितनामायं ॥

नटः सविस्मयं ॥ अये एतन्निबंधरचनकारणं वेदांतवागीशभट्टाचार्यस्य किं विमलं ज्ञानं ॥

सूत्रधारः । कः संशयः । तथा हि ।

शात्यादिसंदर्भमुपेत्य पुण्यैः पुराकृतैर्दीनदयं गुरुं यः ।
नारायणं ब्रह्मविदं मुनींद्रं संसेव्य भातीह परात्मवित्तः ॥
कदापि केनापि कलिः कृतो नो पांडित्यमानेन समं बुधेषु ।
संपश्यता सर्वजनेषु संतं पीतांबरं येन बुधेन सो ऽयं ॥

नटः सविस्मयं ॥ अस्य वेदांतवागीशभट्टाचार्यस्य ब्रह्मविन्मुनींद्रः किं नारायणो गुरुः ॥

सूत्रधारः सानंदं ॥ अये न जानासि किं । शृणु । वाराणस्यां गृहीतलीलावतारो नारायणो मुनींद्रः ॥

नटः । भक्तिभावितं नारायणं पुरः पश्यन्निव सानंदं ॥ किंप्रयोजनो वाराणस्यां गृहीतलीलावतारो नारायणः ॥

सूत्रधारः । तमेव नारायणं ध्यायन् सप्रसादं ॥ कच्चिदंग न जानासि नारायणलीलावतारप्रयोजनं । शृणु तत् प्रयोजनं । तथा हि ।

काले कलौ गतरणे कृपयन्नयं च
क्रूरं तपश्चरति तत्त्वविदो मुनींद्रान् ।
रक्षन्नृशंसकृतिभिर्विबुधैर्विपन्नां
गोरूपिणीमिव द्रुतां परमात्मविद्यां ॥

नटः । नेपथ्याभिमुखमवलोक्य ॥ भो रंगाचार्यस्य कवेः साक्षान्नारायणो गुरुः स वागीशो यस्य राज्ञो भोजस्य निबंधं कुरुते स भोजनृपतिः कमनीयकीर्तिरेव ॥

सूत्रधारः । सानंदं सभ्यवदनान्यवलोकयन् ॥ अये नटवर किं नावगच्छसि राजालंकार एव भोजराज इति । तथा हि ।

वृंदावतीशो जगति प्रसिद्धः शौर्येण दानेन जनावनेन ।
यशोनिधिः सूरजनो महींद्रस्तदात्मजो राजति भोजराजः ॥

नटः ॥ अये भोजराजस्य सूक्ष्मं सच्चरितं नोत्सुपेतं दुर्बोधं किं विदितं ॥

सूत्रधारः । साभिमानं ॥ नटवर प्रजापालनादि वृंदावत्यधीशस्य भोजराजस्य सम्यग्ज्ञातमेव । तथा हि ।

तथा प्रजाः पालयतीह भोजो यथा प्रजाः पूर्वतनं स्मरंति ।
भोजं महींद्रं खलु चौरभीतेः स्ववीर्यतो धर्ममतिः कृपालुः ॥

नटः । प्रफुल्लनयन ऐंद्रीदिशमवलोक्य ॥ अये वृंदावत्यधीशस्य सत्कीर्तिमुद्गायंतौ पुंस्कोकिलाविवैतौ । तदस्मात्स्थानादपसर्तव्यमावाभ्यामिति वरं । यतः ।

DR.RUPAK NATH ( DR.RUPAK NATH )

स्वस्मात्समागच्छति सम्मुख्ये स्यातु न शक्यं खलु बोधपूर्णं ।
पूर्वं सभा संगतिनाधिके ऽपि जनेन मानाधिकमत्सरेण ॥

इति निष्क्रांतौ तौ ॥ प्रस्तावना ॥ ततः प्रविशति वाणीपतिः । नयनानंदश्च ॥

वाणीपतिः । अये नयनानंद । इति सानंदं संबोध्य ।

तां वाणीं करवाणि वाणिललितां भोजस्य राज्ञो गुणा
वर्ण्यंते सुधया समा मधुरया यस्यां प्रिया भूभुजां ।
इत्येवं ननु भारती कृतनतिः संप्रार्थिता भूरिशः
प्रादाद्वांछितमस्तु ते वरममुं मातेव वाग्देवता ॥

तथा हि ।

भोजसंगरमवेक्ष्य धन्विनो भीष्मदेवसदृशस्य वेपते ।
सायकै रिपुतनौ प्रवर्षतो मानसं पविसमं मुहुर्मुहुः ॥०

After these two *'vandivarau'* have made their exit (fol. 5*a*), the dialogue is carried on to the end of the first act by three *Vaishṇavas—Karuṇākara, Bhūrilābha*, and *Rāmadāsa*.

Act II. begins (fol. 8*a*): ततो भिन्नदेशस्थितौ निसर्गसुंदरो ऽरविंदलोचनश्च द्विजवरौ प्रविशतः ॥

निसर्गसुंदरस्तावत् । अरविंदलोचन कुतः स्थानात्समागत भवान् तत्स्थानं स्तुत्यं । यथा ।

सूर्यबिंबं विनिर्यातमिंद्राशायाः प्रगे द्विजाः ।
दृष्ट्वा स्तुवंति तामिंद्रीं हेमाद्रिशिखरद्युतिं ॥०

After these two worthies have taken their departure (fol. 12*b*), the conversation is taken up and carried on to the end by *Cārumitra* and *Kīrtivarman*.

It ends: इति तौ निष्क्रांतौ ।

श्रीमच्चक्रधरव्यासप्रसन्नोत्फुल्ललोचनः ।
वृंदावनतीशभोजो ऽयं जीयात्सूरिजनात्मनः ॥

इति श्रीमन्नारायणसरस्वतीसंपूज्यचरणकमलयुगलवेदांतवागीशभट्टाचार्यकृतौ धर्माध्यक्षव्यासश्रीगोपालनंदनव्यासश्रीचक्रधरालंकृतवृंदावनधीश[सुरजननंदनवृंदावनधीशश्रीभोजराज - सच्चरितनाम्नि श्रीनाटके द्वितीयोंकः] ॥

From सुर० this has been supplied by a later scrawling hand; but the first act has the same colophon.

[H. T. COLEBROOKE.]

## 4182.

**117a.** Foll. 30; size 10 in. by 4¾ in.; fair Devanāgarī writing, of about 1800 A.D.; thirteen lines in a page.

*Dharmavijaya nāṭaka*, an allegorical play, in 5 acts, composed—for the purpose of demonstrating the spiritual advantages of a life regulated by religious ordinances—by *Śukla Bhūdeva*, or *Bhūdeva Miśra*.

It begins: प्रकटितनिजरूपः षोडशाराभिरामे०

See A. Weber, Berlin Cat., no. 1561; Rāj. Mitra, Notices, i., p. 37.

The work has been published in the *Grantharatnamālā*, iii. (Bombay 1889).

The MS. ends: विद्याः । तदेहि वत्स सहैव तावत्साधयामः । इति नाट्येन निष्क्रांताः सर्वे ॥ इति श्रीमच्छुक्लभूदेवविरचिते धर्मविजयनाम्नि नाटके नायकनंदनो नाम पंचमोऽङ्कः ॥ समाप्तमेव नाटकं ॥

After the colophon the edition adds 3 *ślokas* which evidently merely record the date of a MS. used by the editor, viz.:

आनंदाभिधवर्षे तथासयैः संमिते शके माघे ।
कृष्णनवम्यां पूर्णं नाटकमेतच्च धर्मविजयाख्यम् ॥ १ ॥
लिखितं शंकरभिषजा वैनायकिना पुरे त्रिसंध्याख्ये । ०

This gives the late date Śaka 1776 (A.D. 1854). [H. T. COLEBROOKE.]

## 4183.

**1860.** Foll. 53; size 11¾ in. by 5½ in.; clear, modern Devanāgarī writing; 9–14 lines in a page.

*Bhūdeva's Dharmavijaya*, with a commentary, entitled *Arthadīpikā*, by the poet's disciple, *Bhaṭṭa Bhavānīśaṅkara*.

The commentary begins:

श्रीभूदेवगुरुन्नत्वा सांबशंभुस्वरूपिणः ।
भवानीशंकरेणास्य क्रियते ह्यर्थदीपिका ॥ १ ॥०

See A. Weber, Berlin Cat., no. 1561.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends :

श्रीमद्भूदेवगुरुतो ज्ञातं धर्मश्रुतादिकं ।
इति ज्ञापितमस्माभिर्नैवं नात्र प्रकल्पितं ॥ [बभूवतुः ।
अर्थः शब्दश्च सर्वोऽपि जन्मात्मानौ(? जि° or जडा°)
ययोस्तथापि चक्राते नाटकं दीपिकां च यत् ॥ १ ॥
सर्वथा व्यवहारस्य निषेद्धुं नार्हता यतः ।
लोको धर्मस्य विजयं बुद्धा धर्मे प्रवर्तितां ॥ २ ॥
न प्रातिपदिकं किंचित् स्याद्वयोः प्रतिपादकं ।
तौ भूदेवभवानीशंकराख्यौ नामकीर्तनात् ॥ ३ ॥
असंबद्धमिमं लोकं कुर्वाते हतकिल्बिषं ।
तौ ब्रह्मकूटस्थावीशौंतरात्माहं तु जीवकः ॥ ४ ॥
इत्येवंचिच्चतुर्धेति संसराद्भिर्विभाव्यतां(!) ।
नवत्वेष्टसुधांश्वब्दे शंभुनैतद्विभावितं(°षितं W.) ॥ ५ ॥
मार्गमस्तककृष्णायां पंचम्यां पुस्तकं मुदा ॥ ६ ॥

इति श्रीमद्भट्टभवानीशंकरविरचितायां धर्मविजयव्याख्यायामर्थदीपिकाख्यायां पंचमोऽङ्कः ॥

Seeing that the Berlin MS. has the same date (Saṃv. 1869 = 1812 A.D.), one might feel inclined, with Weber, to take it to be the date of the composition of the commentary, were it not that Peterson, Rep. iv., no. 710, mentions a MS. of the work dated Saṃv. 1832.

[DR. JOHN TAYLOR.]

## 4184.

**1183b.** Foll. 30 ; size 13½ in. by 4⅝ in. ; indifferent Bengālī handwriting of 1805 A.D. ; eight lines in a page.

*Kuvalayavatī nāṭikā*, a short play on the love of *Mādhava* (*Kṛishṇa*) and *Kuvalayavatī* ; by *Kṛishṇa Kaviśekhara*.

The MS. is rather incorrect, especially in the *Prākṛit* passages.

It begins :

यः सूत्रेति(? संत्राति) जगन्ति यं परिचरन्त्यष्टौ महासिद्धयो
येन स्वप्नपदे ऽर्पिता दिविषदो यस्मै हरन्ते बलिं ।
वायुर्वाति विभर्ति भूर्वितपते सूर्योऽपि विश्वं यतो
यस्मै तत्प्रभयावभाति रमते यस्मिंश्च तस्मै नमः ॥

नान्द्यन्ते सूत्रधारः ॥ अलमतिविस्तरेण । आदिष्टो ऽस्मि परिषदा । अस्ति परिचितरघुकारभारतीतीर्थभूतस्य श्रीकृष्णनाथः कविशेख[र]स्य कृतिरभिनवा कुवलयवती नाम नाटिका । सा च रमणीयकथाकुतूहलेनास्माभिरद्य कौमुदीमहोत्सवे यथाप्रयोगमवश्यमालोकयितव्या । तत्क्रियतां नेपथ्यपरिग्रह इति । ममापि स्थाने महानत्र परितोषो हृदयस्य यात्मयमसुलभो ऽयमेकत्वसंनिपातो गुणातिशयानां । तथा हि ।

चरितमिदंयदाश्चर्यचित्रं(? चरितमिदमुदार°)
परिषदतीव गुणस्पृहावतीयं ।
वयमपि मधुरप्रयोगरक्ताः
कृतिरभिजातरसस्थितिः कवेश्च ॥

नेपथ्याभिमुखम् । आर्ये इतस्तावत् ॥ प्रविश्य नटी । अयि (? इअम्हि) आनवेतु अज्जो(!) ॥ सूत्र° । आर्ये कुवलयवतीदर्शनोत्सुका परिषत् । तद्यथायदादिष्टो वर्णिकाग्रहणाय पात्रवर्गः ।° --- ॥ इति निष्क्रान्तौ ॥ प्रस्तावना ॥

ततः प्रविशति माधवो मधुकरश्च ॥

माधवः । ललितपदेन परिक्रम्य सहर्षं । सखे मधुकर अद्य सर्वतो विशेषितगुणो ऽयं रमणीयभूयिष्ठो वनाभोगः । तथा हि ।

ये पूर्वं परिणामपाण्डुरुचयः शाखावशेषा द्रुमास्
ते लाक्षायसना हिमीमभिनवा[1] प्रापुः श्रियं पल्लवैः ।
नीहारग्लपिताश्च या मधुकरैरज्ञातकल्पा लता
हूस्तो(? दृष्टे)कुन्दिनि कुड्मले प्रणयिता तासां परा बध्यते ॥

This poor play, consisting of 4 acts, looks like an imitation of the first part of the *Śakuntalā*. The hero meets *Kuvalayavatī*, accompanied by her two friends, *Navamālikā* and *Campakamālikā* (afterwards joined by *Caturikā*), in Vṛindāvana, and falls in love with her ; but, in spite of every care to keep the *liaison* secret, *Rādhikā* (with her *confidante Ratnamālī*) becomes aware of it and takes offence. In the end, however, she condones the temporary aberration of her lover, and *Kuvalayavatī* and her friends are handed over to her as her handmaids ; and matrimonial harmony is thus once more restored in Vṛindāvana. It would almost seem as if the author, for want of inspiration, had been in haste to bring his piece to a conclusion.

[1] Read हीमामभिनवा or इमाम°

DR.RUPNATHJI(DR.RUPAK NATH)

On the margin of the last page, the play is called *Kuvalayaratināṭikā*, both in Bengālī and Devanāgarī characters.

[H. T. Colebrooke.]

## 4185.

**1713c.** Foll. 15; size 9 in. by 3½ in.; fair Devanāgarī writing, of 1744 A.D.; eleven lines in a page.

*Narakadhvaṃsa*, a dramatic entertainment, in one act, of the kind called *vyāyoga*, by *Dharma Sūri*, son of *Parvateśvara Sudhī*, who belonged to a Benares family distinguished for the proficiency of its members in philosophical studies.

The subject of the piece is the victory of *Kṛishṇa* over the *Asura Naraka* near Prāgjyotisha; *Purandara* and *Śacī*, with their followers, being introduced as witnesses of the fight, and their dialogue giving a vivid description of all its incidents.

The *Prākrit* passages are throughout followed immediately by the Sanskrit version.

It begins:

कस्तूरीपरिदिग्धमुग्धकमलावक्षोजकुचौ भुवं
नीलाद्रेः शिखरेषु नित्यकुतुकौ कैटभारिरव्यात्स नः ।
प्रत्यंगाभरणेषु दीप्तवपुषः सेवासु देवाः स्फुटां
यस्याशेषसुरात्मतां विदधते चंद्रार्धचूडादयः ॥ १ ॥

नांद्यंते सूत्रधारः । सकौतुकं सर्वतो ऽवलोक्य । अहो प्रमदयति मम हृदयं प्राभातिकी लक्ष्मीः ।

शय्यांबरं शशिनिशोरिव भाति लाक्षा-
तांबूलयोरिव रसैररुणाभ्रलेशैः ।
हारैः प्रसूननिकरैरिव तारकैश्च
चूर्णैः पटीरशकलैरिव चंद्रिकांशैः ॥ २ ॥

अपि च ।

त्रासादासादिताशाविवरभुवि हरेरंधकारामरारौ
तद्योधाः प्राप्तबाधा इव दिशि विहगा विद्रवंति ध्वनंतः ।
भ्रष्टाश्छिन्नाः पताका इव सलिलधरा हारवत्तारकाश्च
प्रांतप्रालंबिबिंबोऽप्यरसमरभुवि छत्रवच्छीतरोचीः ॥ ३ ॥

प्राचीमवलोक्य ।

प्राक्छिखरिशिखरशेखरतरुणारुणकिरणमंजरी तरणेः ।
विदधाति रथतुरंगमचूडारुणचारुचामरभ्रांतिं ॥ ४ ॥

पुनर्विलोक्य । उदितः खलु भगवान् भक्तजनश्रेयस्करो भास्करः । नूनमयमधुना कामपि कामुकपरिपाटीमाटीकते । यदिदानीं

नीतक्षपः क्वचिदधःकृतजीवनाया
रागान्वितस्तुहिनबाष्पमुचो नलिन्याः ।
लीनश्रियो विगलितालिगिरो विवस्वान्
पुष्णाति पादपतनेन पुनः प्रहर्षं ॥ ५ ॥

वियद्विलोक्य साश्चर्यं ।

श्यामीभूता सुरपथवनी वासरेष्वातपेन
स्पृष्टा धात्रा निशि विरचितैर्दोहदैर्ध्वांतधूपैः ।
सद्यस्ताराकुसुमरुचिरा मंडलेनास्य भानोः
संप्रत्येषा भवति फलिता पक्वबिम्बांशुभिश्च ॥ ६ ॥

तदेनमभिमतः फलप्राप्तये भगवंतं भानुमंतमुपतिष्ठे ।

नमस्तमःकर्दमदुर्दमांबुधि-
प्रनष्टचेष्टाखिलजंतुसंततिं ।
प्रसार्यमाणैः पटुदीर्घरश्मिभिर्
जगत्त्रयीमुद्धरते विवस्वते ॥ ७ ॥

इति सादरं प्रणमति । वियद्विलोक्य सहर्षं ।

कालाभ्रद्विपपाकलः कतकजक्षोदः कठोरांभसां
केकाम्नायकुहूः कलानिधिमणेः शीर्णोपलोद्धर्षणं ।
कंसारेः प्रतिबोधिका कमलिनीकादंबयोः कुट्टनी
कालः कोऽपि करोति काशसुरभिः कामं मनःकौतुकं ॥ ८ ॥

अपि च ।

चापान् पुंड्रेक्षुरूपान् कमलकुवलयोत्फुल्लमल्लीक्षुरप्रान्
दीप्तांश्चोद्दृप्तसप्तच्छदमधुमदवद्गंधवाहद्विपेंद्रान् ।
निर्बाधान् हंसयोधाञ्शरकुसुमरजोवैजयंतीर्जयंती:
सज्जीकुर्वन् समंताद्वदति शरदृतुर्जैत्रयात्रां स्मरस्य ॥ ९ ॥

अपि च ।

सप्तच्छदस्तबकसंभृतसौरभांध-
पुष्पंधयप्रणयमंथरगंधवाहाः ।
व्यातन्वते विमलशालिवनालिकेलि-
लोलद्भुजंगयुवपुंगवमंगलानि ॥ १० ॥

तदहं तावदाश्रिताभिमतफलप्रदायकस्य निखिलनिगमश्रेणीमुक्तावलीनायकस्य कमलामुखकमलदिननायकस्य भगवतो जगन्नायकस्य शरत्कालविहितोत्सवसमालोकनातिकौतुकान् सकलकलाकलापकोविदान् पारिषदान् सत्वरमुपगम्य कमपि

DR.RUPNATHJI( DR.RUPAK NATH )

रूपकविशेषमभिनीय विज्ञानं सफलीकरिष्यामीति परिक्रम्यावलोक्य च । अयं खलु लवणजलनिधेरुल्लोलकल्लोलजालेन कूले समुत्सारितो महेंद्रनीलमणिराशिरिव प्रकाशते नीलसुंदरगिरिः । यदिदानीं

चांपेयसांद्रवनराजिविराजमान-
पार्श्वद्वयस्तुहिनपांडुरतुंगशृंगः ।
निष्यंदमानविततायतहेमपद्म-
भ्राजद्विलद्युमुखताल्मैधियं तनोति ॥ ११ ॥

पार्श्वतोऽवलोक्य सहर्षं । हंतास्मद्विधेयं भागधेयं । इह हि

जगत्पतेरस्य दयार्द्रमूर्तिभिः
कटाक्षवीक्षाभिरभिक्षणोक्षिते ।
सुशीतलच्छायवटांतिकस्थले
सुखोपविष्टाः स्वयमेव सज्जनाः ॥ १२ ॥

तदिह विलंबः श्रेयसोंतरायः । आर्ये इतस्तावत् ॥

प्रविश्य नटी । अय्य(!) इयम्हि । आर्य एषास्मि । किं करणिज्जमाणवेदु अय्यो । किं करणीयमाज्ञापयत्वार्यः ॥

सू° । आर्ये किमन्यदस्ति करणीयमेतत्सामाजिकमनोरंजनात् ॥

नटी । अज्ज कहं करणिज्जं सामाइअहिअआणुरंजणं । आर्य कथं करणीयं सामाजिकहृदयानुरंजनं ॥

सू° । विख्यातेऽजनि पर्वतेश्वरसुधीः श्रीवारणास्यन्वये
दक्षो दर्शनकारिणां सुमनसामैकात्म्यलीलायितं ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा(?°णा)
व्यायोगो रसजृंभितोऽस्ति नरकध्वंसाभिधो नूतनः ॥ १३ ॥

तदभिनयेन सभासदः संतोषणीयाः ॥

नटी । कहं अह्माण(°णं) अणतिमेत्तरमणिज्जो रूपआहिणवो एदाणं महप्पाणं सळहापदं (? सलाघा°) हविस्सदि । कथमस्माकमनतिमात्ररमणीयो रूपकाभिनयो एतेषां महात्मनां श्लाघापदं भविष्यति ।

सू° । महात्मान एव रमणीयगुणलेशवत्तयापि परकृतिं श्लाघंते । तथाहि ।

दोषाकरोऽपि नित्यं सुधाकरत्वेन चंद्रमा लोके ।
श्लाघ्यतरो भवति बुधैर्न तथा खलु पंकजन्मभिस्तु जडैः ॥ १४ ॥

नटी । अय्य चंदम्मि सुहाअरत्तणं विअ अह्माणं रूपआहिणवि (? °म्मि) रमणिज्जो को उणो ।
आर्य चंद्रे सुधाकरत्वमिवास्माकं रूपकाभिनये रमणीयः को गुणः ।

सू° । अस्ति खल्वत्राप्यमृतरसनिष्यंदो सकलतमस्तोमपरिपंथी नरहरेर्नरकासुरनिबर्हणोदाहरणरूपो गुणशिरोमणिः । इत्यमेवैतत् कविना स्वकाव्ये बालभागवतेऽप्युदीरितं ।

विनिंदिताः केन च पंकजन्मना जडेन दोषोपहिता अपि स्वतः ।
ममोक्रयो विष्णुपदस्पृशो बुधैः कला इव श्लाघ्यतमाः कलानिधेः ॥ [१५ ॥

नटी । निसग्गवक्कतक्ककक्कसवअणविळासस्स धम्मसूरिणो वअणाइं कहं सुहारसमहुराइं संवुत्ताइं ।
निसर्गवक्रतर्ककर्कशवचनविलासस्य धर्मसूरेर्वचनानि कथं सुधारसमधुराणि संवृत्तानि ।

सू° । तर्के कर्कशता गतापि नितरां वाग्वैखरी सत्कवेः
माधुर्यं प्रकटीकरोति कविताकालेषु किं चाद्भुतं ।
पश्चाद्यांतकठोरतामुपगता ग्रीष्मे मयूखावलिः
किं नाविष्कुरुते नवामृतभरं भास्वन्निधेः प्रावृषि ॥ १६ ॥

नटी । जुत्तमुत्तमज्जेण । युक्तमुक्तमार्येण ॥

सू° । आर्ये कुतो विलंबनेन(°ने) ।
धाराधरश्यामलमूर्तिभिः खिन्नामाशां शचीपतेः ।
हरिः प्रसादयन्नेव नाट्ये त्वरयतीह नः ॥ १७ ॥

नेपथ्ये । भीति विपक्षजनतोजनितां जहीहि
देवेश मुंच नगरीं नगरीयसीं त्वां ।
रक्षोबलेन सहसा सह सायकाग्नौ
हव्यं करोमि नरकं नरकंटकं तं ॥ १८ ॥

सू° । सविमर्शं । नूनमयं नरकासुरत्रासेन स्वपुरं परित्यज्य पुरंदरमाश्वासयतः कृष्णस्य वेषमभिनीतवतो ममानुजस्य कलहंसकंधरस्यालापः श्रूयते । तदयमविलंबितमेव समरोन्मुखो निर्गमिष्यति । पार्श्वतो विलोक्य सहर्षं । अयंहि

अंके निधाय दयितामिह सत्यभामां
प्राप्तां पुरैव समरादिव वीरलक्ष्मीं ।
दीव्यन् रथे महति दारुकचोदिताश्वे
पंचायुधीपरिकरः पुरतोऽभ्युपैति ॥ १९ ॥

तदावामनंतरक[र]णीयाय सज्जीभवावः ॥ इति निष्क्रांतौ ॥ प्रस्तावना ॥ ततः प्रविशति यथानिर्दिष्टः कृष्णः ॥

कृ° । अयि दारुक प्राग्ज्योतिषं प्रति सत्वरं चोदयाश्वान् ॥

दारुकः । आयुष्मन् मया निश्चितपूर्वमेव भवतश्चिकीर्षितमेतत्पुरंदरागमनात् ॥°

It ends: पुरंदरः। नूनमयं द्वारकापुरपरिसरे संचरन्मुरहरो हलधरेण प्रत्युद्गम्यते । तद्वयमप्येतदनुज्ञाताः सुरपुरं प्रविशामः ॥ इति नंदनंदनस्यंदनस्यंदनसविधं मकरंदः समवतरति ॥

पु° । भगवन्नभिवंदते पुरंदरः ॥

कृष्णः । अप्रतिपक्षो भूयाः ॥

पु° । भगवन्ननुगृहीतोऽस्मि ॥

कृ° । इदं तन्मणिकुंडलाभरणयुगलमदित्यै समर्पय ॥



DR.RUPAK NATH ( DR.RUPNATHJI )

पु° । सहर्षं । महाप्रसादः । इति सादरं गृह्णाति ॥
कृ° । पुरंदर किं ते भूयः प्रियमुपकरोमि ॥
पु° । इतः परं किमु कर्तव्यं ।

दुर्वारा समरे सुरेण सहिता सर्वापि रक्षश्चमूर्
गर्वांधो दलितश्च सोऽपि नरकः पूर्वामराणां प्रभुः ।
निर्वाणं गमितश्च शोकदहनो गीर्वाणमातुस्ततः
सर्वाण्यस्मदपेक्षितानि भगवन्निर्वाहितानि त्वया ॥ ८१॥

तथाप्येतदस्तु भरतवाक्यं ।

भामत्युल्लसिता रता विवरणे तंत्रे निरूढिं गताः
सच्चिंतामणयः समुज्ज्वलयशोलीलावतीवल्लभाः ।
सांख्यन्यायविचारचंचुमतयः प्राभाकरप्रक्रिया
धौरेयस्फुरणा भवंत्ववनिपा विप्राश्च नित्योत्सवाः ॥ ८२॥
आबिभ्रता श्रियमुरस्यथवा शिरोधाव्
अब्जं च नाभिसुषिरे यदि वा कपर्दे ।
पाणौ सुदर्शनवताप्यथवा ललाटे
देवेन केनचिदिदं जगदे तु मोदं ॥ ८३ ॥

इति निष्क्रांताः सर्वे । व्यायोगः समाप्तः ॥ संवत् १८[०]१ आषाढशुद्धद्वितीयायां लिखितं मृत्युंजयेन ॥ श्रीमात्रे नमः ॥

Whilst each leaf is marked नरकध्वंसः नाटकं (or ना°) व्या°, on the title-page the work is called नरकासुरध्वंसः ।

If, by his reference to a *Bālabhāgavata*, the author (as would seem) refers to his own work, no such work of his is known to exist, unless, indeed, the *Kūrmabhaṭṭa*, to whom such a work is ascribed in Bühler's Cat. of Gujarāt, etc., MSS., ii., 14, is a mistake for *Dharmabhaṭṭa*.

The MS. belonged at one time to one *Nārāyaṇa Bhaṭṭa*. [H. T. Colebrooke.]

## 4186.

**2353 a.** Foll. 19; size $10\frac{3}{4}$ in. by $5\frac{1}{2}$ in.; good Devanāgarī writing, of 1588 A.D.: eleven lines in a page.

*Vāsantikā nāṭikā*, in 4 acts, by *Rāmacandra*. The plot is the familiar one of a king (*Haṃsaketu* of Pushpapura) falling in love with a singing girl (*Vāsantikā*), and of a jealous queen (*Haṃsamālā*, daughter of *Kuntaleśvara*) trying to separate them, till at last, *Vāsantikā* is found to be the long-missing daughter of *Malayaketu*, Mahārāja of Kesarapura, on the banks of the Kāverī, who is at the same time the queen's uncle. The princess being compelled by a curse to become a maid-servant till a wonderful jewel (*hāramadhyamaṇi*) of which she has been robbed is recovered, her mother's sister, *Vasumatī*, in the disguise of a female mendicant, named *Rāgataraṅgiṇī*, takes her to the court of Pushpapura. Here at last the jewel turns up again, with a prediction attached to it by the sage *Vāmadeva* to the effect that she shall be wed by *Haṃsaketu*, who at the same time shall become *cakravartin*. Thus the queen at length becomes reconciled to the proposed addition to the king's seraglio.

It begins: श्रीगोपीजनवल्लभाय नमः ।

आयाता पुरतः सखीजनगिरा व्रीडावनम्रानना
स्विद्यत्स्वच्छकपोलमीक्षितवती रोमांचितांगं वरं ।
व्यावृत्ताननमीक्षितालिवदना व्यावर्तमाना मनाक्
साशंकं शशिमौलिना गिरिसुताश्लिष्टा शिवायास्तु वः ॥१॥

नांद्यंते सूत्रधारः । अलमतिप्रस्तुतेन । पुरतोऽवलोक्य । हंत सिद्धार्थोऽस्मि । यतः । समुदिता नानाद्विगंतरेभ्यो भगवतस्त्रिलोचनस्य यात्रायां यात्रिका लोकास्तद्यावदत्र गच्छामि । परिक्रामति ।

नेपथ्ये । हंहो सूत्रधार वयमतिभीष्मग्रीष्ममिहिरकरसंताप-भयात् कतिपयवासरानिहैवातिवाहयिष्यामः । तदनुग्रहबुद्ध्यास्मासु भवता रामचंद्रकवेः कृतिर्वासंतिका नाम नाटिका प्रयोक्तव्येत्यार्यविदग्धमिश्रा विज्ञापयंति ।

सूत्र° । आकर्ण्य । हंत हृदयानुसारिणा प्रसन्नं दैवेन । उच्चैः । भो भोः सामाजिका एष तावदहं गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि ॥

पुनर्नेपथ्ये । त्वरतां२ भवान् ॥

सूत्र° । नेपथ्याभिमुखमवलोक्य । आर्ये इतस्तावत् ॥

प्रविश्य नटी । अज्ज एसंम्हि । आणवेदु अज्जो ॥

सूत्र° । आर्ये आज्ञप्तोऽस्मि तावदेतैरार्यविदग्धमिश्रैर्वासंतिका नाम नाटिका नाटयितव्येति ॥

DR.RUPNATHJI( DR.RUPAK NATH )

नटी। सविश्वासं। ऊज्ज ण मे अंगाइं पप्फुरंति॥

सूत्र°। ससंभ्रमं। किमिति २॥

नटी। सास्रं। अज्ज अज्ज (आर्य अद्य) कुंडिनपुरादो आअदेण (आगतेन) केणावि कुशीलवेण विहत्थीकिदम्हि (विहस्ता कृतास्मि)॥

सूत्र°। कथमिव॥

नटी। जं तुह बहिणिआ मातुस्सिआए (यत्तव भगिनीं मातृष्वसा) समं मातुलकुलादो जणअघरं पट्ठिदा (जनकगृहं प्रस्थिता)।

सूत्र°। ततस्ततः॥

नटी। तदो कुदोवि उवट्ठिदेण महाणीकेण विअट्ठिदा (विघट्टिता) कुतोवि (कुत्रापि) देसंतरे लीणा। रोदिति॥

सूत्र°। हा कष्टं। अथ तत्रभवती भवत्या मातृष्वसा किंवृत्ता॥

नटी। अश्रूणि प्रमृज्य। तदो णिवुत्ते तस्सिं सा विड्दो तदो विलोइअ सणिव्वेदा कासाए परिधरिअ तं अणेसिदुं देसंतरे वाद्युडइ॥

सूत्र°। सनिश्वासं। धिग्दैवं यदेतादृश्यो ऽपि महाकुलसंभवास्तादृशीमवस्थां प्रतिपद्यंते। क्षणं ध्यात्वा। आर्ये अहमप्यनया चिंतया परिप्लुष्टचित्तः शक्नोमि नात्मानं धारयितुं। यतः।

चिंतया भ्रष्टचित्तानां धीरतां वहतामपि।
अनास्था जायते नित्यं संस्तुतेष्वपि वस्तुषु॥

नेपथ्ये। साधु रे भरतपुत्र साधु सम्यगभिहितं चिंतयेत्यादि पठति॥

सूत्र°। आकर्ण्यावलोक्य च। आर्ये संप्राप्तस्तत्रैव महाराजस्य हंसकेतोरमात्यो वसुमित्रः। तदेहि गच्छावः। इति निष्क्रांतौ॥ प्रस्तावना॥

ततः प्रविशति वसुमित्रः।

वसु°। साधु रे साधु सम्यगभिहितं चिंतयेत्यादि पठित्वा चिरं विचिंत्य। सत्यं चिंताविष्टानामीदृश्येव रीतिः। आत्मानं निर्वर्ण्य। आः अहमपीत्थंभूत एवास्मि। यतः।

राजकार्याणि सर्वाणि हित्वा संप्रति शून्यया।
चित्तवृत्त्या मयात्मापि न विशेषाद्विभाव्यते॥

अथवा प्रभूणामुदयमुपेक्षमाणानां भृत्यानां कुतः श्रेयः। तथाप्येतावच्चिंतनीयं। यत्सप्रश्रयमनुनीतेन महर्षिणा परिव्राजिकाशिष्याया वासंतिकायाः पाणिपीडनमहोत्सवमनुभवत एव वत्सहंसकेतोश्चक्रवर्तित्वमित्यावेदितं। देव्या च कुंतलेश्वरदुहित्रा हंसमालया सबहुमानमाहूयामात्यवसुमित्र [।] इयं संगीततरंगिणी परिव्राजिकास्मास्वतिस्निह्यति। अस्मास्वेव स्थातुमिच्छति। तदत्रभवतीं सशिष्यां त्वयि निक्षेपमिव निक्षिपामि। अनंतरं कर्णे लगित्वा यथेनां वासंतिकां न नयनगोचरीकरोत्यार्यपुत्रस्तथा विधेहीति मामादिभिर्निगृहीतोऽस्मि। तदत्र किं युक्तं। क्षणं ध्यात्वा। भवतु भृत्यानां प्रभुकृत्यमेवोद्देश्यं न तु कर्तृविशेषमस्मत्पुकरादितीर्थेन यंचयिष्यामि॥ नेपथ्ये कलकलः॥

वसु°। आकर्ण्यावलोक्य च। अये यथा मंथरस्रतोहारशतकरकलितकनकवेत्रयष्टिप्रहारप्रतिसार्यमाणनागरिकजनकोलाहलः श्रूयते तथा तर्कयामि यत्प्रचलित एव धर्मासनादुत्थाय मधुरेण सममेकांतसेवनाय देवः। तत्कार्यशेषं चिंतयामीति निष्क्रांतः॥ विष्कंभकः॥

ततः प्रविशति राजा विदूषकश्च॥

राजा। वयस्य पश्य। सोऽयमुत्कंठातरलितहृदयः समुपागतः सुरभिसमयः। संप्रति हि

भूयो भूयः कुसुमविशिखद्वेषिभालाग्निवह्नि-
ज्वालामालाकवलितवपुःकामिकेदारसंस्थः।
वस्यन्नस्यद्धरिणनयनादृष्टिपीयूषवृष्ट्या
सिक्तः सिक्तो मनसिजतरुः पल्लवान्याद्धाति॥°

The Sanskrit version of the Prākrit passages is only given in the margin of the first few pages. The writing of foll. 3-10 has suffered from damp along the right-side edge; whilst the left edge of fol. 14, and the right-hand edge of the last three leaves has been torn or eaten away.

It ends: राजा। इतः पर - - - मस्ति। यतः।

नीतस्तेन महर्षिणा स्मृतिपथं देव्या प्रसादः कृतो
जातास्तेऽपि दिगंतगीतयशसः सं[तोषिताः पा]र्थिवाः।
त्वं चापि प्रणयोद्धुरा समभवस्तस्मै पुनः श्रेयसे
प्राप्ता चेयमुदंचदंबुजमुखी नातः परं प्राथ-(r. प्रार्थ्यते)॥

[तथा]पीदमस्तु भरतवाक्यं।

काले तोयमुचो भवंतु जलदाः क्षोणीभुजः पालयं-
त्वेतामंबुधिमेखलां वसु[धरां प]र्यन्तशातारयः।
काव्यालापकथाविदग्धमनसो भूयासुरेते जनाः
शर्वः शर्मपरंपराः प्रवितरत्वास (-) ˘ - नां मुहुः॥

इति निष्क्रांताः सर्वे॥ चतुर्थोऽंकः॥ इति रामचंद्रकृता वासंतिका नाम नाटिका समाप्ता॥ सं १६४५ शनौ आ। कृष्णजीसुतमुरारिणा लिखिता। योगोपीजनवल्लभाय सततं कुर्मो नमो ना-॥

Fol. 1a has the statement of a former owner: व्यासहरिरामने विभागे। [GAIKAWAR.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 4187.

**2353 b.** Foll. 25; size 10 in. by 3¾ in.; good Devanāgarī writing, of 1470 A.D.; eight lines in a page.

*Pāṇḍavābhyudayaṃ chāyānāṭakaṃ*, a dramatized account of tho birth of *Draupadī* from the smoke of a sacrifice performed by *Drupada*, king of Pañcāla (act I.), and of her being given away in marriage, by *svayaṃvara*, to the five Pāṇḍava princes (act II.); composed, by *Vyāsa-śrī-Rāmadeva*, for the delectation of his patron, *Vīra Raṇamalladeva nṛipati*, grandson of *Haribhrama* (*Haribrahman*).

The MS., though written by a skilled calligraphist, is, on the whole, rather incorrect in its readings; and there are occasional small lacunae, probably caused by flaws in the original MS. In some places a second hand has made corrections.

It begins:

विसर्गोत्सर्गादाविह किल विधातुः समुदिता
परा सा काचिद्वागचरमचिदुन्मेषमहसः ।
पुराणं वेदानप्यखिलपुरुषार्थाश्रयतरून्
गुरून् पंचाम्नायान् सममय भजंती विजयते ॥ १ ॥

नांद्यंते सूत्रधारः । समंतादवलोक्य सचमत्कारं । अये कथमियं प्रवृत्तैव शरत् । यदिदमपगतजलदपटलकलंकशंकमपंकसंकरममलसलिलकेलिलोलकोलाहलिकलहंसकुलाकुलितकमलवनं भुवनमंडलमलंकरोति कापि समयलक्ष्मीः ।

अपि च ।

एतस्मिन् शरदुत्सवेऽतिसुभगं गायंति भृंगांगना
नृत्यंत्यब्जकराभिनीतिभिरिमा राजीविनीराजयः ।
मुक्ताजालकशालिसंततसितज्योत्स्नावितानं वियच्छ्रेणीभिः ककुभां मुखेषु च शुकैरातन्यते तोरणं ॥ २ ॥

किंचित्परिक्रम्य सोल्लासं । अहो महोदयपरंपरामिव पश्यामि । यदिह जगदुदरजागरूककौमुदीमहसि हसितहरिन्मुखे सुखितसुरमुनिमनुजमनोहारिणि हरिप्रबोधमहोत्सवे त्रिभुवनजनमनःप्रमदमादधानो जगदुदयमहानाटिकाभिनयमन्नारभत कोऽपि सकलकलामयः समयसूत्रधारः । तथा हि ।

तत्रादृग्विधिनाऽभिनेतु[म]भितः शुद्धप्रबंधक्रमं
यः संमूर्छति मंजुले मधुकरप्रारब्धगीतध्वनौ ।
उत्सार्याशु घनावलीजवनिकामस्मिन् जगन्मंडपे
प्रत्यग्रप्रथितप्रसादसुमुखीः प्रावेशयद्दिग्वधूः ॥ ३ ॥

साकूतमिव । अहमपि तदप्र(?०नु) विविधवीरचूडामणेरसमसाहसकस्य स्वयमंकायातविजयश्रीस्वयंवरमालालंकृतकंठकंदलस्य भुजबलदलितसकलारातेरारतस्य श्रीहरिभ्रमतनुजजन्मनो महामंडलेश्वरस्य श्रीमतो रणमल्लस्य महानवम्युत्सवमनुमिलितसमस्तसामंतचक्रे ऽनुकृतशक्रसंसदि दर्शितसकलकलाकला[प]शालिनि निखिलनिरवद्यविद्याविद्योतमानेऽस्मिन्नास्थानीमंडपे कस्यचित्प्रबंधस्याभिनयेन निजकुलकलां कृतार्थयितुमिच्छामि । तद्भवतु । परिक्रम्य नेपथ्याभिमुखमवलोक्य । आर्ये इतस्तावत् ॥

प्रविश्य नटी । सप्रश्रयमंजलिं बद्ध्वा । एसम्हि । आणवेदु अज्जो ।

सूत्रधारः सादरं । आर्ये ननु प्रवृत्तैव तावदियं शरत् ।

नटी साश्चर्यं । अज्ज कज्जलकिसिण सुघणघोरंधयामुक्कलिदभुवणकोसम्हि । ०_ _

सूत्र० । सस्तं(? सरसं) । अपि एतदर्थमेवाकारितासि । किंच विदितमेव तावद्भवत्या ।

अस्ति स्वस्त्ययनैकहेतुरखिलक्ष्मावर्मसत्कर्मणाम्
आविर्भावितभावितत्कृतयुगाचारप्रचारः क्षितौ ।
वीरश्रीरणमल्लदेवनृपतिस्तन्नद्गुणे रागिणी
यत्र श्रीश्च सरस्वती च वसतस्त्यक्त्वा निजं मत्सरं ॥ ६ ॥

अपि च ।

न जिह्वासाहस्रं न खलु विपुलत्वं च मनसो
न चायुःसातत्ये कतिचन विधातुः प्रतिभुवः ।
गुणानामास्थानं निधिरनवधिः शौर्यमहसः
कथं वा वर्ण्यः स्याद्गणत रणमल्लः क्षितिपतिः ॥ ७ ॥ ०

आर्ये निरूपयामि तावत्किमपि रूपकमनुरूपं । इति चिंतामभिनीय सहर्षोल्लासं । अस्ति किल सकलसामंतचक्रचूडामणिना कबंधजकुलावतंसेनामैव(?०मुनैव) नरपतिनाभ्यर्थितस्य सरसकवेर्व्यासश्रीरामदेवस्य निर्मितिरभिनवं पांडवाभ्युदयं नाम छायानाटकं । तदभिनयेन ०इमं नृपतिमाराधयिष्यामः । यदियमहिमामग्री(?) ।

मद्भाग्यैः नटकर्ममर्मनिपुणाः सभ्या गुणग्राहिणो
वाणी रामकवेरवेक्षितरसौचित्या चमत्कारिणी ।
पांडूनां चरितं च सिंचति सुधाधाराभिरंतः सतां
स्वामी श्रीरणमल्ल एव निखिलक्ष्मापालचूडामणिः ॥ १० ॥
०१३॥

DR.RUPNATHJI( DR.RUPAK NATH )

नेपथ्ये । अवि(? अयि) भागुरे कुशकुसुमसमृद्धिवर्धितस्तावदति-
विमलसलिलाशयालंकृतः किमपि कमनीयो ऽयं देशः ।
सूत्र० । श्रुत्वा । सहर्षं । आर्यं समुपक्रांतमेव वर्णकैः । यदयं मुख्य-
नामा ममानुजो गृहीत[कुशकुसुमो] जावालिरित एवा-
भिवर्तते । तदेहि । आवामप्यनंतरकरणीयाय सज्जी-
भवावः ॥ निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति गृहीतकुशकुसुमः सकमंडलुर्जावालिः ।

जावालिः । ऊर्ध्वमवलोक्य । अहो । विदलितमिव गगनतलं ।
पुरस्तादवलोक्य । प्रभातमिव पश्यामि ।०

*Jāvāli* is joined by *Bhāguri*, who tells the story (heard from *Śālaṅkāyana*—pupil of *mahāmuni Śamīka*, dwelling on the Śrīparvata—who has come from the south country to king *Drupada's* sacrifice) of a *Brāhmaṇī* widow who comes to stay at Ekacakrā in a Brāhman's out-house (*aṅgaṇa-kuṭīraka*) with her five sons, one of whom, by dint of great strength and valour, subsequently rids the town of a *Bakarākshasa*, to whom the Brāhman, according to the daily custom, was to have given himself up; whereupon the widow with her sons disappears from the city.

The *vishkambaka* completed, the first act begins thus (fol. 9*b*):—

नेपथ्ये । भोः२ वितताध्वरोपचारपरिचारकाः । समाज्ञा-
पयति वः सर्वानेष देवो देवयजनमधिवसन् पांचालचक्रवर्ती ।

अमंदस्वादूनि प्रगुणयत भोज्यानि बहुशः
समंतान्नीयंतां घृतदधिपयांसि प्रचुरतां ।
चिनुध्वं द्राक्षेक्षुप्रभृतिमधुरं वर्गमभितः
प्रसर्पत्सौरभ्यं कुरुत विविधं पानकमपि ॥ १७ ॥

अपि च ।

यद्यस्मै रुचितं प्रदेयमखिलं तस्मै तदेवादरात्
शाकानां तु पुनः पुनर्विकरणे कार्यः प्रमादो न च ।
भुंजाना व्यजनानिलैरुपरतस्वेदोद्गमाः सं[ग्र]ह-
स्रक्तांबूलविलेपनव्यतिकरे मा भूत्क्वचिद्विस्मृतिः ॥ १८ ॥

अपि च ।

कोर्यंतां गृहपक्षिणां प्रतिपथं धामानि संतुष्टये
गोभ्यः संतु समंततो ऽतिविततास्तद्ग्रासघासादयः ।

आनेतुं पथिकान् पुरान्न परितस्तिष्ठंतु दूता बहिर्
अन्यानामपि तृप्तये निशि तदाहारा प्रदेया वने ॥ १९ ॥

ततः प्रविशति राज्ञः प्रतीहारः ।

प्र० । समर्पितस्तावत् स्वामिनो निदेशः । सहर्षाश्चर्यं । अहो
निखिलजननयनमनोहारिणी किमपि कमनीयताम-
यं(०यी) यज्ञमंडपश्रीः । तथा हि ।

चेतःकर्प[क]कुंकुमांबुभिरियं सिक्ता समंतान्मही
तद्भंगिक्रममुक्तमौक्तिकशतैरंतःकृतस्वस्तिका ।
चित्रैरत्र वितानतः प्रविततैराभूतलालंबिभिः
प्रालंबैः सुमनःस्रजां जयनिकाशोभाभितस्तन्यते ॥२०॥
०२२॥

ततः प्रविशति सपरिजनो राजा ऋत्विजश्च ।

प्रतीहारः । सबहुमानमुपसृत्य । जयतु२ देव इति प्रणमति ॥

राजा । विरोचन समादिष्टं सूपकारपरिवेषिकाभिः ।

प्रती० । सप्रश्रयं । संपादितः सकल एव स्वामिपादानामादेशः ॥

राजा । सानंदं । विरोचन विभावयामि । किमपि ममधि-
कोपमनसः प्रसक्तिः ।

न संगः साधूनां न च विपुलतीर्थानुसरणं
न सेवा देवानां न च विविधविद्याव्यतिकरः ।
अमंदा[नन्दा]य प्रभवति सतां चेतसि तथा
यथा वैतानोऽयं विधिरधिकरम्यः प्रतिपदं ॥ २३ ॥

पुरतो ऽवलोक्य ऋत्विजो निर्दिशन् राजा वसुधरं प्रति ।
पश्य वसुभूते अत्र कर्माणि कथमिव प्रचरंति ।

ऋत्विजः । उग्रानेताविग्रता भूरिनाद्वान्
विश्वास्याचै(?चैं)श्चकृपा शश्वदूतीः ।
तद् वृत्रहन् सामस्तुतः सुवर्धाम्
त्वं नो विश्वान पथिना पाहि दाश्वन् ॥ २४ ॥

इति होमं नाटयंति ।

राजा । सहर्षं । अहो प्रथमसवनाह्वानगानादिध्वनिरयं मनः-
प्रमदमातनोति ।०

It ends: द्वैपायनः । राजन् श्रूयतां ।

निर्गत्य लाक्षागृहतः प्रदीप्तात् परोचनं(!) शांतिहविर्विधाय ।
गुप्तं चरंतोऽपि ममाज्ञयात्र प्राप्तास्त एते नृपपांडुपुत्राः ॥ ३६ ॥

राजा । सानंदं । भगवन् अनुगृहीतोऽस्मि संशयनिरासेन ।

द्वैपा० । अपि च ।

युधिष्ठिराद्यैरिह पंचभिस्तैरंशे किलायं मघवावतीर्णः ।
शची तवेयं तनया तदस्याः पंचाप्यमी संतु वरा नृवीराः ॥३७॥

राजा । सोपग्रहं । भगवन् किमनेन भगवता यावदेतद-
स्मत्कुलं कुरुकुलं च ।

DR.RUPNATHJI( DR.RUPAK NATH )

या एताः श्रुतयस्त्वयैव भगवन् व्यस्ताः समस्तास्तु ता
या चान्या विविधात्मिका स्मृतिरियं युष्मादृशामुक्तयः ।
किं वातः परमस्ति मूलमपरं धर्मस्य तद्यद्गिरा
पंचैते पतयो मदीयदुहितुः पत्नी तथैषामिह ॥ ३७ ॥

इति द्रौपदीं करेण गृहीत्वा पंचभ्यः समर्पयति । आकाशे दुंदुभिध्वनिः पुष्पवृष्टिश्च । नीराजनप्रभृतिमंगलाचारश्च । युधिष्ठिरादयो द्वैपायनं प्रणमंति ॥

द्वैपा० । युधिष्ठिरं प्रति । किं ते भूयः प्रियमुपकरोमि ॥

युधि० । भगवन् अतः परमपि प्रियमस्ति ।

यल्लाक्षागृहवह्निना न दहनं मार्गे हिडिंबादिभिर्
यद्विघ्नस्य लवोऽपि न प्रतिहतास्ते ते बकाद्याश्च तत् ।
स्त्रीरत्नं यदवाप्तमेष सकलो युष्मत्प्रसादोऽथवा
पांडूनामुदयस्य मूलमतुलं नाथ त्वदीयाशिषा ॥ ३९(!) ॥

तथापीदमस्तु ।

पर्जन्योऽयं विधत्तामभिमतफलदामुर्वरीं भूमिपाला
भूयासुस्त्यक्तवैराः सततगतरुजः संतु [लो]का विशोकाः ।
शश्वद्विश्वंभरांतः प्रथितनवसुधासारमाधुर्यधुर्या
वर्षा वाचः कवीनां सहृद[यहृद]यानंदमुल्लासयंतु ॥ ४० ॥

द्वैपायनः । एवमस्तु । राजानं प्रति । विधीयतां वैवाहिको विधिः ।

राजा । आदेशप्रमाणमिति निष्क्रांताः सर्वे ॥ द्वितीयोऽंकः ॥

समाप्तं चेदं पांडवाभ्युदयं नाम छायानाटकं । कृतिरियं महाकवेः श्रीरामदेवस्येति ॥ °संवत् १५२७ वर्षे फाचोत्र(!) शुदि १ शक्रे(marg. °नौ) लिखितं ॥ [GAIKAWAR.]

## 4188.

**2353 c.** Foll. 9 (one of which, fol. 2, is wanting); size 9¾ in. by 4¾ in.; fair, somewhat cursive, Devanāgarī writing, of 1574 A.D.

*Dūtāṅgada*, a short dramatic composition (*chāyānāṭaka*)—in which the ape *Aṅgada*, the son of *Bālin*, is despatched by *Rāma* to *Rāvaṇa* to demand the surrender of *Sītā*—by *Subhaṭa*.

It begins : पायात्स वः कुमुदकुंदमृणालगौरः° नीत्वो (काद्यो ed.) भवंति शिथिला जयनस्थलीषु ॥ १ ॥° See Aufrecht, Cat. Bodl., nos. 276–278.

The little work has been edited in the *Kāvyamālā*, no. 28 (1891). According to the editors, the author (like *Hemacandra*) flourished under *Kumārapāladeva* of Gujarāt (1088–1172 A.D.), in whose honour this work was composed.

The missing leaf contained from (वसं)तोत्सवे (ed. p. 2, l. 7) to वि गले (p. 5, l. 11). The discrepancy in the number of *ślokas* seems chiefly owing to some of the verses (esp. Prākṛit ones) not being numbered in the MS. There are, however, considerable differences of reading.

It ends : रामस्त्वयोध्यामभ्यागच्छन् लंकारणभुवं निदर्शयन् पुष्पकाधिरूढः सपरिवारः स्वयं च सीतां प्रति । अत्रासीत्° कंठाटवी ॥ ४६ ॥

इति नवरसगोर्भिर्जानकीं प्रीणयन्वः° प्रकटितबहुभद्रः क्षुद्रसंहारिकीर्त्तिः(! सर्वदा रामभद्रः ed.) ॥ ४७ ॥

स्वनिर्मितं किंचन गद्यबंधं कियत्कियत्प्राक्तनसत्कवींद्रैः ।
प्रोक्तं प्रगृह्य प्रविरच्यते स्म रसाढ्यमेतत्सुभटेन नाट्यं ॥ ४८ ॥

इति श्रीकविसुभटेन विरचितं दूतांगदं नाम छायानाटकं समाप्तं ॥ शाके दलवशकेतु १४९६ नभस्ये मासि शुक्लके । उदयाकरेणालेखि नाटकं दशमीगुरौ ॥

[GAIKAWAR.]

## 4189.

**1520 e.** Foll. 13 ; size 10¼ in. by 4¼ in. ; good Devanāgarī writing, of 1584 A.D. ; 12–14 lines in a page.

*Dūtāṅgada*, in a different recension from that of the preceding MS. and the printed edition, but likewise attributed to *Subhaṭa*.

Not only is the dialogue itself considerably extended in this version by the insertion of many additional stanzas, but narrative verses also are thrown in, calculated to make the work a curious hybrid between a dramatic piece (with stage directions) and a narrative poem. This latter character of the composition is rendered still more pronounced by an introduction of 39 (12 + 27) stanzas in mixed metres

DR.RUPNATHJI( DR.RUPAK NATH )

(partly, however, placed in the mouths of *Rāma* and *Hanumat*), referring to incidents which lead to the discovery of *Sītā's* hiding-place.

On the first 9 leaves of the MS. numerous marginal and interlinear notes in Gujarātī have been added, which have, however, suffered a good deal from wear along the edges.

It begins :

कौशल्यालसदालवालजनित: सीतालतालिंगित:
सिक्त: पंक्तिरथेन सोदरमहाशाखाभिरभ्युन्नत: ।
रक्षस्तीक्ष्णनिदाघपाटनपटुच्छायाश्रिपानंदकृद्
युष्मद्वांछितसत्फलानि फलतु श्रीरामकल्पद्रुम: ॥ १ ॥

उद्धर्तासौ धरित्रीभरमिति भुजगाधीश्वरो वंशवृद्धि:
संवृत्तेत्यंशुमाली दलितपरिभवा भाविनी द्यौरितींद्र: ।
हर्षोन्निद्राननश्रीरजनिजनिदिने यस्य लक्ष्मीवयस्य:
सोऽयं व: सर्वकालं सफलयतु मन:कामनां रामनामा ॥ २ ॥

कूर्म: पादोऽस्य यष्टिर्भुजगपतिरसौ भाजनं भूतधात्री
तैलापूरा: (? तैलोत्पूरा:) समुद्रा: कनकगिरिरयं वृत्ति-
वृत्तिप्ररोह: (? वृत्तवर्ति°) ।
अर्चिश्चंडांशुरोचिर्गगनमलिनमाकज्जलं दह्यमाना
शत्रुश्रेणी पतंगा जयति रघुपते त्वत्प्रतापप्रदीप: ॥ ३ ॥ °१२ ॥

आ द्वीपात्परतोऽप्यमी नृपतय: सर्वे समभ्यागता:
कन्येयं कलधौतकोमलरुचि: कीर्तिश्च लाभो [illegible] ।
नाकृष्टं न च टंकृतं न नमितं नोत्थापितं स्थानत:
केनापीदमहो महाधनुरिदं वानीरमुर्वीतले ॥ १ ॥ °

यद्बभंज जनकात्मजाकृते राघव: क्षितिपतिर्हरद्धनु: ।
तद्धनुर्गुणरवेण रोषितस्त्वाजगाम जमदग्निजो मुनि: ॥ ८ ॥

राम उ°। भो ब्रह्मन् भवता समं न घटते संग्रामवार्तापि न:
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्धनि ।
यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभुजाम्
अस्माकं भवतो यतो नवगुणं यज्ञोपवीतं बलं ॥ ९ ॥ °

हनुमानुवाच रामं प्रति ।
दृष्टा सा जनकात्मजा रघुपते युष्मत्प्रसादान्मया
लंका नाम पुरी समुद्रजठरे तत्रास्ति वीरप्रभो ।
राहुग्रस्तनिशापतेरविकला लावण्यहीनप्रभा
सीता जीवति हे नु किं वद सखे रामामृतं मानसं ॥ २७ ॥

अथ दूतांगं ॥ श्रीरामाय नम: ॥
रमंते योगिनो यत्र नित्यानंदे चिदात्मनि ।
इति रामपदेनाशौ (°सौ) परब्रह्माभिधीयते ॥ १ ॥

रामो राजमणि: सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नम: ।
रामान्नास्ति परायणं मम परं रामस्य दासो ऽस्म्यहं
रामे चित्तलय: सदा भवतु मे हे राम मां मा त्यज ॥ २ ॥

पायात्स व: कुमुदकुंदमृणालगौर:° ॥ ३ (ed. *śl.* 1) ॥

शंभो: कोदंडभंगादविदितविभव:° ॥ ४ (ed. 2) ॥

येनोल्लंघ्य तरंगिणीपतिममुं दुर्वारशाखामृगैर्
हत्वा राक्षसपुंगमेवमपरा प्रावर्तितामृग्मयी ।
सिंधुर्मानं विधित्सया जलनिधेरुल्लंघनं मार्गित:
दूतो वालिसुत: कृतो रिपुजये राम: सदा पातु न: ॥ ५ ॥

सूत्रधार: सुख्यनट°। [illegible]विश्वंभरासमुद्धरणादिवराहस्य°
महाकविना सुभटेन निर्मितं दूतांगदं नाम छायानाटकं
भवतां पुरो ऽभिनेतव्यं मया ।

सत्येव [illegible]पधिरत्र पतिव्रतात्वं
[illegible]तृता च निखिला गुरुभक्तिरत्र ।
वाल्मीकिना कविवरप्रवरेण गीते
रामायणे वदत केऽत्र गुणा न संति ॥ ७ (!) ॥

तारापतिं वानरराजलक्ष्मीं° ॥ ८ (ed. 3) ॥

तारा रुमा हरिपतिं रविजं विधाय
हत्वा पुरंदरसुतं वलिनं शरेण ।
बद्धार्णवं दाशरथि: स देव:
सुवेलशैलोपवनेषु रम्ये (? रेमे) ॥ ९ ॥

राम: । लक्ष्मणं प्रति ।
तीर्णोऽर्णव: कवलितेव कपीश्वरस्य° ॥ १० (ed. 4) ॥

लक्ष्मण: । आर्य श्रीराम कातरमनोऽवलंबिना दैवेन किं ।
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी:° ॥ ११ (ed. 5) ॥
यावल्ललाटशिखरं° ॥ १२ (ed. 6) ॥

जयति भृगुवंशतिलक: प्रथमकविर्द्विजवर: स वाल्मीकि: ।
मृदुललितपदनिबद्धं कृतमिह रामायणं येन ॥ १३ ॥
जयति रघुवंशतिलक: कौशल्याहृदयनंदनो राम: ।
दशवदननिधनकारी दाशरथि: पुंडरीकाक्ष: ॥ १४ ॥
तीर्णोर्ण ॥ ° ॥ (!)

तदुल्लंघ्यनलंघयज्जलनिधिं सर्वप्लवंगै: समं
तीरे वारिनिधेर्निवेश्य सकलं सैन्यं ततो राघव: ।
कर्तुं कोणपशोषितैर्जलनिधिं प्राहाष्टमं लक्ष्मणं
दिव्यं गृह्य धनु: शरं च परमं वैरीवधे दीक्षित: ॥ १५ ॥

यावल्ललाट ॥ ° ॥ (!)
संदिश्यतां रघुपते त्वय विग्रहस्य संधे:° ॥ १६ ॥
यो वाली राक्षसं तं त्रिभुवनभयदं दुर्जयं° ॥ १७ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

तदादिश्यतामंगदाय दौत्यं ॥

सद्धनुमानमवलोक्य अंगदं श्रीरामः । वत्स अंगद ।

पिता ते यद्वालि° ॥ १८ (not numbered in MS.; ed. 7) ॥

अंगद उवाच । किं प्राकारविहारतोरणवतीं लंकाम्° ॥ १९ (MS. १८; ed. 8) ॥

राम उ° । अंगद रावणं प्रति गत्वा इति निवेदय ।

अज्ञानादथवाधिपत्यरभसाद्° ॥ २० (MS. १९; ed. 9) ॥

रामस्य वचनं श्रुत्वा वालिपुत्रो महाबलः ।

उवाच वाक्यं मेधावी राघवं हरिसंनिधौ ॥ २१ ॥

अंगदः । किमेतत् । संधौ वा विग्रहे वापि° ॥ २२ (ed. 10) ॥

Besides the introduction, the MS. contains 138 verses (as against 56 of the edition); but the total number is still larger, owing to several verses, apparently considered as mere variants of the same, being sometimes counted as one, e.g., after *śl.* 104, beginning जन्म ब्रह्मकुले°, two others are given, beginning in the same way, and the next verse (105) being then (like the verse before the colophon) actually introduced by पाठांतरं । सा हंचर्ये(? हर्म्ये) रामभद्रे सचट्° ॥

Whilst verses 132 and 138 (the last) of this version correspond to vv. 49 and 54 of the edition, the intervening verses are quite different; nor are the last two verses of the edition found here. It ends:

बाल्ये येन हता सुकेतुदुहिता भग्नं धनुः शांभवं
स्वर्गावासगतिः क्षता भृगुपतेर्गुर्वाज्ञया मेदिनी ।
त्यक्ता वालिरपि क्षतः कपिपतिं सुग्रीव एवाकरोत्
पौलस्त्यं विनिहत्य येन युगपल्लंकेश्वरोऽहं कृतः ॥ १३७ ॥

त्वां पौलस्त्य निहत्य यस्त्वदनुजं कर्ता स लंकेश्वरं॥१३७ (!)॥

पाठांतरं। अत्रासीत्फणिपाशबंधनविधिः° कृत्ता च कंठावली॥१३८।

इति सुभटेन विरचितं दूतांगदं नाम नाटकं समाप्तं ॥ सं १६४१ वर्षे १५०५ प्रवर्तमाने पुस्तकलिखितं व्यासमहं कालतसु मथुरादासु॥

The remaining space on the last leaf is filled up with miscellaneous verses (beginning अ : किं सुंदरि सुंदरं न करोषि), written by two different hands. [H. T. COLEBROOKE.]

## 4190.

**607 a.** Foll. 51 (one of which, fol. 3, is wanting); size 10 in. by 3¾ in.; clear Devanāgarī writing, of 1666 A.D.; six lines in a page.

*Nandighoshavijaya*, or *Kamalāvilāsa*, a dramatic entertainment, in five acts, on incidents connected with the religious festival of the '*rathayātrāmahotsava*,' or procession of *Purushottamadeva's* car; composed by *Śivanārāyaṇa Dāsa*, son of an *ambashṭha* (? *Dūrgādāsa*), in honour of his patron, *Gajapati Narasiṃhadeva*.

It begins:

फुल्लत्पंकजतां स्मितांभसि रमावक्त्रामृतांशौ परि-
स्फीते चारुचकोरतां दिविषदां हृत्पुंडरीकेऽर्कतां ।
दैत्यस्तोमवनेषु दारुणदवोद्दामक्रियापाटवं
बिभ्रत्कौस्तुभभूषणस्य नयनं पायादपायाज्जगत् ॥ १ ॥

अपि च ।

लावण्याबुतरंगिणी तरुणिमप्रागल्भ्यकेलिस्थली
पुष्पेषोर्निशितानि विजयीन्यस्त्राणि कांतिः सभा ।
भाग्यं नंदयशोदयोर्व्रजवधूप्राणा जगन्मंगलं
मूर्तिः पातु जगंति वासवमणिः श्यामाभिरामा हरेः ॥ २ ॥

अपि च ।

यद्यप्यस्ति समस्तवस्तुषु तथाप्येकांतभक्तेच्छया
लीलोत्पन्नितनौ तनौ तु दधतं सृष्टिक्रियासाधनं ।
पाथोयोपदिश्यतमौपनिषदं तत्त्वं स्वरूपोदयात्
दूरोन्मूलितमायमर्जुनसखं ध्यायेम मध्येरथं ॥ ३ ॥

नांद्यंते सूत्रधारः । अलमत्यलौकिकचमत्कारसंभारशालिनि परामर्शानधीने वस्तुनि वाचां प्रपंचेन । किं च सांप्रतमहं श्रीमत्सात्वतगणहृत्कमलांतरुज्जृंभमाणलावण्यसंतानवि-द्रावितद्रावितशुनासीरमणिमांसलमरीचिनिचये चिलो-कीलोकोपजीव्यकरुणावरुणालये पुंडरीकालयपांडुर-गंडकपालीकंडूयनतांडवितधरपुटपटुसंचारपंडिते भग-वति जगतीपरिवृढे अहर्निशनिर्वासिताशेषवासना-विषयिगणानुगम्यमानचेतोवृत्तिसंतानसंविधीयमानता-दृग्वासनानुसंधीयमानसपर्यापर्यायसोदरीकृतनृगनहुषभ-रतभगीरथांबरीषपर्यंकांतर्निर्व्यूढपर्यंकबंधविश्रांतकीर्तेः

DR.RUPNATHJI(DR.RUPAK NATH)

प्रतिपक्षवक्षःकपाटपाटनाविर्भूताभिनवनरसिंहमूर्तेर्गजपतेर्नरसिंहदेवस्य—[this name has been supplied by a different hand* at the beginning of four lines daubed over with yellow pigment at the end of fol. 2*b*, and beginning of fol. 4*a*; the expunged passage (which did not contain that name) having originally ended with तस्य श्रीमन्महाराजकुमारस्य]—वपुष्मद्भिर्निगमैरिव प्रत्यक्षतां गताभिः स्मृतिभिरिव स्वीकृताकृतिभिर्दंडनीतिभिरिव दर्शनविषयमुपेतैर्दर्शनैरिव मुखैरिव काव्यालंकारनाट्यस्य भाजितसभाजिरैः सभास्तारैरादिष्टोऽस्मि। यत्रास्य जगतीजनमनोनयनमहोत्सवस्य करुणाकटाक्षपातपरिभावितैहिकामुष्मिकभावुकेन शिवनारायणदासाभिधेनाक्षमूनुना तदाज्ञया विनिर्मितं नंदिघोषविजयाख्यनाटकमभिनेतुं। अतः सहधर्मिणीमाहूय संगीतकमनुतिष्ठामि॥ परिक्रम्य नेपथ्याभिमुखमवलोक्य किंचिदाकर्ण्य पुनरपवार्य। अये प्रिया समाहितेन चेतसा किमप्यद्भुतं गायति। तदत्रैवावस्थाय तूष्णीमाकर्णयामि। तथा करोति।

नटी गायति।

आणंदामिअपुंजो रेअइ· नीलाद्दिकुंजम्मि।
सुत्रामशिला कपणो जलभ्भइअमेहदो मसिणो॥१॥
आनंदामृतपुंजो राजते नीलाद्रिकुंजे।
सुत्रामशिला कृष्णः जलभरितमेघतो मसृणः॥१॥ ०२॥

सूत्र०। आकर्ण्याभिसृत्य। प्रिये किं तावद्गायसि॥

प्रविश्य नटी। सलज्जाह्लादं। अज्ज न किंपि अणं ०३॥ ०४॥

सूत्र०। प्रिये एवमेतत्कः संदेहः।

धाम्नि ब्रह्ममये निरंतरचिदानंदामृताम्भोनिधौ
प्रत्यग्ज्योतिषि योगिनामपि मनो ध्यानैकतानोत्तरं।
यस्मिन्नस्तमुपेत्य न व्यवसितं धत्ते पदव्याकुलम्
अक्ष्णोर्गोचरमेतदभ्रकुसुमं कुर्वन्त्वमी किं जनाः॥५॥०

Then, hearing two persons speak behind the scene:

मृ०। एतौ देव्याः कमलायाः किंकरावपरोधपरौ भयातयौ भयत्या वैदग्ध्यबोधभाषया स्मारितरपयायामहोत्सवेनाभ्यर्णसंभावितेन भनितोद्वेगौ रोषादिहैवागच्छतः। तदिदानीमस्माकमितोऽपसरणमेव श्रेय इति निष्क्रान्तौ॥

प्रस्तावना॥

Act I. *Abhisheka.*—*Brahman* tells *Jaya* and *Jayā* the traditional story of king *Indradyumna* and his pilgrimage to the *Nīlādri* and the *Purushottamakshetra* (cf. nos. 3627, 3711), whither *Purushottama* (*Vishṇu*), according to his annual custom, has now again betaken himself, thereby arousing *Kamalā's* (*Lakshmī's*) displeasure. *Citraratha* and *Urvaśī* also appear, sent by *Indra* to inquire after the goddess.

II. *Kamalāviraha.*—*Vimalā* tells *Nārada* and *Virajā* the circumstances regarding the estrangement of the divine couple; the goddess having become jealous of the '*yajñavedi*,' looked upon by her as her '*sapatnī*.'

III. *Punarāvirbhāva.*—The *devī*, in her apartments, attended by *Jayā*, is lamenting her fate. The *ṛishi*, with *Vimalā* and *Virajā*, having pacified her, she asks to be taken to her lord.

IV. *Rathavijaya.*—*Viśvāvasu* and *Menakā*, having been sent by *Viriñci* to see that everything is ready for the festival, describe the incidents connected with it, as witnessed by them. Then enters king *Narasiṃhadeva* with his spiritual guide (*Rājaguru*) and his ministers to do homage to *Purushottama*.

V. (? *Kamalāvilāsa* or *Nandighoshavijaya*).—*Viśvāvasu* and *Menakā* witness and describe the subsequent ceremonies. *Kamalā* appears and receives homage from the king (acting as the god's *pratinidhi*, or *pratimūrti*); whereupon she becomes satisfied with her consort's doings, saying (fol. 46*a*): तत्राधिष्ठितायां मयि का शक्तिर्निर्वाहवितरणे यज्ञवेद्याः॥

* It had, however, in the first place been supplied by a second (neat) hand in the lower margin of fol. 2*b* as to be inserted after नरसिंहमूर्तेः, but has been daubed over along with the two bottom lines (doubtless in order to disguise the gap caused by the loss of fol. 3), after which it was written in again by a third hand; a ३ having also been added on fol. 2*b*.

DR.RUPNATHJI( DR.RUPAK NATH )

With one or two exceptions, the Prākṛit passages are followed by their Sanskrit versions. Only the minor female characters (but neither *Kamalā* nor *Virajā* and *Vimalā*) speak, however, in Prākṛit.

It ends : तथापि तदस्तु यथा भरतेन गीतं ।

असितमणिमरीचिवीचिसंग-
स्फुरदधिशंपमकंपमिंदुबिंबं ।
विकसितसरसीरुहांकभृंगी-
व्यतिकरमुग्धमपायतः पुनातु ॥
स जयति पुरुषोत्तमः स रामः
कमलमुखी कमला च सा सुभद्रा ।
जयतु नरपतिः प्रजाश्च सर्वा
द्विजवृषभाश्च निरीतयो भवंतु ॥

अपि च ।

भक्त्या विष्णुं हृदि परिचरन् मोदयन् सन्मनांसि
भ्रांतिं धुन्वन् सुरविटपिनां बाष्ययन्वैरिकांताः ।
नीतिं धर्मे ऽनिशमुपनयन् वर्धयन् राजलक्ष्मीं
वैरिंचाब्दं भुवि विजयतां केसरी सिंहवीरः ॥

इति नंदिघोषविजयनाम्नि नाटके पंचमोंकः ॥ समाप्तश्चायं ग्रंथः ॥ संवत् १७२३ ॥ फाल्गुणे कृष्णपक्षस्य अमायां भौमवासरे । लालाभिधेन लिखितं मुदे भवतु धीमतां ॥

The leaves are marked कम° ; and the reverse of the last leaf contains the (Nāgarī) title *śrī-Kamalāvilāsa-nāṭakam*. [H. T. COLEBROOKE.

## 4191.

**99.** Foll. 35 ; size 10⅝ in. by 4½ in. ; modern Devanāgarī writing (Nepalese paper) ; 8 or 9 lines in a page.

*Hāsyārṇava*, a comedy in two acts, by *Jagad-īśvara*.

It begins : स्वेदस्यंदितसांद्रचंदनचयं°, cf. Wilson, Theatre of the Hindus, ii., p. 408 ; Sylvain Lévi, Le Théatre Indien, p. 253 ; Cat. Bodl., nos. 311, 312.

The MS. is incomplete ; the first act ending on fol. 34*b* : इति हास्यार्णवे सभानिर्णयः प्रथमोंकः ॥

Editions of this farce were published at Calcutta, in 1835 and 1872.

[B. H. HODGSON.]

## 4192.

**607 c.** Foll. 19 ; size 10 in. by 3½ in. ; careless, modern Devanāgarī writing ; 8–10 (mostly 9) lines in a page.

*Hāsyārṇava-prahasana*, a complete, but poor copy. [H. T. COLEBROOKE.]

## 4193.

**3281.** Foll. 32 ; European foolscap paper (water-mark 1811), 13 in. by 8 in. ; twenty lines in a page.

*Hāsyārṇava*, the text written out on one side as for publication, with an English translation on the opposite side.

The latter begins :—"A Bráhman pronounces the benediction : May the copulation of the husband of *Mridani* with *Parvati* be for the happiness of the voluptuous—"

The Sanskrit translation of the Prākṛit passages is not given. [H. H. WILSON.]

## 4194.

**2388.** Foll. 134—of which are wanting foll. 4, 6, 7, 50, 51, 56, 57, 65, 66 (but 67 double), 69, 90–92, 99, 115–117, 126, 128, 133–135 ; size 9 in. by 4 in. ; fair, large Devanāgarī writing, of about 1700 A.D. ; seven lines in a page.

*Gaṅgadāsa-pratāpavilāsa*, a drama, in 9 acts, on certain incidents in the life of king *Gaṅgadāsa Bhūvallabha Pratāpadeva*, of Campakapura (i.e. Campānīr, with its hill-fort, the Pāvadurga or Pāvakadurga) in Gujarāt ; composed by *Gaṅgādhara*.

DR.RUPNATH(DR.RUPAK NATH)

It begins : श्रीमहामाया काली ॥

श्रीमत्संतोषजननी जननी जगतां परा ।
परापरगिरं दद्यादद्यानंदमयी मम ॥ १ ॥

उद्यत्कालीकटाक्षावलिचलनचलल्लोचनापांगरंगः
क्रुध्यद्दैतेयमुक्तागतशरनिकरच्छेदिबाणप्रयोगः ।
मोलच्छृंगारवीरस्फुरितभुजयुगोल्लासिरोमांचितांगः
संधाने सावधानस्त्रिपुरनृपजयी पातु गंगेश्वरो वः ॥ २ ॥

विश्वामित्रातिविश्वाध्वरहरविहरद्यामिनीचारहारी
सीताशृंगारलीलांकितभुजविलसत्कार्मुकज्याकृतांकः ।
पारावारांतरुद्वारितदृषदतुलस्फीतसन्नीतकीर्तिर्
लंकेशातंककारी स जयतु भुवने रामनामावतारः ॥ ३ ॥

नांद्यंते सूत्रधारः । परितोऽवलोक्य । अहो भूमंडलमाखंडलपुरं संप्रति विजिगीषतीति भाति । यतः ।

इह हि विबुधाधारः पावः सुरालयभूधरं
जयति कनकोन्मादं भूभृद्विविक्तसुवर्णभूः ।
कुलसुखकृता युक्तः पत्या स गोत्रभिदा युतं
स्थिरतरलसद्गंगासंगो विनिर्गतजह्नुजं ॥ ४ ॥

निवसति महाकाली यस्मिन्कुतूहललालसा
निजमनु कलान्यासैरेतन्नृपेण विभाविता ।
सितगिरिमपि त्यक्त्वा प्रातः प्रियाविरहासहो
विलसति महादेवो ऽप्यस्मिन् गणावलिमंडितः ॥ ५ ॥

व्यरचि किमयं धात्राधारः प्रयासवतावता
सकलवसतिर्ब्रह्मांडस्य स्वभावमहान् गिरिः ।
उपरि च तले मध्ये यस्मिन्निवासवतां नृणां
त्रिभुवनजनप्राप्यं सौख्यं सदापि ददाति यः ॥ ६ ॥

कुवलयदलश्यामः कामं पुरा यदजीजनत्
कुवलयदलश्यामः कामं वधूनयनांचलः ।
जनयति गिरेरस्योपांते स्थिते पुरुषेऽत्र के
तदुचितमहो लज्जां नैति स्वयं जनयन् रतिं ॥ ७ ॥

अपि च । एते चंपककामिनीपरिलसद्धम्मिल्लमल्लीमिलच्-
चांपेयप्रबलस्फुरत्परिमलस्वीकारतस्तुंदिलाः ।
पीत्वा वारि शरत्प्रसन्नसरसां पावाचलारोहण-
प्रत्यारोहणजातखेदहरणा वांतीह मंदानिलाः ॥ ८ ॥

०१४ ॥ . . . the lost leaf 4 contained from the latter part of *śl.* 10 to the beginning of *śl.* 14.

पटाक्षेपेण विदूषकः । अहो सच्चं सच्चं ।

सोत्ताणं वसणं कआ वि मइणं माणं पहूणं णवा
णो वंगम्मि रसस्स मे ण जणिअं से संबु कंबुप्पहं ।
लंबन्नंनयणहयं मम हिमं मह्मंमि णो दीसये
ता भूमितलजोसिआ ण विबुहण्पीणं महिज्जंतरं(!) ॥

सूत्रधारः । अहो कमत्थं मध्यमं प्रभ्रं परिहसमि ॥

विदूषकः । परिहासभट्टोऽहं तुहे वुत्तं पत्तेमि ।

सूत्रधारः । ध्वनिना विपरीता प्रतीतिर्भायते । ० . . (foll. 6 and 7 wanting, containing *śl.* 15–21) . . ०२३ ॥

कुर्वन्नवदवादमुद्यतमहायादं सभायं चलत्
प्रोतापारपुरं पुरंदर इवानीकं सुरद्वेषिणां ।
यस्त्याणितुरुष्कलोकवनितावक्षोजयावद्यतं
निस्त्राणप्रतिवादिनं समकरोत्कौतूहलेनैव यः ॥ २४ ॥

देशान् गूर्जरभूमिपस्य सहसा यो लीलयैवाग्रहीद्
यः संग्रामसभातले ऽतिविमतान् भूमीपतीन्व्यग्रहीत् ।
यो ऽप्यानंत्र समग्रहीद्बहुतरानर्थिव्रजान् रक्षितुं
यो वैरिक्षितिपैर्भमैः सह भुजोत्कर्षादलं व्यग्रहीत् ॥ २५ ॥

यन्निस्त्रासन्स्त्रोद्गणादपगतः स्वप्राणनिस्तारणं
प्राप्तः स्वांगुलिचर्वणं न चरणं वेगद्रुतः कारणं ।
कृत्वा दुस्तृणदुर्दुमादिचरणं संत्यज्य सद्वारणं
नत्वा दुष्करणं स गूर्जरसुरत्राणः कथं प्राणिति ॥ २६ ॥

तत्कीर्त्या भुवनत्रये धवलिते शोणादिवर्णोज्झिते
संध्याताडवमस्मरन्पशुपतिर्गीर्या सदा संगतः ।
तस्मात्प्रीतिमतीयमत्र नृपतौ श्रीगंगदासाभिधे
मामादिश्चदमुष्य नाट्यविषये तेनाहमत्रागमं ॥ २७ ॥

तदहमनेकानवद्यमंत्रविद्योपासनासमासादितसर्वसपर्वैराचार्यवर्यैः विराजमाने श्रीमन्महाकालीप्रासादपुरोवर्तिनि सभातले ऽस्मिन् सुखासीनं शरत्समयसमुचितदेवीपूजनाय समागतं सकलराजवर्गं गंगाधरकविरचितगंगदासप्रतापविलासनामनाटकाभिनयेन परितोषयामि ।

गंगाधरकविकविता चरिते श्रीगंगदासभूपस्य ।
वयमपि नाट्ये कुशलाः किं संतोषकरणं नात्र ॥ १ ॥

विदूषकः । को सो कई जस्स कव्वेण संतोसो भोदि ।

सूत्रधारः । तस्य गुणवर्णनपद्यं नाकर्णितं । तस्य विरुदपद्यं त्वया नाकर्णितं ।

विदूषकः । तइ मह कणं किं न सावएसि ।

सूत्रधारः । शृणु ।

तरङ्गातुंगाकुलतरतरंगातुलवचो-
मणी रंगासंगादमृतरसशृंगारिततनुः ।
मधूत्संगी भृंगालसलसदनंगारितरुणी-
दृगासंगाभं गायति रचति गंगाधरकविः ॥०



DR.RUPNATHJI( DR.RUPAK NATH )

नेपथ्ये । अलंक्रियतामलंक्रियतां पुरं ।

कुर्वंतु प्रतिवीथि मार्जनविधिं पद्मानि मुक्ताफलैर्
माणिक्यैरभितो लिखंतु सुधया लिंपंतु सौधानि च ।
बध्नंतु प्रतिमंदिरं प्रतिपुरद्वारं पताकावलीर्
वादित्राणि च वादयंतु नगरे नृत्यंतु वारांगनाः ॥ १ ॥

चूलिका ।

विदूषकः । ससंभ्रमं विलोक्य । भाव महूसवसंभमाकलिदो को एसो आअच्छदि ।

सूत्रधारः । मारिष अयं किल राजसचिवो देवीमहोत्सवसंनाहाय पुरपालकानाज्ञापयति । तद्वयमप्यभिनयोचितनेपथ्यग्रहणाय व्रजामः ।० इति निष्क्रांतौ । प्रस्तावना ॥

ततः प्रविशति राजसचिवो हरिदासः । यथा ।

स्फायत्प्रोज्ज्वलकंचुका० ॥ २ ॥

सचिवः । उच्छ्वस्य सानंदं ।

धैर्यैकपद्यां चलतामभिमानवतां नृणां ।
करावलंबनं दत्ते दैवं साहसिनां स्वयं ॥ ३ ॥

कथमहह पंचत्रिंशत्कुलराजकन्यकावचाहुआणकुलप्रदीपस्य हठहंमीरस्य मम स्वामिनो भोगींद्रस्य मस्तकरत्नमिव कन्यारत्नमभिलषतो महंमदमहासुरत्राणस्यापमानना स्वभुजबलेनैव मत्स्वामिना समकारि । तत्र संगरैकांगवीरस्य स्वप्रभोर्भुजसामर्थ्यमजानता मया सचिवबुद्धित्वात्सचिंतेनास्यापि यावज्जावन्मंडपपुरत्राणेन गूर्जरसुरत्राणपूर्वद्वेषिणा ऽस्मत्सहायत्वमंगीकृत्य भायापत्रं प्रेषितं । तद्रात्रौ देवीव्रतनियमवत्याः प्रतापदेव्या मंदिरे देवीपूजनसामग्रीं विलोकयतो महाराजस्याग्रे मया वर्णितं । तदभिनंदितं देव्या स्वीकृतं च महाराजेन ।

तन्मन्ये श्रीमहाकालीसेवया सुस्थिरीकृतं ।
गंगदासमहीजाने(? ०पेन) राज्यमाचंद्रतारकं ॥ १ ॥

तदधुना देवतायात्राभिमुखस्य महाराजस्याज्ञया देवतायजनसामग्रीसहितमित एवायांतं पुरोहितं देवतालयं पुरः प्रस्थापयामीति निष्क्रांतः ॥ विष्कंभकः ॥

ततः प्रविशति पुरोधाः पुरो धावंतः कंबलकमंडलुपूजोपकरणकरा बटवश्च । यथा ।

प्रातःस्नानपवित्रगात्रविलसत्प्रक्षालितप्रोल्लसद्-
धोत्रस्फारितयज्ञसूत्ररचनो दर्भाग्रगल्भांगुलिः ।
गोपीचंदनचर्चितालिकजितादित्यप्रभामंडलः
कर्णांदोलितकुंडलः समयते राज्ञः पुरोधा इह ॥ १ ॥

पुरोहितः । पुरो ऽवलोक्य । ओं

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताप्रणा(? ०तप्रणताः) स्म तां ॥१॥

इति नमस्करोति । पुरोहितः । विलोक्य ।

एषा सा जगदंबिका विजयते काली कपालिप्रिया
देवीभिर्नवकोटिभिः परिवृता युक्ताभितो भैरवैः ।
एतां मंत्रमतांगभूतहवनैराराधयामो ऽधुना
येनासौ यवनाधिपं युधि जयेच्छ्रीगंगदासो नृपः ॥ १ ॥०

Act II. (beg. fol. 16*b*). The king enters, with the *vidūshaka*, to attend the *homa* and the festive performances. For the latter the chief actor introduces himself :—

नाट्यकारः । नाट्यरसिको नाम नाट्यकारो ऽहं ॥

राजा । कुतो देशादागम्यते ॥

नाट्यकारः । कर्णाटात् ॥

राजा । तत्र किमपूर्वमत्रागमने च किं कारणं ॥

नाट्यकारः । आकर्णयतां । पूर्वपश्चिमदक्षिणसमुद्राधीश्वरे हयपतिगजपतिनरपतिरायसुवर्णपुत्तलीकितवामचरणविरुद-तोडराडंबरे महाराजाधिराजराजपरमेश्वरे राजकठारीत्रिनेत्रे(!) राजगजबेटकारे रिपुराजगजगंडभेरुंडावतारे विजयनगरीपुरंदरे श्रीमत्प्रतापदेवराजे महेंद्रसभालंकारे सति तत्कुमारेण श्रीमल्लिकार्जुनराजेन साम्राज्यसिंहासनमधिष्ठितं । तदाकर्ण्य दक्षिणसुरत्राणेन गजपतिना च पूर्वपराभूताभ्यामुभाभ्याममितहयगजपदातिभ्यां संभूयाभिषेणनमकारि । विजयनगरमावृत्य स्थितं तावदसहमानो गजबलं मृगेंद्रशाव इव गिरिकंदराद् विजयनगरतः श्रीमल्लिकार्जुनराजो बहिर्निर्गत्य निशिततरकरवालधाराजलप्रवाहवाहिनीपूरे हयपतिगजपतिसैन्यमशेषममज्जयत् । गजपतिः स्वदेहमात्रावशेषः पलाय्य निरगाद् यवनपतिश्च । तदनंतरं श्रीमल्लिकार्जुनराजेन रणद्यूतविजितान्हयगजान् सकलमहीमंडलकलावत्करकमलसात्कृतवता तस्यामेव वेलायां निजजनकेन श्रीप्रतापदेवराजेन दिव्यरत्नरचितकटककुंडलहारकनकदंडचामरयुगलमौक्तिकच्छत्ररिपुराजगजगंडभेरुंडनिजविरुदपदकहयगजनरपतिराजकविपुत्तलीकिते(०तं) विरुदतोडरं दत्त्वा निजकीर्तिजगंगाया भगीरथीकृत्य सन्मानितरुचिरांगधरो(संमा०) ऽनवद्यविद्याबलेन दिग्विजयाय यातः संप्रति क्वास्त इति पृष्टं । तदा तदानीमेवोत्तरदिगंतरालात्समागतेन केनचिद्वैतालिकेन महाराजस्य कीर्तिमाहिमाचलं कृत्वा द्वारकायात्रां विधायाह्मदाबादनगरे गूर्जरसुरत्राणस्य महाद्वारे वामचरणे विरुदतोडरं निधाय सभाकोविदान्मूकीकृत्य षण्मासानुषित्वा ततो निर्गम्य

DR.RUPNATHJI( DR.RUPAK NATH )

पावाचलाधीश्वरं चंपकपुरपुरंदरं श्रीगंगदासभूवल्लभं द्रष्टुं समागतः । तत्र श्रीगंगदासभूवल्लभेन लोकोत्तरविद्योर्जितां कवितां विलोक्य संतुष्टेन बहुमानदानैः परितोष्य मच्चरित्राभिनयनाटकं भवता विधेयमित्युक्तः करोमीति स्वीकृत्य लोकोत्तरं नाटकमकार्षीत् । तदद्भुतमाकर्ण्य गंगदासभूवल्लभो बहुकनककलशैरापादतलमस्तकं तमापूरयत् । अस्य नाटकस्याभिनयं कर्तुं कश्चिन्नाट्यकारः समागच्छेदिति राजा चिंतां करोतीत्युक्ते श्रीमल्लिकार्जुनराजेन साधु कथितमस्मच्चिंता दूरीकृतेति बहुदानपुरःसरं स वैतालिकः सन्मानितः(संमा०) । तदानीं तदास्थानस्थितेन रिपुनाट्यकारवारणमदनिवारणपंचाननेन मया तदाकर्ण्य तन्नाटकमहं नाट्यरसिको ऽभिनेष्यामीत्यत्र सोत्कंठमागतो ऽस्मि। तावन्मम भाग्यगुणेन महाराजो ऽपि महाकालीमहामहोत्सवे कलाकुतूहलानि विलोकयन्नेव मन्नयनगोचरः समजनि । तदहं महाराजस्य युवराजत्वमारभ्य रूपकाभिनयाय नेपथ्याभिनयनाय गच्छामि। पश्यतु महाराजः। इति निष्क्रांतः॥

नेपथ्ये कलकलः ।

नयति नयति मुग्धां राजपुत्रीं कुमारः
सितहय इव भद्रां सानुरागां सुभद्रां ।
व्रजत व्रजत पश्चाद्वेगतः शस्त्रहस्ताः
कथमहह पुरस्तात्साहसी वीर एषः ॥ ४ ॥

सर्वे किमिदमिति सहसोत्तिष्ठंति ।

राजा । तुरगस्तुरगस्तरवारिस्तरवारिः ॥

अत्रांतरे प्रविशति तुरगाधिरूढो राजकुमारीसहितो युवराजः।

राजा । क एष नूतनवयाः कस्येयं कुलकन्यका ।
मामेवायाति शरणं दातव्यमभयं मया ॥ ५ ॥

विदूषकः । वयस्स एसा खु कुलकण्णा तवेव रूवानुरूवा । ता एदं अपहरिअ अंतेउरे कीस न करेसि ।

राजा । धिग्मूढ कथमेवं पापधियं ददासि । परस्त्रीपरधनविमुखानस्मान्न जानासि किं ।

युवराजः । अये राजकुमारि श्रांतासि तदत्र तुरगादवतीर्य महाकालीसरस्तीरे कदंबतरुतले क्षणमुपविश यावदहं पश्चादागतान् त्वज्जनकभट्टान् निशितशरशतैर्निवर्तयिष्ये ।

राजकुमारी । पिय ते तदेव णिवुत्ता ।

युवराजः । विलोक्य । सत्यं । निर्वृत्ता एव । तत्सुखेनोपविशाव । इत्युपवेशक्रियां नाटयति ।

राजकुमारी । अज्ज्ह तिसिद म्हि । तावपमिणीपत्तपत्तेण मे जलमुपणेहि ॥

युवराजस्तथा करोति ॥

राजकुमारी । पिय तुमं पढमं पिय । अणंतरं मं पायय ॥

उभौ तथा कुरुतः ॥

युवराजः । एकासन उपविश्य । कथमयं मलयानिलः श्रममपनयति । यथा ।

आंदोलयन्कुवलयानि विलीनभृंग-
संगीतरंगकलहंसकुलादृतानि ।
स्वीकृत्य नः श्रमजलं शिशिरोदबिंदु-
मालां ददाति मलयोपनतः समीरः ॥ ६ ॥

राजा । विलोक्य । यथैतौ बालिशौ न जानीतस्तथास्मिन्प्रहलवकुलांतरे स्थित्वानयोः परस्परानुरागगोष्ठीमाकर्णयावः ।

विदूषकः । अम्हाणं वि कोदुहं वट्टइ ॥ तथा कुरुतः ॥

The king soon perceives that it is an incident in his own life that is represented: अहो कर्णाटनाट्यकारेण° ममैव युवराजदशाचरितमभिनीतमिदं । युवराजत्व एवास्माभिः क्रीडितं । कथं नाट्यकारश्चातुर्येणुनोद्भूतमिव सर्वं दर्शयति ।°

Act III. (beg. fol. 36*b*). The queen *Pratāpadevī* is put out of humour by what has occurred, and fancying herself rejected, goes, with her attendants *Jayalatā* and *Vikramadevī*, to do homage to *Mahākālī* for her intercession. Meanwhile the king himself is longing for his consort, and is at length reconciled to her (the scene of reconciliation being, however, lost on foll. 50 and 51).

Act IV. (beg. fol. 53*a*). The general *Raṇacaṅga* brings some enemies' heads (*Dalapati-Yavana-śirāṃsi*), and is taken to the audience chamber [कंचुकी । महाराय रणचंगो दलवइजवणशिराश्निं(!) आणिअ दुग्गदुआरे सचिवेण सह चिट्ठं कुणं वट्टइ ।° ततः प्रविशति समानीतयवनमस्तको रणचंगः ।], where the king sits in state, attended by the *kumāra Narasiṃha* with his younger brothers. The general's account of his victory seems lost on

DR.RUPNATHJI( DR.RUPAK NATH )

foll. 56–57. Messengers then appear with reports from all directions, followed by two courtiers bringing a letter. From the West the report is as follows :—

राजा । पश्चिमे देशे किमपूर्वं ।

दूतः । देव त्वच्छरणार्थिभिर्नृपशतैस्त्वत्पाणिदत्ताभयैस्
त्वद्राज्ये सुखवासितात्मदयितापुत्रप्रपौत्रादिकैः ।
ग्रस्ते गूर्जरमंडले प्रतिपदं ग्रासार्थनालोलुपैर्
अंतर्द्रोहयुतो महम्मदसुरत्राणो ऽधरं खादति ॥ १ ॥

राजा । इतःपरमधराधरं खादतु ॥

सचिवः । इतःपरमिदमिव ॥

राजा । दूतान्संभाव्य स्वमंदिराणि प्रस्थापनीयाः ॥
सचिवस्तथा करोति । दूता नमस्कृत्य प्रयांति ॥

नेपथ्ये । कष्कः ॥

प्रविश्य कंचुकी । महाराज । वीरमभूवस्स नानभूवस्स पत्तहरौ समागदौ ॥

राजा । आकारय ॥
कंचुकी तथा करोति ॥ पत्रहरौ नमस्कृत्य पत्रं दत्तः ॥
सचिवः पत्राय करं प्रसारयति ॥

राजा । संप्रोक्ष्य पत्रं ग्राह्यं । यतः ।
म्लेच्छाय कन्यां ददतो[:] स्वस्य जीवनहेतवे ।
नानवीरमयोः कस्य संपर्को नोपजायते ॥ १ ॥

सचिवः । तथा कृत्वा पत्रं वाचयति । स्वस्ति श्रीगंगदासभूपं प्रति नानभूपवीरमभूपयोः प्रणामपूर्विका विज्ञप्तिः । वयमिह कुशलिनः । भवता स्वकुशलपत्रं प्रेषणीयं ॥ तात्पर्यं च । सुरत्राणाज्ञयास्माभिरलेखि । ये सुरत्राणद्वेषिणः सुरत्राणराज्यमुद्ग्रसीकृत्य(°द्रासी°) भवच्छरणागता ग्रासिनो[1] राजानो भवन्मंडले वर्तंते तेषां निवासो न देयः । भवता नीतिविरुद्धं क्रियते । महता सह वैरं नारंभणीयं । किं च । आत्मानं सततं रक्षेद् दारैरपि धनैरपि । इति नीतिशास्त्रार्थं चेतसि संधाय स्वकन्यामपि दत्त्वा[2] स्वस्त्रियोऽपि सुरत्राणस्याग्रे नर्तयित्वा सुरत्राणस्य पादपरित्राणमपि करे धृत्वा यानि कानि चिह्नान्यक्षराणि प्रतिक्षणमुक्त्वा सकलमपि मानमहंकारं त्यक्त्वास्माभिर्यथा कथंचित्समयप्रतीक्षा क्रियते । स चतुरो यः समयं जानाति । अयं समयः क्षत्रियाणां न भवति । अयं कलिकालो यवनानामेव । विचारय । अस्माकमैलदुर्गमनेनाग्राहि । अन्येषां कियतां लंकासमानि दुर्गाण्यनेनाग्राहिषत । किं च सकलमहीमंडलोल्लसत्कीर्तेः करविजितकर्णकामधेनुकल्पद्रुमस्य सिद्धांगनापितामितवितरणजनितयशःकलाधरस्योचितदान - द्विगुणभोजस्य श्रीमुग्गुलराजस्यापि राज्यमेतज्जनकेन गृहीतं । किं च भवत्पूर्वजस्य चाहुआणकुलावतंसस्य असमसमरसाहसैकमल्लस्य शरणागतवज्रपंजरस्य हंमीरवीरस्यापि रणथंभोराभिधं(!)दुर्गमपि दुर्गं ढिल्लीसुरत्राणेन गृहीतं ॥ राधणसुरत्राणेनापि जेमराजमानकरादिभूपानां

. . . wanting foll. 65 (? and 66), containing the end of 4th and the beginning of 5th act.

Act v. takes us to the court of Sultan Muhammad (1443–1451 A.D.), of Ahmadābād, son of Ahmad Shāh.

Fol. 67[1] opens with an incomplete verse, after which :—

नानभूपवीरमौ । पत्रं वाचयतः । शक्तिर्या महतीति महंमदसुरत्राणस्येति ॥

सूरत्राणः । कथमहंकारः ॥

नानभूपवीरमौ । पातसाह (Padishah) किं कथनीयं ।
म्लेच्छाय कन्यां ददतोः स्वस्य जीवनहेतवे ।
नानवीरमयोः कस्य संपर्को नोपजायते ॥

इति पठित्वा । कथम् अपमानिता वयमनेन ।
गतेन सर्वराज्येन न दुनोति तथा मनः ।
यथानेनापमानेन कृतेनाहंकृतात्मना ॥ १ ॥
धिगस्माकं कुलं यत्र वयं जनुरुपागताः ।
दर्शयामो मुखं लोके ये ऽपमानमखीसखं(!) ॥ २ ॥

सुरत्राणः । कूर्चमवलंब्य । अयमपमानो ममैव न भवतां । तदहमहंमदसंभवो महंमदो न भवामि यदस्य मदमनसो गंगदासस्य दुर्गपावकं यावकमिव प्रतापपावके न द्रावयामि ।

यावद्दुर्मददंतिदंतकुलिशैः पावाचलं छेद्मि नो
यावत्तद्भुजदंडमंडितधनुःखंडं शरैर्भेद्मि नो ।
यावत्तत्तनुजाकरं निजकरेणासादितं वेद्मि नो
तावन्नाहमहंमदादुदभवं तावन्न वा मद्मदः ॥

[1] That is, vassals, or holders of grants of land; cf. Forbes, Rās Mālā, i., p. 242.

[2] As a matter of fact, the Rājā of Edar, for one, had given his daughter in marriage to the Sultan, and thereby bought his peace.

DR.RUPNATHJI( DR.RUPAK NATH )

परिक्रम्यावलोक्य ।

रे सिंदूर भयंकराननकरान्कुर्वंत्वरं कुंजरान्
रे पल्याण विभावितान्परिसमारोहंतु वाजिव्रजान् ।
रे संग्राम परिस्फुरद्युतिभरान् गृह्णंतु शस्त्रोत्करान्
सोऽहं पावकपातनाय चलितो नालीकयंत्रोपलैः ॥ २ ॥

किं च । पदातिनिकराः पुरस्तदनु वाजिनां राज्यम्
ततो गजघटालयस्तदनु भूभृतो गच्छत ।
ततोऽहमपि विस्फुरद्द्रयहयाधिरूढः स्वयं
व्रजामि रणहेतवे यवनसादिभिः संवृतः ॥ ३ ॥°

The army then starts on its march (the unsuccessful campaign of 1449 A.D.) to *Gaṅgadāsa's* capital, where at first—according to the descriptions given by the Sultan's companions (*Nānabhūpa*, *Vīrama*, *Bhīmabhūpa*, and *Khāna Munīra*)—it carries everything before it, the assailed king, with his family and troops, being thrown back into the hill-fort and closely invested.

Act VI. (beg. fol. 80*a*). Whilst, however, the Sultan's troops take a rest, the king, having conferred with his general *Raṇadhīra*, suddenly makes a sortie, and routs the enemy. The Rājā himself encounters *Nānabhūpa*, who turns to flight; whereupon *Vīrama* comes to meet the king, but after some exchange of taunting words, the end of the act is lost in foll. 90–92.

Act VII. (incomplete at beginning). *Vīrama* produces a plan of the hill-fort (which he has obtained from his *Purohita* who had once stayed there, receiving rich presents from *Gaṅgadāsa's* mother, *Bhāmāmbā*), and enters into a minute description thereof in 30 *ślokas*. The Sultan, spurred on by the glowing account of the place, makes another effort to retrieve his defeat, but falls from his *paṭṭahastin*, which then is killed by a stone from the ramparts, whilst he himself only succeeds in saving himself by mounting a horse and taking to flight amidst the jubilant rejoicings of the besieged.

Act VIII. (beg. fol. 101*b*). *Raṇadhīra* points out to the king the spot where the Sultan has halted with *Vīrama*. The latter bids his master take heart:

वीरमः । पातसाह चिंता न कर्तव्या । शनैः कंथा शनैः पंथा शनैः पर्वतमस्तके (! cf. Böhtlingk, Ind. Spr., 6390) इति नीतिर्विचारणीया । प्रथमतोऽस्य देशा विध्वंसनीयाः । ततः परिक्षीणतया स्वयमेव परिपक्वं गलितं प्रांशुवृक्षफलमिव (दुर्गं marg.) करं समेष्यति ॥

सुरत्राणः । तत्प्रथममेव पल्लीदेशराजधानीं करंडीं मुलियाडदेपुरादिदेशग्रामान् विध्वंसयितुं मुलाखदिरनिदामदोप्रमुखाश्चत्वारिंशत्सहस्राश्च वाराः प्रस्थापिताः ।

वीरमः । तत्साधु कृतं नीतिरहस्यविदा पातसाहेन । इति प्रणामं करोति ॥

नेपथ्ये कलकलः । दुर्गस्योपरि जयपताकाः । जितं जितं खजकालेन (?) भोजेन च मध्येपल्लिवनं । चत्वारिंशत्सहस्राणि यवना विनिपातिताः ।

टेपुरे निहताः केचित्केचिन्मग्ना जलांतरे ।
हताश्ववारास्तुरगा नीताः पल्लीनिवासिभिः ॥ ३९ ॥°

Whilst the Sultan is lamenting the slaughter of his troops, *Vīrama* points out to him how a body dispatched by him has gained possession of part of the rampart of the fort (करेश्वरशिखरपश्चान्मार्गेण . . . भट्टाः पावकदुर्गमारूढा एव). But presently *Gaṅgadāsa* himself, becoming aware of the fact (खाः शत्रवो विषयपल्लीदुर्गपरिसरशिखरमारूढा एव. वीरमेणादृष्टपूर्वेण मार्गेण पावकपरिसरशिखरमारोहिताः स्वभटाः), throws himself against the assailants and forces them back. The Sultan then threatening the king that he will yet bring him to his knees, the latter jeers at him:—

राजा । विहस्य । निस्साणध्वनिः शत्रुवनितावक्षोजशैलयोस्तथा
प्रतिध्वनति यथा भवन्मुखे भवादृशां विकत्थनता युक्तैव ।
यस्य वर्णयितान्योऽस्ति स आत्मानं न वर्णयेत् ।
वर्णनीयगुणाभावात्स नो यस्य स वर्णयेत् ॥ ४१ ॥

भवत्पौरुषं भवता किं वर्णनीयं । तत्प्रत्यक्षत एव वीक्ष्यते ।

सुरत्राणः । दुर्गबलेन वल्गसि ।

राजा । गजाश्वकटकबाहुल्याद्वल्गसि । यदि निजभुजयोस्तेजो वहसि तदेकाकिनौ युध्याव । उभयसैन्ये विलोकयतां ।

DR.RUPNATHJI( DR.RUPAK NATH )

सुरत्राणः । काकतालिकान्यायेन जयं प्राप्तो ऽसि । तेन गर्वं वहसि । त्वत्पूर्वजस्य हम्मीरस्य हठिनः का दशा जाता । सा त्वया नाकर्णिता प्रायेण ।

ममापकारिणः सर्वान्ग्रासिनो रक्षतस्तव ।
त्वत्पूर्वजस्य भविता हम्मीरस्य दशा हठात् ॥ ४२ ॥

राजा । शरणागतरक्षार्थं यस्यात्तज्जीविताधिकं ।
तदेव जीवितं मन्ये येन संजीव्यते ऽखिलं ॥ ४३ ॥

सुरत्राणः ।

मुंचाभिमानं सकलं यथान्ये पृथिवीभुजः ।
दत्त्वा निजसुतां मह्यं राज्यं कुरु निरामयं ॥ ४४ ॥

राजा । इतरनृपतिकन्यावन्ममाप्यात्मजां यद्
यवननृप विलासिन् याचसे तद्ददामि ।
भवति तव किमाभिः प्राकृताभिः प्रमोदः
समिति मम कृपाणो देव कन्यां ददाति ॥ ४५ ॥

नेपथ्ये कलकलः ।

पावस्य दक्षिणं भागमारूढा नानभूपतेः ।
पत्तयः पातिताः पृथ्व्यां तत्रस्थैः पावरक्षकैः ॥ ४६ ॥

The Sultan then resolves to make one more effort to take the fort; and at the moment when his troops approach, there also arrive there some of the king's *grāsinaḥ*—those mentioned, in Prākṛit, being *Khemano, Cāhuāṇarāula Udayasiṃho, Gaṅgaḍokio, Khemāṇaputto Avaghaḍo, Udayasiṃhaputto Ajjunadeo*—to seek shelter in the fort; and they ask to be allowed to join in the fight [तवोपकारबद्धानामस्माकमधमार्णता । त्वत्कार्ये व्ययितैः प्राणैरस्माभिः सामयीयते ॥] The king, however, thinks it his duty to fight for them; and when his general reports that the Sultan, with *Mīra Saudāgara* (*suratrāṇaprāṇasamaḥ*) in front of him, and *Nānabhūpa* and *Vīrama* by his side, are advancing, he boldly issues forth from the gate. This leads the Sultan to assume that the king's resources must be at an end: यदयं दुर्गाधिपो दुर्गान्निर्गत्य युध्यति तदस्य धनधान्यादिदुर्गनिर्वाहसामग्री हम्मीरस्येव व्ययितेति लक्ष्यते । श्रूयते च महान्प्रत्यहं व्ययो ऽस्य ।

चत्वारिंशत्सहस्राणि प्रत्यहं भुंजते गृहे ।
मनुष्या गंगदासस्य पंक्तौ दशशतानि च ॥ ५२ ॥

After a few more syllables [शरणागतग्रा(सिनः)] there is a break, foll. 114–118 being wanting, and a leaf marked 114, written in a large sprawling hand, not carrying on tho text. But apparently *Vīrama* must have remarked that *Gaṅgadāsa's* stock of supplies is by no means nearing its end, seeing that the conversation proceeds (on the supplied leaf):

सुरत्राणः । तत्कथं त्वत्कर्णपथमागतं ।

वीरमः । रात्रौ तत्र आगतेन ब्राह्मणेन कथितं ।

सुरत्राणः । तत्कथं ।

वीरमः । मंत्रिभिः प्रत्यहमेतावद्भ्यो धान्यं न दातव्यमित्युक्ते राज्ञा गंगदासेन निंबकुठारिशिवराजकुठारिणावाहूय पृष्टं कुठारे कियद्धान्यं विद्यत इति । तदा निंबानुजेन शिवराजकुठारिणेदमुक्तं । स्वामिन् संख्या तु न ज्ञायते ॥ परं तु यथा यथा धान्यराशयः प्रत्यहं लोकेभ्यो दीयंते तथा तथाधिकाधिकं पूर्यंते ।

महाराजस्य धर्मेण नित्यं यद्यद् व्ययीकृतं ।
वर्धते तत्तदधिकं धनधान्यादिकं वसु ॥

इति तद्वचनसुधयानंदितो राजा । अतो धनधान्यादिषु न विचारः ।

On fol. 119, the Sultan is informed by a messenger that a large hostile army (probably that of the Sultan of Mālava) is advancing on Ahmadabād, whereupon he resolves to beat a hasty retreat at nightfall. This being done, *Gaṅgadāsa*, considering it unworthy of a *Kshatriya* to strike at a retreating foe, re-enters his dwelling.

Act IX., written by a different hand, begins (fol. 121*a*) with an allegorical scene, in which the *Vaitālika*, after singing his morning song, is joined by his sister (*Gaṅgadāsa-*) *Kīrti*—represented as oue of the wives of the king (still reposing in the arms of *Jayakamalā*)—and introduces to her an unknown twin-sister of hers (*Mahammadasāha-*) *Apakīrti*; whereupon the two ladies enter into friendly conversation

DR.RUPNATHJI(DR.RUPAK NATH)

(the former speaking in Sanskrit, the latter in Prākṛit), and agree to go and visit other lands; the end of this scene being, however, lost on foll. 128–29.

In the last scene (incomplete at the beginning) the king and queen (attended by the *Vidūshaka* and *Jayalatā*) betake themselves to the sanctuary of the goddess to offer their homage. The end is, however, wanting again on foll. 133–35, the last leaf containing the incomplete colophon: [इति श्रीगंगाधरकविरचिते गंगदास]प्रतापविलासनामनाटके श्रीमहाकालीप्रसादो नाम नवमोंकः ॥०॥ to which another hand has added the statement: वैद्यवरश्रीभाभाजीमहत्तमानां पुस्तकमिदं ॥

Though somewhat clumsily constructed, and rather rambling in its dialogues, the subject-matter and the treatment of it are of sufficient interest to make one regret that the MS. is so defective and so little correct, especially in the Prākṛit portions. Here and there passages are marked as to be omitted in such a way as might almost lead one to suspect that it was the author's own copy.

Cf. Sylvain Lévi, Le Théatre Indien, App., p. 46.

[GAIKAWAR.]

## 4195.

**1831.** Foll. 40. Size 11¾ in. by 5¼ in.; fair, modern Devanāgarī writing; eleven lines in a page.

*Mukundānanda*, a dramatic composition, in one act, of the *bhāṇa* kind, by *Kāśīpati Kavirāj*.

It consists of fictitious, chiefly amorous, conversations between the actor (*Bhujaṅgaśekhara*) in the character of *Kṛishṇa* in *Vṛindāvana*, and imaginary interlocutors—as *Vasantaka* (*vayasya*), *Mudgala Bhaṭṭa* (a *paurāṇika*), *Mayūraka* (*vayasya*), and a number of damsels (*Marālikā*, *Līlāvatī*, *Lavaṅgikā*, *Mallikā*, *Candrikā*, etc.)

It begins:

वंदे वंदारुमंदारमिंदुभूषणनंदनं ।
अमंदानंदसंदोहबंधुरं सिंधुराननं ॥ १ ॥

कंठालिंगनमंगलं घनकुचाभोगोपभोगोत्सवं
श्रोणीसंगमसंभ्रमं च सततं संप्रेप्समानो पुनः ।
प्राप्तं को ऽप्यमितीर्घ्ययेव यमुनाकूले वलाद्यः स्वयं
गोपानामहरद्दुकूलनिचयं कृष्णः स पुष्णातु नः ॥ २ ॥

The work has been printed at Madras (1882), and in the *Kāvyamālā*, no. 16.

It ends:

कृतिं लसदलंकृतिं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदपद्मयोरयमयं प्रणामांजलिः
सरोजमुकुलाकृतिः शिरसि संततं न्यस्यते ॥ २५८ ॥

इति श्रीकाशीपतिकविराजविरचितो मुकुंदानंदनामायं मिश्रभाणः संपूर्णः ॥

[DR. JOHN TAYLOR.]

## 4196.

**274.** Foll. 42; size 11 in. by 4½ in.; Devanāgarī character; foll. 1–26 written in a large clear hand, about 1650 A.D.; eight lines in a page; foll. 27–42 in a smaller, slanting hand, in 1706 A.D.; twelve lines in a page.

*Śriṅgāravāṭikā* (or *Śṛiṅgāravāpikā*, as it is frequently called in the MS.), a play (*nāṭikā*), in four acts, by *Viśvanāthabhaṭṭa Kavi* (pupil of *Dhuṇḍhirāja*), son of *Mahādevabhaṭṭa Sūri*, grandson of *Vishṇubhaṭṭa Kovida*, and great-grandson of *Haribhaṭṭa Paṇḍita*, of the *Cittapāvana* family.

The subject of the play is the love of the young king of Avantī, *Candraketu*, and *Kāntimatī*, daughter of king *Ratnapāla*, of Campāvatī.



DR.RUPNATHJI( DR.RUPAK NATH )

It begins:

यच्छिष्यै रचिता जयंति जगति ग्रंथा हि ते यान् क्षणं
दृष्ट्वा मस्तकघूर्णनं वितनुते वागीश्वरो ऽपि स्वयं ।
तस्मै वैदिकतांत्रिकाध्वरविदे श्रीढुंढिराजाय[1] मे
विश्वस्मिन् स्थिरकीर्तये ऽस्तु[2] गुरवे सद्बुद्धिदात्रे नमः ॥१॥
चंचद्वेणिजटं नतोन्नतलसद्वक्षोजहीरप्रभं
हैमाहेयविभूषणं करिवरत्वग्दिव्यवासोऽंचितं ।
किं ब्रह्मेति विवादमत्र विदुषां हर्तुं यदेकीभवत्
तल्लोकत्रयमंगलं विजयते द्वंद्वं किमप्यद्भुतं ॥२॥
सेवा यस्य निजे गृहे हृदि तु सा सा चोपविश्य स्मृतिः
कालं सापि न चेहते न हि च काप्यत्रास्ति निर्बंधता ।
यत्रस्यास्तु फलं तदिंद्रपतिभिः सर्वासिभिर्दुर्लभं
लभ्यं तच्च विनैव याचनमसौ त्वां पातु लक्ष्मीप्रभुः ॥३॥

नांद्यंते सूत्रधारः । प्रवेशं नाटयित्वा । भो भो भरतपुत्राः । अलमतिविस्तरेण । क्षणमात्रं श्रूयतां । श्रूयतां समस्तभरतसुतसमाराधितचरणकमलकमलाकराभिधाननाटकाचार्यांतेवासिनो रमणीयं मम वाक्यमिति । अद्याहं परममहिमपरमात्मपादपद्मालयद्वंद्वनिर्द्वंद्वभक्तिमकरंदास्वादनसदामोदमानमहोदारमनोमिलिंदेन° --- श्रीमहाराजाधिराजश्रीरामसिंहमहीपालेनाज्ञप्तो ऽस्मीति। भो भो कमलाकरांतेवासिन् (?°सि-)श्रीविश्वनाथकविविरचिता चंद्रकेतुमहीपालचरित्रविराजिता शृंगारवापिका नाम नाटिकास्तीत्यस्माभिर्बहुदिनं श्रूयते । तदद्य सुमतिना त्वया सा विस्तीर्णेऽस्मिन् सुवर्णनिर्मिते सभामंडपे गीतवाद्याद्यैरभिनेतव्येति । अस्ति च मम चित्तपावनजातीयेन निखिलमहाजनसमाजसंमानितहरिभट्टपंडितप्रपौत्रेण प्रतिदिनं वेदवेदांतादिसकलशास्त्राध्यापनकृतकालक्षेपणस्य विष्णुभट्टकोविदस्य पौत्रेण निरंतरं श्रौतस्मार्तानुष्ठानपरायणपंडित श्रीमहादेवभट्टसूरिसुतेन श्रीविश्वनाथ[भट्ट marg.]कविना सास्माकमनुग्रहबुद्ध्या पाठिता समर्पिता च । यस्य किल ग्रंथारंभे सकलरसिकलोकान् प्रति कात्यायनीप्रार्थनापूर्वकमियं वाचो युक्तिः । यथा ।

इमं निबंधं सुगमं करोतु सा
शिवा दरिद्रस्य ममोदितं मुखात् ।
यया कटाक्षैरवलोकनैर्निजैः
पतिः पशूनां जगतीपतिः कृतः ॥१॥

[1] श्रीधुंदिराजाय MS.

[2] Thus corrected *alt. manū* for orig. गतकीर्तयेऽस्तु

तथा च ।

नाटिकां शुचिरसस्य वापिकां नायिकामिव मनोविनोदिकां ।
वीक्ष्य वीक्ष्य तरुणा इमां मुदा वासरानपनयंतु सर्वदा ॥२॥

तदहं गृहं गत्वा गृहिणीमाहूय यावत्तया सार्धमुक्तिप्रत्युक्तिभिः कृत्वा सभासदां पुरतो मधुमधुरिममधुरतमवर्णायाः कथायाः प्रसंगं करोमि तावद्भवंतो ऽपि यथामदुपदेशं विरचितविविधवेषधारिणो भूत्वा चंद्रकेतुमहीपालभूमिकानयनपूर्वकं प्रवेशं नाटयंतु ।

इत्याज्ञाप्य किंचिदंतरं गत्वा नेपथ्याभिमुखमवलोक्य गृहिणीमाकारयति । आर्ये इतस्तावत् ।

प्रविश्य नटी । अज्जउत्त एस म्हि । आणवेदु अज्जउत्तो किंणिमिहं अज्जसेण(!) आहूद म्हीत्ति ।

सूत्रधारः । आर्ये विष्णुसिंहं कुमारं पुरस्कृत्य शृंगारवापिकाभिनयप्रदर्शनार्थं श्रीरामसिंहमहीपालेनाज्ञप्तो ऽस्मि[1] । तदद्य मम वचनेन विरचितविविधमंडनाया अस्यां राजसभायां प्रविष्टायास्तत्रभवत्या भवत्या मधुमधुरसुकुमारतरवचनविलासैरेवमेवं भवतु । तथा हि ।

अद्यासौ बहु मोदतां कविरमी शृंगारवापीं तथा
गाहंतां नृपसूनवः सुखवशाद्रात्रिर्व्रजेत्सूक्ष्मतां ।
गंधर्वा भवदीयगायनकृतां गच्छंतु ते लज्जताम्
अस्माकं जगतां त्रये ऽद्य महती कीर्तिश्च संजायतां ॥°--

सूत्र° । आर्ये अलमलमनया चिंतया इममेवार्थं साधयितुं । कर्णाटकदेशे चंद्रकेतुबालमहीपालानंगजीविकाराजकुमारिकाविवाहघटकप्रधानपुत्रगुणराशिमित्रवत् मया प्रेषितो ऽस्ति स्वकीयश्चंदनंदनो नाम नटः । ° --। आर्ये श्रूयतां तावत् । अस्ति दक्षिणस्यां दिशि श्रीशोभासंपन्नं सकलजनरंजनक्षमं राजधानीद्वयं । एकाऽवंती नाम नगरी । अपरा च चंपावती नाम । तयोरवंत्याः पतिस्तावद् विजयकेतुपुत्रश्चंद्रकेतुर्नाम सौंदर्येणापरो मदन इव । स च प्रथमे वयस्येव राज्यं प्राप्य बुद्धिसागरनाम्नि पितुः प्रधाने सकलं राज्यभारं निधाय स्वयं तत्पुत्रेण गुणराशिना सह सख्यं कृत्वा नानाविध[कौतुक marg.]विलोकनतत्परो बभूव । चंपावत्याः पतिस्तावद् रत्नपालो नाम महीपालः । तस्य [शृंगारवापिक marg.]ानंगजीविकाऽपरपर्याया कांतिमती नाम कन्या । सा पूर्वजन्मनि जलदेवतासीत् । कदाचिद्वरुणो

[1] Thus corr. for orig. शृंगारवापिकाभिनयावलोकनार्थंमुत्कंठितोऽयं श्रीरामसिंहाख्यो महीपालोऽस्ति ।

DR.RUPNATHJI(DR.RUPAK NATH)

राजा ज्ञातापराधां तामिति शप्त्वा पश्चात् शापांतं च कृतवान् त्वं मनुष्यलोके मानुषी भव। तत्र च पातिव्रत्येन पतिं समाराध्य पुनः स्वां प्रकृतिं प्राप्येति। सा नवनीतकंठी पितृगृहे शुक्लपक्षचंद्रकलेव वर्धमाना सती सखीभिः सार्धं सर्वमंगला देवालयसमीपे शृंगारवाटिकायां खेलंत्यासीत्। कदाचित्स चंद्रकेतू राजा जनानां वदनात्तस्याः सौंदर्यं श्रुत्वा गुप्तत्यैव तत्प्राप्त्युपायतत्परमनस्को बभूव। सापि च तस्य सौंदर्यं श्रुत्वा तन्मनस्का बभूव। एवं तयोः परस्परं परोक्षानुरागे वृद्धिं गते सति कदाचित्स चंद्रकेतुः क्षितीशस्तामवलोकयितुं स्वमित्रं गुणराशिं प्रेषितवान्। ततः स गुणराशिश्चंपावत्यां गत्वा शृंगारवाटिकायां बाललक्ष्मीमिव क्रीडंतीं तां विलोक्य पुनरवंतीं प्रति समागत्य चंद्रकेतवे तस्याः श्रुतानुभूतान्समस्तान्गुणान्कथयांबभूव। ततः स राजा चंपावत्यां कश्चित्सिद्ध आगतो ऽस्ति तस्य दर्शनं कर्तव्यमिति व्याजमुत्पाद्य चंपावत्यां गत्वा सर्वमंगलायाः प्रासादनिकटे निवासं चक्रे। तत्रैव निकटवर्तिनि वटुकभैरवमंदिरे पुरैव गुणराशिमित्रेण स्थापितया मुंडमालानामसिद्धिन्या बुद्धिकौशलेन कार्यसिद्धिं कृतवान्।

नटी। अज्ज। अलं अग्गे कधणेण एदिणा ज्जेव मए सव्वो वि णाडिआअत्थो (*r.* णा°) अवगदो ऽस्थीत्ति।°

सूत्र°। आर्ये किं बहुना। श्रूयतां।

आसीत्सूर्यकुले मनूपमनिभः श्रीमानसिंहाभिधो
राजा रंजितपंडितेंद्रनिवहः सिंहोपमो विक्रमे।
कीर्त्या सर्वदिगंतनित्यगतयाप्यासन्नया सर्वदा
कर्णश्रीबलिभोजराजगणनाकाले धुरा कीर्तितः ॥१॥°३॥

तस्मात्कीर्तिसितीकृतत्रिभुवनात् श्रीपूर्णिमाचंद्रवद्
भूमींद्राद्भुजशालिनः किल जगत्सिंहः कुमारो ऽभवत्।
सर्वान्यो युवराज एव वशयामासारिसार्थान् यथा
मातंगान् सृणिरोजसाऽऽजिशिरसि श्रीकार्त्तिकेयोपमः
[॥ ४ ॥ °६ ॥

तस्मिन्वंदिमुखांबुजेषु मधुरान् श्रीसाधुवादान्निजान्
धृत्वा वासवमित्रतां सति गते तत्पुत्र उर्वीमिमां।
शासत्सन् शुभुभेतरामिह महासिंहाभिधः संपदा
यश्चासीद्धनदोपमो गुणिजनग्रामप्रदः सर्वदा ॥७[1] ॥ °८ ॥

तस्मात्मानिजनादिनाथ उदभूद्रामो महामानवान्
राजा राजदुदारचारुचरितो विश्वंभराभूषणं।
नाम्ना श्रीजयसिंह इत्यभिहितो दानेषु कर्णाधिको
युद्धा चित्रशिखंडिनंदनसमः सिंहोपमो विक्रमे ॥ ९ ॥

तस्याशेषाचलेशार्चितपदसरणेः श्रीसुधर्मोपमायां
केचित्तर्किसभायां कतिचन विबुधाः सांख्यपातंजले च।
केचित्साहित्यशास्त्रे तत इतरबुधाः श्रीतयोगे च शास्त्रे
व्याख्यायावाप्यमानं निजयमतिगृहं यानयंतश्च सग्मुः
[॥ १० ॥ °१३ ॥

सूनुस्तस्य सुधार्णवोदितसुधाधामोपमो दोर्भिभिर्
भूमींद्रस्य जयन्तवत्रपनयोः पित्रोः सदानंदकृत्।
राज्यं प्राप्य पुरूरवा इव परः श्रीरामसिंहाख्यया
यः ख्यातो भुवि विक्रमार्चितभुजः श्रीपार्वतीपुत्रवत् ॥१४॥

अहो विविधमंगलालसदनंतकेतुप्रभा
प्रभूतजनविसंकुला बहुविधैर्बुधैरुज्ज्वला।
दिवं हसति यत्सभा सकलशास्त्रसाहित्यवाग्
विवादमुदितांतरैर्द्विजपतिव्रजैरंचिता ॥ १५ ॥

येन श्रीब्रह्मपुत्राभिधनदपुलिने स्वर्णपृथ्वीप्रदानं
चक्रे यस्मिन्द्विजास्तेऽप्यतिधनिन इह क्ष्मातरालेऽभ्यभूवन्।
दृष्टा ये रुक्ममालोकितमपि न न तच्चित्रमेतत्तु किंतु
ब्रह्माप्यन्यं यदान्यं सृजति न तमिमं वीक्ष्य वीरैकमान्यं
[॥ १६ ॥ ० १८ ॥

वीरैरर्जुनहिंदुसिंहसबलानंदोग्रसिंहोद्भट-
श्रेष्ठश्रीहरिसिंहरावलजयत्सिंहादिभिः सेवितं।
यं दृष्ट्वा समरे सपत्नपृतना संत्रस्य भावानघो
धत्ते ऽष्टावपि सात्त्विकानवयवधृतुत्वं प्रगल्भाप्यहो ॥१९॥
[°२२ ॥

नटी। श्रुत्वा सानंदं। अज्जउत्त जइ एव्वं ता संपुण्णो मे मणलो वि मणो होस्सीत्ति।

नेपथ्ये। शंखवाद्यानंतरं। साधु रे भरतपुत्र साधु कः संदेहः। एतादृश एवायं° श्रीरामसिंहाख्यो महीपालो ऽस्ति। तद्वयमपि किमेतस्य पुण्यशीलस्य दर्शनेन चक्षुषः फलं नानुभविष्याम इति।

सूत्रधारः। श्रुत्वा। आर्ये तत्किमिति विलंबसे। आगता एव किलैते चंद्रकेतुभूमिपालभूमिकां पुरस्कृत्य मदीया नटास्तदावामपि त्वरितमभिलषितकार्यसिद्धये व्रजाव इति निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति विरहावस्थो नाट्यव्रासनस्थो राजा सविदूषकः॥

राजा। सर्वतो विलोक्य। आत्मगतं।

[1] The MS. omits the number of v. 6, and is consequently one figure short from here.



DR.RUPNATHJI( DR.RUPAK NATH )

जाने यद्यपि तां सुधाकरमुखीं प्राप्स्याम्यहं स्वल्पकैर्
एवाहोभिरिदं तथापि हृदयं प्राप्नोति नो निर्वृतिं ।
यत्सत्यं ब्रुवते जना विरहिणां सर्वं हि दुःखायते
नो चेत्सर्वसुखप्रदा कथमियं ज्योत्स्ना भृशं मां दहेत् ॥१॥°

The king tells the *Vidūshaka* how in a dream he has seen *Kāntimatī*, the beautiful daughter of *Ratnapāla* of Campāvatī.

Act II. The chief minister's son, *Guṇarāśi*, just returned to Ujjayinī from Campāvatī, tells the king that *Kāntimatī* is in love with him, whose praises had been constantly sung by those around her. Her father, seeing his daughter pining away without any apparent cause, had in vain summoned wise Brāhmans, physicians, Siddhas and others to cure her, till at last the *Siddhinī Muṇḍamālikā*, who was reported to have effected numerous cures, made her appearance and took up her residence at the shrine of *Sarvamaṅgalā* in the Śṛiṅgāravāṭikā. He advises the king to pay a visit to the king of Campāvatī, and consult the *Siddhinī*.

Act III. The scene is laid partly at the Śṛiṅgāravāṭikā, where the wise woman tells her pupil *Jaṭālampaṭā* about *Candraketu*, who had once shown her great respect; and partly at the court of Ujjayinī, where the king receives reports and makes preparations for his journey.

Act IV. *Kāntimatī* visits the *Siddhinī*, and is told by her that *Candraketu* is coming. During his stay, the latter resides at the Kanakaniketana, whence he views and describes the city. He also pays his respects to *Muṇḍamālikā*, who ultimately brings about the desired union.

It ends :

गुणराशिः । महाराज सत्यं तथापीदमस्तु भरतवाक्यं ।

पश्यंस्त्रैलोक्यमेतत् सुरनरभुजगान्ख्यापयन् स्वस्वकर्मा-
ख्यायात्याहस्य हैमं रथमतिजविनं सप्तनामाश्वितं(?०नं) यः ।
स त्वामात्मोचतेजोमहिमहतमहाध्वांतमालो विवस्वान् ।
पायान्मित्रोऽप्यमित्रो निजजनविपदां संविदां संप्रदाता॥९७॥
वर्णाश्चत्वार एते निजविहितपथेनात्मशक्त्या तुरीयाम्
आराध्याराध्य विद्यां विषयसुखभृतां भुक्तिमादौ लभंतां ।
पुत्रान्पौत्रान् पृथिव्यां सकलगुणगणालंकृतान् स्थापयित्वा
पश्चान्मुक्तिं श्रयंतां श्रुतिशतगदितां सच्चिदानंदरूपां ॥ ९८॥
यो जाता खलु चित्तपावन इति ख्यातस्तथोपाख्यया
विख्यातो भुवि रानडा इति जडाज्ञानापहानौ कृती ।
तस्य श्रीकविविश्वनाथविदुषो [ऽ]दोषोज्झितैषा कृतिः
कुर्याच्चेतसि संमदं बहुविधं संख्यावतां संप्रति ॥ ९९ ॥

इति निष्क्रान्ताः सर्वे ॥ चतुर्थोऽङ्कः ॥ इति श्रीचित्तपावनज्ञातीयरानडोपनामककविविश्वनाथभट्टविरचिता शृंगारवापिका नाम नाटिका काश्यां परिपूर्णा संवत् १७६३ समए अगहन वदि अष्टमी ॥

Wherever the full title of the play is given in the margin (viz. foll. 1, 2, 6–8) it is called *Śṛiṅgāravāpikā*. [H. T. COLEBROOKE.]

## 4197.

**144.** Foll. 38; size 14 in. by 3 in.; good Bengālī handwriting, of about 1750 A.D.; four lines in a page.

*Kautukaratnākara prahasana*, a comedy, in one act, composed for the delectation of the people during the celebration of the Spring festival (*vasantamahotsava, vishuvamahotsava*)—by one bearing the surname of *Kavitārkika*, son of *Vāṇīnātha*, and court chaplain of *Lakshmaṇapati*, or *Lakshmaṇa Māṇikyadeva*, son of *Gandharva Māṇikyadeva*, of *Bhūluyā-rājadhānī*.

It begins (with the verse-numbers supplied):

भूतैराकृष्टवस्त्रामुरसि करहतिं कुर्वतीमानताङ्गीं
दन्तैर्दष्टा रसज्ञां जघनगुरुतया प्रस्खलन्तीं द्रवन्तीं ।
पश्यैतां दक्षपत्नीमिति सुरसरिता जल्पिते सोपहासं
तां वीक्ष्य स्मेरवक्त्रः सपदि नतशिराः पातु वः पञ्चवक्त्रः ॥१॥

DR.RUPNATHJI( DR.RUPAK NATH )

अपि च । कोदण्डकर्षणविधौ श्रुतिमूलसङ्गी
भङ्गीं दधत् श्रवणभूषणपङ्कजस्य ।
चित्रीकृतो मधुकरैरिव नीलरत्नैः
पाणिः पुनातु गिरिराजभुवो जगन्ति ॥ २ ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । समन्तादवलोक्य । अहो सकलसामाजिकानां हृदयानि कौतुकजलनिमग्नानीव लक्ष्यन्ते । तथा हि ।

स्मितविदितरदालीमौक्तिकश्रेणिरोचि-
र्विदलितभुवनान्तध्वान्तधाराः समन्तात् ।
विकसितमुखपद्मव्यूहसौरभ्यपुञ्जैः
कवलितसकलासाः(°शाः) सभ्यसंघाः स्फुरन्ति ॥३॥

अद्य तावन्महाविषुवमहोत्सवे विहितबहुविधवितरणभूदेवभूरिभोजनप्रमुखवैदिककर्मकलापेन समधिरूढप्रसादेन पृथिवीपुरोहितेनादिष्टोऽस्मि कस्यचित्परिषदाराधनपटुतरस्य प्रहसनस्याभिनयाय । तत्समीहितं नः संपन्नं । तथा हि ।

आज्ञा नरपतेर्यत्र सभा चेत्तत्र सादरा ।
समीहितमतः किं स्यान्मादृशां नात्यधीमतां ॥ ४ ॥

तन्निजगेहिनीमाहूय महीमहेन्द्रस्यादेशं संपादयामि ।
इति नेपथ्याभिमुखमवलोक्य । आर्ये निजचरणमञ्जुमञ्जीरशिञ्जितमुखरितां रङ्गभूमिं कुरु ।

प्रविश्य नटी । एषा म्हि । आनवेदु अज्जे(r. अज्जो) ।

सूत्र° । आर्ये आज्ञापितो ऽस्मि राज्ञा कस्यचित्प्रहसनस्याभिनयाय ।

नटी । अज्ज केण णम्या(!) ।

सूत्र° । स्वगतं । सकलदिङ्नारीमलयजमण्डनायमानयशःप्रसरो ऽप्येष धरणीनायको विदितः प्रियया । अथवा कुलजनानां पतिपरायणानां मनोऽस्यत्र (? मनांस्यत्र) विस्फुरन्ति । प्रकाशं । प्रिये न जानासि । यस्य हि

न्यायादिग्रन्थवीथीविचरणपटुभिर्भूषिता भूमिदेवैर्
नित्यं भूदेवदेवार्चनरतमनुजा भारतीरङ्गशाला ।
रङ्गालंकारभूतातिथिमिलनमहासादराशेषलोका
वाराही यत्र देवी स्वयमरुणकरी भूलुया राजधानी ॥५॥

अपि च ।

दानौघैर्बहुभिर्मखैः सुकृतिनामाशंसनीया स्थितेः
स्वर्लोकादपि सा समुज्ज्वलगुणा विभ्राजते भूलुया ।
यस्यां सूरकुलाम्बुधेः समुदिताः कल्पद्रुमा जङ्गमाः
क्षौणीन्द्रा विचरन्ति सन्ति विबुधाचार्या द्विजेन्द्राः शतं ॥६॥

जनकस्तु यस्य

आसीन्मनोज्ञाधिकरस्य मूर्तिः श्वेतातपत्रीकृतचारुकीर्तिः ।
शूरान्वयाम्भोनिधिपूर्णचन्द्रो गन्धर्वमाणिक्यमहामहेन्द्रः ॥ ९ ॥ °८ ॥

भ्रमति युधि करीन्द्रे तस्य संहृदपद्यः
क्षितिधर इति मोहादग्रहीद्विभ्रमाप्तु ।
तदनु दशनयोश्चापान्तदा दृग्भ्रमो ऽयं
सुरसदसि मलज्ञो यन्नपाणिर्बभूव ॥ १० ॥

स्वयं यस्तु । विनम्रनृपमण्डलीमुकुटकोटिरत्नावली-
विशालविशदप्रभाश्रपितपादपङ्केरुहः ।
प्रतापमिहिरोदयग्लपितवैरिसीमन्तिनी-
स्फुरद्वयनकैरवो जयति लक्ष्मणक्षौणिपः ॥ ११ ॥ °१३ ॥

प्रिये सकलगुणनिधेस्तस्य भूपालचूडामणेर्गुणगणकथने न हि गीर्वाणगुरुरपि पटीयान् । तत्र के वयं वराकाः । तथा हि ।

आरोप्यन्ते गुणा ये स्तुतिकविवरैः पूर्वभूमीश्वराणां
न्यूनं श्रीलक्ष्मणस्य क्षितिकुलमणेः सन्ति नैसर्गिकास्ते ।
आस्तां तस्य स्तुतिः साहजगुणगणभाषणे ऽप्यस्य मन्ये
यद्येकः स्यात्पटीयान् दशशतवदनो भोगिनां सार्वभौमः
॥ १४ ॥ °१६ ॥

अपि च । यो ऽयमनवरतमुपचीयमानसुकृतकदम्बसंतर्पणार्थमस्मं रत्नाकरं निर्मितवान् ।

न्यायव्याकरणादिशास्त्रनिवहस्वाध्यानमध्यन्दिन-
प्रोद्यानद्युमणिप्रभातिरभितः संतापितानां सतां ।
धाराणामवगाहनाय गहनस्वच्छे रसैः पूरितः
श्रीमल्लक्ष्मणभूभुजा विरचितः सत्काव्यरत्नाकरः ॥ १७ ॥

नटी । सविस्मयं । अज्जउत्त । ईदिसम्पि प्पहसनमत्थि जेन तादिशस्स कविउलगुरुअस्स चेदस्सा अस्मनन्दो(?) मनोविणोद इदप्पत्ति ।

सूत्र° । क्षणं विभाव्य स्मृतिमभिनीय । वाणीनाथमहात्मनः सुकृतिनो विद्याविवेकक्षमाधैर्यौदार्यगभीरतासुजनताकारुण्यवारांनिधेर्भूमीदेवमणेः सुतस्य कृतिनः सत्काव्यरत्नाम्बुधिरास्ते श्रीकवितार्किकस्य सरसः कश्चित्प्रबन्धोत्तरः । तथा हि । एतस्य हि प्रज्ञानिर्जितनाकनागरगुरोरधिगतसकलशास्त्रार्थतत्त्वस्य कविकुलशिरोमाणिक्यमेदिनीपतिनिवहमुकुटमरीचिरञ्जितपदनखरस्य पुरोधसा तेन विरचितं कौतुकरत्नाकरं प्रहसनमेवात्र पटुतरमित्याकलयामः ।

नटी । अज्ज । एत्थ दोलायाद(? दोलायदे) मे हिअयं ।

सूत्र° । प्रिये न जानासि । स्वयं सकरुणमुपदिश्य कारित-

DR.RUPNATHJI(DR.RUPAK NATH)

गुणसक्षस्य (? °पक्षस्य) जनस्यानतिशायितो ऽपि गुण उपदेशकानां परां प्रीतिमुत्पादयति । तथा हि ।

स्वयं स्नेहेन सिक्तस्य शाखिनः कुसुमं यथा ।
आनन्दयति सेक्तारं तथा नान्यतरूद्भवं ॥ १८ ॥

अत्र नरपतिकुलमुकुटमणिश्रीलक्ष्मणमाणिक्यदेवस्य [पाद]पद्ममेव प्रमाणं । तथा हि ।

सभ्याः सदर्थं कलयन्ति काव्ये
दिशन्ति दोषान्पिशुनाः प्रयत्नैः ।
मधूनि पुष्पे मधुपाः पिबन्ति
कुर्वन्ति कीटाः किल वृन्तवेधं ॥ २३ ॥°

The comic figure of the piece is a silly king, *Māna*, whose queen has been abducted, and who relies for her recovery on a lot of imbeciles and knaves who possess his confidence. The nature of these characters is sufficiently indicated by their names. There is *Kumati Deva*, the minister; *Aśubhacintaka*, the astrologer (*daivajña*); *Ācārakālakūṭa*, the priest (*vipra*); *Pracaṇḍaśephavarvara*, the spy; *Suśīlāntaka Daṇḍapāṇi*, the overseer of the harem; *Samarakāra*, the commander of the army; *Ajitendriya*, the guru; *Vyādhivardhaka*, the physician (*vaidya*); and *Kapaṭaveśadhārin*, the brāhmaṇa, who is accidentally revealed as the abductor.

Of Prākṛit, the play contains only the few conventional phrases and a song assigned to the actress in the prologue.

It ends:

आचार° । देव भूयः किं ते प्रियमुपकरोमि ।
राजा । अतः परमपि प्रियमस्ति । तथा हि ।

त्वं चाचार्यवर स्वकीयनगराचारे नियुक्तो मया
सच्छक्राशनमिश्रिताम्बुचसुरा(?°तुरा) प्रीताखिलैर्बान्धवैः ।
ग्रामानङ्गतरङ्गिनी च कुलटीरूपैर्जगन्मोहिनी
नीतो ऽयं कपटी गुरुर्मम गृहं देवीं गृहीत्वा मुदा ॥

तथापीदमस्तु ।

पृथ्वीविस्तारशम्यां जनयतु विदधद्देवराजः सुवृष्टिं
भूदेवैर्यज्ञकर्माखिलनिहितपुरोडाः स संतर्पितः सन्
क्षीरं सुस्निग्धगव्यो दधतु बहुतरं तद्भवे राज्यसंघे
यन्नैस्तुष्टाः प्रज्ञानां विदधतु निखिलानन्दवृन्दानि देवाः ॥

इति निष्क्रान्ताः ॥ इति कौतुकरत्नाकरनाम प्रहसनं समाप्तं ॥ इति रत्नाकरं पुस्तं रामलोचनशर्मणा । लिखितं बहुयत्नेन वर्णाशुद्धं त्यजेद्बुधः

For an incomplete MS. of the same work (reaching as far as fol. 28*b*, *l.* 3 of the present MS.), see Notices of Skt. MSS., 2nd ser., i., p. 80. [H. T. Colebrooke.]

## 4198.

**1120 e.** Foll. 12; size 12 in. by 4½ in.; very fair Devanāgarī writing, of about 1800 A.D.; twelve lines in a page.

*Vasantatilaka*, a dramatic entertainment, in one act, of the *bhāṇa* order; by *Varadācārya*—son of *Sudarśana Kavi*, surnamed *Ghaṭikāśata*—eulogised by the *sūtradhāra* both as poet and as logician. [A.]

It begins:

जयंति जगतां मातुः स्तनकुंकुमबिंदवः ।
मुकुंदाश्लेषसंक्रांतकौस्तुभश्रीविडंबिनः ॥

It ends:

कांचीपुरीमधिवसन् कमनीयभूमा
कामीड्य एव वरदः कमलालयायाः[1]
आकल्पयन्वसुमतीमनुकल्पमेनां (°रंज्यमानां B)
कल्पद्रुमो भवतु (जयति B) कश्चन मानवानां ॥ १४७ ॥

इति निष्क्रांतास्सर्वे ॥ वसंततिलकभाणस्समाप्तः ॥

The work consists of a soliloquy describing the most heterogeneous scenes, one abruptly succeeding the other. The scene is laid in the streets of Kāñcīpurī (Conjevaram), the abode of crowds of Brāhmans and dancing-girls connected with its famous temples; and the colours of the picture are taken from the occurrences of daily life, such as gossipping about the private affairs of casual passers-by, love-making to other men's wives, cock-fights,

[1] कामी स एव वरदः कमलामहीशः B.

DR.RUPNATH(DR.RUPAK NATH)

snake-catching, stopping of a mad elephant running about, teaching in a class-room, duels, etc. The last scene begins with the arrival, from Hastigiriśikhara, of *Varadarāja*, styled *Hastigirīśa, i.e.* prince of Kāñcīpurī, who comes to grace by his presence the celebration of the *vasantotsava*. On this occasion *Vasantasenā*, a dancing-girl from Vilāsapura, performs before the king, is admired and liberally rewarded by him, and finally becomes the wife of the actor, *Śṛiṅgāraśekhara*.

The piece is entirely composed in Sanskrit. Editions of the work have appeared at Calcutta and Madras.

Cf. Sylvain Lévi, Le Théatre Indien, p. 255.

[H. T. Colebrooke.]

## 4199.

**3188.** Foll. 30; size 12½ in. by 3¾ in.; good, modern Devanāgarī writing; European paper; seven lines in a page.

The same work. [B.]

Colophon: इति श्रीमद्घटिकाशतबिरुदश्रीवरदाचार्येण विरचितो वसंततिलको नाम भाणः समाप्तः ॥

The fly-leaf contains the following note:—
"Copied for me from a manuscript belonging to *Lakhman Trimbakjī Gadgil* of Belgaum.

The manuscript is dated Śaka 1709. It consists of twenty-four leaves, about 11½ in. long by 4¾ in. broad. The characters are Nāgarī. Presented to the India Office Library, 23rd August, 1878.

J. F. Fleet, Bo.C.S."

## 4200.

**1827.** Foll. 6; size 12½ in. by 5 in.; clear Devanāgarī writing of 1812 A.D.; European paper (watermark 1808); 12 lines in a page.

*Mithyājñānakhaṇḍana*, a short allegorical play vindicating the superiority of the ancient traditionary forms of belief and social state of things; by *Kavi Ravidāsa*.

It begins:

श्रीदेवी यः सुखायाखिलजननजननी पार्वती पावनी स्याद्
वाग्देवी वाक्प्रदास्तु शुभफलिरपि परा सिद्धिमृद्धिं ददातु ।
रामः कामं निकामं वितरतु सततं धामधामासु(? °स्तु) नाम
देवश्चंद्रार्धचूडो गजवदनयुतः कीर्तिकांतिप्रदो ऽस्तु ॥ १ ॥

अपि च । सतां संनिहितो नित्यं पाखंडपवनूरगः ।
स श्रीपतिः परामृद्धिं सर्वसिद्धिं च यच्छतु ॥ २ ॥

नांद्यंते सूत्रधारः । भो भोः सभासदः सावधानाः शृणुध्वं । इह खलु भरतखंडमंडनीभूते गुर्जरप्रदेशे द्वारवतीपतेः प्रियाय कविरविदासकृतस्य मिथ्याज्ञानखंडनाभिधस्य नाटकस्याभिनयार्थं प्रवृत्तो ऽस्मि । तदाकारयेय नटीं ।

सूत्रधारः । प्रिये इतस्तावत्प्रविश्यं ।

नटी । अज्जउत्त किं कत्तं ।

सूत्रधारः । प्रिये नाटकमभिनेतव्यमस्माभिः ।

नटी । अज्जउत्त तं कवज्जं(! किमर्थं) ।

सूत्रधारः । प्रिये भगवद्भक्त्यर्थमेव ।

नटी । केरिसो उण भगवं (कीदृशः पुनर्भगवान्) ।

सूत्रधारः । आः भगवानपि पृच्छयते भवत्या । तथा हि ।

यो मायया सृजति रक्षति हंति काले
त्रैलोक्यमेतदखिलं सजलांबुदाभः ।
तं श्रीनिकेतममलांबुजपत्रनेत्रं
नावैति कः परमकारुणिकातपत्रं ॥ ३ ॥

नटी । सहर्षं । आकाशे कर्णं दत्त्वा । अज्जउत्त किं कखमुहदं सूयदे ।

सूत्रधारः । कर्णं दत्त्वा । आः परिज्ञातं । वेदध्वनिरयं पातकं विधुनोत्यस्माकं पवित्रतरो घोषारवत्कारो ऽपि श्रूयते । अहमिति मन्ये । वेदैः परिवृता भगवती वाग्देवी समागता । यासौ

साक्षात्कर्पूरगौरा कनकमयमहाकुंडलोद्भासिगल्ला
श्रीमद्वीणाप्रवीणा शशधरविशदे राजहंसे निषण्णा ।
बिंबोष्ठी पद्मपत्रायतनयनयुगोत्तुंगवक्षोजयुग्मा
हीराकारद्विजालिर्वलिललिततनूद्दाममध्या सुनाभिः ॥ ४ ॥

वेदाश्च य एते

DR.RUPNATHJI( DR.RUPAK NATH )

कषायवरवाससः शशिकरस्फुरद्दंतुभिः
प्रकाशितहृदंबरास्तिलककांतिगौराननाः ।
गृहीतकनकोत्तमस्फुरितवारिपात्रीरुचाम्
इळनखरुचो वचोऽमृतरसेन सत्सौख्यदाः ॥ ५ ॥

तर्हि वयं सपर्यार्थं प्रयताम इति निष्क्रांतौ ॥ प्रस्तावना ॥
ततः प्रविशति यथानिर्दिष्टा भगवती वाग्देवी चत्वारो वेदाश्च सर्वशास्त्रनिपुणपरिवृताः । इतस्ततः परिक्रम्य
वेदाः सरस्वतीं विलोक्य । भगवति संसारसागरतरणि० । वयं तु पापहेतुना कलिहलकेन पराभूता विरलप्रचाराः कृताः ।० अतो ऽस्माभिः किं कर्तव्यं कुत्र गंतव्यं तत्समादिशतु भगवती ।
वाग्देवी । अत्याश्चर्यमिदं । भगवंतो वेदा अपि स्तुतिवाक्यैर्वराकीं मां संभावयंति ।०

*Sarasvatī* tries successively to associate the *Vedas* with *Vishṇubhakti*, *Nyāya*, *Mīmāṃsā*, and *Vedānta*, but they declare themselves likewise infected by the evil influences of *Kali*. Then *Praśastipaurāṇika* is called to the rescue. At the same time appears *Vyāsa Viṭāvataṃsa*, with his four female friends *Viṭopadeśā*, *Viṭavallabhā*, *Viṭāṅganā*, and *Viṭavilāsinī*, as the representatives of female emancipation; whilst the unsavoury *Kumbhakārī Adhautagudā* also makes her appearance, hailed by the women as their 'mother' and 'teacher' (*upadeshṭrī*). *Viṭopadeśā* then informs her that she has initiated many '*sādhavaḥ*' into '*viṭatā*,' and introduces her to her own friend *Viṭāvataṃsa*, with whose assistance she has accomplished so much, whereupon this worthy pays his respects to the beldame. Meanwhile, *Praśastipaurāṇika*, who has been a witness to this scene, makes his remarks upon the strange modern development of womanhood (अहो स्त्रीणां प्रपंचो गहनः); but when they try to indoctrinate a *Brāhmaṇī* with their new-fangled morals, and when she, though at first shrinking with disgust from the suggestion that she should render homage to a *Kumbhakārī*, shows signs of giving way to their blandishments, he strikes in, and exposes the hollowness of *Viṭāvataṃsa's* doctrine of the superiority of pleasure to duty.

It ends: ततो वेदाः सरस्वती च प्रशस्तपौराणिकं साधुवादेन पूजयतः । प्रगटीभूता प्रशस्तपौराणिकोपरि देवकरच्युता पुष्पवृष्टिः पतति । वेददर्शनेन उत वाग्देवीदर्शनेन सवितृदर्शनात्तमांसीव सर्वे पाखंडा विद्रुताः । भगवती वाग्देवी वेदाश्च जयश्रिया सेव्यमानाः सकलमुनिणै(०मुनिगणैः) स्तूयंते । तद्यथा ।

नमो ऽस्तु [ते] देवि सवितृसारदे
नमो ऽस्तु वेदाः सकलेश्वरेश्वराः ।
सच्छस्त्रसंघाश्च पुराणसंहिता
नमो ऽस्तु वो धर्मपथप्रवर्तकाः ॥ ४६ ॥
वेदाः कुर्वंतु कल्याणं श्रीरस्तु सदने हि नः ।
सारदा सारदा नः स्यात् कारुण्यांबुतरंगिणी ॥ ४७ ॥

इति श्रीकविरविदासविरचितं मिथ्याज्ञानखंडनं नाम नाटकं समाप्तं ॥ नवरसवसुशशिवर्षे कार्त्तिककृष्णदले भूतदिने बुधवारे सूर्यपुरे विमले । शोधः समजनि शंभुद्विजतः क्षंतुमलं मतिमंतः कुर्वंतो वसुधातलममलं ॥

[Dr. John Taylor.]

## 4201.

**1570 B.** Foll. 12; size 9¼ in. by 4½ in; Bengalī handwriting of about 1700 A.D.; 8–10 lines in a page.

*Dhūrtasamāgama prahasana*, a farce, in two acts, by *Jyotirīśvara Kaviśekharācārya*, son of *Dhīreśvara*, and grandson of *Rāmeśvara*.

It begins:

हर्षादम्भोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमत्या
श्वश्र्वा मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्ब्यमाने ।
तद्भक्तं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा तद्भृत्नमाप्नु(!) स्मितसुभगमुखः पातु वः पञ्चवक्त्रः ॥०

The little play has been edited in Ch. Lassen's Anthologia Sanscritica (Bonn, 1838; not reprinted in the 2nd edition), where (pref., p. xi.) the Karṇāṭa king *Narasiṃha*, mentioned in the prologue as the author's patron, is

DR.RUPNATHJI(DR.RUPAK NATH)

identified with the king of that name who ruled at Vijayanagara 1487–1507 A.D.

A leaf is wanting at the end; the MS. ending with the first pāda of the last stanza: काले सन्ततवर्षिणो जलधाराः सर्वैः समुद्गनभरा(!)

Cf. Aufrecht, Cat. Bodl., no. 281; Sylvain Lévi, Théâtre Indien, pp. 252-3.

[H. T. COLEBROOKE.]

## 4202.

**450 b.** Foll. 8; size 8¾ in. by 3½ in.; legibly written, in Devanāgarī, about 1700 A.D.; 9–12 lines in a page.

*Svarṇamuktāvivāda*, the dispute of Gold and Pearl for superiority, treated dramatically, in prose and verse, by *Maheśa Paṇḍita*.

It begins: श्रीमहागणपतये नमः॥ श्रीवाराह्यै नमः॥

अस्ति स्वस्तिमती समस्तनगरीसौंदर्यपूर्णा पुरी
ख्याता श्रीनगरी गरीयसि गुणैर्गौरीगुरोः पर्वते ।
यत्र स्वर्णमयी सभासु सततं मुक्तामयी च श्रियौ
सेवेते बलभद्रराजचरणावन्योन्यसंस्पर्धया ॥१॥

सुवर्णं । इतस्ततः सभ्यकंठकर्णांगुलीष्ववलोक्य सक्रोधं ।

भो सभ्याः कथयंतु केयमधमा सार्धं मया स्पर्धते
केयं कस्य सुता किमीयवनिता कार्यं किमस्याः पुनः ।
किं जानाति न मां सुवर्णमखिलैराराध्यमानं सदा
धातूत्तंसमिहापरत्र च सुखासाधारणं कारणं ॥२॥ यतः।
यत्राहं निवसामि तत्र गुणिनः शस्त्रं च शास्त्रं तथा
वस्त्रं चापि विचित्रमत्र सुभगा नागास्तुरंगा अपि ।
नानादेशसमागताः सुचरिताः संतः कियंतो न वा
भक्ष्यं भोज्यमपीह वस्तु सकलं नानाविधं विद्यते ॥३॥
गेहे यस्य वसामि तस्य विविधा वापीतडागादयो
धर्माः शर्मकरास्तनोति सुतुलादानादिदानानि सः ।
स्वर्गारोहणकारणानि सकलाः सोमाश्वमेधादयो
यागास्तेन नरेण कर्तुमुचिता विद्यापि तस्यैव सा ॥४॥

मुक्ता । सस्मितं ।

तातः ख्यातः स पाथोनिधिरतिमहती रत्नगर्भा च माता
ये ये सौभाग्यवंतो जगति सुकृतिनो नायका मामकास्ते ।
आर्याः कार्यं मदीयं यदिह किमपि वा तद्विदंतो विदंति
क्लीबं कस्मादकस्माद्वदति मयि मुधा वर्णमेतत्सुवर्णं ॥५॥
भ्राता मे स कलानिधिर्गिरिसुताभर्तुः शिरोभूषणं
या सा मे भगिनी रमा भगवतो वक्षःस्थलस्थायिनी ।
किं चाहं च समस्तराजरमणीवक्षोजभूषाकरी
मुक्तानाम गुणैकधाम सततं निर्मुक्तदोषव्रजा ॥६॥

सुवर्णं । भो भो सारासारविचारचतुराः सभासदः कथमियं
मुक्ता नाम मुक्तलोकलज्जा मां क्लीबमित्याभाषते ।
मुकुटकुंडलकंठविभूषणैः कटककंकणकिंकिणिकादिभिः ।
पदकपादविभूषणनूपुरैर्जगति मंततमंततिको ऽस्म्यहं ॥७॥

यदि च शब्दक्लीबतामात्रेण सेयं रंडा समस्तयशःप्रदं मां क्लीबमित्याक्षिपते तर्हि निखिलजगज्जनकस्य ब्रह्मणः क्लीबतां कथं नावादयेत् । किं च । दारदैवतपदानां पुंनपुंसकस्त्रीलिंगत्वे ऽपि तत्तदर्थानां न तल्लिंगतेति सुप्रसिद्धतरं । अहो सभ्याः नूनमस्यां गणिकायां भवंतोऽपि पक्षपातिनः संतीति मन्ये येनैवं वदंत्याममस्यां मौनमाश्रितं युष्माभिः । न चैतद्युक्तमवभयतां । यतः । सभा वा न प्रवेष्टव्या° इति धर्मशास्त्रं (M. 8, 13) श्रूयते । यदि च धर्मशास्त्राद्बिभ्यति भवंतस्तर्हि राजदंडभीतिरपि नास्तीत्यहो महासाहसं ।

रागाल्लोभाद्भयाद्वापि स्मृत्यपेतार्थकारिणः ।
सभ्याः पृथक्पृथग्दंड्या विवादाद्द्विगुणं दमं ॥

इति (*Yājñ.* 2, 4) धर्मशास्त्रस्मरणात् ॥ ततः

सभ्याः सुवर्णमवलोक्य सस्मेरं । भो सुवर्ण यद्यपि कवयः स्थले स्थले क्लीबत्वेन निर्दिशंति तेनैव वयं मौनमाश्रिताः । न तु मुक्तापक्षपातेन ।

सुवर्णं । हंत भवंतोऽपि कवीनां वचः प्रमाणयंति । यतः ।

कवयः किं न भाषंते किं न जल्पंति मद्यपाः ।
राजानः किं न कुर्वंति किं न भक्षंति वायसाः ॥

इति कविभिरेव कवियचनामयथार्थत्वकथनादिदमल-मसत्कलहेनेति तूष्णीं बभूव ।

मुक्ता । तदेतत्सुवर्णवचनमाकर्ण्य सगर्वं ।

हे हे हिरण्य दुर्वर्णवादिन् किं गर्वमायसे ।
त्वमाकरजनिः स्वर्ण रत्नाकरजनिस्त्वहं ॥°

Subsequently, Silver (*rajata*) and Diamond (*hīraka*) join in the dispute, on the part of the precious metals and stones respectively; but, in the end, king *Balabhadradeva* himself is appealed to, and, with diplomatic tact, settles the dispute by allowing to each side its own special merits and sphere of usefulness.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends: राज्ञा। पुनः सस्मेरं। भो सुवर्णास्मत्सभायामभिमानमपहाय मिलित्वैव स्थीयतां। °। किं च।

युष्माकं यादृशी कांतिः कांचनेन सहामुना।
नान्यथा तादृशी तेन मिलित्वैवास्यतामिह॥

हीरकं। स्वमनसि विचार्य। भो मुक्ते साधूक्तं सकलार्थतत्त्वविदा महाराजेन। यतः। उपकर्त्रारिणा संधिर्न°॥ उपकारोऽमुनास्माकं कांचनेन महान्कृतः। यतः। तत्तद्दूरनिवासिनो ऽस्मानानीय परमपवित्रमूर्तेर्भगवच्चरणशरणस्यानंतदानमानसंतोषितभूरिसुरप्रवरस्य विविधविद्याप्रचुरतरपंडितमंडलीमंडितसभामंडपस्य निजकीर्तिकौमुदीमोदितजगत्पद्मस्य क्षितिपालचयचमूचक्रचूडामणिश्रेणिनीराजितोपांतपदद्वयांभोजकिर्मीरितस्वर्णपीठस्यास्य महाराजस्य दर्शनं कारितं। किं च।

उपजीव्यविरोधेन न कुतश्चिदवस्थितिः।
पश्येंधनविरोधेन दहनस्य कुतः स्थितिः॥

तस्मात्साधूक्तं महाराजेन बलभद्रदेवेन मिलित्वैवास्यतामिति।

सर्वाकूपारपारस्थितमपि विविधं वस्तुजातं समस्तं
शस्तं यत्पादपीठं क्षितितलममलं सर्वदालंकरोति।
सोऽसौ भूचक्रवर्ती जगदखिलमहाधीरवीराग्रवर्ती
प्राज्यं राज्यं विधत्तां नृपतिकुलमणिः साहिबाहादुरेन्द्रः॥१॥

इयं श्रीनगरीयस्य श्रीमहेशमनीषिणः।
निर्मितिः शर्म निर्मातु निर्मत्सरमनीषिणां॥२॥

इति श्रीमहेशपंडितविरचितः स्वर्णमुक्काविवादः समाप्तः॥

The *Balabhadra Deva* of *Śrīnagarī*, who thus acts as referee, and to whom the little play is dedicated, was probably the author's patron; whilst the *Sāhi Bāhādurendra* (*bhūcakravartin*) referred to in the first of the concluding ślokas may have been intended for the contemporary suzerain king of Guzerat, *Bahādur Shāh*[1] (1526-1537).

[1] This was suggested by Mr. L. D. Barnett, who kindly supplied me with the (not very satisfactory) readings of the Bombay edition in the final ślokas and colophon, viz.:—

योऽसौ . . . वीरधीराग्रवर्ती° ॥६०॥
इयं श्रीनगरी यस्य श्रीमहेशमनीषिण।
निर्मितः शर्मनिर्मातुर्निर्मत्सरमनीषिणा ॥६१॥

इति सुवर्णमुक्तासंवादः समाप्तः॥

This little work has been printed in the *Laghukāvyāni* (pp. 171 ff.), forming part of the Bombay magazine *Kāvyetihāsasangraha*, vol. 10; but unfortunately this edition was not available for consultation when the foregoing extracts were made.

[H. T. COLEBROOKE.]

## 4203.

**243.** Foll. 102 (counted 101, no. 46 being double); size 12¼ in. by 4¼ in.; good, modern Bengālī handwriting (omitting, however, the diacritic dot of the *r*); six (from fol. 48 seven) lines in a page.

*Ānandalatikā*, a dramatic poem, in five sections (*kusuma*), on the love of *Sama* and *Revā*, by *Krishṇanātha Sārvabhauma-bhaṭṭācārya*, son of *Durgādāsa Cakravartin*.

Though exhibiting some of the forms of a *nāṭaka* (and marked as such outside), the work is devoid of all real dramatic action, being rather a collection of poetry, descriptive and narrative, with interspersed dialogues and *quasi* stage directions.

It begins (with the numbers supplied):

संभ्रान्तं नमदुन्नमत्क्षितिलुठद्गीर्वाणमूर्धावली
चञ्चच्चामरचारुकुन्तलचयध्वान्तालिसंवर्धिनी।
तेषां फुल्लविलोचनाम्बुजदलान्युल्लासयन्ती परं
चित्रा तन्नखचन्द्रिकावलिरियं चेतो ममालम्बतां॥१॥

सानन्दं वन्दनाय क्षितितलविलसन्मौलिचन्द्रार्धमौलेर्
व्यालश्वासप्रदीप्तोद्भटनयनशिखिज्वालया दग्धमर्मा।
शीतांशुः पादपद्मं हिमगिरिदुहितुः शीतलं यो निषण्णः
पीयूषस्निग्धदेहो विलसति नखरः सोऽयमव्याच्चिरं वः॥२॥

एणीलोचनमिन्दुबिम्बविमलज्योत्स्नां पिकीकूजितं
हंसीमञ्जुगतिं जहार भवती व्यक्तं जगन्मण्डले।
मच्चित्तं वद कुत्र गोपितमिति व्याहृत्य गोपीस्तनान्
मुञ्चन्कञ्चुलिकां विचारचतुरो मुग्धो हरिः पातु वः॥३॥

DR.RUPNATHJI( DR.RUPAK NATH )

शम्भोर्नर्तनधूतमञ्जुलजटाक्षेपेण संपातितैर्
गाङ्गैर्वारिभिराप्तु मुण्डनिवहे शैवीतनूमाश्रिते ।
गौरीमुत्सुकयन् गणांश्च मुखयन् मुस्मेरलम्बोदरो
मातेयं तव जाह्नवीति पितरं संव्रीडयन् पातु वः ॥ ४ ॥

आकर्ण्य सभ्याः । भो आनन्दक साधु साधु नान्दीभिर्नन्दिता वयं । किंतु देवस्य चिन्तामणेर्जामातृपरिणेतृनीततनया-निमित्तमन्यादृशमानसं । तदस्य मनोनिर्वेदजनकमपि प्रबन्धं प्रस्तावय ।

आनन्दकः । आर्याः । श्रीमन्नन्दनन्दनचरणसरसीरुहमनन-परितुच्छितविषयरसश्रीदुर्गादासचक्रवर्तितनयेन श्री-कृष्णनाथकविना विरचितमानन्दलतिकानामप्रबन्ध-मधीतवानस्मि । तद्यदि देवरुचये भवति । अथवा श्रीपुरुषोत्तमदेवचरितेन तावदात्मानमपि पवित्रयामि । तथा हि ।

दीर्घासदालपनगाढजडां रसज्ञां
शुद्धां करोमि गुणवारिनिधौ विभूनां ।
स्वर्वाहिनीपयसि भूरिविधूततुण्डः
काको ऽपि चञ्चुपुटकं विमलीकरोति ॥ ५ ॥

इति सभ्येषु निवेद्य नृपतिपुरत उपसृत्य प्रकटितकरपुटकः प्रचलद्भवदलः सविनयनमितकन्धरः क्षितिपतिपदनिहितनय-नस्तिष्ठति ।

राजा । अवलोक्य । अये आनन्दक । किमपि विवक्षुरिव वीक्ष्यसे । तत्किमिति मौनमास्थितं भवता ॥

आनन्द[:] । महाराज मन्यगरलितं (?सम्यगवसितं) देवैः । तथा हि ।

अभिनवकविकवितेयं भरति न वा रुचमेतदभिज्ञानां ।
हरति वा वितचित्तं चटुलयति मां हरेर्गुणानुवादः[1] ॥ ६ ॥

[राजा।] भो आनन्दक। प्रभुगुणविरलितप्रबन्धमधीतवान् भवान्। तदलमेतावता विनयप्रबन्धेन विलम्बावलम्बनेनापि ।

आनन्दः । यथाज्ञा[प]यति[देवः ।] तदेव प्रस्तौति ।

कुरुक्षेत्रं यातैः क्षितिपनिवहैर्भूरिविभवैर्
महारत्नौघानां वितरणभरैर्दीननिकरान् ।
महाद्यान्कुर्वद्भिः क्षुभितकनकाद्रिप्रभृतिभिर्
महेष्वासैरासीत् क्षितिरपि तदा देवभवनं ॥ ७ ॥

कृतार्थयन्साधुजनेक्षणानि पिपासयन्दुर्जनमानसानि ।
आनन्दयन्नागतनन्दमुख्यांस्तस्मिन्प्रभुः पौरजनैर्जगाम ॥ ८ ॥

निशम्य लोकैरिह लोकनाथं चेहस्तपीनपयोधराया ।
तदा यशोदा सुतधीविमुग्धा तद्दर्शनव्यग्रमना हरोद ॥ ९ ॥

देवो ऽपि सद्भावगृहीतमानसम्
चिरेण विचोरयलोकलालसः ।
पुरेव पालोचितवेशपेशलो(*r.* °वेव°)
गोपाकृतिः पादगतिं प्रतस्थे ॥ १० ॥

पुरा वयस्यैर्व्रजपालसंघैरालोकितो वर्त्मनि तैर्मुकुन्दः ।
निवेदितोऽथ व्रजनाथपत्न्यामन्तःपुरं तूर्णमथाविवेश॥११॥°५०॥

नोद्धवादिरपि गोपनन्दनान् रुक्मिणीप्रभृतयो न यद्वधीः ।
न प्रभू च पितरौ व्रजेश्वरी चेतसो गमयितुं रमापतेः ॥५१॥

सभ्याः। साधु भो आनन्दक साधु। उचितप्रमाणैर्वयमानन्दिताः। ततः आनन्दकः ।

अत्रान्तरे पुलकपूरितदेहयष्टिन्
आनन्दजेन नयनाम्बुभरेण सिञ्चन् ।
दूराद्विभोः समवलोकनमुग्धचेताः
श्रीनारदः क्षितितलं मुनिराजगाम ॥ ५२ ॥

तं नारदं वीक्ष्य सुदूरतो ऽपि विहाय सिंहासनमाशु देवः ।
जगाम तस्यान्तिकमेव तूर्णं भूमिं पदाम्भोरुहमण्डयन्सः ॥५३॥

योगीन्द्रवृन्दैरपि वन्दितोऽपि व्रजेशजं भाविभिरर्चितोऽपि ।
तदङ्घ्रियुग्मे जगदेकनाथो दण्डो यथा मारुतः पपात ॥
[५४ ॥ °५५ ॥

कालिन्दीं प्रति नारदः ।

विहाय रुक्मिणीगेहमपि सत्यानिकेतनं ।
मामिहानीतवान्देवः सौभाग्यं पर्यवस्तव ॥ ५६ ॥

देवः । स्वगतं ।

जानाति नर्म न रमा मयि कुप्यतीति
वृत्तं निशम्य कुपिता किल सत्यभामा ।
भूयोऽपि हन्त मुनिना स्मृतपारिजाता
पूर्वाधिको मम पुनः पृथुलः प्रमादः ॥ ५७ ॥

नारदः । देव ।

तवानुरूपा दयिता यथा मामतोपयच्छुद्धतमान्तरेण ।
प्रतिप्रियं तस्य करोतु को वा स्वीयानुरूपं तु निरूपयामि ॥५८॥

मानवाधिपतिर्देव दमनो नाम भूपतिः ।
विभवैर्भक्तियोगैश्च न यस्य प्रतिमो भुवि ॥ ५९ ॥

निखिलान्तर्निगूढानां गोचरः सर्वमेव हि ।
तथाप्यमुष्यास्तोषाय प्रलपामि पुरः प्रभोः ॥ ६० ॥

[1] ? Read हरति न वा हितचित्तं चटुलयति मां हरि-गुणवादः ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तनया तस्य भूपस्य जगदुत्तररूपिणी ।
नाम रेवा गुणास्तस्या नाहं वर्णयितुं क्षमः ॥ ८१ ॥
तवात्मजे सा दृढबद्धभावा स्वयंवरार्थं यतते पितास्याः ।
द्विजोऽपि पत्री विनिवेश्य मूर्ध्नि समागतप्राय इवावधेहि ॥ ८२ ॥ °९२ ॥
अथ त्वदीयस्तनयः समोऽपि स्वीयानुरूपां दयितां दिदृक्षुः ।
विद्यां समाश्रित्य मयैव दत्तां[1] क्षितीश्वराणां पुरमाविवेश ॥ ९३ ॥ °९९ ॥

In the course of his quest of a suitable consort, he arrives at *Damana's* city, and hearing the praises of *Revā* sung, he enters the palace unseen.

ततः शयानां मणिवेदिकायां शशाङ्कशृङ्गीमधिरुह्य शय्यां ।
चकार नेत्रातिथिमेव रेवां सरिद्विलीनामिव राजहंसीं॥१००॥
अथ विलोक्य समो दमनात्मजामनुभुवन्न पुनर्भवनिर्वृतिं ।
तरलितोऽग्रजकूटमनोभुवा स्वगतमित्यमभाषत तद्गुणान्॥१०१॥

Subsequently the sleeping maid awakens, and they plight their faith to each other.

II. (fol 40*a*):

मन्दं मन्दं क्षिपति चरणं चिन्तयन्प्रेम तस्यास्
तूर्णं तूर्णं किरति नयनं पृष्ठतस्तद्गमेण ।
वारं वारं जपति निभृतं भाषितानि प्रिया[णि]
दीर्घं दीर्घं श्वसिति च समः कम्पमानाखिलाङ्गः॥°

*Sama's* friend, *Subhūti*, son of *Uddhava*, noticing the change in the prince's condition, is told in detail what has occurred, and the love-sick prince then proceeds to paint from memory the portrait of his beloved, which occupation affords ample scope for depicting the lover's feelings.

III. (fol. 50*a*):

अथो मुनीन्द्रादवगत्य भूपः समाधिविज्ञातसमस्तवृत्तं ।
निजानुरूपे प्रतिलब्धभावां सुतां स विज्ञाय परं तुतोष ॥ १ ॥
प्रलोभितेयं मदनानुजेन(!)जहौ न धर्मं कुलजाङ्गनायाः ।
रहोगतापीति महीमहेन्द्रः प्रियान्वितस्तां प्रशशंस रेवां ॥२॥

[1] Viz., the power of entering anywhere without being seen by others.

The king issues invitations to the *svayamvara*, and various scenes of amusement in connection therewith are depicted.

IV. (fol. 67*b*):

अथोदिते भास्वति भूमिपालास्तच्चिन्तनोन्निद्रितलोहिताक्षाः ।
माध्वीकरम्यामपि वन्दिगीतां स्तुतिं तदानीं विफलां वितेनुः ॥१॥

The princes assemble, and at length the princess herself enters the festive hall.

शीतांशुबिम्बवदना स्तनभारनम्रा
स्वेदाम्बुबिम्बमनुबिम्बितपल्लवोष्ठी ।
भूदेवपाणिपरिदर्शितवर्त्मनैव
बाला जगाम मगधाधिपसंनिधानं ॥ ३६ ॥
भूपात्मजां द्विजवरः पुरतो निधाय
बद्धाञ्जलिर्नमितमौलिरिदं बभाषे ।
कीर्तिप्रतापजयदानमहीमहेन्द्र
भूपावधेहि यदहं विनिवेदयामि ॥ ३७ ॥
एषा पुरा नृपसुता शयिता निशायां
स्वप्ने कुतोऽप्यधिगता कठिनां समस्यां ।
लभ्यैव(*r.* लब्ध्वैव) बाल्यचपला स्वकरग्रहेऽपि
तत्पूरणं च पण इत्यकरोत्प्रतिज्ञां ॥ ३८ ॥

इति काञ्चनपटलिखितां समस्यामर्पयति । राजा सादरं प्रगृह्य वाचयति ।

रौपाभिधो धीरसमोऽप्यधीरः
को मित्रजामित्रजनप्रसूतः । इति ।

The king of Magadha being unable to complete the verse, the rulers of Kaliṅga, Karṇāṭa, Avanti, Kāmarūpa and others are successively tried without success, until at last the princess and her companion come to the Yadu prince.

एवं तयोः स्फुटतमे दृढभावबन्धे
तं पश्यतामपि जयाशिषि निःसृतायां ।
भूपेषु मूर्छिततमेषु करे समस्य
विन्यस्तवान्द्विजवरः कठिनां समस्यां ॥७२॥°७४॥
ईषद्विहस्य जलदध्वनिराशु तेषाम्
उत्कण्ठया सह ददर्श तदर्धमेव ।
आधूतमौलिदयिताननदृष्टिवर्गं
सोऽपूरयत् प्रियतमातिमनोरथेन ॥ ७५ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

रौपाभिधो धीरसमो ऽप्यधीरः
को मित्रजामित्रजनप्रसूतः[1] ।
कृष्णात्मजो ऽसौ सम एव नान्यः
प्रासूत कालिन्द्यपि यं स एषः ॥ ७६ ॥

ततः क्षमानाथसुता कराभ्यामानीय नम्रा कलधौतमालां ।
प्रेम्णा समालिङ्गनमोददात्री कण्ठे ऽर्पयामास मुदा प्रियस्य ॥७७॥
[°७८॥

तस्मिन्धृते पूरितमानसानां पौराङ्गनानां बहुसाधुवादः ।
तयोः सुखायापरभूभुजां च श्रवःसमीपे ऽजनि वज्रपातः ॥ ७९ ॥°

This section concludes with the marriage of the couple.

v. (fol. 83*a*) : अथ यामिनीशेषे विकासितकुसुमार्चनाय प्रस्थिते सुमुखीप्रियकथे ॥

सुमु° । सखि प्रियकथे ।

श्रेणीभूय मधुव्रतस्फुटरवैरुन्निद्रिताः सादरं
सद्वृत्तस्तवकस्तनोपरि लसच्छाखाभुजालिङ्गिताः ।
ईषत्स्मेरनवप्रसूनवदनाहूतानिलैश्चुम्बिताः
पश्योद्याननवा[ङ्कुराः] प्रियसखीं संस्मारयन्तीक्षिताः
[॥ १ ॥ °५॥

प्रिय° । सखि सुमुखि । तव वाणीरसतरङ्गिण्यपि न मां सुखयति ॥

सुमु° । किमिति ॥

प्रिय° । आकौमारं यया सार्धं जन्मैतद्यापितं मया ।
तां विहाय निशा नीता किमस्मादपि दुःसहं ॥६॥°७॥

तन्वङ्गी सहचारिणीविरहिता मुग्धा शिरीषादपि
शून्यान्येव जगन्ति पश्यति सखीं का वा प्रियां पृच्छति ।
अङ्कं नैव जहाति मातुरधुनाप्येकाकिनी बालिका
नो जाने नृपजा समेन सहिता जागर्ति निद्राति वा ॥ ८ ॥

सुमु° । सखि प्रियकथे । केवलमुदारचरितैव भवती सा पुनश्चिराभिलषितनिधिमिव लब्ध्या(लब्ध्वा) विलपति (? विलसति) ॥

प्रिय° । सखि सुमुखि । स्वयंवरसमाहूतकुलवधूनामनुनयाय देव्या समादिष्टास्मीति तदनभिज्ञा[हं ।] तदा मूलतः कथय ॥

सुमु° । सखि शृणु । सा हि

भूषाभिराशोभितदेहवल्ली स्वकान्तिविद्योतितदिग्विभागा ।
नीता सखीभिः शयनीयसीम्नि नवाङ्गनेवाजनि नम्रमौलिः ॥९॥

चिरेण कान्ताननयामिनीपतेर्निभालनोत्कण्ठितमानसाकुला ।
तदार्द्रदृष्टिप्रणयेन कीलिता पुरः सखीनामिति मूर्छितास्मि ॥१०॥

प्रिय° । सखि ततस्ततः ॥

सुमु° । ततो मयैता अपनीय मन्दिरात्
गवाक्षविन्यस्तदृशा निशायां ।
तयोरपूर्वप्रणयैकधाम्नो(? °प्रणयैकधाम्नोः)
विलोकितं प्रेम विनिर्मितं रहः ॥ ११ ॥

यातासु तासु प्रणयेन रेवामाश्वासयन्निर्भरभीतिरेषा ।
नेत्राम्बुधौतस्तनकुङ्कुमेव बद्धाञ्जलिस्तावदधोननाम ॥ १२ ॥

करेण संगृह्य करं प्रियायाः स्वभावलिलाङ्कः क्षणमास तूष्णीं ।
ततो ह विन्याशितबाहुवल्ली रेवा समालिङ्गति निर्भरं सः
[॥ १३ ॥ °२२ ॥

ईदृग्विधानि कति नाम विलोकितानि
सौभाग्यभाञ्जि चरितानि तयोर्निशायां ।
नेत्रं ममैव सफलीकृतमद्य किंतु
रेवा गमिष्यति पुरादिति मूर्छितास्मि ॥ २३ ॥

प्रिय° । सखि सुमुखि । क्व यास्यति रेवा द्वारावत्यां किं न पश्यसि ।

द्वारि द्वारि द्विरदपतयः पृष्ठविन्यस्तहेयाः
स्थाने स्थाने करधृतसुखस्वर्णपाशास्तुरङ्गाः ।
भेरीध्वानैश्चमकितदृशः सायुधा योधमुख्या
रेवा गन्तो(गन्ता) स्वपुरमिति वेत्रिणो घोषयन्तु ॥ २४ ॥

प्रियसखि । किमेतेन पुष्पावचयनेन तामेव विलोकयामीत्युभे प्रस्थिते । कियद्दूरं गत्वा प्रस्थानकोलाहलाकलनविकलं नृपतिमवलोक्य ।

सुमुखी । प्रियकथे । नृपतिं विलपन्तमवलोकयन्त्या द्विगुणं विदार्यते मम हृदयं । तदत्र क्षणं विश्राममयामीत्युभे उपविश्य राजानं निर्वर्णयतः ।

राजा । रेवा यास्यति हन्त नाथनिलयं बालानतिज्ञा कथं
शुश्रूषां प्रविधास्यति श्वशुरयोः पत्युर्मनोरञ्जनं ।
क्षुद्भ्रातपविपीडिता च कुलजा कस्मै किलाख्यास्यते
शून्यान्येव दिवां मुखानि किमहो पश्यामि तां चिन्तयन्
[॥ २५ ॥ °२६ ॥ इति रोदिति ॥

अमात्यः । देव । नायं विषादसमयः । तदलमावेशेन । भगवतः प्रस्थानाय त्वरयन्ति वैत्रपाणिनः । तदाज्ञापय तत्र प्रयाणाय ॥

राजा । ससंभ्रमं । साधु मन्त्रितं । तदग्रतो गच्छ ॥

[अमात्यः ।] यथाज्ञापयसि । इति तथा करोति ॥

[1] That is, son of Kālindī (*i.e.* Yamunā, daughter of the Sun) and her friend (or husband Krishṇa).

DR.RUPNATHJI( DR.RUPAK NATH)

DR.RUPNATHJI( DR.RUPAK NATH )

राजा । भगवतश्चरणसविधं गत्वाऽष्टाङ्गपातं प्रणम्य बद्धाञ्जलिः ।

पूर्णानन्दमगाधबोधनिलयं यं निर्गुणं निष्क्रियं
निर्वाणाय हृदि स्थितं स्थिरधियो युञ्जन्ति सद्योगिनः ।
सुस्निग्धाञ्जनकीर्तिपीतवसनं(? °कीर्णि°) रूपं जगन्मोहनं
भक्ता यस्य भजन्ति न्मखनिरतं(? शेष°) तस्मै नमो विष्णवे ॥२७॥°

Subsequently the young couple take their departure, in *Revā's* parting words occurring the verse :—

नम्रत्वं गुरुषु प्रभौ सरलता बन्धौ दया पूरुषे
चान्यस्मिन् विषधी(!) वहिनं गमनं लोभ्ये(? लौल्ये) ति-
तिक्षा परा ।
मौनं विप्रियवादिनि प्रियकथा भृत्येषु धर्मे मन्दिरे
मातर्धर्म इतीरितः कुलभुवां चित्ते दृढं धारयाः(?धारितः)॥४९॥

Then follows the description of the journey to and entrance into Dvāravatī, in tho kāvya style, with prose dialogues and stage directions thrown in, as when, on their way, they visit the *maharshi Ashṭāvakra's* forest retreat (fol. 94*a*) :—

रेवा । ससंभ्रमं । नाथ क्षणमत्र रथं विश्रामय । अदृष्टपूर्वाणी-
दृशतपोवनानि ।

तथा हि ।

नवनवतरुशोभा लोभयशेषुदृष्टि (?°यत्यश्वदृष्टिं)
सुखयति मम गात्राण्यालवालाम्बुवाणुः ।
सुरभिकुसुमगन्धा मानसं मादयन्ति
ह्यभयहरिणशावाः पाणिमुत्कण्ठयन्ति ॥ ६८ ॥

अपि च ।

नानापुष्पितपादपाः प्रतिदिशो नृत्यन्मयूराः स्थली-
शाखायामभयाः पठन्ति किमहो सामानि शुद्धं शुकाः ।
माध्वीकान्मधुरं कपोलमधुलिट्पुंस्कोकिलैः क्षीयते

तदत्र क्षणमवस्थातुमिच्छामि ॥

समः । प्रिये युक्तं । अत्र हि महर्षिरष्टावक्रः प्रतिवसति ।
तदवहेलनमनुचितं ॥ सारथिं प्रति । अये भद्रक याव-
तावन् महर्षिमष्टावक्रं प्रणम्यागच्छावस्तावदश्वान् पालय ।

सौभ° । यथाज्ञापयति देव इति तथा करोति ।

समः । परिजनान् प्रति । अयमुग्रस्तपोधनस्तद्यूयमत्रैव तिष्ठत ।
इत्युभौ गच्छतः ॥

समः । प्रिये । एहि पश्य ।

तरूणां नैविड्यान्मिहिरकवलेशो न धरणौ
प्रभावैः पुण्यानां कुसु[मित]मिदं सर्वमभवत् ।
सुपक्वैः सुस्वादैर्बहुतरफलैर्नम्रवितपस्
तवातिथ्यं मन्ये किसलयकरेणैव कुरुते ॥ ७० ॥

It ends :

ईषद्दृष्टिकताल्पवाक्यविभवः स्तोकाक्षरज्ञो जनो
विश्वासोककरापधीश्वरसदानन्ताखिलज्ञाननः(?) ।
यन्मौढ्याद् गुणवर्णनाय रसनां व्यामोहयत्यादरात्
चापल्यं तदिदं दयालुहृदयैः क्षन्तव्यमार्यैर्बुधैः ॥

चित्ते कामवशंवदे मृगदृशां वक्त्रेन्दुलुब्धे ऽक्षिणि
कर्णे च प्रतिवाचिकप्रणयिनि स्पर्शादरिण्या(?°ण्यां)त्वचि ।
पाणौ वेङ्गितसेविनि स्तुतिकथामुग्धो (*r.* °मुग्धे) रसज्ञादले
धावत्स्वेषु रतेन्द्रियेषु महिमा कैस्त्रिपैर्वर्ण्यते(?) ॥

कविवरकृतकाव्येष्वत्र चित्रेषु सत्सु
तदपि सरलमुख्यैरेतदालोचनीयं ।
सति हि कनकहाने (?°हारे) रत्नयुक्तादिचित्रे
लघुरपि हृदि काचो न्यस्यते कामिनीभिः ॥[१३७]॥

इति श्रीमहामहोपाध्यायकृष्णनाथसार्वभौमभट्टाचार्यविरचि-
तानन्दलतिकायां पञ्चमकुसुमं ॥